BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 234.



तैत्तिरीय-प्रातिशाख्यं ।

त्रिभाष्यरत्ननाम टीकासहितम् ।

THE TAITTIRI′YA PRA′TISA′KHYA.

WITH THE

COMMENTARY ENTITLED THE TRIBHA′SHYARATNA.

EDITED BY

RA′JENDRALA′LA MITRA.

FASCICULUS I.

CALCUTTA

PRINTED AT THE GANES′A PRESS.

1871.

श्रीगणेशाय नमः ॥

तैत्तिरीय-प्रातिशाख्यम्

त्रिभाष्यरत्ननामक-विवरणसहितम् ।

तत्र प्रथमाध्यायः ।

(१) भक्तियुक्तः प्रणम्याहं गणेशचरणद्वयम् ।
गुरूनपि गिरं देवीमिदं वक्ष्यामि लक्षणम् ॥ १ ॥
व्याख्यानं प्रातिशाख्यस्य वीक्ष्य वाररुचादिकम् ।
कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियम् ॥ २ ॥

श्लोकयोरनयोरयमर्थः । 'भक्तियुक्तः अहं गणेशचरणद्वयं गुरून् गिरं अपि', 'देवीं' वाग्देवीमित्यर्थः । तांश्च 'प्रणम्य लक्षणमिदं वक्ष्यामि' । 'यत्'लक्षणं, 'त्रिभाष्यरत्न'नामकं, 'भूसुरप्रियं' विद्वत्प्रियं सत्, 'भासते' । कीदृशं लक्षणं, 'प्रातिशाख्यस्य', 'व्याख्यान'रूपं, 'वाररुचादिकं' भाष्यजातं, 'वीक्ष्य', न्यूनातिरिक्तपरिहारेण, 'कृतं' विरचितम् । 'आदि'शब्देन आत्रेयमाहि-

(१) शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ इति क्वचित्कितपुस्तकस्यादौ पाठः ।

षेयौ गृह्येते। अत एव त्रिभाष्यरत्नमिति नाम्न उपपत्तिः। त्रयाणां भाष्याणां समाहारः 'त्रिभाष्यं', तस्य 'रत्नं' भूषणम्॥

अथ वर्णसमाम्नायः॥१॥

मङ्गलानन्तरारम्भप्रश्नकात्स्र्न्येष्वथो अथेति मङ्गलाद्यनेकार्थत्वात् अथशब्दस्य अर्थनिर्णयार्थमेकोऽर्थो निश्चितव्यः। तत्र प्रथमं तावन्मङ्गलार्थत्वमुच्यते। तस्य प्रणवसाधर्म्यात्। तथाहि समाचक्षते शिक्षाकारः। "ओङ्कारश्चाथशब्दश्च मङ्गलाविति कीर्त्तितौ" इति(१)। आहोस्वित् आनन्तर्यार्थता, वेदाध्ययनानन्तरं लक्षणज्ञानं कुर्य्यादिति सापेक्षत्वात्। लक्षणस्य पूर्वं वेदाधिगमे सत्यथ लक्षण(२) परीक्षावसरः। अथवा अधिकारार्थः 'अथ'शब्दः। त्वथैवेति विनिवर्त्तकाऽधिकारकाऽवधारकाः(३) इति विद्यमानत्वात्।

अथ वर्णसमाम्नायः पाठक्रमोऽधिक्रियत इति सूत्रान्वयः। 'सम्'इति एकीभावे। 'आ'इति मर्य्यादायां, (४) 'म्नाय'इत्यानुपूर्व्येण(५) एकीभूता अकारादयो वर्णाः स्वरभक्तिपर्य्यवसाना-

---

(१) ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभाविति इति ग, चिह्नितपुस्तकपाठः।

(२) वेदाधिगमे सति लक्षणेति ग, चिह्नितपुस्तकपाठः।

वेदाधिगमे सति लक्षणेति ग, चिह्नितपुस्तकपाठः।

(३) त्वथैवेति विनिवर्त्तकाधिकारा वक्ष्यमाणकावधारका इति खचिह्नितपुस्तकपाठः।

(४) आङिति मर्य्यादायामिति इ० मुद्रितपुस्तकपाठः।

(५) म्नाय इत्यानुपूर्व्येणोपदेश इति इ० मुद्रितपुस्तकपाठः।

आनुपूर्व्येण पूर्वैः शिष्टैरुपदिष्टाः। तथाहि। अ आ आ ३, इ ई ई ३, उ ऊ ऊ ३, ऋ ॠ३ ऌ १[१], ए ऐ, ओ औ, इति स्वराः षोडश। क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ मा इति स्पर्शाः पञ्चविंशतिः। य र ल वा इति चतस्रोऽन्तस्थाः। ᳵक ᳵप श ष स हा इति षडूष्माणः[२]। अनुस्वारश्चेतिसूत्रेण अनुस्वार उक्तः। कालविशेषाश्रयत्वादसौ धर्म्मो न त्वनुनासिकवद्धर्म्मः[३]। विधेर्मध्यस्थनासिक्यात् इति शिक्षाकारवचनन्तु[४] धर्म्मधर्म्मिणोरभेदविवक्षयोपपद्यते। अथ विसर्जनीय इत्यनेन विसर्जनीय उक्तः। नासिकाविवरणादानुनासिक्यमिति[५] रङ्ग उक्तः। पृक्तः स्वरात्परो लीडमिति ऌकार उक्तः। स्पर्शादनुत्तमादिति चत्वारो यमा उक्ताः। रेफोष्मसंयोगे रेफस्वरभक्तिरिति स्वरभक्तिरुक्ता। अनेन प्रकारेण याजुर्वैदिकवर्णानां षष्टिसङ्ख्या सूत्रत एव

---

(१) अ १ आ २ आ ३, इ १ ई २ ई ३, उ १ ऊ २ ऊ ३, ऋ १ ॠ २, ऌ १ इति गचिह्नितपुस्तकपाठः।

(२) ᳵक ᳵप श ष स ह ख फ इति षडूष्माण इति क, ख, चिह्नितपुस्तकद्वयपाठः।

(३) न त्वनुनासिकधर्म इति ग, चिह्नितपुस्तकपाठः।

(४) विधेर्मध्यस्थनासिक्यौ न विरोधो भवेत् स्मृतः। तस्मात् करोति कार्य्याणि वर्णानां धर्म एव तु इति शिक्षाकारवचनन्तु इति ग, चिह्नितपुस्तकपाठः। विधेर्मध्यस्थनासिक्य इति शिक्षावचने सति इति इ० मु० पुस्तकपाठः।

(५) आनुनासिक्यमित्यनेन इति इ० मु० पुस्तकपाठः।

विस्पष्टं द्रष्टव्या(१)। ननु "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः, शम्भुमते मताः" इति शिक्षाकारवचने सति कथं षष्टिसङ्ख्या नियम्यते। सत्यं तत्, लौकिकवैदिकसर्ववर्णविषयमिति न शिक्षाकारवचनेन विरोधः। अत्र तु सूत्रैरेव तावतामेवोपलम्भादेष(२) निर्णयो वर्णितः(३)। वर्णानां समाम्नायो वर्णसमाम्नायः॥

अथ नवादितः समानाक्षराणि॥ २॥

'अथ' इति सञ्ज्ञाधिकारार्थः। अस्मिन् वर्णसमाम्नाये 'आदितः', आरभ्य 'नव' वर्णाः, 'समानाक्षरसञ्ज्ञा भवन्ति। यथा अ आ आ ३(४)इत्यादि। सञ्ज्ञायाः प्रयोजनं, दीर्घं समानाक्षरे सवर्णपर-इत्यादि। नन्वीदृशी महती सञ्ज्ञा किमर्था। शिक्षाशास्त्र-प्रसिद्ध्यनुरोधादिति(५) ब्रूमः॥

द्वे द्वे सवर्णे ह्रस्वदीर्घे॥ ३॥

तेषु समानाक्षरेषु द्वे द्वे ह्रस्वे द्वे द्वे दीर्घे वा (६) ह्रस्वदीर्घे दीर्घह्रस्वे वा अक्षरे परस्परं सवर्णसञ्ज्ञे भवतः। इयमन्वर्थ-

---

(१) अनेन क्रमेण याजुर्वैदिकवर्णानां षष्टिसङ्ख्या नियम्यते। अत्र एव विस्पष्टं द्रष्टव्या इति ग, चिह्नितपुस्तकपाठः।

(२) अत्र तु सूत्रैरेतावतां वर्णानामेवोपलम्भादेष एव इति ख, चिह्नितपुस्तकपाठः।

(३) निर्णयो निर्णीत इति ग, चिह्नितपुस्तकपाठः।

(४) अ १ आ २ आ ३ इति ग, चिह्नितपुस्तकपाठः।

(५) शिक्षादिशास्त्रप्रसिद्ध्यनुरोधायेति ख, ग, चिह्नितपुस्तकद्वयपाठः। इ० मु० पुस्तकपाठश्च।

(६) इ० मु० पुस्तके खचिह्नितपुस्तकेपि दीर्घे वा इत्यत्र वापदं नास्ति।

सञ्ज्ञा । सवर्णत्वं नाम सादृश्यमुच्यते । तस्मादकारादीनामि-कारादिभिर्न सवर्णसञ्ज्ञा शङ्का, भिन्नस्थानप्रयत्नत्वादनयोः । सञ्ज्ञायाः प्रयोजनं, दीर्घं समानाक्षरे सवर्णपर इति(१) । ह्रस्वञ्च दीर्घञ्च ह्रस्वदीर्घे ॥

न प्लुतपूर्वम् ॥ ४ ॥

प्लुतपूर्वं समानाक्षरं सवर्णसञ्ज्ञं न भवति । प्लुतमस्मात् पूर्वमिति प्लुतपूर्वं । यथा । अग्ना ३ इत्याहेत्यत्र दीर्घं समानाक्षरे सवर्णपर-इत्येकादेशः प्रसक्तः । तच्चानिष्टं । प्रतिषिद्धायान्त्वेवं सवर्णसञ्ज्ञायां पारिशेष्यात् इवर्णोकारौ यवकाराविति प्लुतपूर्वस्य इकारस्य यत्वं स्यात् । स च यकारः, लुप्येते त्ववर्णपूर्वौ यवकाराविति(२) यकारे लुप्ते सति इवर्णपर एकारमित्येकादेशः प्रसक्तः,(३) सोऽपि निषिध्यते, न प्लुतप्रग्रहाविल्यनेन । तस्मात् अग्ना ३ इत्याहेति सिद्ध्यति ॥

षोडशादितः स्वराः ॥ ५ ॥

वर्णानां समाम्नायस्य(४) आदित आरभ्य षोडश वर्णाः स्वर-

---

(१) सवर्णपर इत्यादि इति ख, ग, चिह्नितपुस्तकपाठः ।

(२) यवकाराविति लुप्यते इति इ० मु० पुस्तकपाठः । ख, ग, चिह्नितपुस्तकपाठश्च ।

(३) इत्येकार्थः प्रसक्त इति इ० मु० पुस्तकपाठः । इत्येकारः प्रसक्त इति ख, चिह्नितपुस्तकपाठः ।

(४) वर्णसमाम्नायस्य इति ग, चिह्नितपुस्तकपाठः ।

सञ्ज्ञा भवन्ति। अकारादय औकारपर्य्यन्ता इत्यर्थः। सञ्ज्ञायाः प्रयोजनं, स्वरपूर्वं व्यञ्जनमित्यादि(१)॥

शेषो व्यञ्जनानि॥ ६॥

स्वरेभ्यः शेषो वर्णराशिर्व्यंजनसञ्ज्ञो भवति। ककारादिस्वरभक्तिपर्य्यन्ता इत्यर्थः। सञ्ज्ञायाः प्रयोजनं, स्वरव्यञ्जनपर इत्यादि(२)॥

आद्याः पञ्चविंशति स्पर्शाः॥७॥

व्यञ्जनेष्वाद्याः पञ्चविंशतिवर्णाः स्पर्शसञ्ज्ञा भवन्ति। ककारादयो मकारपर्यन्ता इत्यर्थः। अथ नवादितः समानाक्षराणि षोड़शादित इतिवत् आदित इति वक्तव्ये (३) आद्या इति शब्दान्तरप्रयोगोऽर्थान्तरसूचकः। व्यञ्जनेष्वाद्या न तु स्वरेष्वाद्या इति विज्ञेयं। सञ्ज्ञायाः प्रयोजनम्, स्पर्शः स्पर्शपर इत्यादि॥

परास्चतस्रोऽन्तस्थाः॥ ८॥

स्पर्शेभ्यः परे चत्वारो वर्णा अन्तस्थासञ्ज्ञा भवन्ति। सञ्ज्ञायाः प्रयोजनम्, अन्तस्थापरश्च सवर्णमनुनासिकमित्यादि॥

---

(१) सञ्ज्ञायाः प्रयोजनं, अथ स्वरपरो यकारमित्यादि ख, ग, चिह्नितपुस्तकद्वयपाठः। इ० मु० पु० पाठश्च।

(२) सञ्ज्ञायाः प्रयोजनं स्वरपूर्वं व्यञ्जनमित्यादि। इति ख, ग, चिह्नितपुस्तकद्वयपाठः। सञ्ज्ञायाः प्रयोजनं व्यञ्जनं स्वराङ्गमिति इ० मु० पुस्तकपाठः।

(३) षोडशादितः स्वरा इति वक्तव्ये इति ग,चिह्नितपुस्तकपाठः। षोड़शादितः स्वरा, इतिवत् आदित इति वक्तव्ये इति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तके एतदधिकपाठोऽस्ति।

परे षडूष्माणः ॥ ९ ॥

अन्तस्थाभ्यः परे षड्वर्णा ऊष्मसञ्ज्ञा भवन्ति । सञ्ज्ञायाः प्रयोजनम्, ऊष्मा स्वरपर इत्यादि ॥

स्पर्शानामानुपूर्व्येण पञ्च पञ्च वर्गाः ॥ १० ॥

स्पर्शानां मध्ये आनुपूर्व्येण पञ्च पञ्च वर्णा वर्गसञ्ज्ञा भवन्ति । कचटतपाद्यो ङञणनमान्ता इत्यर्थः । सञ्ज्ञायाः प्रयोजनं, टवर्गश्च तवर्गपर इत्यादि ॥

प्रथमद्वितीयतृतीयचतुर्थोत्तमाः ॥ ११ ॥

एकैकस्मिन् वर्गे यथाक्रमेण वर्णाः प्रथमद्वितीयतृतीयचतुर्थोत्तमसञ्ज्ञा भवन्ति । सिद्धेऽपि सङ्ख्यानिमित्ते नाम्नि सङ्ख्यान्तराभिधानार्थं सञ्ज्ञान्तरं(१) कथयितुं प्रथमादिसञ्ज्ञाविधानं । तत् कथम् । ककारादीनामेव प्रथमादिसञ्ज्ञाप्रत्ययार्थम्,स्वरान्तस्थोष्मप्रभृतिषु तु सङ्ख्यासञ्ज्ञा-प्रतिषेधार्थम् । सञ्ज्ञायाः प्रयोजनं, प्रथम ऊष्मपरो द्वितीयं तृतीयं स्वरघोषवत्परः । हकारो हचतुर्थेषु नानुत्तमः (२) उत्तमपर इत्यादि ॥

ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः ॥ १२॥

ऊष्माणश्च विसर्जनीयश्च प्रथमद्वितीयाश्चाघोषसञ्ज्ञा भवन्ति । सञ्ज्ञायाः प्रयोजनम्,अघोषपरस्तस्य इत्यादि ॥

---

(१) सङ्ख्यान्तरमिति ख, चिह्नितपुस्तकपाठः ।

(२) हकारश्चतुर्थं नानुत्तम इति ग, चिह्नितपुस्तकपाठः ।

न हकारः ॥ १३ ॥

न भवत्यघोषसञ्ज्ञो हकारः। जश्वत्वादघोषत्वे प्राप्ते तदपवादोऽयम् ॥

व्यञ्जनशेषो घोषवान् ॥ १४ ॥

अघोषेभ्योन्यो व्यञ्जनशेषो घोषवत्सञ्ज्ञो भवति। यद्यप्यूष-विसर्जनीयेत्यघोषेषूक्तेषु (१) व्यञ्जनशेषस्य पारिशेष्यात् घोषवत्त्वं सिद्धं। यथा देवदत्तयज्ञदत्तयोरपरश्शुर्देवदत्त इत्युक्ते परः परशु-मानिति सिद्धम्। तथापि शास्त्रे संव्यवहारार्थं सञ्ज्ञानिर्देशः क्रियते। पारिशेष्यादपि कण्ठोक्तेर्विशेषात्। अन्यथा न हकार इति हकारस्याघोषसञ्ज्ञा निषिध्येत। नापि हकारो घोषवान्। विध्यभावात्। तथैव व्यञ्जनशेषः। स्वरा अपि तथा न घोष-वन्तो नाप्यघोषाः। तथासति घोषवत्परश्चेति यत्र यत्र वक्ष्यति तत्र सन्देहः स्यात्। घोषवत्परो नाम किम्पर इति तन्माभूदितीदं सूत्रमारभ्यते। व्यञ्जनरूपः शेषो व्यञ्जनशेषः। अत्र सूत्रे चोद्य-परिहाररूप एष विशेषो माहिषेयभाषितः(२)। सञ्ज्ञायाः प्रयोजनं, घोषवत्परश्चेत्यादि ॥

आप्रावोपाभ्यधिप्रतिपरिविनीत्युपसर्गाः ॥ १५ ॥

आ प्र अव उप अभि अधि प्रति परि वि नि इत्येते शब्दा

(१) यद्यप्यूष्मा विसर्जनीयप्रथमेष्वघोषेषूक्त इति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

(२) विशेषो माहिषेये भाषित इति ख, चिह्नितपुस्तकपाठः।

उपसर्गसञ्ज्ञा भवन्ति। ननु प्रपरापसमन्ववनिर्दुर्व्याङि-त्यादि(१) पाणिनीया विशेषेण भणन्ति। कथमत्र सूत्रकृता निरर्गलमुपसर्गा इतिशब्देन सङ्कुचिताः। उच्यते। यजुर्वेदविषय-एतावन्त एवेति मन्तव्यम्। तर्हि प्रपरावसमिति (२) समुच्चये विशेषः कथमुपलभ्यत इति (३)। परत्वविधाने तस्य तात्पर्य्यं न तु उपसर्गसञ्ज्ञाविधानेविशेषपाठः। तस्मान्न केनचिद्विरोधः। सञ्ज्ञायाः प्रयोजनं, उपसर्गनिपूर्वोऽनुदात्ते पद इति। 'इति'-शब्दः प्रकारवाची ॥

वर्णः कारोत्तरो वर्णाख्या ॥ १६ ॥

कारोत्तरो वर्णो वर्णस्य आख्या भवति। यथा, अथैकारे-काराविति। कारशब्द उत्तरो यस्मादसौ कारोत्तरः।

अकार-व्यवेतो व्यञ्जनानां ॥१७॥

अकारव्यवहितो वर्णः कारशब्दोत्तरो व्यञ्जनानामाख्या भवति। यथा, टनकारपूर्वश्च तकारमित्यादि (४)। अकारेण व्यवेतः अकारव्यवेतः ॥

---

(१) ननु प्रपरापसमन्ववनिर्दुर्व्याङादयोप्यतिसूद्भयश्च प्रतिना सह लक्षयितव्याः पर्य्युपयोरपि लक्षणमात्रेणेत्यादि इति ग, चिह्नितपुस्तकपाठः।

(२) तर्हि परापसमितीति ख, चिह्नितपुस्तकपाठः।

(३) विशेषपाठः कथमुपलभ्यते इति ख, चिह्नितपुस्तकपाठः।

(४) तकारश्चकारमित्यादि इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। नकारश्चकारमित्यादि इति ग, चिह्नितपुस्तकपाठः।

न विसर्जनीयजिह्वामूलीयोपध्मानी-यानुस्वारनासिक्यानाम् ॥ १८ ॥

विसर्जनीयादीनां वर्णत्वाविशेषात् कारोत्तरत्वं प्राप्तमनेन निवर्त्त्यते। न खलु विसर्जनीयादीनां कारोत्तरता भवति। कुतः। सर्वत्र तथाप्रयोगानुपलम्भात्। ननु यथा वर्णः कारोत्तरो वर्णाख्येति वर्णशब्दवाच्यस्यैव कारोत्तरत्वम्, नकारो णकार-मित्यादि ; न तु वाचकस्य। अन्यथा वर्णकार इति स्यात्। तद्वद्विसर्जनीयादीनामपि (१) वाच्यग्रहणमेव युक्तं नान्यथा। तथासति वाचकपरतया वाररुचादि (२) विरचितमेतदुदाहर-णम्, अवसाने रविसर्जनीयेत्याद्यनुचितमिति चेन्नैवं मंस्थाः। वाच्यानां केवलानामप्रयोगात्। अत्र वाच्यवाचकयोरभेदविव-क्षया सूत्रसरणिरित्युदाहरणगमनिका ॥

एफस्तु रस्य ॥ १९ ॥

रेफस्य तु(३) एफशब्द आख्या भवति। यथा रेफोष्मपर इति। रेफस्य व्यञ्जनत्वाविशेषात् प्राप्तङ्कारोत्तरत्वम्, अकारव्यवेतत्वञ्च। तदुभयं 'तु'शब्दो निवारयति। अन्ये त्वन्यथा मन्यन्ते, अकार-व्यवेतत्वमेवेति। तदसाधु। तथासति कदाचित् कारोत्तरता कदाचिदेफोत्तरता चेति विकल्पः स्यात्। यथा, अकारो-

---

(१) विसर्जनीयानामपि इति ख, चिह्नितपुस्तकपाठः। विसर्जनीयादीनामित्य-त्रापि इति ग, चिह्नितपुस्तकपाठः। अत्रापि इति इ० मु० पुस्तकपाठः।

(२) वररुच्यादि इति इ० मु० पुस्तकपाठः।

(३) रस्यतु इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

व्यञ्जनानामितिविधानाद्विकल्पः। तथाहि, रेफोष्मसंयोगे रेफः पूर्वो ह्वनीत्यादि(१)। नन्वेवं कारोत्तरत्वमपि विकल्पेन स्वीकृतं क्वचित्। तस्मादस्मदुक्त एव युक्तः 'तु'शब्दार्थः॥

ह्रस्वो वर्णोत्तरस्त्रयाणाम्॥ २०॥

वर्णोत्तरो ह्रस्वो ह्रस्वदीर्घप्लुतानामाख्या भवति। यथा इवर्णपर एकारमित्यादि। वर्णशब्द उत्तरो यस्मादसौ वर्णोत्तरः॥

अकारो व्यञ्जनानाम्॥ २१॥

व्यञ्जनानामकार आख्या भवति। यथा शचछपर इत्यादि (२)। कारशब्दोत्तरत्वं। इदञ्च विकल्पते। समुच्चये त्वकारव्यवेतो व्यञ्जनानामिति व्यर्थं स्यात्। ननु तर्हि कारोत्तरता किमर्था, तदानीमपि व्यवायरूपेण (३) अकारलाभात् स एव आख्या भवतु। सत्यं। शिक्षादिशास्त्रप्रसिद्धसङ्केतानुसारेणेति परिहारः। अपरे तु सङ्गिरन्ते, अकारः सर्वस्वरान्तस्य व्यञ्जनस्य ग्राहक इति। यथा, मनःक्षेमे, घनाघनः, क्षोभणः, उक्थशासः क्षामित्यादि न क्षपर इति प्रतिषेधस्योदाहरणं (४)स्यादिति। तदसारं। कुतः। वा घोषपूर्वस्तष्टमिति-

(१) रेफोष्मसंयोगे रेफस्वरभक्तिः रेफः पूर्वह्वनीत्यादि इति इ० मु० पुस्तकपाठः। रेफोष्मसंयोगे रेफः पूर्वो ह्वतनीत्यादिषु रेफोत्तरत्वमिति ख, चिह्नितपुस्तकपाठः।

२ यथा तकारस्वकारं शचछपर इत्यादि इति इ० मु० पुस्तकपाठः।

३ व्यवायस्वरूपेण इति इ० मु० पुस्तकपाठः। स्वरूपेणेति ख, चिह्नितपुस्तकपाठः।

४ निषेधस्योदाहरणमिति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

षपूर्वस्य तकारस्य (१) टत्वे कृते इषेट्वेति स्यात्। तच्चानिष्टं। किञ्च। यवनह्रस्वरपरेष्वित्यत्र स्वरपरशब्दो व्यर्थः स्यात्। भवन्मते सर्वस्वरान्तस्य स्वोकारनियमात्। तस्मादनुपपन्नमेव तन्मतं मन्महे। किन्तु वर्णमात्रस्याख्या॥

ग्रहणस्य च॥ २२॥

लक्ष्यं निमित्तञ्च ग्रहणमित्युच्यते। गृह्यत इति ग्रहणं, गृह्यतेऽनेनेति निमित्तमपि ग्रहणं, पदैकदेशः, प्रातिपदिकमिति यावत्। 'च'कारः पूर्वसूत्रोक्तमकारमाकर्षयति। ग्रहणस्य प्रातिपदिकस्य सर्वावस्थस्य अकार आख्या भवति। यथा किंशिल किंशिलेति परः किंशिलशब्दो लक्ष्यं। उदाहरणं यथा, किंशिलस्वतुर्थः किंशिलाय च क्षपणाय च(२)। ओष्ठे वः परो लुप्यते इति तु निमित्तं। यथा। स्वाहौष्ठाभ्यां। उपयाममधरेणोष्ठेन॥

अःकार आगमविकारिलोपिनाम्॥ २३॥

आगमादीनामःकार आख्या भवति। अःकार इति प्रथमाविभक्तेरुपलक्षणं। आगमस्य यथा, द्वितीयचतुर्थयोस्तु व्यञ्जनोत्तरयोः पूर्वः। विकारिणो यथा, अथ नकारो णकारं। लोपिनो यथा, तिष्ठन्त्येकया स पूर्वः(३)। इत्येकवचनानि। लप-

---

१ षपूर्वत्वात्तकारस्येति ख,चिह्नितपुस्तकपाठः।

२ किंशिलस्वतुर्थो वन्यः किंशिलाय च इति ग,चिह्नितपुस्तकपाठः।

३ लोपिनो यथा इमंद्रा सुप्रयसः। तिष्ठन्त्येकया सपूर्व इति ग,चिह्नितपुस्तकपाठः।

रौ लकारमिति द्विवचनं। आनुपूर्व्यान्नासिक्या इति बहुवचनं। आगमस्य विकारी च लोपी च आगमविकारिलोपिनः, तेषां ॥

ग्रहणं वा ॥ २४ ॥

तेषां आगमादीनां क्वचिद् ग्रहणं वा भवति। अःकारेण विनापीति तात्पर्य्यं। आगमस्य यथा, आदिरꣳहतिरित्यादि। विकारिणो यथा, हन्यादुप्यमानश्चेत्यादि। लोपिनो यथा, एष स स्य इत्यादि ॥

आसन्नꣳ सन्देहे ॥ २५ ॥

सन्देहे सति आसन्नं वर्णं पदं वा गृह्णीयात्। स्वयमात्वस्माच्च विकर्णी चोत्तमे इत्यत्र चकारद्वयसम्भवात्। प्रग्रहनिमित्तत्वेन कतरस्योपादानं कर्त्तव्यमिति सन्देहे यदासन्नं कार्य्यभाजस्तदेव स्वीकर्त्तव्यं। चोत्तमे इति सूत्रे वर्णस्य यथा, आपृषती (१) इत्यादि ॥

अनेकस्यापि ॥ २६ ॥

सन्देहे अनेकस्य पदस्य वर्णस्य वा ग्रहणं भवति। 'अपि'-शब्दः सन्देह इत्यन्वादिशति। तिष्ठन्त्येकया स पूर्व एवोत्तर-इत्यादि ॥

प्रथमो वर्गोत्तरो वर्गाख्या ॥ २७ ॥

वर्गशब्दोत्तरः प्रथमः स्ववर्गस्याख्या भवति। यथा, टवर्गश्च तवर्गपर इति। वर्गशब्द उत्तरो यस्मादसौ वर्गोत्तरः ॥

१ आपृषती आऊती इत्यादि इति ग, चिह्नितपुस्तकपाठः।

अं विकारस्य ॥ २८ ॥

अमिति शब्दो विकारस्याख्या भवति। अमिति द्वितीया-विभक्तेरुपलक्षणं। यथा, प्रथमपूर्वो हकारश्चतुर्थं। अथ नकारो णकारं।

पूर्व इति पूर्वः ॥ २९ ॥

यः पूर्वशब्देन विशिष्यते (१), स तत्रैव स्वेन रूपेणोपलक्षितो ज्ञातव्यः, न तु रूपसामान्यादन्यो भिन्नदेशस्थः। यथा, द्यावापृथिवीपूर्वस्य प्रग्रहो भवतीति वक्ष्यति, पूर्वत्वात् यावती द्यावापृथिवी महित्वेति यावतीशब्दः प्रग्रहः। यावती वै पृथिवीति तु न स्यात् प्रग्रहः॥

पर इत्युत्तरः ॥ ३० ॥

यः, पर इतिशब्देन (२) विशिष्यते, सोऽपि तत्रैव स्वेन रूपेण प्रत्येतव्यः। यथा, द्वेपरस्य प्रग्रहो भवतीति वक्ष्यति। परत्वात् द्वे जाये विन्दत इत्यत्र जाये इति शब्दः प्रग्रहः। योनिरसि जाय एहीत्यत्र तु न प्रग्रहः॥

ऋकारऌकारौ ह्रस्वौ ॥ ३१ ॥

ऋकारस्य ऌकारस्य ह्रस्वसञ्ज्ञौ भवतः।(३) ऋतवो वै। अक्लृप्तस्य क्लृप्त्यै॥

१ पूर्वशब्देन निर्दिष्ट इति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

२ पर इत्यनेनेति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

३ यथा इति इ० मु० पुस्तकेऽधिकपाठः।

अकारश्च ॥ ३२ ॥

अकारश्च ह्रस्वसञ्ज्ञो भवति । 'च'कारो ह्रस्वत्वमन्वादिशति । यथा, अयं पुर इति ॥

तेन च समानकालस्वरः ॥ ३३ ॥

तेन अकारेण यः तुल्यकालस्वरः, स च ह्रस्वो भवति । अत्रापि चकारो ह्रस्वान्वादेशकः । समानकालस्वर इति इकार उकारश्चेत्यर्थः । सन्ध्यक्षराणां समानकालत्वाभावात् । यथा, इषे त्वा । उपप्रयन्तः । अत्राह, अकारो ह्रस्वः, तेन च समानकालस्वर इत्यारब्धव्यम् । ऋकारऌकारौ ह्रस्वाविति तु नारब्धव्यम्, एवमारभ्यमाणे पुनरुक्ततया गौरवं भवेदिति, उच्यते । आरब्धव्यमेवैतत् । कुतः, ऋकारऌकारयोरन्तरा रेफलकारौ स्तः । तत्स्थानत्वादनयोः कालव्यभिचारः स्यात्, ह्रस्वत्वं न गम्येत, तन्माभूदित्येवमारभ्यते, ऋकारऌकारौ ह्रस्वाविति ॥

अनुस्वारश्च ॥ ३४ ॥

भवत्यनुस्वारोपि (१) ह्रस्वसञ्ज्ञः । यथा, ताँ्हस्ते । चकारो ह्रस्वान्वाकर्षकः । अनुस्वारस्वरभक्तिश्चेति, स्वरं प्रत्यङ्गत्वविधानादनुस्वारस्य व्यञ्जनत्वं । तथासति ह्रस्वार्द्धकालं

---

१ अनुस्वारश्चेति ख, चिह्नितपुस्तकपाठः, द्वि० मु० पुस्तकपाठश्च ।

व्यञ्जनमिति अर्द्धमात्रत्वं प्राप्तं तन्माभूदिति ह्रस्वत्वं विधीयते। ह्रस्वसञ्ज्ञायाः प्रयोजनं, विभागे (१) ह्रस्वव्यञ्जनपर इति।

द्विस्तावान् दीर्घः ॥ ३५ ॥

तावानिति प्रकृतो ह्रस्व उच्यते। द्विरिति द्विरूपः। 'तावान्' ह्रस्वः, द्विरूपो दीर्घसञ्ज्ञो भवतीति सूत्रयोजना। तात्पर्यं तु ह्रस्वद्विगुणकालस्वरो दीर्घसञ्ज्ञो भवतीति। दीर्घसञ्ज्ञायाः प्रयोजनं(२), दीर्घं समानाक्षरे सवर्णपर इत्यादि ॥

त्रिः प्लुतः ॥ ३६ ॥

अत्रापि ह्रस्वोऽनुवर्त्तते, सान्निध्यात्। त्रिरिति त्रिरूपो ह्रस्वः(३) प्लुतसञ्ज्ञो भवति। तात्पर्यन्त्वत्रापि ब्रूमः, ह्रस्वात्त्रिगुणकालः स्वरः प्लुतसञ्ज्ञो भवति इति। सञ्ज्ञायाः प्रयोजनं, न प्लुतप्रग्रहाविति ॥

ह्रस्वार्द्धकालं व्यञ्जनम् ॥ ३७ ॥

व्यञ्जनं ह्रस्वार्द्धकालं भवति। न तु व्यञ्जनमिति सञ्ज्ञा। अन्यथा। व्यञ्जनकालस्य स्वरस्यात्राधिक इत्यत्र कालशब्दस्य पौनरुक्त्यापत्तेः। यथा, वाक्। ह्रस्वस्यार्द्धं, ह्रस्वार्द्धं, ह्रस्वार्द्धं परिमाणकालो यस्य तत्, तथोक्तम् ॥

उच्चैरुदात्तः ॥ ३८ ॥

आयामो दारुण्यमितिलक्षणलक्षितः स्वर उदात्त इत्युच्यते।

---

१ अथादावुत्तरे विभागे इति ग, चिह्नितपुस्तकपाठः।
२ सञ्ज्ञायाः प्रयोजनमिति ख, ग, चिह्नितपुस्तकपाठः।
३ त्रिरिति त्रिरूपः, त्रिरूपो ह्रस्वः इति इ० मु० पुस्तकपाठः।

यथा, स इति। सञ्ज्ञायाः प्रयोजनं, उदात्तात् परोनुदात्तः स्वरितमिति॥

नीचैरनुदात्तः॥ ३९॥

अन्ववसर्गसूत्रलक्षणलक्षितः(१)स्वरोऽनुदात्त इत्युच्यते। यथा, अवदताम्। सञ्ज्ञायाः प्रयोजनं, अनुदात्तो न नित्यमिति॥

समाहारः स्वरितः॥ ४०॥

तयोरुदात्तानुदात्तयोर्यः समाहारः सः स्वरित उच्यते (२)। यथा, तेऽब्रुवन्। समाह्रियत इति समाहारः। तयोर्मीलनजन्यः स्वरः स्वरित इत्यर्थः। स्वरितस्वरूपविधिरयं। उपरिष्टात्तु तत्र तत्र स्वरितो वक्ष्यते। यथा, उदात्तात् परोऽनुदात्तः स्वरितम्, उदात्तयोश्च परोनुदात्तः स्वरितं, तस्मिन्ननुदात्ते पूर्वउदात्तः स्वरितमित्यादि॥

तस्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्द्धं ह्रस्वस्य॥४१॥

उदात्तादनन्तरे यः स्वर्यते (२) तस्यादिस्तावदुच्चैस्तरामुदात्ततरो भवति, यावद्ध्रस्वस्यार्द्धं। यथा, स इधानः॥

उदात्तसमः शेषः॥ ४२॥

ह्रस्वार्द्धकालाच्छेष उदात्तसमो भवति, नतूदात्त एव। सम-

---

१ अन्ववसर्गेतिसूत्रलक्षित इति ख,चिह्नितपुस्तकपाठः। अन्ववसर्गसूत्रलक्षितेति ग, चिह्नितपुस्तकपाठः। अन्ववसर्ग इतिसूत्रलक्षितः इति इ० मु० पुस्तकपाठः।

२ तयोरुदानुदात्तयोः समाहारः स्वरितसञ्ज्ञो भवति इति क,चिह्नितपुस्तकपाठः।

२ उदात्तादनन्तरो यः स्वरः स्वर्यते इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

शब्दप्रयोगात् किञ्चिन् न्यूनत्वं प्रतीयते। अन्यथा, स्वरिताभावात् पूर्वोक्तमेवोदाहरणम् ॥

सव्यञ्जनोऽपि ॥ ४३ ॥

केवलस्यायं विधिः पुरस्तादुक्तः, इदानीं व्यञ्जनसहितत्वेपि स्वरितस्य तथात्वमुच्यते। सव्यञ्जनोपि स्वरित उदात्तानन्तरोऽन्यो वा उक्तविधिर्भवति। 'अपि' शब्दः स्वरितमाकर्षति। यथा, सखिभ्यो वरिवस्तिष्यः ॥

अनन्तरो वा नीचैस्तराम् ॥४४॥

तस्य स्वरितस्य ह्रस्वार्द्धकालाच्छेषः 'नीचैस्तराम्' अनुदात्ततरः, भवति (१)। 'अनन्तरः' शेष इत्यर्थः। तदेवोदाहरणम् ॥

अनुदात्तसमो वा ॥४५॥

तस्य स्वरितस्य स एव शेषः, अनुदात्तसमो वा भवति (२) ॥

आदिरस्योदात्तसमः शेषोऽनुदात्तसम इत्याचार्य्याः ॥४६॥

तस्यैव(३) स्वरितस्यादिर्ह्रस्वार्द्धकालः(४) उदात्तसमो भवति। (५)शेषस्त्वनुदात्तसम इत्याचार्य्या ब्रुवते। यथा, सखिभ्यो वरिवः।

---

१ वा भवतीति क, ग, चिह्नितपुस्तकद्वयपाठः।

२ तदेवोदाहरणमित्यधिकः पाठो ग, चिह्नितपुस्तकेस्ति। अनुदात्त समो भवति इति इ० मु० पुस्तकपाठः।

३ अस्यैवेति ग, चिह्नितपुस्तकपाठः।

४ स्वरितस्यादिर्ह्रस्वार्द्धकाल इति ख, चिह्नितपुस्तकपाठः।

५ शेषस्त्वनुदात्तसमो भवति इ० मु० पुस्तकेऽधिकः पाठः।

तस्यादिरित्यारभ्याभिहितेऽस्मिन् विकल्पजाले सूत्रमेतदेवेष्टम्। प्रश्लिष्टप्रातिहतयोर्मृदुतरस्वैरोव्यञ्जन-पादवृत्तयोरितिलक्षणानुकूल्यात्। न तूपरितनमपि सूत्रमिष्टम्, एतल्लक्षणप्रातिकूल्यादेव॥

सर्वः प्रवण इत्येके ॥४७॥

प्रवणशब्दः स्वरितपर्य्यायः। सव्यञ्जन एव स्वरित आदित-आरभ्य सर्व्वः प्रवणो भवतीति 'एके' आचार्य्याः, ऊचिरे। यथा, सखिभ्यो वरिवः।

नानापदवदिङ्ग्यमसङ्ख्याने ॥४८॥

इङ्ग्यपदं नानापदवद्भवत्यसङ्ख्याने विषये। नानापदवदिति किम्, ओषताग्निम्महेति, तत् प्रवाते, इत्यादावाकारैकारपूर्व्वस्तु बहुस्वरस्य तेथे इति प्रग्रह्यत्वं मा भूदिति। असङ्ख्यान इति किम्, द्विपदस्य, एकव्यवेतोपीति द्वे सवने शुक्रवतीत्यत्र प्रग्रह्यत्वं भवत्विति वदामः। नानापदमिव नानापदवत्॥

तस्य पूर्वपदमवग्रहः ॥४९॥

'तस्य' इङ्ग्यपदस्य, पूर्व्वपदमवग्रह इत्युच्यते। यथा, देवायत-इति देवायते। अत्रावग्रहसञ्ज्ञायाः (१) प्रयोजनं, नावग्रह-इत्यादि। पदावग्रहशब्दयोर्नियतलिङ्गत्वादन्योन्यान्वयः सम्भवति॥

पदग्रहणेषु पदं गम्येत ॥५०॥

पदग्रहणेषु सूत्रेषु गृहीतं पदमेव 'गम्येत' ज्ञातव्यं, न पदै-

---

१ अवग्रहसञ्ज्ञाया इति ख, ग, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

कदेशः। यथा, त्वे इत्यनिङ्ग्यान्त इति वक्ष्यति। तथा सति त्वे क्रतुमिति प्रग्रह्यो भवति। क्रत्वे दक्षायेति पदैकदेशत्वान्न भवति। गृह्णन्तीति ग्रहणानि, पदानां ग्रहणानि पदग्रहणानि, तेषु॥

अपि विकृतम् ॥५१॥

'अपि' शब्दः पदमन्वादिशति। पदग्रहणेषु विकृतमपि पदमवगन्तव्यं। यथा, णत्वापत्तौ वा हन इति ग्रहीष्यते पदमिति कृत्वा विसर्जनीये ओत्वमापन्नेपि णत्वं (१) नैव निवर्त्तते। प्रवाहणो वन्हिः। एष स स्य इति विसर्जनीयलोपग्रहणं पठिष्यते। अयमुष्य प्रदेवयुरित्यत्र सकारे षत्वमापन्नेपि विसर्गलोपो भवत्येव॥

अप्यकारादि ॥५२॥

अत्रापि 'अपि' शब्दः पदान्वादेशकः। पदग्रहणेष्वकारादि अपि पदं विज्ञेयं। यथा, स्वर्त्ता वयुनेति ह्रस्वादेशे वक्ष्यति। अकारादेरपि तस्य स्वाग्रहणस्य (२) ह्रस्वत्वं भवति, यथा अस्वावन्तꣳ सहस्रिणं। अकार आदिर्यस्य तत्तथोक्तम्॥

अन्-कारादि च ॥५३॥

'च'कारः पदमिति बोधयति। पदग्रहणेष्वन्-कारादि अपि पदं विज्ञेयं। अꣳस्वित्यनुस्वारागमे वक्ष्यति। अन्-कारादेरपि

---

१ विसर्जनीयेोत्वमापन्नेपि णत्वम् इति क, चिह्नितपुस्तकपाठः।

२ स्वा इत्यस्य ग्रहणस्येति ख, चिह्नितपुस्तकपाठः।

तस्यानुस्वारागमः स्यात्। यथा, अनꣳशु कुर्व्वन्तः। अन्-कार-आदिर्यस्य तत्तथोक्तं। नन्वत्र सूत्रे अनित्यस्य कारोत्तरत्वं-कथं क्रियते, वर्णः कारोत्तर इति सूत्रे वर्णस्य कारोत्तरत्व-विधान (१) भङ्गप्रसङ्गात्। उच्यते। सत्यं, एतच्छास्त्रबलान्न क्रियते, किन्तु शास्त्रान्तरबलात् क्रियते। यथा, पाणिनीयाः एवकारः, अपिकारः, इत्यादीनां साधुतां कथयन्ति। एवम-त्रापि। एवमःकार आगमेत्यत्रापि चोद्यपरिहारौ विज्ञेयौ॥

एकवर्णः पदमपृक्तः ॥५४॥

एकश्चासौ वर्णश्च एकवर्णः। स चेत् पदं भवति, सोऽपृक्तसञ्ज्ञ-कः स्यात्। यथा, स उवेकविꣳशवर्त्तनिः। पदमिति किम्। यज्ञपताविति। सञ्ज्ञायाः प्रयोजनं, उकारोऽपृक्तः प्रकृत्येति। अपृक्त इति व्यञ्जनेनासंयुत इत्यर्थः॥

आद्यन्तवच्च ॥५५॥

चकारान्वादिष्टं तदपृक्तसञ्ज्ञं पदम् आदिवदन्तवच्च (२) कार्य्यभाग् भवति। आदिवद्यथा, स उवेकविꣳशवर्त्तनिरित्यत्र तस्यादिरुच्चैस्तरामिति कार्य्यं भवति। अन्तवद्यथा, ओते यन्तो-त्यत्र अन्त इति प्रग्रहकार्य्यं भवति। आदिश्चान्तश्च आद्यन्तौ, ताविव आद्यन्तवत्॥

---

१ वर्णः कारोत्तरो वर्णाख्येति वर्णमात्रस्य कारोत्तरत्वविधानेति ग, चिह्नित-पुस्तकपाठः। वर्णः कारोत्तरो इति वर्णस्य कारोत्तरत्वविधान, इति ग, चिह्नितपुस्तक-पाठः।

२ आद्यन्तवच्चेति इ० मु० पुस्तकपाठः।

वर्णस्य विकारलोपौ ॥ ५६ ॥

वर्णमात्रस्य विकारलोपौ स्यातां नतु सर्व्वस्य पदस्य। विकारस्तावत्, धूर्षाहाविति। लोपस्तु, स ते जानाति ॥

विनाशो लोपः ॥ ५७ ॥

वर्णस्य विनाशो लोपसञ्ज्ञो भवति। यथा, इमन्द्रा सुप्रयसः। सञ्ज्ञायाः प्रयोजनं, अथ लोप इत्यादि। वर्णस्य नित्यतां केचिदाहुः। तन्निराकरणाय व्याकरणानुसारेण सूत्रमेतदभाणि ॥

अन्वादेशोऽन्त्यस्य ॥ ५८ ॥

निमित्तस्य निमित्तिनो वा अन्त्यस्यान्वादेशो भवति। निमित्तीति प्रधानं कार्य्यभागिति (१) यावत्। निमित्तस्य यथा, हन्यादुप्यमानञ्चेत्यन्त्यस्य (२) निःशब्दस्य। निमित्तिनो यथा, अकारस्तु संहितायामपीत्यत्र सुश्लोका इत्यन्त्यस्य अकारस्य। अन्त्यस्येति किं। ब्रह्मा त्वꣳ राजन्, अग्ना३ इत्याह, विचित्यः सोमा३ न विचिन्त्या ३, इति ॥

उपबन्धस्तु देशाय नित्यं ॥ ५९ ॥

उपबन्धस्तु स्वदेशायैव नित्यं निर्द्देशको भवति। उपनिबध्यत-इत्युपबन्धः(३)। एतस्मिन्नित्यधिकरणरूपः सङ्ख्यानविषयः प्रदेशश्च

१ निमित्तीति प्रथमकार्यभागिति ग, चिह्नित-पुस्तकपाठः।

२ हन्यादुप्यमानं चेत्यस्याचेति इ० मु० पुस्तकपाठः।

३ उपनिबध्यत इत्युपनिबन्ध इति क, चिह्नितपुस्तकपाठः।

उपबन्ध उच्यते। यथा, इरावतीत्यादि(१) सूत्रद्वयं, सोमायस्वैतस्मिन्, गमयतो भवत इति च। उपबन्धे यदुक्तं तदन्यत्र न भवतीति 'तु'शब्दार्थः। यथा, इत्याह देवी ह्येषा देवः सोमः। अत्र त्रिपदप्रभृतिन्यायेन पूर्वजे प्रभृत्यायमिति प्राप्तिः। अन्यत्र यो निषेधः स उपबन्धे न भवतीति 'नित्य'शब्दार्थः। यथा, सदो हविर्द्धाने इति प्रग्रहो ग्रहिष्यते। केवलं हविर्द्धाने इति सर्वथा न प्रग्रहो गृह्यते। यथा, हविर्द्धाने खायन्त इत्ययमन्यत्र निषेधो हविर्द्धाने प्राची प्रवर्त्तयेयुरित्यत्र न प्रसरति। गमयतो भवत इत्यादिना प्राप्तिः। नन्वेतदनुपपन्नं। अन्यत्र निषेधस्य क्वचिदुपबन्धेपि दर्शनात्। यथा, अथ मिथुनी भवत इत्यत्र गमयतो भवत इत्युपबन्धप्राप्तिः। न ग्रामीत्यादिना अन्यत्र निषेधेन निषिध्यते। यथा, वायव आरोहणवाहा इत्यत्र सोमायस्वेति प्राप्तिः (२)। अन्ते समानपद इत्यनेन (३) अन्यत्र निषेधेन निषिध्यते। अत्रोच्यते, ग्रामो वायवे मनवे इत्यादीनां कण्ठोक्तत्वादेव निषेधः प्रसरतु, केवलं हविर्द्धाने प्रग्रहो न इत्यार्थिको निषेधो न प्रसरत्येव। आर्थिककण्ठोक्तयोः कण्ठोक्तस्य प्राबल्यात्। ननु अते अवे इत्यनयोः कण्ठोक्त्यैवालं, तत्र नित्यग्रहणेन किं। उच्यते, नितरां परिहारः। कण्ठोक्तिरुपबन्धप्राप्तिमेव निवर्त्तयति। नित्यशब्दस्तु प्राप्त्यन्तरमपि परिहरति। यथा, द्वे जाये विन्दत इत्यत्र एकव्यवेतोऽपीति प्राप्तिः। वनस्पते वीड्वङ्ग इत्यत्र

---

१ इरावतीप्रभृत्यादि इति ग, चिह्नितपुस्तकपाठः।

२ सोमायस्वैतस्मिन्निति प्राप्तिरिति ग, चिह्नितपुस्तकपाठः।

३ समानपदे नित्यमित्यनेनेति ग, चिह्नितपुस्तकपाठः।

वीड़ादिप्राप्तिः। एवमाद्यूहनीयम्। माहिषेयमतानुसारेणैवं प्रपञ्चितं॥

नानापदीयं च निमित्तं प्रग्रहस्वादिषु॥ ६०॥

'च'कारस्तुशब्दगदितं नञर्थमन्वादिशति(१)। प्रग्रहेषु स्वादिषु च नानापदसम्बन्धिनिमित्तमसंहितायामपि स्वकार्य्यमुपदिशतीति (२) प्रग्रहानुस्वारकार्य्यं न निवर्त्तते (३)। यथा वक्ष्यति, ग्नीचक्रे पपरे प्रग्रहौ भवत इत्यत्र प्रग्रहत्वे पकारेणोपदिष्टे पदकालेपि तथैव। स्वादिषु च यथा, नावग्रहपूर्व्वं इत्यवग्रहेणानुस्वारागमे निषिद्धे पदकालेऽपि तथैव। यथा, अर्द्धमासे देवाः। षत्वणत्वादौ तु नानापदीयं निमित्तम् असंहितायामेव(४) कार्य्यं करोतीत्ययमारम्भः। यथा, शुचिषदिति शुचिसत्। प्रवाहण इति प्रवाहनः।

यथोक्तं पुनरुक्तं त्रिपदप्रभृति त्रिपदप्रभृति॥ ६१॥

त्रयाणां पदानां समाहारस्त्रिपदं। कार्य्यभाजः पदस्य तृतीयत्वं विज्ञेयं। ईदृशं त्रिपदप्रभृति आदिर्यस्य तत्त्रिपदप्रभृति, 'यथोक्तं' पूर्व्वोक्तविधिं(५) करोति। अविशेषेण तत्त्रिपदप्रभृति (६) पुनरुक्तं

---

१ नञमन्वादिशति इति ख, चिह्नितपुस्तकपाठः। तदर्थमन्वादिशति इति क, चिह्नितपुस्तकपाठः।

२ स्वरकार्यमुपदिशतीति क, चिह्नितपुस्तकपाठः।

३ प्रग्रहानुस्वारकार्थं निवर्त्त्यते इति ग, चिह्नितपुस्तकपाठः।

४ निमित्तं संहितायामेवेति ख. चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

५ पूर्वविधिमिति ग, चिह्नितपुस्तकपाठः।

६ स्वविशेषणाय तत् त्रिपदप्रभृति इति ग, चिह्नितपुस्तकपाठः। स्वविशेषणं यत् तत् त्रिपदप्रभृति इति इ० मु० पुस्तकपाठः।

चेत्। तथा हि, लुप्यते त्वकार एकारौकारपूर्व्व इत्यनेन प्रथमकाण्डे तृतीयप्रश्ने देवस्य त्वा सवितुः प्रसवेऽश्विनोरित्यत्र अकारे लुप्ते तदेव वाक्यं, वाजपेयेप्यलोपं बाधित्वा तत् तथैव भवति, त्रिपदप्रभृतित्वात्। उभावामित्यत्र सुपथा राये अस्मानित्येतत्। उदुत्यं जातवेदसमित्यत्रापि तथैव। तथा यन्ते वायुरित्यत्र स जातो गर्भो असि रोदस्योरित्येतत्। क्रूरमिवेत्यत्रापि(१) तथैव। ब्राह्मणवाक्येषु तु त्रिपदमात्राद्या कार्य्यं भवति। ब्राह्मणवाक्येषु पूर्व्वस्यस्यैवोक्तम्।(२) यथा, इमामगृभ्णन्नित्यत्र मर्य्यश्रीस्पृहयद्वर्णो अग्निरित्येतद् वाक्यम्। उत्क्रामेत्यत्रापि तथैव भवति। कार्य्यभाजः पदस्य तृतीयत्वमिति किम्। ये अन्तरिक्षे ये दिवि तेभ्य इत्युख्ये। येन्तरिक्षे ये दिवि येषामिति रुद्रान्तमानुवाके। प्रभृतीति किम्। त्वमग्ने रुद्र इति याज्यायां दिवस्परि प्रथमं जज्ञे अग्निरिति वाक्यम्। अग्नयेऽन्नवत इत्यत्र इतः प्रथमं जज्ञे अग्निरिति पुनरुक्तं सत्तथैव भवेदितिचेत्, मैवं। त्रिपदमात्रादेव तथाभाव इति नात्र वक्तुं युक्तं। किन्तु जज्ञे सऽस्थानस्थान इति जज्ञेग्रहणसामर्थ्यात् (३)। अन्यथा तस्य वैयर्थ्यात्। पदवीप्सा अध्यायपरिसमाप्तिं द्योतयति॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे प्रथमोऽध्यायः॥ १॥

---

१ क्रूरमिव वा अत्रापि इति ग, चिह्नितपुस्तकपाठः।

२ पूर्वस्थलस्यैवोक्तेरिति ख, ग, चिह्नितपुस्तकपाठः। इ० मु० पुस्तक पाठश्च।

३ किन्तु जज्ञेष स्थान इति जज्ञेग्रहणसाधर्म्यात् इति ग, चिह्नितपुस्तकपाठः।

तैत्तिरीय-प्रातिशाख्ये

द्वितीयोऽध्यायः ।

अथ शब्दोत्पत्तिः ॥ १ ॥

उक्तो वर्णसमाम्नायस्तेषां वर्णानां कीदृक् कारणं, कथं वा उपलब्धिः(१) इत्याकाङ्क्षानन्तरं तन्निरूप्यत इत्यानन्तर्यार्थः 'अथ'शब्दः । अथवा इत उत्तरं यद्वक्ष्यते(२)तच्छब्दोत्पत्तिरित्यधिकृतं(३) वेदितव्यमित्यधिकारार्थः । शब्दो नाम ध्वनिः, वर्णानामकारादीनामुपादानकारणं, तदुत्पत्तिर्जन्म, उपलब्धिर्वा । यथा उदकस्य दर्शनात् पूर्वमेव भूमौ जलमस्त्येव तत् खननाद् दृश्यते तद्वत् (४) सेयमुच्यत इति सूत्रार्थः ॥

वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने ॥ २ ॥

वायुम् अग्निः समीरयति इति वायुशरीरं, तथाभूतात् 'समीरणात्' प्रेरणात्, अभिघातादित्यर्थः । 'कण्ठोरसोः', 'सन्धाने' मध्यदेशे, शब्दोत्पत्तिर्भवति (५) । शिक्षा चैवमस्ति (६),

---

१ कीदृक् कारणं कथं वा तदुपलब्धिरिति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च । कीदृशं कारणं कथं वा तदुपलब्धिरिति ग, चिह्नितपुस्तकपाठः ।

२ यद्वक्ष्यतीति क, चिह्नितपुस्तकपाठः ।

३ तच्छब्दोत्पत्तिरित्येतदधिकृतमिति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

४ तद्वत् शब्दोत्पत्तिरिति ग, चिह्नितपुस्तकेऽधिकः पाठः ।

५ भवतीति इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

६ शिक्षा चैवमस्तीति इति इ० मु० पुस्तकपाठः ।

(१) मनः कायाग्निमाहन्ति स प्रेरयति मारुतं ।

मारुतस्तूरसि चरन् मन्द्रञ्जनयति स्वरम् ॥ इति । (२)

वायुश्च शरीरञ्च वायुशरीरे, तयोः समीरणं, तस्मात् । अन्ये त्वाहुः, वायोः शरीरे सतः समीरणं, तस्मात् शब्दोत्पत्तिरिति । अत्रेत्थं (३)समासः, राजदन्तादित्वाच्छरीरशब्दस्य (४) परनिपातः । शरीरे वायुः, वायुशरीरं, तस्य समीरणं, तस्मात् । अस्मिन्मते वायोः समीरणकर्त्तृत्वमेव, न तु कर्म्मत्वं ॥

तस्य प्रातिश्रुत्कानि भवन्त्युरः कण्ठः शिरो मुखं नासिके इति ॥ ३॥

'तस्य' प्रकृतस्य शब्दस्य, उरःप्रभृतीनि स्थानानि (५) 'प्रातिश्रुत्कानि', भवन्ति । 'प्रतिश्रुत्'प्रतिध्वनिः, तस्य सम्बन्धीनि 'प्रातिश्रुत्कानि' । संवृते कण्ठे नादः क्रियते एतदादिना सूत्रत्रयेण शब्दस्य त्रैविध्यमुच्यते, नादः, श्वासः, हकारः, च इति । तावन्नादलक्षणमाह,

---

१ आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षयेति ग, चिह्नितपुस्तकेऽधिकः पाठः ।

२ किञ्च । आकाशवायुप्रभवः शरीरात् समुद्धरन् वक्त्रमुपैति नादः । स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमायाति स एव शब्दः ॥ इति नैयायिके । इति ग, चिह्नितपुस्तकेऽधिकः पाठः ।

३ तत्रेत्थमिति क, ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

४ शरीरस्येति इ० मु० पुस्तकपाठः ।

५ उरःप्रभृतिस्थानानि इति क, चिह्नितपुस्तकपाठः ।

संवृते कण्ठे नादः क्रियते ॥ ४ ॥

'संवृते कण्ठे', यः शब्दः 'क्रियते', सः 'नाद'सञ्ज्ञो भवति। सञ्ज्ञायाः प्रयोजनं, नादोनुप्रदानमित्यादि ॥

विवृते श्वासः ॥ ५ ॥

'विवृते', कण्ठे यः शब्दः क्रियते, सः 'श्वास'सञ्ज्ञो भवति। सञ्ज्ञायाः प्रयोजनं, अघोषेषु श्वास इति ॥

मध्ये हकारः ॥ ६ ॥

संवृतविवृतयोः 'मध्ये' मध्यमप्रकारे, यः शब्दः क्रियते, स 'हकार'सञ्ज्ञो भवति। सञ्ज्ञायाः प्रयोजनं, हकारो हचतुर्थेष्विति ॥

ता वर्णप्रकृतयः ॥ ७ ॥

वर्णानां प्रकृतयः, 'वर्णप्रकृतयः'। ता वर्णप्रकृतयो भवन्ति ये नादश्वासहकारा उक्ताः। नादप्रकृतयः केचिद्वर्णाः, श्वासप्रकृतयोऽन्ये, हकारप्रकृतयोऽन्ये। यथा, मृत्प्रकृतयो घटशरावादयः। यथा वा, तन्तुप्रकृतयः पटाः। ननु सर्वनाम्नः प्रकृतपरामर्शकत्वात् (१) नादश्वासहकारेषु पुंलिङ्गेषु परामर्शार्हेषु (२) सत्सु ता इति स्त्रीलिङ्गप्रयोगः (३) कथं साधुः। उच्यते। निर्देशनिर्दिश्य-

---

१ प्रकृतपरामर्शित्वादिति ख, चिह्नितपुस्तकपाठः। प्रकृतपरामर्शित्वेनेति इ० मु० पुस्तकपाठः।

२ परामर्शितेषु इति ख, चिह्नितपुस्तकपाठः।

३ स्त्रीलिङ्गनिर्देश इति ग, चिह्नितपुस्तकपाठः।

मानयोः(१) एकतामापादयन्ति सर्व्वनामानि कामचारेण तल्लिङ्गतामुपाददत इति महाभाष्यवचनात्(२) प्रयोगसाधुत्वमध्यवसीयते। तस्मादन्योन्यान्वयसम्भवः (३)॥

नादोऽनुप्रदानꣳ स्वरघोषवत्सु ॥ ८॥

'स्वरेषु 'घोषवत्सु', च वर्णेषु, 'नादः', 'अनुप्रदानं', भवति। अनुप्रदीयते अनेन वर्ण इति 'अनुप्रदानं' मूलकारणं। अनुप्रदीयते उपादीयते जन्यत इत्यर्थः॥

हकारो हचतुर्थेषु ॥ ९॥

हकारश्च चतुर्थाश्च 'हचतुर्थाः', तेषु, वर्णेषु, 'हकारः', अनुप्रदानं भवति। ननु सञ्ज्ञाविधानक्रमभङ्गान्नात्रेदं(४) सूत्रमवतरति। मैवं। घोषवत्स्विति सामान्यान्नादो हचतुर्थेषु च प्रसज्यते इत्यतिप्रसङ्ग(५) परिहारार्थत्वादवतरत्येवेति वदामः॥

अघोषेषु श्वासः ॥ १०॥

'अघोषेषु' वर्णेषु, श्वासोऽनुप्रदानं भवति॥

---

१ निर्द्दिश्यमानप्रतिनिर्द्दिश्यमानयोरिति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

२ महाभाष्यकारवचनादिति ग, चिह्नितपुस्तकपाठः।

३ तस्मादन्योन्यान्वयः सम्भवति इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

४ क्रमभङ्गप्रसङ्गान्नैवेदमिति इ० मु० पुस्तकपाठः।

५ इतिप्रसङ्ग इति क, ख, ग, चिह्नितपुस्तकपाठः।

भूयान् प्रथमेभ्योऽन्येषु ॥ ११ ॥

सान्निध्याच्छ्वास इति लभ्यते । 'प्रथमेभ्यः,' 'अन्येषु' घोषेषु,(१) श्वासः, 'भूयान्' अधिकः, भवति ॥

अवर्णे नात्युपसꣳहृतमोष्ठहनु (२) नातिव्यस्तम् ॥ १२ ॥

'अवर्णे' 'उच्चार्य्यमाणे 'ओष्ठहनु', 'अत्युपसंहृतं' अतिसंश्लिष्टं, 'न', भवति । 'अतिव्यस्तं' अतिविवृतं च, 'न,' भवति । ओष्ठौ च हनू च, ओष्ठहनु । द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानामित्येकवद्भावः । तदेकस्मिन्नुभयथा न शक्यते कर्त्तुमिति योगविभागः(३), अकारे नात्युपसंहृतम्, आकारे प्लुते च नातिव्यस्तम्, इति ॥

ओकारे च ॥ १३ ॥

'च'कारो हनुमात्रकार्य्यान्वादेशकः । ओष्ठकार्य्यस्य परसूत्रेण विशेषविधानात् । 'ओकारे,' उच्चार्य्यमाणे हनू अतिव्यस्ते न भवतः ॥

ओष्ठौ तूपसꣳहृततरौ ॥ १४ ॥

सान्निध्यादोकार इति लभ्यते। ओकारे कार्य्ये 'ओष्ठौ', 'उपसंहृततरौ', स्यातां । 'तु'शब्द ओष्ठयोः पूर्व्वोक्तविधिं निवारय-

---

१ अन्येष्वघोषेषु इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

२ नात्युपसंहृतमोष्ठहनु इति ख, चिह्नितपुस्तकपाठः ।

३ योगविभागः कार्यं इति इ० मु० पुस्तकपाठः ।

तीति(१) वररुचिरुवाच । माहिषेयस्तु बभाषे, बन्धोरित्यादिकमोकारं सव्यञ्जनं व्यस्ततो निवारयतीति ॥

ईषत्प्रकृष्टावेकारे ॥ १५ ॥

प्रकृष्टावित्यत्र द्विवचनेन प्रकृतावोष्ठौ गृह्येते । 'एकारे,' कार्य्ये, ओष्ठौ 'ईषत् प्रकृष्टौ,' स्यातां । प्रकृष्टता, सन्निकृष्टता ॥

उपसꣳहृततरे हनू ॥ १६ ॥

सान्निध्यादेकार इति लभ्यते । एकारे कार्य्ये 'हनू', 'उपसंहृततरे', भवतः । अतिशयनोपसंहृते उपसंहृततरे ॥

जिह्वामध्यान्ताभ्यां चोत्तराञ्जम्भ्यान्त्स्पर्शयति ॥ १७ ॥

एकारे कार्य्ये 'जिह्वामध्यान्ताभ्याम्,' 'उत्तरान् जम्भ्यान्,' 'स्पर्शयति' स्पृशेदित्यर्थः । पालयतीत्यादिवत् स्वार्थे णिच् । 'जम्भ्यान्' इति हनुमूलप्रान्तप्रदेशान्, इत्यर्थः । मण्डूकप्लुतिन्यायेन 'च'कार एकारमाकर्षति । जिह्वाया मध्यं, (२) तस्य अन्तौ, ताभ्यां, जिह्वामध्यान्ताभ्यां ॥

उपसंहृततरे च जिह्वाग्रमृकारर्कारलृकारेषु वर्त्स्वेषूपसꣳहरति ॥ १८ ॥

'च'शब्देन हन्वोरन्वादेशः (३) । ऋकारे ॠकारे लृकारे च

---

१ तुशब्दः पूर्वोक्तविधिमोष्ठयोर्निराकरोतीति ग, चिह्नितपुस्तकपाठः ।

२ जिह्वाया मध्यं जिह्वामध्यमिति इ० मु० पुस्तकपाठः ।

३ चशब्दो हन्वोरन्वादेशक इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

कार्य्ये हनू 'उपसंहततरे', भवतः, जिह्वाग्रञ्च 'वर्त्स्वेषु', 'उपसंहरति' निक्षिपेत्। 'वर्त्स्वेषु' इति दन्तपङ्क्तेरुपरिष्टादुच्चप्रदेशेषु, इत्यर्थः। नन्वरमृकारपरे इति लक्षणासम्भवाट्टकारकारल्कारेष्विति कथं सन्धिः साधुः। सत्यं। नैतल्लक्षणात् किन्तु शास्त्रान्तरबलात् साधुः। एवमृकारल्कारौ ह्रस्वावित्यत्रापि विज्ञेयम्॥

एकेषामनुस्वारस्वरभक्त्योश्च ॥ १९ ॥

'च'कारः पूर्व्वोक्तविधिमन्वादिशति। यथासङ्ख्येन 'अनुस्वारस्वरभक्त्योः', पूर्व्वोक्तविधिर्भवति। अनुस्वारे हन्वोरुपसंहारः, स्वरभक्तौ जिह्वाग्रस्य वर्त्स्वेषूपसंहारः, एतत् 'एकेषां' मतं। अन्येषान्तु मतम्, अनुस्वारस्यानुनासिकमात्रत्वं, स्वरभक्तेर्ऋकारतुल्यत्वम्, इति। तच्चिन्त्यं (१)॥

अनादेशे प्रणयस्ता जिह्वा ॥ २० ॥

यत्र जिह्वाग्रेण जिह्वामध्येनेत्यादिः 'अनादेशः' अनुपदेशः, तत्र विषये, 'प्रणयस्ता', 'जिह्वा', तूष्णीम्भूता भवति। प्रकर्षेण न्यस्ता प्रणयस्ता। यथा उपमा। नन्वनादेशे सर्व्वकरणानां तूष्णीम्भावसिद्धेः किमर्थोऽयमारम्भः। उच्यते, एकारस्य जिह्वामध्यान्तनिष्पाद्यत्वमस्तीति (२) तदवयवस्याप्यकारस्य तथात्व-

---

१ ऋकारतुल्यत्वमिति वररुचिरचितं तच्चिन्त्यमिति ग, चिह्नितपुस्तकपाठः, इ०मु०पुस्तकपाठश्च। ऋकारतुल्यत्वमिति वररुचिमत तच्चानित्यमिति ख, चिह्नित-पुस्तकपाठः।

२ जिह्वामध्यान्ताभ्यां निष्पाद्यत्वमिति ख, चिह्नितपुस्तकपाठः। जिह्वामध्यान्त-निष्पाद्यत्वमिति इ॰ मु॰ चिह्नितपुस्तकपाठः।

मस्तीति(१) अकारत्वसामान्यात्(२) अन्यचाप्ययेत्यादौ तथात्वं प्रसज्येत। तच्चानिष्टं। तन्माभूदिति परिहारः। न आदेशः, अनादेशः, तस्मिन्, उपदेशाभावे, इत्यर्थः॥

अकारवदोष्ठौ॥ २१॥

सान्निध्यादनादेश इति लभ्यते। ओष्ठयोर्यत्नानादेशस्तत्र 'अकारवत्' अकारे यथा, तथा 'ओष्ठौ', भवतः, नात्युपसंहृततराविल्यर्थः। यथा, इन्द्र इति॥

तालौ जिह्वामध्यमिवर्णे॥ २२॥

'इवर्णे', कार्य्ये, 'जिह्वामध्यं', 'तालौ,' उपसंहर्त्तव्यं। यथा, इषे त्वा। जिह्वायाः मध्यं, जिह्वामध्यम्॥

एकारे च॥ २३॥

'च'कारः पूर्व्वविधिमन्वादिशति। 'एकारे', कार्य्ये, जिह्वामध्यं तालावुपसंहर्त्तव्यं। ननु, विधौ समाने पृथक् सूत्रारम्भः किमर्थः। उच्यते, इवर्णे यथा जिह्वामध्योपसंहारः, न खल्वेवमिकारे, किन्तु ततो न्यून इत्यर्थः। कुतः, अकारमिश्रितत्वादेकारस्य, अकारस्य च तदेकदेशत्वात् जिह्वामध्यनिष्पाद्यत्वं,(३) न तु स्वतः। अत एव सोपाधिकत्वान्न्यूनत्वोप-

१ तदवयवस्याकारस्य तथात्वमस्ति इति इ० मु० पुस्तकपाठः।

२ अकारत्वसाम्यादिति ग, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

३ जिह्वामध्यान्ताभ्यां निष्पाद्यत्वमिति ख, चिह्नितपुस्तकपाठः। जिह्वामध्यान्तनिष्पाद्यमिति इ० मु० पुस्तकपाठः। तदेक देशत्वात् तत् स्थानत्वमिति क, चिह्नितपुस्तकपाठः।

पत्तिः। ईषत्प्रकृष्टावित्यादिसूत्रत्रयेण एकारस्य स्थानकरणे निर्द्दिष्टे। इह तु ततोऽन्यथैव(१) निर्द्दिश्यते। तदेकस्मिन्(२) उभयथा कर्त्तुं न शक्यते, विरोधात्। तस्मादत्र योगविभागः कर्त्तव्यः, अव्यञ्जने तल्लक्षणं, सव्यञ्जने त्वेतत्, इति। कुतोऽयं नियमः। उच्यते, एकार इति सामान्योक्तौ सत्यां प्रथममव्यञ्जनस्यैव ग्रहणं मुख्यं। तथा सति प्रथमप्रतीते तस्मिन्(३) प्रथमं लक्षणं युज्यते। सव्यञ्जनेषु (४) पारिशेष्यादेतदिति विज्ञेयम्॥

ओष्ठोपसंहार उवर्णे॥ २४॥

'उवर्णे', कार्य्ये, 'ओष्ठोपसंहारः,' भवति। अत्रोपसंहारः पूर्व्ववन्न सन्निकृष्टतामात्रं, किन्तु सन्निकृष्टाविवोष्ठौ दीर्घौ स्याताmिति(५) वक्ष्यते। एवमोष्ठौ तूपसंहृततरावित्यत्रापि विज्ञेयम्। यथा, उलूखलबुध्नो यूपः। ओष्ठयोरुपसंहारः, ओष्ठोपसंहारः॥

एकान्तरस्तु सर्व्वत्र प्रकृतात्॥ २५॥

सान्निध्यादोष्ठोपसंहार इति लभ्यते। सर्व्वत्र ओष्ठ्यस्वरेषु 'प्रकृतात्' ओष्ठोपसंहारात्, पृथगोष्ठोपसंहारः कर्त्तव्यः। स चेत् 'एका-

---

१ ततोन्यत्तस्यैवेति क, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

२ तदेतस्मिन् इति ग, चिह्नितपुस्तकपाठः।

३ प्रतीतेस्मिन्निति इ० मु० पुस्तकपाठः।

४ सव्यञ्जने इति ख, ग, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

५ दीर्घौ च स्यातामिति इति क, ग, चिह्नितपुस्तकपाठः।

न्तरः' एकान्तर इति मात्राकालव्यवेत इत्यर्थः(१)। एकमात्रा(२) अन्तरं, व्यवधानं, यस्य असौ। एकान्तर इति पृथगोष्ठोपसंहारस्य विशेषणम्। 'तु'शब्द ओकारपरत्वे एकान्तरत्वनियमं निवर्त्तयति। उदाहरणानि। उत्पूत शुष्मꣳ। सून्नीयमिति सु उन्नीयं। अथो ओषधीषु। बाहुवोर्बलं। तनुवौ घोरान्या। चतुर्होता। ननु, योꣳशुमित्यत्रानुस्वारस्य मात्राकालः, शकारस्यार्द्धमात्राकालः, एवमध्यर्द्धमात्रत्वे सत्येकान्तरत्वाभावात् कथं पृथगोष्ठोप संहारः(३)। उच्यते, शते पञ्चाशन्यायेन सिद्ध्यति। अध्यर्द्धमात्रत्वे एकमात्रत्वं(४) सुतरामस्ति। तेन कार्य्यं भवति। अधिकन्तु न निषिध्यते। स्वायोगव्यवच्छेदकत्वादेकशब्दस्य। अत एव बाहुवोर्बलमुरुवोरोज इत्यादेर्न द्विरोष्ठत्वं (५) मुख्यं, किन्तु स्फुरितत्वं। उदाहरणञ्चाभासतया दर्शितं। तर्हि कुसुरुविन्द इत्यत्र ककाररेफाभ्यामुत्तरयोरुकारयोः कथं पृथगोष्ठोपसंहारो न भवति। अक्षरार्द्धमात्रव्यवायसम्भवात्। मैवम्। अत्र(६) ककारसकारोत्तरयोरुकारयोस्तावन्न पृथगोष्ठता। एत-

---

१ मात्राकालव्यवाय इत्यर्थ इति क, चिह्नितपुस्तकपाठः। मात्राकालव्यवाय इति लभ्यते इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

२ एका मात्रे ति ग, चिह्नितपुस्तकपाठः।

३ पृथगोष्ठोपसंहारत्वसिद्धिरिति ग, चिह्नितपुस्तकपाठः। पृथगोष्ठोपसंहारसिद्धिरिति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

४ अध्यर्द्धमात्रत्वेप्येकमात्रत्वमिति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

५ द्विरोष्ठ्यमिति ख, चिह्नितपुस्तकपाठः। द्विरोष्ठ्यत्वमिति क, चिह्नितपुस्तकपाठः।

६ तत्रेति क, चिह्नितपुस्तकपाठः।

लक्षणासम्भवात्। रेफादुत्तरस्य तु प्रकृतात् पृथक्त्वाभावान्नायं विधिः। किन्तु मध्यस्थसकारोत्तरादुकारात् पृथक्त्वं। तथा सत्येकान्तरत्वाभावस्तदवस्थः(१) एवेति लक्षणमिदमव्यभिचरितम्॥

अकारार्द्धमैकारौकारयोरादिः॥ २६॥

ऐकारस्यौकारस्य च 'आदिः', 'अकारार्द्धं,' भवति। अकारस्यार्द्धकालसम इत्यर्थः। अकारस्यार्द्धम्, अकारार्द्धम्॥

संवृतकरणतरमेकेषां॥ २७॥

सान्निध्यादकारार्द्धमिति लभ्यते। 'एकेषां,' मते तदकारार्द्धं 'संवृतकरणतरं,' भवति। संवृतानि, सन्निकृष्टानि, करणानि, यस्य तत्, संवृतकरणम्। अतिशयेन संवृतकरणं, संवृतकरणतरम्॥

इकारोध्यर्द्धः पूर्व्वस्य शेषः॥ २८॥

'पूर्वस्य' ऐकारस्येत्यर्थः। अधस्तादैकारौकारयोः सहोच्चरितत्वात्। 'अध्यर्द्धः,' 'इकारः,' ऐकारस्य, 'शेषः,' भवति। अधिकमर्द्धं यस्याऽसावध्यर्द्धः॥

उकारस्तूत्तरस्य॥ २९॥

'उत्तरस्य' औकारस्येत्यर्थः। अध्यर्द्धः, 'उकारः,' औकारस्य

---

१ एकान्तराभावस्तदवस्थ इति ख, ग, चिह्नितपुस्तकपाठः; इ० मु० पुस्तकपाठस्य।

शेष:(१) भवति। यथानयोरुभयोरप्यादिरकार एव, तद्वदिकार-एव(२) शेष: प्रसक्त:। तन्निषेधति 'तु' शब्द:॥

अनुस्वारोत्तमा अनुनासिका:॥ ३०॥

'अनुस्वार:,' च 'उत्तमा:,' च 'अनुनासिका:,' भवन्ति। नासिकामनुवर्त्तन्त इत्यनुनासिका: (३)। यथा अनुस्वार:, योꣳशुम्(४)। उत्तमाश्च, प्रत्यङ् होतारम्। प्राञ्चमुप(५)॥

स्वराणां यत्रोपसꣳहारस्तत् स्थानं॥ ३१॥

'स्वराणां,' 'तत् स्थानं,' भवति, 'यत्रोपसंहार:,' स्यात्। 'उपसंहार:' नाम संश्लेषविशेष:(६)॥

यदुपसꣳहरति तत् करणम्॥ ३२॥

सान्निध्यात् स्वराणामिति लभ्यते। स्वराणां 'तत् करणं,' भवति, 'यत्,' स्वरान् 'उपसंहरति' प्रापयति स्वस्थानम्(७)। यथा, जिह्वाग्रमकारल्कारेत्यादि।

---

१ औकारशेष इति इ० मु० पुस्तकपाठ:।

२ आदिरकारस्तद्वदिकार एवेति क, चिह्नितपुस्तकपाठ:।

३ भवन्तीति क, चिह्नितपुस्तकेऽधिक: पाठ:।

४ योंशुं ग्टह्णातीति ग, चिह्नितपुस्तकपाठ:।

५ प्राञ्चमित्यादि इति ग, चिह्नितपुस्तकपाठ:।

६ उपसंश्लेषविशेष इति इ० मु० पुस्तकपाठ:।

७ प्रापयति तत् स्थानमिति क, चिह्नितपुस्तकपाठ:। प्रापयति तत् करणमिति ग, चिह्नितपुस्तकपाठ:, इ० मु० पुस्तकपाठश्च।

अन्येषान्तु यत्र स्पर्शनं तत् स्थानम् ॥ ३३ ॥

स्वरेभ्यः 'अन्येषां' वर्णानां, 'तत् स्थानं,' 'यत्र स्पर्शनं,' भवेत्। अत्र व्यञ्जनानां संश्लेषमात्रं कथ्यते। स्वराणान्तु पुरस्तात् संश्लेषविशेषः कथितः। उपसंहारस्पर्शनयोः शब्दशक्त्या विशेष एव विदुषा(१) विज्ञेयः। 'तु'शब्दः स्वरनिवृत्त्यर्थः। अथवा अनुस्वारस्वरभक्त्योर्व्यञ्जनवत् (२) स्पर्शमात्रनिवर्त्तकः (३) इति माहिषेयभाषितम् ॥

येन स्पर्शयति तत् करणम् ॥ ३४ ॥

सान्निध्यादन्येषामिति लभ्यते। स्वरेभ्योन्येषां वर्णानां 'तत् करणं,' भवति, अध्येता 'येन,' व्यञ्जनानि 'स्पर्शयति' प्रापयति स्थानम्(४) ॥

हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति ॥ ३५ ॥

'कवर्गे,' उच्चार्य्यमाणे 'जिह्वामूलेन,' वर्णं 'हनुमूले' 'स्पर्श-

---

१ उपसंहारस्पर्शशब्दशक्त्या स्थानविशेष एवेति क, चिह्नितपुस्तकपाठः। उपसंहारस्पर्शनयोः शब्दशक्त्या विशेषो विदुषा इति इ० मु० पुस्तकपाठः, ख, चिह्नितपुस्तकपाठश्च।

२ अनुस्वारभक्त्योर्व्यञ्जनत्वादिति ख, चिह्नितपुस्तकपाठः।

३ स्पर्शनमात्रत्वनिवर्तक इति ख, चिह्नितपुस्तकपाठः। स्पर्शनमात्रकत्वनिवर्त्तक इति इ० मु० पुस्तकपाठः।

४ प्रापयति तत् करणमिति ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। प्रापयति तत् स्थानमिति ख, चिह्नितपुस्तकपाठः।

यति' प्रापयेदित्यर्थः। हन्वोर्मूलं, हनुमूलं, तस्मिन्। मूल इति जात्यपेक्षायामेकवचनम्(१)॥

ताली जिह्वामध्येन चवर्गे॥ ३६॥

'चवर्गे,' कार्य्ये, 'जिह्वामध्येन,' वर्णान् 'ताली,' स्पर्शयेत्॥

जिह्वाग्रेण प्रतिविष्ट्य मूर्द्धनि टवर्गे॥ ३७॥

'टवर्गे,' कार्य्ये, 'जिह्वाग्रेण,' वर्णं 'मूर्द्धनि,' स्पर्शयेत्। किं कृत्वा, योग्यत्वात् जिह्वाग्रं,(२) 'प्रतिविष्ट्य' आवेष्ट्य। 'मूर्द्ध'-शब्देन वक्त्रविवरोपरिभागो विवक्ष्यते॥

जिह्वाग्रेण तवर्गे दन्तमूलेषु॥ ३८॥

'तवर्ग,' कार्य्ये, 'जिह्वाग्रेण,' वर्णान् 'दन्तमूलेषु,' स्पर्शयेत्॥

ओष्ठाभ्यां पवर्गे॥ ३९॥

'पवर्गे,' कार्य्ये, 'ओष्ठाभ्यां' अन्योन्यं स्पर्शयेत्। अत्रोत्तरोष्ठ-स्थानं उत्तरत्वसाम्यादेषां स्थानानामधरोष्ठः करणं॥

ताली जिह्वामध्यान्ताभ्यां यकारे॥४०॥

'यकारे,' कार्य्ये, 'जिह्वामध्यान्ताभ्यां,' 'ताली,' स्पर्शयेत्। जिह्वायाः मध्यं, तस्य अन्तौ, ताभ्यां, जिह्वामध्यान्ताभ्यां॥

---

१ तस्मिन्, मूलमिति जात्यपेक्षमेकवचनमिति ग, चिह्नितपुस्तकपाठः। तस्मिन्। जात्यपेक्षयामेकवचनमिति द० मु० पुस्तकपाठः।

२ योग्यत्वात्तज्जिह्वाग्रमिति ख, ग, चिह्नितपुस्तकपाठः।

रेफे जिह्वाग्रमध्येन प्रत्यग् दन्तमूलेभ्यः ॥ ४१ ॥

'रेफे,' कार्य्ये, 'जिह्वाग्रमध्येन,' 'दन्तमूलेभ्यः,' 'प्रत्यक्,' स्पर्शयेत्। 'प्रत्यक्' इति अभ्यन्तर उपरिभागे (१), इत्यर्थः। यथा, प्रत्यगात्मेत्यन्तरात्मा(२) प्रतीयते ॥

दन्तमूलेषु च लकारे ॥ ४२ ॥

'च'कारो जिह्वाग्रमध्यं प्रत्यक्त्वञ्चाकर्षति(३)। 'लकारे,' कार्य्ये, जिह्वाग्रमध्येन 'दन्तमूलेषु,' प्रत्यक् स्पर्शयेत्। अयमर्थः, लकारस्य दन्तमूलप्रत्यासन्नप्रत्यक्प्रदेशस्थानमिति(४) विज्ञेयं ॥

ओष्ठान्ताभ्यां दन्तैर्वकारे ॥ ४३ ॥

'वकारे,' कार्य्ये, अधरोष्ठान्ताभ्याम् 'उत्तरदन्ताग्रैः(५),' सह स्पर्शयेत्। 'दन्तैः' इतिस्थाननिर्देशः। 'ओष्ठान्ताभ्याम्' इति करणनिर्देशः ॥

स्पर्शस्थानेषूष्माण आनुपूर्व्येण ॥ ४४ ॥

'ऊष्माणः' 'आनुपूर्व्येण' यथाक्रमेण, 'स्पर्शस्थानेषु,' उच्चारणीया भवन्ति। यथा, जिह्वामूलीयः, कवर्गस्थाने। यः काम-

---

१ अभ्यन्तरमुपरिभागे इति क, ग, चिह्नितपुस्तकपाठः।

२ प्रत्यगात्मेत्यभ्यन्तरात्मेति क, चिह्नितपुस्तकपाठः।

३ प्रत्यक्त्वमन्वादिशतीति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

४ दन्तमूलप्रत्यासन्नप्रत्यगन्तरप्रदेशस्थानमितीति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च। दन्तमूलप्रत्यासन्नप्रदेशस्थानमितीति क, चिह्नितपुस्तकपाठः।

५ उपरि दन्ताग्रेणेति क, चिह्नितपुस्तकपाठः।

येत। शकारः, चवर्गस्थाने। मधुश्च माधवश्च। षकारः, टवर्गस्थाने। अष्टाभ्यः स्वाहा (१)। सकारः, तवर्गस्थाने। स्तना-उपरवाः (२)। उपध्मानीयः, पवर्गस्थाने। यः पाप्मना इत्यानुपूर्व्येण विज्ञेयं(३)। आनुपूर्व्यनियमात् पञ्चसूष्मसु उक्तेषु हकारोऽवशिष्टः। तस्य विधिमुपरिष्टादाचष्टे॥

करणमध्यन्तु विवृतं॥४५॥

तेषामूष्मणां 'करणमध्यन्तु,' 'विवृतं,' भवति। स्पर्शानां करणसाधर्म्यनिवृत्तिपरः(४) 'तु'शब्दः। करणानां मध्यं, करणमध्यं॥

कण्ठस्थानौ हकारविसर्जनीयौ॥४६॥

'हकारविसर्जनीयौ,' 'कण्ठस्थानौ', भवतः(५)। कण्ठः, स्थानं ययोस्तौ, तथोक्तौ (६)। अनयोः करणाभावः। अहरहर्विधानिनां॥

उदयस्वरादिसस्थानो हकार एकेषां॥४७॥

'एकेषां', मते, 'हकारः', 'उदयस्वरादिसस्थानः' आत्मन-उपरि स्वरादिसस्थानः, भवति, इति वाररुचोक्तं। स्यादेतत्।

१ अष्टावष्टाविति ग, चिह्नितपुस्तकपाठः।

२ अग्निस्ते इति ग, चिह्नितपुस्तके भिन्नपाठः।

३ आन्तपूर्व्येण, आन्तपूर्व्या विज्ञेयाः इति च इ० मु० पु० पाठः।

४ करणसाम्यनिवृत्तिकर इति क, चिह्नितपुस्तकपाठः। करणसाम्यनिवृत्तिपर-इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

५ कण्ठस्थानौ स्थानामिति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

६ ययोस्तौ कण्ठस्थानाविति ग, चिह्नितपुस्तकपाठः।

आदिना सस्थान इत्युक्तौ शेषस्य स्थानान्तरं (१) वक्तव्यं। तदप्यकार इकार उकारे (२) नास्ति। तथा सति स्वरस्य आदित एकमेवस्थानमिति, (३) आदिशब्दवैयर्थ्यं स्यात्। स्वरसस्थान इत्येतावतैव सिद्धेरिति(४)। मैवं। सन्ध्यक्षरेषु शेषस्य स्थानान्तरोपपत्तेः। इकारोऽध्यर्द्ध इति सूत्रद्वयेन शेषभूतवर्णव्यक्तौ(५) तयो स्थानान्तरमपि सिद्धमेव(६)। एवमैकारौकारयोरपि व्याकरणे शेषस्य स्थानान्तरं विहितं विज्ञेयं। सन्ध्यक्षरत्वाविशेषादनयोः (७)। नन्वेवमप्यकुहविसर्जनीयानां कण्ठ इति सन्ध्यक्षरादावकारस्यापि कण्ठस्थानत्वात्तेन सस्थानत्वे कथ्यमाने (८) पूर्व्वसूत्रोक्तेन पौनरुक्त्यमस्य सूत्रस्य स्यात्। मैवं मंस्थाः। एकारौकारयोरादिवर्त्तिनः(९) अकारस्य केवलस्य च विशेषोऽस्ति। केवलस्य करणम्, ओष्ठहनु, नातिव्यस्तं, नात्युपसंहृतञ्च। सन्ध्यक्षरादौ वर्त्तमानस्य तु संवृतकरणतरं (१०)। तस्मात् स्थानकरणयोः सहचरितत्वादादिसस्थान-

---

१ स्थानान्तरत्वमिति इ० मु० पुस्तकपाठः।
२ तदप्यकारेकारोकारेषु इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।
३ स्वरस्यैकमेव स्थानमिति इति क, ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।
४ इत्येतावतैवार्थसिद्धेरिति इति इ० मु० पुस्तकपाठः।
५ सूत्रद्वयेन एकारौकारयोः शेषभूतवर्णव्यक्तौ इति ग, चिह्नितपुस्तकपाठः।
६ प्रसिद्धमेवेति ख, ग, चिह्नितपुस्तकपाठः।
७ सन्ध्यक्षरत्वादविशेषादनयोरिति क, चिह्नितपुस्तकपाठः।
८ तेन समानस्थानत्वे कथ्यमाने इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।
९ एकारौकारादिवर्त्तिन इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। ओकारैकारयोरादिवर्त्तिन इति ग, चिह्नितपुस्तकपाठः।
१० संवृतकरणमिति ग, चिह्नितपुस्तकपाठः।

इत्युक्ते आदिसमानस्थानकरण इति विज्ञेयं। किञ्च पूर्व्वसूत्रे करणाभाव उक्तः। अत्र तु करणवत्वमपि विद्यत इति मतान्तरमुपपद्यते, न पौनरुक्त्यञ्च। यथा, तिग्महेते। यावतीर्वांसामहै। अग्निहोत्रं जुहोति। सम्प्रयतीरहौ(१)। 'उदय'-शब्दः, उत्तरपर्य्यायः। उदयश्चासौ स्वरश्च, तस्य आदिः, तेन सस्थानः, उदयस्वरादिसस्थानः (२)॥

पूर्वान्तसस्थानो विसर्जनीयः ॥ ४८ ॥

'विसर्जनीयः', आत्मनः पूर्व्वस्वरान्तेन 'सस्थानः' समानस्थानकरणः, भवति। अत्रापि पूर्व्वस्वरान्त इति(३) सन्ध्यक्षरमुच्यते। स्वरान्तस्य भिन्नस्थानान्तरत्वाभावात् (४)। यथा, अग्नेः। ब्राह्मणैरायुष्मत्। बाहुवोर्बलं। आयङ्गौः। पूर्व्वस्य, अन्तः, तेन, सस्थानः, पूर्व्वान्तसस्थानः॥

नासिक्या नासिकास्थानाः ॥ ४९ ॥

'नासिक्याः' यमाः, 'नासिकास्थानाः', भवन्ति। यथा, रुक्मं। यान्वा। आह्लारः। रत्नमभजन्त। पाप्मानं॥

---

१ सम्प्रयतीरह्वाविति ख, चिह्नितपुस्तकपाठः।

२ उदयस्वरादिसस्थानः, उदयश्चासौ स्वरश्च, तस्य आदिः, तेन, सस्थानः, उदयस्वरादिसस्थान इति क, चिह्नितपुस्तकपाठः। उदयश्चासौ स्वरस्य तस्य आदिः, तेन सस्थान इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

३ पूर्वस्वर इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

४ स्वरान्तरस्य हि स्थानान्तरत्वाभावात् इति ख, चिह्नितपुस्तकपाठः।

मुखनासिक्या वा ॥ ५० ॥

त एव नासिक्याः 'मुखनासिकाभ्यां वा उच्चारणीयाः[१] भवन्ति। उक्तान्येवोदाहरणानि। मुखञ्च, नासिका च, मुखनासिके। तत्सम्बन्धिनः, 'मुखनासिक्याः' ॥

वर्गवच्चैषु ॥ ५१ ॥

सिंहावलोकनेन [२] वर्गस्योक्तं करणं 'च'कारोऽनुकर्षति। 'एषु' नासिक्येषु, 'वर्गवत्', करणं भवति। वर्गस्येव वर्गवत् ॥

नासिकाविवरणादानुनासिक्यं, नासिकाविवरणादानुनसिक्यम् ॥ ५२ ॥

'नासिकाविवरणात्' घ्राणविलात्, 'आनुनासिक्यं' रागादि कर्त्तव्यं। यथा सुश्लोकां३ सुमङ्गलां३ इत्यादि[३] ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे द्वितीयोऽध्यायः ॥२॥

अथ तृतियोध्यायः।

अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनपरः ॥ १ ॥

'अथ' इत्ययमधिकारः। 'आदौ' पदादौ, 'उत्तरे' पदान्ते च, वर्त्तमानः संहितायां यो दीर्घः, असौ, 'विभागे' पदविभागसमये, 'व्यञ्जनपरः,' 'ह्रस्वं,' आपद्यते। व्यञ्जनपरत्वमत्र यथासंहितास्थं

---

१ मुखनासिकाभ्यामुच्चारणीया इति क, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। मुखेन नासिकाभ्याञ्च उच्चारणीया इति इ० मु० चिह्नितपुस्तकोद्धृतपाठान्तरम्। मुख नासिकाभ्याञ्चोच्चारणीया इति ग, चिह्नितपुस्तकपाठः।

२ सिंहावलोकनन्यायेन इति ग, चिह्नितपुस्तकपाठः।

३ सुश्लोकां सुमङ्गलमित्यादीति क, चिह्नितपुस्तकपाठः।

विज्ञेयं । ननु, दीर्घः कथं लभ्यते, ह्रस्वानन्तरभावित्वात्, देवाशो-कादिग्रहणेषु प्लुतादर्शनाच्चेति ब्रूमः । संहितायामित्यस्याय-मर्थः, कार्यभाजः पदस्य उत्तरपदेन सह सम्बन्धः,(१) न तु पूर्व्व-पदेन सह सम्बन्धनियमः । 'विभागः', अत्र प्रकृतिपदैरुच्यते। प्रकृति-र्नाम यथापाठः । प्रकृतिपदैरिति किं । स्थामयो भुव इत्यत्र जटायां स्थशब्दस्य द्वितीयोच्चारणेपि दीर्घः प्रसज्येत । उत्तरपदेन विभागाभावात् स माभूदिति(२) परिहारः । विभागशब्दस्य(३) अयमर्थः, पदादौ दीर्घस्य पूर्व्वपदेन विभागः, पदान्ते दीर्घस्य उत्तरपदेन विभागः । विभागे व्यञ्जनपर इति किं । ऋत-धामासीत्यत्र (४) माभूदिति । नाधामा धारयेदितिप्राप्तिः(५) । संहितायां यो दीर्घ इति किं (६) । एष वो भरता राजेत्यत्र(७) प्राप्तिसम्पादनार्थं । तथा सति भरता याज्यास्विति (८) याज्या-पदं सार्थकं । नान्यथा । व्यञ्जनमस्मात् परः, इति व्यञ्जन-परः ॥

---

१ सबन्धनियम इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

२ तन्माभूदितीति ग, चिह्नितपुस्तकपाठः ।

३ विभागपदस्येति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

४ ऋतधामा इत्यत्रेति ग, चिह्नितपुस्तकपाठः ।

५ धामा धारयेति प्राप्तिरिति ख, ग, चिह्नितपुस्तकपाठः ।

६ संहितायां दीर्घइतीति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च ।

७ भरता राज्ञेत्यत्रेति ख, चिह्नितपुस्तकपाठः ।

८ याज्यास्वितीति क, चिह्नितपुस्तकपाठः ।

ऊर्ज्जे त्वा वायवः (१) इत्यादावेतल्लक्षणसम्भवादतिव्याप्ति-मुत्तरसूत्रैः परिहरति।

देवाशीकासुम्नाश्वर्त्तावयुनाहृदयाघोक्थाशुद्धा ॥ २ ॥

देवा शीका सुम्ना श्वा ऋता वयुना हृदया अघा उक्था शुद्धा इत्येतेष्ववग्रहेष्वन्त्यस्वरः (२) विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, देवायते यजमानाय। शीकायते स्वाहा। सुम्नायन्तो हवामहे। द्यावापृथिव्या श्वावित्। अप्यकारादितिवचनादिदमप्युदाहर्त्तव्यम्। अश्वावतीᳲ सोमवतीं। ऋतायवः पुरान्नमक्षन् (३) वयुनाविदेकः (४)। हृदयाविधश्चित्। अघायवो मा गन्धर्व्वो विश्वावसुराद्यत्। उक्था मदानां धेनुः। आपो देवीः शुद्धा युवः॥

इन्द्रा वद्वन्वान्परः ॥ ३ ॥

'इन्द्रा' इत्येतस्मिन् अवग्रहे सति, अन्त्यस्वरः, वत्, वन्, वान्, इत्येवम्परो विभागे ह्रस्वमापद्यते। यथा, इन्द्रावतीमपचितीं। इन्द्रावन्तो मरुतः। इन्द्रावान् स्वाहा। इन्द्रेति किं। ऊर्णावन्तं प्रथमः (५)। प्रजावान् (६)। प्रजावतीरनमीवा अयक्ष्माः। एवं पर इति किं। इन्द्रावरुणयोरहं॥

---

१ त्वा वायव इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

२ इत्येतेषु ग्रहणेष्ववग्रहेष्वन्त्यस्वर इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। एतेष्वन्त्यस्वरोवग्रहेषु इति ग, चिह्नितपुस्तकपाठः।

३ ऋतायवः पुरान्नं भक्षन्निति ख, चिह्नितपुस्तकपाठः। ऋतायवः पुरान्नमिति ग, चिह्नितपुस्तकपाठः।

४ वयुनाविदेक इदिति ख, चिह्नितपुस्तकपाठः।

५ प्रथमः सिदयोनीमिति ख, चिह्नितपुस्तकपाठः।

६ असुरप्रजावान् इति ख, चिह्नितपुस्तकपाठः।

चित्रा वपरः ॥ ४ ॥

'चित्रा' 'इत्येतस्मिन्नवग्रहे, अन्तस्वरो वकारपरः, विभागे क्रमत्वमापद्यते । यथा, चित्रावसोः स्वस्ति ते पारमशीय । चित्रेतिकिं । मित्रावरुणाविव । वपर इति किं । चित्रापौर्णमासे(१) दीक्षेरन् ॥

प्रस्थेन्द्रियाद्रविणाविश्वदेव्यादीर्घावीर्य्याविश्वावातात्वाभङ्गुराकर्णकावृष्णियासुगोपर्कसामाघासत्रावर्षापुष्पामेघाप्रास्वा ॥ ५ ॥

प्रस्था इन्द्रिया द्रविणा विश्वदेव्या दीर्घा वीर्य्या विश्वा वाता त्वा भङ्गुरा कर्णका वृष्णिया सुगोपा ऋक्सामा अघा सत्रा वर्षा पुष्पा मेघा प्रा स्वा एतेष्ववग्रहेषु(२) अन्त्यस्वरो विभागे व्यञ्जनपरो क्रमत्वमापद्यते । यथा, प्रस्थावद्रथवाहनं । इन्द्रियावते पुरोडाशम् । द्रविणावतः कुरुते । विश्वदेव्यावते स्वाहाः । दीर्घा धियो रक्षमाणाः । वीर्य्यावन्तमभिमातिषाहम् । विश्वामित्रस्य सूक्तम् । वातावद्वर्षन् । त्वावतो मघोनः । भेत्तारं भङ्गुरावतः । कर्णकावत्येतया (३) । वृष्णियावतस्तव । सुगोपातमो जनः (४) । ऋक्सामाभ्यां यजुषाम् । अघाश्वा देवैनम् । सत्राजितं धनजितं ।

---

१ चित्रापूर्णमासे इति ख, ग, चिह्नितपुस्तकपाठः ।

२ इत्येतेष्ववग्रहेष्विति ख, चिह्नितपुस्तकपाठः इ० मु० पुस्तकपाठस्य ।

३ भूमीं कर्णकावत्येतयेति क, चिह्नितपुस्तकपाठः ।

४ स सुगोपातमो जन इति ग, चिह्नितपुस्तकपाठः ।

वर्षाह्वां जुहोति। पुष्पावतीः सुपिप्पलाः। मेघायते स्वाहा। प्रावणेभिः सजोषसः। स्वाधियञ्जनयत् सूदयच्च॥

लोक एवेष्टा॥ ६॥

'लोके' 'एव' इत्येवम्पूर्वे 'इष्टा' इत्येतस्मिन् अवग्रहे (१) अन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, सममुष्मिँल्लोक इष्टापूर्त्तेन(२)। स लेवेष्टापूर्त्ती। एवम्पूर्वं इति किं। एनम् इष्टापूर्त्ते सꣳ सृजेथाम् (३)। इष्टेति किं। साचादे प्रजापतये॥

शक्तीरथीत्विषीवाशीरात्र्योषध्याहुतीव्याहृतीस्वाहाकृतीह्रादुनीशचीचितीश्रोणीपृष्ठीपूत्यभीचर्षणीपर्यधीपारीशत्रू-विषूवसूअनूहनूसूविभू इत्यवग्रहः॥ ७॥

शक्ती रथी त्विषी वाशी रात्री ओषधी आहुती व्याहृती स्वाहा कृती ह्रादुनी शची चिती श्रोणी पृष्ठी पूती अभी चर्षणी परी अधी पारी शत्रू विषू वसू अनू हनू सू विभू इत्येते ष्ववग्रहेषु, अन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, शक्तीवन्तो गभीराः। रथीतमौ रथीनां। त्विषीमते पथीनां(४)। वाशीमन्त इष्विणः (५)। रात्रीभिरसुम्नन्।

---

१ इत्येतस्मिन्नवग्रहणे इति क, चिह्नितपुस्तकपाठः इत्यस्मिन् ग्रहणे इति इ॰ पुस्तकपाठः।

२ सममुष्मिंल्लोक इष्टापूर्त्तेन गच्छते इति ख, चिह्नितपुस्तकपाठः। लोक इष्टा पूत्तनेति ग, चिह्नितपुस्तकपाठः।

३ एनमिष्टापूर्त्ते संरभेथामिति ग, चिह्नितपुस्तकपाठः।

४ सस्रिञ्जराय त्विषीमते इति ख, चिह्नितपुस्तकपाठः।

५ ते वाशीवामन्त इष्मिण इति क, चिह्नितपुस्तकपाठः।

ओषधीभ्यो वेहतं । आहुतीभिरनूयाजेषु । एताभिर्व्याहृतीभिः प्रजापतिः । स्वाहा कृतीभ्यः प्रेष्य इत्याह । ऋादुनीभ्यः स्वाहा । चष्टे शचीभिः । चितीभ्यामुपायन् । श्रोणीभ्याᳫं स्वाहा । पृष्टीभ्यः स्वाहा । पूतीगन्धस्यापहत्यै । अभीवृतो घृणीवान् । मित्रस्य चर्षणी धृतः । वीरवन्तं परीणसं । अधीवासं या हिरण्यानि । पारीणह्यस्येशे । शत्रूयतो हन्ता । विषूवान् विषूवन्तः (१) । अरमतिर्वसूयुः । अनूराधा नक्षत्रं । अन्कारादि चेति(२) वचनादननूयाजं प्रापणीयमित्येतदप्युदाहरणं (३) भवति । हनूभ्याᳫं स्वाहा । सूयवसिनी मनवे । विभू दाव्ने (४) । 'इत्यवग्रहः' 'इति' अनेन प्रकारेण उक्तः पदसमुदायः, 'अवग्रहः', विज्ञेयः ॥

अवा-सचस्वा-नुदा-मृडा-वर्द्धा-शिक्षा-रक्षा-ऽद्या-भवा-भजा-यत्राचरा-पिबा-ना-धामा-धारया-धर्षाघा-वर्द्धया-बोधात्रा-तत्रामुञ्चाश्वस्या-पृणस्वा-हिष्ठा-त्वन्तरा-जनिष्ठा-युक्ष्वाच्छा ॥ ८ ॥

अवा सचस्वा नुदा मृडा वर्द्धा शिक्षा रक्षा अद्या भवा भजा यत्रा चरा पिबा ना धामा धारया धर्षा अघा वर्द्धया बोधा अत्रा तत्रा मुञ्चा अश्वस्या पृणस्वा हिष्ठा त्वन्तरा जनिष्ठा युक्ष्वा अच्छा इत्येतेष्वनवग्रहेषु (५) अन्त्यस्वरो विभागे व्यञ्जन-

१ विषूवन्तो भवन्ति इति ख, चिह्नितपुस्तकपाठः ।

२ अन्कारादितीति ग, चिह्नितपुस्तकपाठः ।

३ प्रापणीयमप्येतदुदाहरणमिति ग, चिह्नितपुस्तकपाठः ।

४ विभू दावुन्ने इति ग, चिह्नितपुस्तकपाठः ।

५ एतेष्वनवग्रहेषु इति ग, चिह्नितपुस्तकपाठः ।

परो ऋक्त्वमापद्यते। यथा, अवा नो देव्या कृपा। सचस्वा न स्वस्तये। प्रणुदा नः सपत्नान्। मृडा जनित्रे रुद्र (१)। वर्द्धा नो अमवच्छ्रवः। शिक्षा नो अस्मिन्। रक्षा च नो अधि (२)। अद्या देवान् जुष्टतमः। भवा पायुर्विशो अस्याः। व्रजे भजा त्वन्नः। यत्रा नरो मरुतः। प्रचरा सोम दुर्या। पिबा सोममिन्द्रमन्दतु त्वा। रिपवो ना ह देभुः। अपि विकृतम्, अप्यकारात्, इति वचनाभ्यां (३) प्रणवा अध्वव इत्यत्र ऋक्त्वादेशः किं न स्यात्। मैवं। अपि विकृतमिति वचनं कण्ठोक्तपदविषयम्, न त्वकारादिपदविषयम्। प्राणा इत्यस्यापि (४) अकारादित्वान्नायं विधिः। तर्हि वैकृतत्वाभावादना इत्यनीङ्ग्यांशस्य किं न स्यादयं विधिः। एवं रूपसंहितायां दीर्घाभावात्। धामा ह यत् ते अजर बृहस्पते धारया वसूनि। धर्षा मानुषा नक्षः। उतवाघस्यालात्। तमग्ने वर्द्धया त्वम्। बोधा नो अस्य वचसो यविष्ठ। अत्रा ते रूपम्(५)। तत्रा रथमुप(६)। प्रमुञ्चा स्वस्तये। एकस्त्वष्टुरश्वस्या विशस्ता(७)। समयोनीरापृणस्वा घृतेन। आपो हिष्ठा

१ मृडा नो रुद्रोत नो मय इति ख, चिह्नितपुस्तकपाठः। मृडा जरित्र इति ग, चिह्नितपुस्तकपाठः।

२ रक्षा च नो अधि च देवब्रूहि इति ख, चिह्नितपुस्तकपाठः।

३ इति द्वाभ्यां वचनाभ्यामिति इ० मु० पुस्तकपाठः।

४ प्राणा वा इत्यस्यापीति ग, चिह्नितपुस्तकपाठः।

५ अत्रा ते रूपमुत्तममिति ख, चिह्नितपुस्तकपाठः।

६ तत्रा रथमुपशग्मं सदेमेति ख, चिह्नितपुस्तकपाठः।

७ अश्वस्या विशस्तेति ग, चिह्नितपुस्तकपाठः।

मयोभुवः[१]। हि इति किं[२]। प्रतिष्ठा वा एकविंशः। अग्ने त्वन्तरा मृधः। त्वमिति किं। अन्तरतरा तमन्नतो भवति। जनिष्ठा हि जेन्यः। युक्ष्वा हि देवहूतमान्। अच्छा नश्चि द्युमत्तः[३]।

अधाग्नियाज्ये ॥ ९ ॥

अग्निस्य याज्या च 'अग्नियाज्यं', तस्मिन्। चार्थे द्वन्द्व इति समासः। 'अग्निः' इत्यग्निप्रकाशकमन्त्रा इत्युच्यन्ते[४]। चतुर्थ-काण्ड इत्यर्थः। उभावामिन्द्राग्नीप्रभृत्यग्निर्वृत्राणिपर्य्यन्ताः प्रश्नोत्तमानुवाका याज्यासञ्ज्ञका[५] भवन्ति, युक्ष्वा हीत्यनुवाकस्य। अत्र विषये 'अधा'इत्येतस्मिन् ग्रहणे अन्त्यस्वरो विभागे व्यञ्जन-परो ह्रस्वमापद्यते। यथा, अधा ह्यग्ने क्रतोः। अधा च नः शर्म यच्छ। अधा ते सुम्नमीमहे। अधा यथा नः। अग्नि-याज्ये इति किं। अधा मेति तद्वितिष्णवे ॥

कुत्रा-दक्षिणेना-स्वेना-हन्तना-जगामा-रुहेमा-विद्मर्धामा-चक्रमा-वामा-स्तरीमा-भरेमा-वर्षयथेरयथारिथा-पाथाथा-सिञ्चथा-जनयथा-जयतोश्तावता-याता-शृणुता-कृणुता-विभृता ॥ १० ॥

---

१ मयोभुवो भुव इति क, चिह्नितपुस्तकपाठः।

२ हिष्ठेति किमिति ग, चिह्नितपुस्तकपाठः।

३ द्युमत्तम इति ख, चिह्नितपुस्तकपाठः।

४ मन्त्रा लच्यन्ते इति ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च। मन्त्रा लक्ष्यन्ते इति ख, चिह्नितपुस्तकपाठः।

५ याज्यासञ्ज्ञा इति ख, ग, चिह्नितपुस्तकपाठः।

कृत्वा दक्षिणेना स्वेना हन्तना जगामा रुहेमा विद्मा ऋध्यामा चक्रमा चामा स्तरीमा भरेमा वर्षयथा ईरयथा आरिथा पाथा अथा सिञ्चथा जनयथा जयता उच्चता अवता याता शृणुता कृणुता बिभृता एतेष्वनवग्रहेषु(१) अन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, कृत्वाचिद्यस्य स मृतौ। दक्षिणेना वसूनि। स्वेना हि वृत्रꣳशवसा। तपसा हन्तना तं। आजगामा परस्याः। अस्रवन्ती मा रुहेमा स्वस्तये। विद्मा ते अग्ने। ऋध्यामा त ओहैः। चक्रमा कच्चनागः। चामा रेरिहद्वीरुधः समञ्जन्। सुष्टरीमा जुषाणा। अꣳहो मुचे प्रभरमामनीषां। वृष्टिं वर्षयथा पुरीषिणः। उदीरयथा मरुतः। उदारिथा यजेतम्। क्षये पाथा दिवो विमहसः। अथा सोमस्य(२)। यत्रा नरो मरुतः सिञ्चथा मधु। आपो जनयथा च नः। उप प्रेत जयता नर स्थिराः। घृतमुच्चता मधुवर्णम्(३)। अस्मानु देवा अवता हवेषु॥ देवा रथैर्याता हिरण्ययैः। मरुतः शृणुता हवं। संवत्सराय कृणुता बृहन्नमः। पुत्रं बिभृता स्वेनम्॥

भरता याज्यासु॥ ११॥

'भरता' इत्येतस्मिन् ग्रहणे अन्त्यस्वरो 'याज्या' विषये विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, धिया भरता जातवेदसं। भर-

---

१ इत्येतेष्वनवग्रहेषु इति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठस्य। एतेषु इति ग, चिह्नितपुस्तकपाठः।

२ अथा सोमस्य प्रयती युवाभ्यामिति ख, चिह्नितपुस्तकपाठः।

३ उच्चतामधुवर्णमच ते इति ग, चिह्नितपुस्तकपाठः।

ता वसुवित्तमं । वचोग्नये(१) भरता बृहत् । याज्यास्विति किं । एष वो भरता राजा ॥

अत्ता--भवता--नदता--तरतातपता--जुहुता--वोचता-मुञ्चता--चृता-घुष्या-जनया-वर्त्तया--सादया--पारया--दीया-हरा-भरापा-ससादा-सृजा-तिष्ठा-येना ॥ १२ ॥

अत्ता भवता अनदता तरता तपता जुहुता वोचता मुञ्चता चृता घुष्या जनया वर्त्तया सादया पारया दीया हरा भरा अपा ससादा सृजा तिष्ठा येना एतेषु(२) अनवग्रहेष्वन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते । यथा, अत्ता हवीꣳषि । आदित्यासो भवता मृडयन्तः । अहावनदता ह ते । सु वो रुद्राणास्तरता रजाꣳसि । तपता सुवृक्तिभिः । पित्रे जुहुता विश्वकर्म्मणे । विश्वेदेवासो अधिवोचता मे । पदिषितामसुञ्चता यजत्रा । अयस्मयं विचृता बन्धमेतं । परुष्परुरनुघुष्या विशस्ता । मनुर्भव जनया दैव्यं (३) । ताभिरावर्त्तया पुनः । सादया यज्ञं (४) । अग्ने त्वं पारया नव्यः । बृहस्पते परिदीया रथेन । निहारमिन्निमे हरा निहारं । मा नो मर्षीराभरादद्धि । वाजꣳ सृत्या

---

१ नमोग्नये इति ग, चिह्नितपुस्तकपाठः । पूर्व्वं वचोग्नये इति ख, चिह्नितपुस्तकपाठः ।

२ इत्येतेषु इति ख, चिह्नितपुस्तकपाठः ।

३ जनया दैव्यं जनमिति ख, ग, चिह्नितपुस्तकपाठः ।

४ यज्ञं सुकृतस्येति ख, चिह्नितपुस्तकपाठः ।

अपावृधि ([१])। अग्निर्होता निषसादा यजीयान्। सृजा वृष्टिं दिवः। तिष्ठा देवो न सविता। येना सहस्रं वहसि॥

उश्मसी-क्रयी-कधी-श्रुधी-यदी॥ १३॥

उश्मसी क्रयी कधी श्रुधी यदी इत्येतेषु ग्रहणेषु([२]) अन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, उश्मसी गमध्ये। रुद्र यत्ते क्रयी परं। कधी स्वस्मान् अदितेः। इमं मे वरुण श्रुधी हवं। यदी भूमिं जनयन् विश्वकर्म्मा॥

सू-तू-नू-मिथू-मक्षू-ऊ॥१४॥

सू तू नू मिथू मक्षू ऊ इत्येतेषु ग्रहणेषु ([३]) अन्त्यस्वरो विभागे व्यञ्जनपरो ह्रस्वमापद्यते। यथा, मोषूण इन्द्र। आतू न उपगन्त न। तस्य नूरण आ([४])। पाशाण्यसिना([५]) मिथूकः। मक्षू देववतो रथः। अस्माभिरूनु प्रतिचक्ष्याभूत्([६])।

व्युत्पूर्व्व आननुदात्तोनूष्मवत्यनूष्मवति॥ १५॥

'वि' इत्येवम्पूर्व्व 'उत्' पूर्वो वा([७]) 'आन्' इत्येष स्वरः 'अनुदात्तः'

---

१ श्रुत्या अपावृधि इति ख, ग, चिह्नितपुस्तकपाठः।

२ इत्येतेष्वनवग्रहेषु इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठस्य।

३ इत्येतेष्वनवग्रहेषु इतिख, चिह्नितपुस्तकपाठः इ० मु० पुस्तकपाठस्य। एते॰ इति, ग, चिह्नितपुस्तकपाठः।

४ एतमस्य नूरणे इति ख, चिह्नितपुस्तकपाठः।

५ गाशाण्य सिनेति ख, चिह्नितपुस्तकपाठः।

६ अस्माभिरूनु प्रतिचक्ष्याभूत् ऊर्द्धऊ ऊषुण ऊतये इति ख, चिह्नितपुस्तकपाठः अस्माभिरूनु उर्द्ध ऊषुण इति ग, चिह्नितपुस्तकपाठः।

७ वि उत्इत्येवम्पूर्व उत्पूर्वो वेति ख, चिह्नितपुस्तकपाठः।

‘अनूष्मवति’ ऊष्मरहिते पदे(१), वर्त्तमानो व्यञ्जनपरः पदादौ वर्त्तमानत्वादत्र पूर्व्वपदेन(२) विभागे सति ह्रस्वमापद्यते। यथा, व्यानायेति वि अनाय। उदानायेत्युत् अनाय। एवम्पूर्व्व इति किं। यदानूचुस्तेन। पर्य्याणीयाहवनीयस्य। नकारः किमर्थः। यद्रुक्मं व्याघारयति। उदादाय पृथिवीं जीरदानुः। अनुदात्त-इति किं। विश्वकर्म्मा व्यानट्। नेष्टः पत्नीमुदानय। अनूष्म-वतीति किं। मधोर्धारा व्यानशुः। उदानिषुर्महीरिति॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे तृतीयोऽध्यायः॥ ३॥

अथ चतुर्थोऽध्यायः।

अथ प्रग्रहाः॥ १॥

‘अथ’ इत्ययमधिकारः। ‘प्रग्रहाः’, उच्यन्ते, इत्येतदधिकृतं विज्ञेयम् (३)॥

नावग्रहः॥ २॥

‘अवग्रहः,’ प्रग्रहो ‘न’, भवति॥

---

१ ऊष्मरहिते पदादौ इति क, चिह्नितपुस्तकपाठः।

२ वर्त्तमानत्वात् पूर्वपदेन इति ख, ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

३ अधिकृतं वेदितव्यम्, इतउत्तरं यद्वक्ष्याम इति ग, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

ओकारः सांहितोकारव्यञ्जनपरः, ग्नौ नहिपरः द्वे इति वक्ष्यति। एतत् उद्दिश्य पुरस्तादपवादोऽनेन विधीयते। यथा, तनूनपादसुरः। अग्ने अर्धं यजमानं। अग्नीषोमौ मा। द्वे द्वे पुरोऽनुवाक्ये कुर्य्यात्। अवग्रह इति जात्यपेक्षायामेकवचनं॥

अन्तः॥३॥

पदस्य 'अन्तः', प्रग्रहसञ्ज्ञो भवति। यथा, देवते समृद्धे। अत्राह, किम् अपदान्तोऽपि प्रग्रहः स्यात्। अत्रोच्यते, ऊकार-इत्यविशेषेण वक्ष्यति, ओकारोऽसांहितोकारव्यञ्जनपर इति, चौयत्प्रपर इति च। अपदान्तस्य ऊकारस्य ओकारस्य(१) चौशब्दस्य वा प्रग्रहत्वं माभूदिति(२)। ननु, सिद्धमेवैतत्। एतत्सूत्रशेषे(३) उत्तरसूत्रेऽपिशब्देनान्वादेशोन्त्यस्यैव कार्य्यस्य निर्व्वाहात्(४) नेति ब्रूमः। अनेकवर्णसमुदाये ह्यन्त्यत्वमुपपन्नं। अयं पुनरेकवर्णनिर्द्देशः। ऊकार इत्यादिवर्णस्य यौ विकारलोपौ तयोरेवान्वादेशः। अन्त्यस्येत्यनेन अन्त्यः प्रग्रह इत्युक्तम्। प्रग्रह-इति सञ्ज्ञामात्रं, न निमित्तं(५) निमित्ती वा। तस्मादत्रान्वादेशो न प्रसरति॥

इतिपरोपि॥४॥

'अपि'शब्दः सिंहावलोकनेन अथादावुत्तरे विभागे इत्यत

---

१ ओकान्तस्येति क, चिह्नितपुस्तकपाठः।

२ चौशब्दस्य ग्रहणं मा भूदिति ख, चिह्नितपुस्तकपाठः।

३ एतत् सूत्रशेषभूते इति ख, चिह्नितपुस्तकपाठः, इ० मु० पुस्तकपाठश्च।

४ कार्य्यनिर्वाहात् इति ग, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

५ न तु निमित्तमिति ख, चिह्नितपुस्तकपाठः। इ० मु० पुस्तकपाठश्च।

विभागपदमन्वादिशति। सोऽयं प्रग्रहो विभागे 'इतिपरोऽपि', भवति। यथा, देवते इति। उभे इति। 'इति' शब्दः, परः, यस्मात्, असौ, इतिपरः॥

ऊकारः॥ ५॥

'ऊकारः', पदान्तः सर्वत्र प्रग्रहो भवति। पदसमये वर्त्तमानः। यथा, हनू वा एते। वासन्तिकावृतू। बाहू उपस्तुतं। पदसमये वर्त्तमान इति किं। सूतूनूमिथूमच्चूज इत्यादावपि स्यात्(१)।

ओकारोऽसाꣳहितोऽकारव्यञ्जनपरः॥ ६॥

'असाꣳहितः', 'ओकारः', 'अकारपरः(२) 'व्यञ्जनपरो वा प्रग्रहः स्यात्। यथा, विद्माहि सूनो असि। विष्णो हव्यꣳ रक्षस्व। असाꣳहित इति किं। सोऽब्रवीत्। एवम्पर इति किं। विष्णवे ह्यीदम्। संहितानिमित्तः, सांहितः, न साꣳहितः असाꣳहितः। अकारश्च व्यञ्जनञ्च अकारव्यञ्जने एते परे(३) यस्मात् सः तथोक्तः॥

समह्रदथपितृपूर्व्वश्च॥ ७॥

पूर्व्वोक्तनिमित्ताभावेपि (४) कार्य्यविधानार्थमोकारं विशि-

---

१ इत्यादि इति ग०, इ० मु० च।

२ अकारपरो वेति ग०, इ० मु० च।

३ ते परे इति इ० मु०।

४ पूर्वोक्तपरनिमित्ताभावेपि इति ख०, ग०, इ० मु० च।

नष्टि। 'च'कार ओकारमन्वादिशति। 'स म ह द थ पित्' एवम् 'पूर्वः,' असांहित ओकारः, अकारव्यञ्जनाभ्यामन्यपरोऽपि प्रग्रहो भवति। यथा, सो एवैषैतस्य। माभिर्मारोमो एषाम्। उपहूतां३ हो। इन्द्रो इत्याह। तथो एवोत्तरे। पितो आविशस्व। एवम्पूर्व इति किं। शतक्रतवुद्रॅशमिव। असांॅहित इति किं। प्र सो अग्ने॥

अथैकारेकारौ॥ ८॥

'अथ' इत्ययमधिकारः। 'एकारेकारौ', प्रग्रहत्वेन विशिष्येते[१], इति एतदधिकृतं वेदितव्यं॥

अस्मे ॥९॥

'अस्मे' इत्येतस्मिन् ग्रहणे, अन्त्यस्वरः प्रग्रहो भवति। यथा, अस्मे ते बन्धुः॥

त्वे इत्यनिङ्ग्यान्तः॥ १०॥

'इति'शब्दः पदग्रहणत्वं[२] द्योतयति। 'अनिङ्ग्यान्तः', 'त्वे' इत्येष शब्दः, प्रग्रहो भवति। यथा, त्वे क्रतुमपि। अनिङ्ग्यान्त इति किं। अनागास्त्वे अदिति त्वे तुरासः। इङ्ग्यस्यान्तः इङ्ग्यान्तः, न इङ्ग्यान्तः अनिङ्ग्यान्तः॥

---

१ प्रग्रहत्वेन विधीयेते इति ख०, ग०, इ० मु० च।

२ इङ्ग्यग्रहणत्वमिति ग०, इ० मु० च।

देवते उभे भागधे ऊर्द्ध्वे विशाखे शृङ्गे एने मेध्ये तृप्ते तृद्ये-कनीनिके पार्श्वे शिवे चोत्तमे एवोत्तरे शिप्रे रथन्तरे वत्सरस्य रूपे विरूपे विषुरूपे सदोहविर्द्धाने अधिषवणे अहोरात्रे-धृतव्रते स्तुतशस्त्रे ऋक्सामे अक्ते अर्पिते रैवते पूर्त्ते प्रत्ते-विधृते अनृते अच्छिद्रेबहुले पूर्व्वजे कृणुध्वꣳसदने ॥११॥

देवते उभे भागधे ऊर्द्ध्वे विशाखे शृङ्गे एने मेध्ये तृप्ते तृद्ये कनीनिके पार्श्वे शिवे चोत्तमे एवोत्तरे शिप्रे रथन्तरे वत्सरस्य रूपे विरूपे विषुरूपे सदोहविर्द्धाने अधिषवणे अहोरात्रे धृतव्रते स्तुतशस्त्रे ऋक्सामे अक्ते अर्पिते रैवते पूर्त्ते प्रत्ते विधृते अनृते अच्छिद्रेबहुले पूर्व्वजे कृणुध्वꣳसदने, एतानि पदानि प्रग्रह-सञ्ज्ञानि स्युः। यथा, देवते सम्भृद्धैः। उभे एव रसेनानक्ति। भागधे भागधा अस्मै। भागधे इति किं।(१) अग्न उद्धे। ऊर्द्ध्वे समिधावादधाति। विशाखे नक्षत्रं। वीति किं। तस्मिन् सह-स्रशाखे इति शाखान्तरे। अन्तरा शृङ्गे। मेध्ये एवैने करोति। असंतृप्ते हि हनू। सन्तृद्ये धृत्यै। कनीनिके अग्निष्टोमौ यत्। पार्श्वे परः समानः। शिवे नो द्यावापृथिवी। विकीर्णौ चोत्तमे उपदधाति। चेति किं। सम्याद्योत्तमे भासि। तयो एवोत्तरे निर्व्वपेत्। एवेति किं। नैति षोडश्युत्तरे। शिप्रे अवेपयः। यद्बृह-द्रथन्तरे अन्वर्ज्जयेयुः। संवत्सरस्य रूपे आप्नुवन्ति। विरूपे धापयेते। विषुरूपे अहनी। वत्सरस्य विश्विति किं। अरूच्चितं

---

१ भागे इति किमिति-क०, ग०, इ० मु० च।

दृश आरूपे अन्नं। रूपशब्दस्य प्रतिविशेषणं ग्रहणं विस्पष्टार्थं[१] द्रष्टव्यं। सदो हविर्द्धाने एव सम्मिनोति। सद इति किं। उपरवा हविर्द्धाने खायन्ते। ननु, पदग्रहणेषु पदं गम्येतेति सामर्थ्यात् हविर्द्धाने इत्येकपदस्यैव कार्य्यसिद्धिः, सदःपदं व्यर्थं। मैवं। पदग्रहणे[२] स्थलान्तरे भिन्नरूपस्य सम्भावनायां विशेषणं सार्थकं[३]। भिन्नरूपत्वाभावे तु चोद्यमेवैतद्भवेत्[४]। ननु, तर्हि देवते इति पदग्रहणस्य स्थलान्तरे सोमदेवते मतिविद इत्यत्र च भिन्नरूपत्वात्[५] विशेषणेन भवितव्यं। तच्च नास्ति। उच्यते, देवते इत्यखण्डपदस्यैव कार्य्यं विशेषणं[६] न युज्यते। अखण्डविधानमिति कथं प्रतीयते। ते इत्यंशस्य[७] ते मा पातमित्यादिना पृथक्करणादिति ब्रूमः। मैवं[८]। हविर्द्धाने इत्यस्याखण्डत्वद्योतकं न किञ्चिदप्यस्ति[९], येन सदःपदं वैयर्थ्यमालम्बते[१०]। अधिषवणे जिह्वा चर्म्म[११]। अधोति किं। सवने सवनेऽभिग्टह्णाति।

---

१ प्रतिविशेषणमुच्चारणं विस्पष्टार्थमिति ख०, ग०, इ० म० च।

२ पदग्रहणस्येति क०, ख० च।

३ सार्थकं भवति इति इ० मु०।

४ चोद्यमेतद्भवेदिति ग०, इ० मु० च। चोद्यमतदिति ख०।

५ मतिविद इति भिन्नरूपत्वादिति ख० मतिविद इत्यभिन्नरूपत्वादिति ग०।

६ कार्य्याविधानादत्र विशेषणमिति ख०, ग०, इ० मु० च।

७ ते इत्यस्येति ग०, इ० मु० च।

८ नैवमिति ख०, इ० मु० च।

९ सदो हविर्द्धाने इत्यखण्डत्वद्योतकं न किञ्चित्तथास्ति इति ग०।

१० सदःपदवैयर्थ्यमालम्बते इति इ० मु०। सदःपदवैयर्थ्यमापद्यते इति, सदःपदवैयर्थ्यमावलम्बयते इति, सदःपदवैयर्थ्यमालम्भयते इति च, इ० मु० धृतपाठः।

११ हनू अधिषवणे जिह्वेति ग०।

अहोरात्रे प्राविशन्। अहरिति किं। अतिरात्रे पशुकामस्य। द्यावापृथिवी धृतव्रते अविन्ना(१)। धृतेति किं। यस्य व्रते पुष्टिपतिः स्तुतश्रस्त्वेव एवैतेन दुहे। स्तुते इति किं। ऊर्द्ध्वश्रस्त्वे प्रतिष्ठिते, इति शाखान्तरे। ऋक्सामे वै(२)। ऋगिति किम्। ब्रह्मसामे इति शाखान्तरे(३)। घृतेनाक्ते(४)। भुवनेष्वर्पिते। शाक्वररैवते(५)। जाग्रत्स्वेनमिष्टापूर्त्ते(६)। प्रत्ते कामं(७)। विधृते समानी(८)। वीतिकिम्। अग्निधृते इति(९) शाखान्तरे। सत्यानृते अवपश्यन्। अच्छिद्रे बहुले उभे। पूर्व्वजे पितरा। पूर्व्वेति किं। प्रथमजे इति शाखान्तरे। गीर्भिः कृणुध्वꣳसदने ऋतस्य। कृणुध्वमिति किं अपान्त्वा सदने सादयामि॥

अमी चक्षुषो कार्ष्णी देवता फल्गुनी मुष्टी धी नाभीवपाश्रपणी अहनी जन्मनी सुम्निनी सामनी वैष्णवी ऐक्षवी दर्वी द्यावापृथिवी॥ १२॥

अमी चक्षुषो कार्ष्णी देवता फल्गुनी मुष्टी धी नाभी वपाश्रपणी

---

१ अविन्ना देवीति ख०, ग०।

२ ऋक्सामे वै देवेभ्य इति ख०, ग० च।

३ ब्रह्म मे प्रतिष्ठिते इति शाखान्तरे इति ग०।

४ घृतेनाक्ते वृषणमिति ग०। अक्ते वृषणं दधाथामिति ख०।

५ शक्वररैवते सामनीति ख०, ग० च।

६ इष्टा पूर्त्ते संसृजेथामिति ख०, ग० च।

७ प्रत्ते काममन्नाद्यं दुहाते इति ख०, ग० च।

८ नासिकया चक्षुषी विधृते सर्वत इति ख०।

९ अपि धृते इति ख०।

अहनी जन्मनी सुम्निनी सामनी वैष्णवी ऐन्द्रवी दर्व्वी द्यावापृथिवी एतानि पदानि प्रग्रहसञ्ज्ञानि भवन्ति(१)। यथा, अमीला जहति(२)। चक्षुषी वा एते(३)। कार्ष्णी उपानहा(४)। पितरी देवता। फल्गुनी नक्षत्रम्। देवतेति किं। यद् द्वितीयꣳ सा फल्गुनी। मुष्टीकरोति वाचं। प्रधीतावुक्थ्या। रजतनाभी वैश्वदेवी। वपाश्रपणी प्रहरति। वपेतिकिं। पशुश्रपणीति शाखान्तरे। अहनी द्यौरिवासि। उभे निपासि जन्मनी। सुम्नाय सुम्निनी। सामनी प्रतिष्ठित्यै। वलगहनी वैष्णवी। ऐन्द्रवी तिरश्ची। दर्व्वी श्रीणीष आसनी। द्यावापृथिवी एव खेन। द्यावेति किं। मही द्यौः पृथिवी च नः॥

पूर्वश्च॥ १३॥

'च' कारेणान्वादिष्टद्यावापृथिवी इत्येतस्मात् 'पूर्वः', अपि ईकार एकारो वा पदान्तः प्रग्रहो भवति। यथा, यावती द्यावापृथिवी(५)। अविन्ने द्यावापृथिवी (६)॥

न रुन्धे नित्यम्॥ १४॥

'रुन्धे' इत्यन्तः स्वरो द्यावापृथिवी इत्यस्मात् पूर्व्वोऽपि 'न'

१ सञ्ज्ञानि स्युरिति ग०, इ० मु० च।
२ अमी वा इदमभूवन्निति ग०।
३ एते यज्ञस्येति ग०।
४ कार्ष्णी उपानहावुपमुञ्चत इति ख०, ग० च।
५ द्यावापृथिवी महित्वेति ख०, ग० च।
६ द्यावापृथिवी धृतव्रते इति ख०।

प्रग्रहो भवति। रुन्धे द्यावापृथिवी गच्छ (१)। 'नित्य'शब्दः प्राप्त्यन्तरनिषेधार्थः। अवरुन्धे यदा सहस्रं। वीडादीति-प्राप्तिः।

हरी सहुरी सहूती कल्पयन्ती आपृषती आहुती ॥१५॥

हरी सहुरी सहूती कल्पयन्ती आपृषती आहुती, एतेषु पदेष्वन्त्यस्वरः प्रग्रहो भवति(२)। यथा, हरी ते युञ्जा पृषती(३)। सहुरी सपर्य्याम्। सेति किं। तमाहुरो म्लावयन्तीति(४) शाखान्तरे। सहूती वनतं गिरः। सेति किं। हूती पुनर्जुहोतीति शाखान्तरे। अध्वरं कल्पयन्ती ऊर्ड्वं। युञ्जापृषती अभूतां। आप इति किं। पृषती स्थूलपृषती। पुरोडाशमेते आहुती(५)। आहु इति किं। हुती तस्माद्देवा इति, शाखान्तरे।

पूर्व्वश्च ॥ १६ ॥

'च'कारान्वादिष्टादाहुती इत्येतस्मात् 'पूर्व्वः', अपि(६) ईकार एकारो वा पदान्तः प्रग्रहो भवति। यथा, पुरोडाशमेते आहुती (७)।

---

१ गच्छस्वाहेत्याहेति ख०।

२ एतेष्वन्त्यस्वरः प्रग्रहः स्यादिति ग०, द० मु० च।

३ पृषती अभूतामिति ग०।

४ तमाहुरीद्दयत इति ग०।

५ आहुती जुहोतीति ख०।

६ चकारान्वादेशादाहुती इत्येतस्मात् पूर्वं इति ग०, द० मु० च।

७ एते आहुती जुहुतीति ख०।

वाससी-तपसी-रोदसी ॥ १७ ॥

वाससी तपसी रोदसी, इत्येतेषु पदेष्वन्त्यस्वरः प्रग्रहो भवति (१)। यथा, वाससी इव विवसानौ। दीक्षातपसी अवरुन्धे इमे वै रोदसी तयोः ॥

परश्च ॥ १८ ॥

'च'काराराान्वादिष्टाद्रोदसी इत्येतस्मात् 'परः', ईकार एकारौ वा पदान्तः प्रग्रहो भवति। यथा, अन्विन्द्रꣳ रोदसी वा वसाने ॥

व्यचस्वती-भरिष्यन्ती-नःपृथिवी ॥ १९ ॥

एतेषु पदेष्वन्त्यः स्वरः प्रग्रहो भवति(२)। यथा, व्यचस्वती संवसाथां। अग्निमन्तर्भरिष्यन्ती(३)। द्यावा नः पृथिवी इमं न इति किं। रेजते अग्ने पृथिवी मखेभ्यः ॥

येअप्रथेतामुर्वी--तेअस्य -यंक्रन्दसी-क्रन्दस्वती--तेआचरन्ती-अन्तरैतासु ॥२०॥

येअप्रथेताम् उर्वी तेअस्य यंक्रन्दसी क्रन्दस्वती तेआचरन्ती अन्तरा, 'एतासु' ऋक्षु, ईकार एकारौ वा पदान्तः प्रग्रहो

---

१ इत्येतानि प्रग्रहसञ्ज्ञानि भवन्तीति ख०, ड० मु० च। इत्येतानि प्रग्रहसञ्ज्ञानि स्युरिति ग०।

२ एतेष्वन्त्यस्वरः पदान्त इति ड० मु०।

३ भरिष्यन्ती ज्योतिष्मन्तमिति ख०।

भवति(१)। यथा, ये अप्रथेताममितेभिः। अप्रथेतामिति किं। ये ते पन्थानः। उर्व्वी रोदसी वरिवः (२)। ते अस्य योषणे (३)। अस्येति किं। ते वर्द्धन्त(४)। यं क्रन्दसी अवसा(५)। क्रन्दसीति किं। यमग्ने पृत्सु मर्त्यं। छन्दस्वती उषसा (६)। ते आचरन्ती समाना(७)। आचरन्तीति किं। ते नो अर्व्वन्तो हवनश्रुतः। अन्तरा मित्रावरुणा चरन्ती॥

नोपास्थे ॥ २१ ॥

एतास्वृत्तु 'उपस्थे' इत्यन्तस्वरः(८) प्रग्रह्यो 'न' भवति। यथा, बिभ्रतामुपस्थे। उपेति किं। ये प्रतिष्ठे अबभतां(९)॥

इरावतीप्रभृत्यादाधार ॥ २२ ॥

'इरावतीप्रभृति' इरावतीशब्दमारभ्य (१०) 'आदाधार' दाधारशब्दपर्य्यन्तम्, ईकार एकारो वा पदान्तः प्रग्रह्यो भवति। यथा, इरावती धेनुमती हि भूतं॥

---

१ प्रग्रह्यः स्यादिति ग०।

२ उर्व्वी रोदसी वरिवः कृणोतमिति ख०।

३ योषणे दिव्ये इति ख०।

४ वर्द्धन्त स्वतवसो महित्वानेति ग०।

५ अवसा तस्तभाने इति ख०।

६ उषसा पेपिशाने इति ख०।

७ समानेव योषेति ख०।

८ अन्त्यस्वरः पदान्त इति ग०, इ० मु० च।

९ अभवतां वसूनामिति ख०, ग० च।

१० इरावती इति शब्दमारभ्येति ख०, इ० मु० च।

पूर्वजेप्रभृत्यायं ॥ २३ ॥

'पूर्व्वजेप्रभृति', 'आ अयं', पर्य्यन्तः (१) ईकार एकारौ वा पदान्तः प्रग्रह्यो भवति। यथा, पूर्व्वजे ऋतावरी इत्याह। 'आ' इति पदं(२) मर्य्यादायां वर्त्तते। ननु, पूर्व्वजे पितरेत्यारभ्य अयं पुरोभुव इत्येतत्पर्य्यन्तस्थलमेतत्सूत्रविषयः किं न स्यात्। उच्यते, भवत्पक्षे उपबन्धान्तःपातित्वात् कृणुध्वꣳ सदने इति ग्रहणस्य वैयर्थ्यं माभूदिति(३)। तस्मात् स्थलमेतत्सूत्रविषयः(४) न भवति। नन्वत्र पूर्व्वजेग्रहणमनर्थकं। पूर्व्वजे कृणुध्वꣳ सदने इति तत्रैवोक्तत्वात्। किन्तु वरीप्रभृतीत्येतावतैवालं। नेति ब्रूमः(५)। वरीग्रहणद्वयसम्भवात्, कुत्र वा अवधित्वेन(६) स्वीकार इति सन्देहः स्यात्। किञ्च आसन्नꣳ सन्देहे इतिवचनादुत्तरा-वधिसन्निकृष्टो द्वितीयवरीशब्द एव स्वीकर्त्तव्यः। तथासति पूर्ववरीशब्दस्य च प्रग्रहत्वं न स्यात्। तच्चानिष्टम्। ननु, भवन्मतेपि पूर्वजेद्वयसम्भवात् कुत्र वा ग्रहणमिति सन्देहः समानः। किञ्च युक्त्युक्तमनिष्टञ्च समानं(७)। मैवं। पूर्वजे इति पद

१ अयं पर्यन्तमिति ख०।

२ आङ्पदमिति ग०, इ० मु० च।

३ वैयर्थ्यं स्यात् तन्माभूदितीति इ० मु०।

४ तस्मादेतत्स्थलमेतत्सूत्रविषय इति ग०, इ० मु० च।

५ ऋतावरीप्रभृत्येतावतैवालमिति चेन्नेति ग०।

६ अवधिनियमत्वेनेति ग०, इ० मु० च।

७ यत्तूक्तमनिष्टं तुल्यमिति ग०। युक्तियुक्तसन्निकृष्टञ्च समानमिति ख०।

मत्र कार्य्यभाक्त्वेन नोच्यते, येन पौनरुक्त्यं भवेत्, किन्तु पूर्वस्यासौ जेशब्दस्य पूर्वं जे । एतत्प्रभृतीत्युपलक्षणत्वेनोच्यते(१) ॥ ननु तर्हि उपह्वत इति पदमतिक्रम्य अयमित्यवधित्वेन किमुच्यते (२) । उपह्वत इति पदानां बाहुल्येपि आसन्न९ सन्देहे इति वचनात् प्राथमिकस्यैव ग्रहणसिद्धेः । मैवं । उपह्वत इतिग्रहणे सूत्रगौरवदोषः(३) । उपेत्येतावन्मात्रस्येडग्यांशस्य पदत्वं गौणं(४) । अयं इत्यस्य तु मुख्यम् । मुख्ये सम्भवति न गौणमिति न्यायादयमिति युक्तं ग्रहणम् । नन्वेतेनैव न्यायेन आद्यवधेरनुपपन्नता(५) । नायं पक्षः । मुख्ये सम्भवाभावात्(६) । तथाहि । ह्वयत इति मुख्ये स्वीकृते अभिविधिन्यायेन तस्यापि प्रग्रहत्वं स्यात्(७) । तच्चानिष्टं । अते समानपद इतिवचनादेतदिष्टं न भवतीति चेत् । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमितिन्यायात्, ह्वयत इत्युच्चार्य्य तस्य निषेधकथनादपि तदनुच्चारणमेव रमणीय-

---

१ प्रभृतीत्युपलक्षकत्वेनोच्यते इति ख०, ङ० मु० च । एतत्प्रभृतीनित्युपलक्षकत्वेनोच्यते इति ग० ।

२ इति पदमुपक्रम्यायमित्यवधित्वेन किमर्थमुच्यते इति ग० । इति पदमतिक्रम्यायमित्यवधित्वेन किमर्थमुच्यते इति ङ० मु० ।

३ उपह्वत इति पदग्रहणे तत्र गौरवदोष इति ग०, ङ० मु० च ।

४ उपेत्यैतावन्मात्रभूतस्यादिभूतस्यांशभूतस्येति ग० । उपेत्यैतावन्मात्रस्यादिभूतस्यांशस्येति ङ० मु० च ।

५ आद्यपदस्यानुपपन्नतेति ख०, ग० च ।

६ मुख्यसम्भवाभावादिति ग०, ङ० मु० च ।

७ तस्यापि ग्रहणं स्यादिति ख०, ग०, ङ० मु० च ।

मिति(१) मुख्यसम्भवाभावस्तदवस्थ एव । तस्मादस्मिन् सूत्रेऽनुप-पत्तिलेशो नास्ति ॥

इमे गर्भमुपैवरसेनपरः ॥ २४ ॥

'इमे', इत्यन्त्यस्वरो गर्भम् उपएव रसेन, एवम्परः प्रग्रहः(२) स्यात् । यथा, यदिमे गर्भमदधातां । इमे उपावत्स्यतः । इमे एव रसेनानक्ति । रसेनेतिकिं । इम एवास्मै लोकाः । एवम्परइति किं । अध्वर्त्तव्या वा इमे देवाः ॥

क्रूरमापःसजूर्ब्रह्मजैतेषु च ॥ २५ ॥

इमे इति शब्दमन्वादिशति 'च'कारः(३) । क्रूरं आपः सजू ब्रह्मज, 'एतेषु' अनुवाकेषु, इमे, इत्यन्त्यस्वरः, पूर्व्वोक्तपरनिमित्ताभावेपि प्रग्रहो भवति । क्रूरमिव वेत्यत्र यथा, इमे वै रोदसी । आपो वरुणस्येत्यत्र यथा, इमे एवोपधत्ते । सजूरब्द इत्यत्र यथा, इमे अश्विना संवत्सरः । ब्रह्मजज्ञानमित्यत्र यथा, न हीमे यजुषाप्तुं(४) । जेति किं । ब्रह्मवादिन इत्यत्र चय इमे लोकाः(५) इत्यस्य प्रग्रहत्वं माभूदिति ॥

---

१ वरमिति ग० ।

२ एवम्परः पदान्तः प्रग्रह इति ग०, इ० मु० च ।

३ इमे इति चशब्दोन्वादिशति इति इ० मु० । चकार इमे इति शब्दमन्वादिशतीति ख० ।

४ यजुषाप्तुमर्हतीति ख० ।

५ ब्रह्मवादिनो वदन्तीत्यत्र इमे लोका इति ग० । ब्रह्मवादिनो वदन्त्यङ्गिरित्यय इमे लोका इति ख० ।

पूर्णे च ॥ २६ ॥

'च'शब्दो ब्रह्मजज्ञानमित्यन्वादिशति । 'पूर्णे' इत्यन्तस्वरः ब्रह्मजज्ञानमित्यनुवाके प्रग्रह्यो भवति । यथा, पूर्णे उपदधाति । पूर्णे एवैनं । अस्मिन्ननुवाक इति किं । यो वै पूर्ण आसिञ्चति ॥

दृढे ॥ २७ ॥

'दृढे'इत्यन्त्यस्वरः (१) सर्वत्र प्रग्रह्यो भवति । यथा, येन द्यौरुग्रा पृथिवी च दृढे ॥

घ्नीचक्रे पपरे ॥ २८ ॥

'घ्नी', 'चक्रे', इत्येते पदे 'पपरे,' प्रग्रह्ये(२) भवतः । यथा, वार्त्तघ्नी पूर्णमासे । चक्रे पृष्ठानि । पपर इति किं । यद्विरूपया वार्त्तघ्नी स्यात् । सन्निधानचक्रे नीचा तं (३) । घ्नीचक्रे इति किं । शका भौमी पान्त्वः । येषामीशे पशुपतिः । पकारः परः याभ्यां ते, पपरे ॥

न्वती ॥ २९ ॥

'न्वती' इत्यन्त्यस्वरः प्रग्रह्यो भवति । यथा, ओमन्वती तेस्मिन् । वृधन्वती अमावास्यायां । नकारेण किं । कर्णकावत्येतया ह स्म ॥

---

१ इत्यस्मिन्नन्त्यस्वरः सर्वत्र इति ख०, इ० मु० च । इत्यन्तस्वर इति ग० ।
२ इत्येते सर्वत्र पदे पपरे प्रग्रह्ये इति ख० ।
३ नीचात वधि इति ख० ।

पपरो न ॥ ३० ॥

सान्निध्यान् न्वतो इति लभ्यते। 'पपरः' न्वतो इत्यन्त्यस्वरः प्रग्रहः 'न' भवति। यथा, मूर्द्धन्वती पुरोऽनुवाक्या भवति॥

समीची ॥ ३१ ॥

'समीची' इत्यन्त्यस्वरः प्रग्रहो भवति। यथा, समीची रेतः सिञ्चतः। पश्चात् समीची ताभिः॥

नपरो न ॥ ३२ ॥

सान्निध्यात् समीची इति लभ्यते। 'न', खलु समीची इत्यन्त्यस्वरः 'न'कार'परः', प्रग्रहो भवति। समीची-नामासि॥

ची यत्प्रपरः ॥ ३३ ॥

'ची' इत्यन्त्यस्वरः 'यत्परः' 'प्रपरः' वा प्रग्रहः स्यात्। यथा, ऐच्चवी तिरश्ची यत्[१]। यत्र प्राची प्रेतं [२]। एवम्पर इति किं। सा प्राची दिक्। तकाररेफाभ्यां किं। गौर्घृताची यज्ञः। प्राची पत्न्यन्वास्ते। चीति किं। एकादशिनी यदग्नौ। प्रजनने प्रजननी [३]॥

---

१ ऐच्चवी तिरश्ची यदाश्वबाल इति ख०। ऐच्चवी तिरश्चो यत्रेति क०।

२ प्रेतमध्वरमिति ख०, ग० च।

३ प्रजनने प्रजननमिति ख०।

आन्मही ॥ ३४ ॥

'आन्' इत्येतद्विशिष्टे 'मही' ग्रहणे अन्त्यस्वरः प्रग्रह्यो भवति [१]। यथा, महान्मही अस्तभायत् ॥ आनिति किं। मही द्यौः पृथिवी च नः। आकारेण किं। वयुनाविदेक इन्मही ॥

पतीश्रुतिः ॥ ३५ ॥

'पती' इत्यस्य यत्र यत्र 'श्रुतिः' श्रवणमस्ति, तत्र तत्र प्रग्रह्यत्वं विज्ञेयं। यथा, द्वौ पती विन्दते। शुभस्पती इदं[२]। श्रुतिरिति किं। दम्पती वामं [३], प्रियमिन्द्राबृहस्पती, इत्यादावपि पदैकदेशे प्रग्रह्यत्वाय ॥

ग्नौ ॥ ३६ ॥

'ग्नौ' इति प्रग्रह्यो भवति। यथा, अन्तराग्नी पशूनां। विश्वामित्रयमदग्नी[४] ॥

न ह्रिपरः ॥ ३७ ॥

ग्नौ इति सान्निध्याल्लभ्यते। 'न' खलु ग्नौ इति पदान्तः 'ह्रिपरः' प्रग्रह्यो भवति। यथा, ऐन्द्राग्नी ह्रि वार्हस्पत्या। एवम्परइति किं। इन्द्राग्नी हवामहे इति शाखान्तरे ॥

---

१ प्रग्रह्यः स्यादिति इ० मु०।

२ इदमर्हमिति ख०।

३ वाममश्नुत इति ख०।

४ यमदग्नी वसिष्ठेनेति ख०, ग० च।

वीड् द्वारौ कृष्णश्चरावो यदापरः ॥ ३८ ॥

'वीड् द्वारौ कृष्णः चरावः यदा' इत्येतत् 'परः' (१) ईकार एकारो वा पदन्तः प्रग्रहो भवति । यथा, धिषणे विड्सती वीड येथां । डकारेण किं । आपश्च मे वीरुधश्च(२) । देवी द्वारौ वा(३) रौ इति किं । द्वादश सम्पद्यन्ते द्वादश । अतिष्ठमाने कृष्णो रूप म्(४) । विसर्गेण किं । चात्वाले कृष्णविषाणां(५) । विवसानौ चरावः । राव इति किं ॥ राये च नः स्वपत्याय(६) । नन्नमाने यदेदन्ता । ननु, यतन्ते यदाचिषुरित्यत्र(७) प्रग्रहत्वं किं न स्यात् । पदग्रहणेषु पदं गम्येतेति वचनात् नेति ब्रूमः (८) ॥

न ज्ञेऽङ्क्ते नित्यम् ॥ ३९ ॥

'ज्ञे' 'अङ्क्ते' 'इत्येतयोरन्त्यस्वरः 'नित्य' प्रग्रहः 'न स्यात् । यथा, वरुणाय राज्ञे कृष्णः । एन्यङ्क्ते कृष्णः(९) । वीड़ादिप्राप्तिरनयोः । 'नित्य' शब्दः प्राप्त्यन्तरप्रतिषेधकप्रयो जकः(१०) । यज्ञेपि कर्त्तोरिति तावब्रूतां । गमयेतो भवत

---

१ इत्येवम्पर इति ख०, ग०, इ० मु० च ।

२ वीरुधश्च मे इति ख० ।

३ द्वारौ मासेति ख०, ग० च ।

४ यज्ञायातिष्ठमाने कृष्ण इति ख० ।

५ विषाणां प्रास्यति इति ग० ।

६ स्वपत्याय देवेति ग० ।

७ यदाचिषुर्दिव्यमित्यत्रेति ग० ।

८ वचनान्न भवतीति ब्रूम इति ख०, ग०, इ० मु० च ।

९ अङ्क्ते कृष्णो रात्रिये इति ख० ।

१० प्राप्त्यन्तरप्रतिषेधक इति ख० ।

इत्यादिना प्राप्तिः । स्वराज्ञे नो बाहो । सोमायस्वेतिप्राप्तिः ॥

आकारैकारपूर्वस्तु बहुस्वरस्य ते थे ॥ ४० ॥

'बहुस्वरस्य' पदस्य, सम्बन्धो 'ते' इति 'थे' इति वा आकारपूर्व्व एकारपूर्व्वो वा प्रग्रहो भवति । यथा, सुजाते यो विद्विषाण्योः । शुक्रामन्थिनौ गृह्येते । पृथिव्या रिरिचाथे(१) । दृꣳहणाय नुदेथे । एवम्पूर्व्व इति किं । आद्वब्रते वा एतत्(२) । त्रीणि ब्रता विदथे अन्तरेषां । बहुस्वरस्येति किं । तत् प्रवाते(३) । यदेते गृह्यन्त एषां । ते थे इति किं । अनूच्यमान आसादयति । वीड्वादिनिमित्तसापेक्षतानिवर्त्तकः 'तु'शब्द इति वररुचिपक्षः । माहिषेयपक्षस्तु वक्ष्यते, पूर्व्वसूत्रोक्तनिषेधनित्यशब्दज्ञापितानुवृत्तिं निवारयतीति । तत्र वररुचिमतं रुचितं(४) । बहवः स्वराः यस्मिन् तत् बहुस्वरं, तस्य । अत्र स्वरशब्देनोपादानवता(५) बहुशब्देन व्यक्तिभेदो विज्ञेयः ॥

न शार्याते ॥ ४१ ॥

'शार्य्याते' इत्यन्त्यस्वरः प्रग्रहः 'न' भवति । यथा, शार्याते अपिवः सुतस्य । पूर्व्वसूत्रप्राप्तौ सत्यां कण्ठोक्त्या निषेधोऽनेन(६) विधीयते ॥

---

१ रिरिचाथे दिवस्येति ख० ।

२ एतद्यजमान इति ग० ।

३ प्रवाते विषजन्ति इति ग० ।

४ रुचिरमिति ग० ।

५ स्वरशब्दोपादानाच्चेति इ० मु० । बहुस्वररूपशब्देनोपादानवतेति ग० ।

६ कण्ठोक्तनिषेधोनेनेति ग०, इ० मु० च । कण्ठोक्तो निषेधोनेनेति ख० ।

ते मापातंनमएनमभिवायुर्गर्भमुपाह्नस्तुपरः ॥ ४२ ॥

मापातं नमः एनमभि वायुः गर्भम् उप अह्नः तु, एवं 'परः' 'ते' इति शब्दः, प्रग्रहः स्यात्। यथा, ते मा पातमास्य। पातमिति किं(१)। ते मास्मिन् यज्ञे(२) परिदधावहै पुनस्ते। नमोऽग्नये। नम इति किं(३)। ते न व्यजयन्त। ते एनमभिसमनह्येतां। अभीति किं। त एनं भिषज्यन्ति ब्रह्मणः। ते वायुर्व्यवात्। युरिति किं। ते वाचꣳ स्त्रियं। ते गर्भमदधातां। ते उपामन्त्रयन्त। ते अह्नोरात्रयोः। ते त्वावनोत्सृज्ये इत्याहुः। उकारेण किं। ते ते धामान्युश्मसि। एवम्पर इति किं। ते देवाः। ते इति किं। बृहदुक्थे नमः(४)। अमुष्मिंल्लोक उपशेरे। यन्ति वा एते सवनाद्येहः॥

अनुदात्तो न नित्यं ॥४३॥

मापातमित्यादिपरोपि ते इत्यन्त्यस्वरः 'अनुदात्तः' 'नित्यं' प्रग्रहो 'न' भवति। यथा, उभाभ्यामुत ते नमः (५)। नित्यमिति किं। लक्षणान्तरप्राप्तस्यापि प्रतिषेधो यथा स्यात्। नमस्ते अस्त्वायुधाय। गमयतो भवत इति प्राप्तिः(६)॥

---

१ मा पातमिति किमिति ख०।

२ यज्ञे उपक्रयध्वमिति ख०।

३ म इति किमिति ग०।

४ वृहदुक्थे नम इति क०, ग० च।

५ बाहुभ्यामुत ते नम इति ख०।

६ भवत इत्यादिना प्राप्तिरिति ड० मु०।

एते तनुवौवैसमेवह्वियज्ञपदिष्टक्-परः ॥ ४४ ॥

तनुवौ वैसं एव हि यज्ञ पत् इष्टक्, एवं 'परः'(१) 'एते' इत्यन्त्यस्वरः (२) प्रग्रह्यो भवति । यथा, तस्यैते तनुवौ । एते वै संवत्सरस्य चक्षुषी । समिति किं । एते वा इडायै स्तनाः । स एते एव नमस्यन्नुपाधावत् । एते हि देवानां । चक्षुषी वा एते यज्ञस्य । एते पदे अथो(३) । यदेते इष्टके उपदधाति । एवम्पर इति किं । अथ कतम एते देवाः । एते इति किं । मनुत एवैनं । पुष्करपर्णे ह्येनं । अग्रे यज्ञपतिं धत्त । सप्तमे पदे जुहोति ॥

परश्च द्वयोः ॥ ४५ ॥

निमित्तिनिमित्तयोः 'द्वयोः', उपरि वर्त्तमानयोः(४) पत् इष्टक् इत्येतयोः(५) 'च'कारान्वादिष्टयोः परत ईकार एकारो वा पदान्तः प्रग्रह्यो भवति । यथा, यज्ञस्य ह्येते पदे । यदेते इष्टके उपदधाति । निमित्तिन उपरि वर्त्तमानयोरिति किं ॥ सप्तमे पदे जुहोति । तस्यास्ते देवीष्टके ॥

---

१ इत्येवम्पर इति ख०, ग०, इ० मु० च ।

२ इत्यन्तस्वरः पदान्त इति ग०, इ० मु० च ।

३ यज्ञस्य ह्येते पदे अथो इति ग० ।

४ निमित्तिन उपरि वर्त्तमानयोरिति ख०, ग०, इ० मु० च ।

५ पदिष्टकशब्दयोरिति इ० मु० ।

स्थःपरः ॥ ४६ ॥

'स्थः' इत्येवं 'परः' ईकार एकारो वा पदान्तः प्रग्रह्यो भवति। यथा, विष्णोः श्याम्रे स्थः (१)। विसर्गेण किं। लोके स्थ युष्मा७्स्ते नु ॥

परश्चोभयोः ॥ ४७ ॥

'च'कारान्वादिष्टयोः पूर्व्वसूत्रोक्तनिमित्तनिमित्तिनोः 'उभयोः' 'परः', ईकार एकारो वा पदान्तः प्रग्रह्यो भवति। यथा, शिल्पे स्थस्ते वामारभेते वा(२)। दृढे स्थः शिथिरे समीची। उभयोरिति किं। वृषणौ स्थ उर्व्वशी। परश्च द्वयोरिति(३) वाच्ये उभयोरिति शब्दान्तरमर्थान्तरज्ञापकं(४)। निमित्तिसहितयोः पूर्व्वसूत्रोक्तयोर्निमित्तयोः परः प्रग्रह्यो भवति, परश्च द्वयोरिति सूत्रार्थः। अत्र तु सूत्रे निमित्तनिमित्तिनोरुभयोः परः प्रग्रहः स्यादिति विषयभेदो विज्ञेयः(५) ॥

सोमायस्वैतस्मिन् ॥ ४८ ॥

'सोमायस्व राज्ञे' इत्येतस्मिन्ननुवाके ईकार एकारो वा

---

१ विष्णोः शुग्रम्रे स्थ इति क०।

२ शिल्पे स्थस्ते वामारभे इति ख०, ग० च।

३ तयोरिति क०, ख०।

४ शब्दान्तरमर्थभिन्नज्ञापकमिति ख०।

५ विशेषाद्भेदो विज्ञेय इति इ० मु०। विशेषणभेदो विज्ञेय इति ग०।

पदान्तः प्रग्रह्यो भवति। यथा, अवी इ धेनू इत्यादि। स्वेति किं। सोमाय पितृमत इत्यत्र माभूदिति॥

द्वे॥४९॥

'द्वे' इत्यन्त्यस्वरः सर्व्वत्र (१) प्रग्रह्यो भवति। यथा, द्वे द्वे सम्भरति। यद्वे नश्येतां॥

परश्च॥५०॥

'च'कारो द्वे इत्यन्वादिशति। द्वे इत्येतस्मात् 'परः' ईकार एकारो वा पदान्तः प्रग्रह्यो भवति। यथा, द्वे शुक्ले द्वे कृष्णे मूर्द्धन्वतीः॥

एकव्यवेतोऽपि॥५१॥

'एकव्यवेतोऽपि' (२) द्वे इत्येतस्मात् पर ईकार एकारो वा पदान्तः प्रग्रह्यो भवति। यथा, द्वे ह्येते देवते (३)। द्वे वाव देवसत्रे। एकेन व्यवेतः (४) एकव्यवेतः। 'अपि'शब्दो द्वे इत्यन्वादिशति, मण्डूकप्लुतिन्यायेन॥

---

१ पदान्तः सर्व्वत्रेति ग०, ङ० मु० च।

२ एकव्यवहितोपि इति ख०, ग० च।

३ देवते सम्यञ्चौ इति ख०।

४ एकेन पदेन व्यवेत इति ख०, ग०, ङ० मु० च।

गमयतो भवतोऽनूकारात् परं तनूयदकरोत्कुर्य्या-दिष्टिष्वब्रूतां प्रवर्त्तास्ताᳪस्तम्नीतां वाचयतिबिभृतस्त्वाग्निं गायत्रं ताभ्यामेवोभाभ्यामवान्तरं पर आषष्ठात् ॥५२॥

'गमयतः' 'भवतः', 'अनूकारात्' उकारव्यतिरिक्तवर्णात्, 'परं', 'भवतः' इति पदं। नञो यद्यप्यभावो मुख्योऽर्थः, तथापि तदन्यार्थता स्वीकृता, लक्ष्यानुसारात्। तनू यत्, अकरोत्, कुर्य्यादिष्टिषु, कुर्यादिति पदमिष्टिषूत्येतत्। 'इष्टयो नाम दश-मादयस्त्रयः प्रपाठकाः (१) उत्तमानुवाकवर्जिताः(२)। अब्रूतां प्रवर्त्त आस्तां स्तम्नीतां वाचयति बिभृतस्त अग्निं गायत्रं ताभ्यामिव उभाभ्याम् अवान्तरम्, इत्येवम्'परः' 'आषष्ठात्' पदात्, पूर्व्वो वर्त्तमान ईकार एकारो वा पदान्तः प्रग्रहो भवति। अभिविधावयम् 'आकारः। तेन सहेत्यभिविधिः। यथा, ते एवैनं प्रतिष्ठां गमयतः। उत्तरावती भवतः। अनूकारात् परमिति किं। दीघन्तिन्तनामानाद्दतू भवतः (३)। एते वै महायज्ञस्यान्ते तनू यत्। यदिति किं। परिपतये त्वा गृह्णामि तनू नप्त्रे त्वा गृह्णामि (४)। बुध्नवती अग्रवती याज्यानुवाक्ये अकरोत्। मानवी ऋचौ धाय्ये कुर्य्यात्।

---

१ त्रयः प्रश्ना इति ख०, ग०, इ० मु० च।

२ उत्तमानुवाकरहिता इति क०, ख० च।

३ दीघन्तेतरामानाद्दतूभवत इति क०।

४ त्वा गृह्णामि तनू नप्त्रे इति ख०, ग० च।

इष्टिष्विति किं। अग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्। ते अब्रूतां वरं वृणावहै। हविर्द्धाने[१] प्राची प्रवर्त्तयेयुः। वर्त्तेति किं। ते दित्याॅ समध्रियन्त त्वया प्रजानामि। इमे वै सहास्तां। वैश्वदेवाग्निमारुते उक्थे अव्यथयन्तौ स्तभ्नीताम्। उत्तमे औदुम्बरी वाचयति। ते एव यजमानस्य रेतो बिभृतस्तस्मात्। तेति किं[२]। मन्महे यावात्मन्वद्विभृतो यौ च रक्षतः। एते दधाते ये अग्निं गायत्रं। गायत्रमिति किं। सधस्थेऽग्निं पुरीष्यम्। एते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव। अत्र पदद्वयमेकं निमित्तमित्येतेतत्पदमुद्दिश्य आषष्ठनियमभङ्गप्रसङ्ग इति चेत्। मैवं[३]। निमित्तैकदेशस्य षष्ठत्वोपपत्तेः। सकलस्यापि निमित्तस्य षष्ठत्वमुपपद्यते[४]। लोकेप्यवयवधर्म्मेणावयविनो विशेषसिद्धेः। तथाहि, कर्णे कुण्डलं धारयन्तं कुण्डली देवदत्त इति वदन्ति। एवेति किं। अपहॅस्यग्ने ताभ्याम्। ये द्वे अहोरात्रे एव ते उभाभ्याम्। उत्सृज्ये इत्याहुर्ये अवान्तरं। अन्तरमिति किं। सन्त्वेवते हेडः। आषष्ठादिति किं। पर इत्युत्तर इति परिभाषया अनन्तरस्यैव परत्वं स्यात्। तन्माभूदिति॥

---

१ हविर्धानी इति ख०।

२ स्तं तिकिमिति क०, ग० च।

३ इति चेन्नायं प्रसङ्ग इति ख०, ङ० मु० च।

४ षष्ठत्वमुपचर्यत इति क०।

न ग्रामी वर्च्चसी मिथुनी मासे लोके धत्ते ॥ ५३ ॥

ग्रामी वर्च्चसी मिथुनी मासे लोके धत्ते, एतेष्वन्त्यस्वरो गमयतो भवत इत्यादिपरोपि प्रग्रहो 'न' भवति। यथा, ग्राम्येव भवति गणवती याज्यानुवाक्ये भवतः। ब्रह्मवर्च्चस्येव भवत्युभयतो रुक्मौ भवतः। अथ मिथुनी भवतः। पूर्णमासे प्रयच्छत्तावब्रूतां। लोके प्रतितिष्ठन्तौ यन्ति द्वौ षड्हौ भवतः। धत्ते ज्योतिष्मतावस्मा इमौ लोकौ भवतः॥

अते समानपदे नित्यमवे चावे च ॥५४॥

निषेधं 'च'कारोन्वादिशति। अते अवे इत्यनयोः पदैकदेशयोरन्त्यस्वरः 'समानपदे' वर्त्तमानो गमयतो भवत इत्यादिपरोपि नित्यं प्रग्रहो न भवति। यथा, अवरुन्धतेऽतिराचावभितो भवतः। अभ्याह्वयते वज्रमेनमभिप्रवर्त्तयति। अनातध्वृष्णावे। उभाभ्यामुत ते नमः। समानपद इति किं। एव ते उभाभ्याम्। अत्र नित्यशब्दः प्राप्तान्तरपरिहारार्थ इति सोदाहरण उपबन्धस्तु देशायेति सूत्रे प्रसङ्गादुक्तम्। समानञ्च तत् पदञ्च समानपदम्, तस्मिन् समानपदे॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः ।

अथ सꣳहितायामेकप्राणभावे ॥ १ ॥

'अथ' इत्ययमधिकारः । 'संहितायामेकप्राणभावे' इत्येतदधिकृतं वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः । संहितेति कोऽर्थः । नानापदसन्धानं संयोग इति सूत्रेणोक्तः संहितार्थः । परः सन्निकर्षः संहितेति वैयाकरणाः पठन्ति । एकसमुत्थः प्राणः एकप्राणः, तस्य भावस्तद्भावः, तस्मिन्, इत्यात्रेयमतं । अन्यथापि समासः सङ्गच्छते, एकप्राणेन भाव्यते जन्यते उच्चार्य्यते इत्येकप्राणभावः । एकेनोच्छ्वासेन यावानुच्चार्य्यते वेदभागः, तावान् 'एकप्राणभावः' इत्यर्थः । अतएवावसाने पदविधिः(१) । ननु संहितायामित्येतावतैवालम्, एकप्राणभाव इति वा उभयारम्भेण किम् । उच्यते, एकप्राणभाव इत्यनारभ्यमाणे प्रवृत्तस्य संहिताविधेः पदावसानत्वं नेष्यते । संहितायामित्यारभ्यमाणे तु पदेष्वेकप्राणभावः(२) उपपद्यते इति वक्ष्यमाणं कार्य्यं कुत्र वा भवतीति(३) सन्देहः स्यात् । तस्मादस्मिन्नुभयारम्भे प्रयोजनमस्ति ॥

यथायुक्तादिविधिः सा प्रकृतिः ॥ २ ॥

'प्रकृतिः' संहितास्वरूपम्, अनेनोच्यते । प्रकृतिर्विक्रमक्रम इति

---

१ नपदविधिरिति क० ।

२ पदेष्वप्येकप्राणभाव इति ग०, ङ० मु० च । पदे एकप्राणभाव इति ख० ।

३ क्व भवतीति ङ० इति मु० ।

विज्ञेयत्वेन विधानात्(१)। 'यथायुक्तात्' यथास्थितात् पदपाठात् कूटस्थात् अविचालिनः(२), 'विधिः' 'सा' 'प्रकृतिः' संहिता(३) विज्ञेया। 'विधिः' विधानं प्रकृतिरित्यर्थः। यथा, स्वधा अस्युर्वी चासि। धन्वन्निव प्रपा असि। सहस्रस्य प्रमा असि। प्रवुध्निया ईरते। ज्या इयꣳ समने। अमिनन्त एवैः। अत्र सूत्रे पदानां परस्परान्वयो महाभाष्यवचनेन(४) विज्ञेयः। तच्च वचनं तावर्णप्रकृतय इत्यत्र पठितव्यम्(५)। एवमत्रापि स्वरितयोर्मध्ये यत्र नीचमित्यादौ मन्तव्यम्॥

तत्र पूर्व्वं पूर्व्वं प्रथमम्॥ ३॥

'तत्र' संहिताविधाने, 'पूर्व्वं पूर्व्वं' पदं सूत्रञ्च, 'प्रथमं' कर्त्तव्यम्। यथा, अच्छ आ इहि इत्यत्र दीर्घं समानाक्षर इति दीर्घः(६)। अच्छा इहि इति स्थिते इवर्णपर एकारमित्येकारे कृते अच्छेहीति भवति। अन्यथा एहीति कृत्वा अच्छशब्देन(७) सन्धीयमाने अच्छैहीति स्यात्। तच्चानिष्टं। पूर्व्वपदकर्त्तव्यत्वे एतदुदाहरणम्। पूर्व्वसूत्रकर्त्तव्यत्वेपि वदामः। यथा, षट्

---

१ विज्ञेयत्वविधानादिति ग०।

२ अविचलित इति ग०, इ० मु० च। अविच्छिन्न इति ख०।

३ प्रकृतिसंहितेति क०, ख०, इ० मु० च।

४ महाभाष्यवचने इति ख०। महाभाष्यवचनाच्चेति ग०, इ० मु० च।

५ पठितमिति ख०। पठन्ति इति ग०, इ० मु० च।

६ दीर्घं समानाक्षरे सवर्णपरे इति दीर्घ इति ख०।

७ अच्छशब्दे इति ख०, ग०, इ० मु० च।

त्रिग्रामनिष्पूर्व्व इति नकारस्य णत्वे कृते उत्तमपर उत्तमऌ-सवर्गीयमित्यनेन टकारस्य णत्वे(१) षण्णवत्या इति भवति। अन्यथा उत्तमपर उत्तममिति सूत्रे प्रथमं प्रवृत्ते सति षण् नवत्या इति स्यात्। तच्चानिष्टं। यथा, वट्(२) स्वयमभिगूर्त्तायेत्यत्र टनकार इति पूर्व्वस्य तकारः, प्रथम ऊष्मपर इति(३)सूत्रद्वयं प्रसक्तं। तत्र पूर्व्वत्वात् टनकारपूर्व्व इत्येतदेव (४) कर्त्तव्यं प्रथमं। अन्यथा वषट् स्वाहेति स्यात्(५)। तच्चानिष्टं। अथवा इमं विष्यामीत्यत्र उपसर्गनिष्पूर्व्वोनुदात्ते पदे स्वरपूर्व्वं व्यञ्जनमिति सूत्रं च(६) प्राप्तं। तत्र द्वित्वसूत्रप्राथम्ये(७) विष्यामीति स्यात्। तन्माभूदिति षत्वमेव प्रथमं कर्त्तव्यं। पूर्व्वं पूर्व्वमिति वीप्सा सर्व्वत्रैवमर्थं(८) समर्थयति॥

त्रपुमिथुपूर्व्वः शकारश्चपरः॥४॥

'त्रपु' 'मिथु' एवम्पूर्व्वः शकारागमो भवति, चकारपरः(९)।

---

१ णत्वे कृते इति इ० मु०। णत्वे सतीति ख०, ग० च।

२ तथा वषट् इति ख०। तथा वट्टेति इ० मु०।

३ ऊष्मपरो द्वितीयमिति ख०, ग०, इ० मु० च।

४ टनकारपूर्व्वस्य तकार इत्येतदेवेति ग०।

५ वट्ठ स्वयमितीति ख०, इ० मु० च।

६ व्यञ्जनं द्विवर्णं व्यञ्जनपरमिति सूत्रद्वयमिति ग०, इ० मु० च। व्यञ्जनमित्यादि सूत्रञ्चेति ख०।

७ द्वित्वसूत्रे प्रथमे कार्य्ये सतीति ख०, ग०, इ० मु० च।

८ सर्व्वथैवमर्थमिति इ० मु०।

९ चपर इति ग०, इ० मु० च।

यथा, सोमश्च मे नपुश्च मे। मिथुश्चरन्तमुपयाति। एवम्पूर्व्व इति किं। विभु च मे प्रभु च मे। एवम्पर इति किं। असिना मिथूकः॥

सुपूर्व्वश्च चन्द्रपरः॥ ५॥

'च'कारः शकारमन्वादिशति। 'सुपूर्व्वः' शकार आगमो भवति, 'चन्द्रपरः'। यथा, सुश्चन्द्रदस्मविश्यते। एवम्पूर्व्व इति किं। प्रचन्द्रमास्तिरति(१)। एवम्पर इति किं। आ मा सुचरिते भज। सु इत्येष शब्दः पूर्व्वो यस्मादसौ सुपूर्व्वः॥

सम्पूर्व्वः सकारः कुरुपरः॥ ६॥

'सम्' इत्येवम्पूर्व्वः 'सकारः' आगमो भवति, 'कुरुपरः'। यथा, यजमानः संस्कुरुते। एवम्पूर्व्व इति किं। पुरोडाशं कुर्व्वीत (२)। एवम्पर इति किं। संस्कृत्यच्छावाकसामं (३) भवति। कुरुशब्दः परो यस्मादसौ कुरुपरः॥

अकुर्व्वं च प्रत्ययात् परः॥ ७॥

'च'कारः सम्पूर्व्वमागममन्वादिशति(४)। 'अकुर्व्वं च' इति

---

१ स्तिरति दीर्घमायुरिति ग०।

२ पुरोडाशं अलं कुर्वितीति ख०, ग० च।

३ संष्टत्यच्छावाकसाममिति ग०।

४ सम्पूर्वत्वमागमश्चान्वादिशतीति ग०, ड० मु० च। सम्पूर्वत्वमागमत्वं चान्वादिशतीति ख०।

प्रग्रहणे (१) 'प्रत्ययात्' 'परः' सकार आगमो भवति, सम्पूर्व्वः। यथा, त इषुऽसमस्कुर्व्वत। प्रत्ययो नाम अकार उच्यते। प्रत्यायन्ते अभिव्यज्यन्ते व्यञ्जनान्यनेनेति प्रत्ययः। सम्पूर्व्व इति किं। अग्निहोत्रं व्रतमकुर्व्वत॥

नीचापूर्व्वो दकार उच्चापरः॥८॥

'नीचापूर्व्वः' 'दकारः' आगमो भवति, 'उच्चापरः'। यथा, मध्यान्नीचादुच्चा स्वधया। एवम्पूर्व्व इति किं। लोकं यन्त्यु-च्चावचाक्षि। एवम्पर इति किं। नीचातन्धच्चि। आगमा एते॥

असम्पूर्वोऽरमृकारः॥९॥

'असम्' इत्येवम्पूर्व्वः' 'ऋकारः' 'अर'विकारमापद्यते। यथा, गृहाणामसमर्त्यै। अत्र(२) निमित्तमेकपदसंस्थं विज्ञेयं। अन्यथा कल्याणी रूपसमृद्धा, वहो ह्येष समृद्धैर, इत्यादावपि भवेत्। ऋकार इति किं। असंतृणेहि(३)॥

अवग्रह आशीर्धूःस्सुवरिति रेफं परः सकारः षकारम्॥१०॥

'अवग्रहे' इति सप्तम्यन्तं पदं, 'आशीः'प्रभृतिभिः प्रत्येक-मभिसम्बध्यते(४)। आशीः धूः सुवः, इत्येतेष्ववग्रहेषु विसर्ज्जनीयो

---

१ अकुर्वेच इति ग्रहणे इति ग०, इ० मु० च। अकुर्व इति ग्रहणे इति ख०।

२ तत्रेति ग०, इ० मु० च।

३ असन्तृणेहि हन् इति ग०।

४ सम्बध्यते विसर्ग इति क०, ग०, च।

रेफमापद्यते। एभ्यः 'परः' यदि वर्त्तते 'सकारः' तर्हि सोपि 'षकारं' आपद्यते। यथा, इत्याशीर्पदयर्चा। धूर्षाहावनस्रू। सुवर्षाजिह्वामग्ने। अवग्रह इति किं। देव सुवस्य ते(१)। कखपकार(२) इति अनेन आशीष्पदयेति प्राप्तं। अघोषपरस्तस्य सस्थानमिति धूःसाहो, सुवःसाहमिति च प्राप्तं॥ तदुभयभङ्गायायमारम्भः। 'इति'शब्द एषामेवैष विशेषो नान्येषामिति प्रकारवाची॥

अथ लोपः॥ ११॥

'अथ'इत्ययमधिकारः। 'लोपः' इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः। अयमधिकारस्तिष्ठन्त्येकयेति(३) सूत्रपर्य्यन्तो मन्तव्यः(४)॥

ईम्पूर्व्वो मकारः॥ १२॥

'मकारः' 'ईम्' इत्येवम्पूर्व्वो, लुप्यते मकारपरश्चेत्। यथा, ईमन्द्रा सुप्रयस। एवम्पूर्व्व इति किं। इमं मे वरुण। दीर्घेण किं। अग्निं मित्रं वरुणं। ईमिति पदग्रहणं। इतरथा पृथिवी मा हिꣳसीः इत्यादौ मकारो लुप्यते(५)। तच्चानिष्टं। मकारपर इति किं। ईङ्काराय स्वाहिङ्कृताय।

---

१ देव सुस्य ते इमसामुष्यायणमिति ख०।

२ कखपकारपर इति ग०, इ० मु० च।

३ तिष्ठन्त्येकया सपूर्व इति ख०।

४ वेदितव्य इति ग०, इ० मु० च।

५ लुप्येतेति ख०, ग०, इ० मु० च।

तुनुपूर्व उदात्तयोर्वकारः ॥ १३ ॥

'तु नु' इत्येवम्पूर्व्वो 'वकारः' लुप्यते । तयोः तुन्वोः 'उदात्तयोः' असतोरिति विभज्य विनियोगो विज्ञेयः । यथा, सत्वै यजेत । इन्वा उपस्तीर्णं(१) । उदात्तयोरिति किं । अनुव्रतहत्यै । अप्यकारादिति प्राप्तिः । एवम्पूर्व्व इति किं । इदं वामावास्ये(२) । वकार इति किं । प्र तु जनयति इति । विदुषो नु यज्ञं(३) । तुश्च नुश्च तुनू तौ पूर्व्वौ यस्मात् स तथोक्तः ॥

उत्पूर्वः सकारो व्यञ्जनपरः ॥ १४ ॥

'व्यञ्जनपरः' 'सकारः' 'उत्पूर्व्वः' लुप्यते । प्रत्युच्चै सयत्वाय । व्यञ्जनमस्मात् परमिति व्यञ्जनपरः । एवम्पूर्व्वइति किम् । जगत्स्था देवाः । सकार इति किं । उत्क्रꣳस्यते स्वाहा । एवम्पर इति किं । उत्सादेन जिह्वामव ॥

एषसस्य इति च ॥ १५ ॥

व्यक्तिविषयः(४) 'इति' शब्दः प्रत्येकमेष इत्यादीन् विसर्ज्जनीयान्तान् द्योतयति(५) । 'च'कारो व्यञ्जनमन्वादिशति(६) । एषः सः स्यः, एषु पदेषु विसर्ज्जनीयो व्यञ्जनपरो लुप्यते । यथा,

---

१ उपस्तीर्णमिच्छन्ति इति ख०, ग० च ।

२ वामावास्ये हविरिति ग० ।

३ यज्ञं शृणोतु इति ख० ।

४ व्यक्तिविशिष्टः इति क०, ।

५ तावद् द्योतयतीति ग० ।

६ व्यञ्जनपरतामन्वादिशतीति ग० ।

एष तं गायत्रः। स ते जानाति। एष स्य वाजी। एवम्पर इति किं। दम एवास्यैव उप तिष्ठते। स इधानः॥

नासः॥ १६॥

'असः' इत्यस्मिन् ग्रहणे, विसर्ज्जनीयः व्यञ्जनपरो 'न' लुप्यते। हृत्स्वसो मयोभूत्। अप्यकारादितिप्राप्तेर्निषेधः॥

इद्विदग्नइमान्नएनौषधीःपरः सः॥ १७॥

इदु इदग्ने इमान्न एना ओषधीः, इत्येवम् 'परः'(१) 'सः' इत्यत्र विसर्ज्जनीयो लुप्यते। यथा, सेदु होता। सेदग्ने अस्तु। इदग्ने इत्येताभ्यां किं। स इज्जनेन। स इद्देवेषु गच्छति। सेमान्नो हव्यदातिं। न इति किं। स इमामभ्यमृशत्। सेनानीकेन। सौषधीरनुरुध्यसे। स इति किं। परो दिवा पर एना॥

अवग्रह इत्येकम्॥ १८॥

'इति' शब्दविशिष्टे 'एकम्' इत्यस्मिन्, 'अवग्रहे' मकारो लुप्यते। यथा, इत्येकैकं तस्य जुहुयात्। अवग्रह इति किं। इत्येकमग्रेय। इतोति किं(२)। यदेकमेकꣳसम्भरेत्॥

---

१ एवम्पर इति ग०, इ० मु० च।

२ इति शब्दविशिष्ट इति किम् इति ग०, इ० मु० च।

तिष्ठन्त्येकया सपूर्वः॥ १९॥

'तिष्ठन्ति'शब्दविषयविशिष्टे(१) 'एकया' इत्यस्मिन् ग्रहणे अन्त्यो वर्णः 'सपूर्व्वः' पूर्व्वसहितः, लुप्यते। यथा, तिष्ठन्त्येकै-कया स्तुतया समायन्ति। तिष्ठन्तीति किं। करोत्येकयैकयोत्-सर्गम्। पूर्व्वेण सह वर्त्तत इति सपूर्व्वः॥

नकारः शकारश्चपरः॥ २०॥

'च'कार'परः' 'नकारः' 'शकारम्' आपद्यते। यथा, अहीꣳश्च सर्व्वान् जम्भयन्। ऋतूꣳश्च तस्य चत्रियां च। कर्णाꣳ श्चाकर्णाꣳश्च। नकार इति किं। शश्चमे। चपर इति किं। तां छन्दोभिरन्वविन्दत्। चकारः परो यस्मादसौ चपरः॥

नायन्नैरयन्नाध्रुवन्नड्वान्घृणीवान्वारुणानेवास्मिन्॥ २१॥

आयन् ऐरयन् आध्रुवन् अनड्वान् घृणीवान् वारुणान् एवा-स्मिन्, एषु ग्रहणेषु नकारः शकारं 'न' आपद्यते, च परोऽपि। यथा, लोकमायन् चतस्रः। यामैरयन् चन्द्रमसि। आध्रुवन् चरुणास्मिन्। अनड्वाञ्च मे धेनुश्च मे। घृणीवान् चेति-तिल्मना। वारुणान् चतुष्कपालान् निर्वपेत्। एवास्मिन् चचुर्धर्त्तः। एवेति किं। अस्मिꣳश्चामुष्मिꣳश्च॥

तकारश्चकारꣳ शचछपरः॥ २२॥

'शचछपरस्तकारश्चकारम्' आपद्यते। यथा, तच्छंयोः।

---

१ शब्दविशिष्टे इति ग०, द० मु० च।

तच्चाददुः। तच्छन्दसाम्। अत्र शचछपर इति सामान्येनोक्तानां (१) निमित्तानां प्रकृतत्वं विज्ञेयम्, मुख्यत्वात्। प्राकृतवैकृतयोः (२) प्राकृतं मुख्यम्। अन्यथा शकारग्रहणवैयर्थ्याच्च (३)। कुतो वैयर्थ्यम्। स्पर्शपूर्व्वः शकारञ्छकारमिति शकारस्य छत्वे कृते तकारञ्चकारं शचछपर इत्येतावतैव सिद्धिरिति ब्रूमः। किञ्च परसूत्रे सति प्रवृत्ते पश्चात् पूर्वसूत्रप्रसरणन्नस्वरसं। तत्र पूर्व्वं पूर्व्वं प्रथममितिनियमभङ्गप्रसङ्गात्॥

जपरो जकारम्॥ २३॥

सान्निध्यात्तकार इति लभ्यते। 'जपरः' तकारः 'जकारं' आप्नोति (४)। यथा, तज्जयानां जयत्वम्। एवम्पर इति किं। तत् प्रवाति॥

नकार एतेषु ञकारम्॥ २४॥

एतेष्वितिबहुवचननिर्द्देश्यजं प्रत्यासन्नमेवापेक्ष्य (५) सूत्रद्वयस्थेषु परनिमित्तेषु सम्प्रत्ययः। तस्मात् 'एतेषु' इति शचछजेषु परत इत्यर्थः। 'नकारो ञकारम्' आपद्यते। यथा, तेनैवैनाञ्छमयति। श्रत्वापत्तौ निषिद्धो यो नकारः सोऽत्र चपरत्वेन

१ सामान्योक्तानामिति ड० मु०।

२ तत्र प्राकृतवैकृतयोरिति ग०, ड० मु० च।

३ शकारग्रहणवैयर्थ्यात् इति ग०, ड० मु० च।

४ आपद्यते इति ग०, ड० मु० च।

५ बहुवचननिर्द्देशात् प्रत्यासन्नमेवानपेक्ष्येति ग०, ड० मु० च।

विषयी क्रियते। लोकमायच्चतस्त्रः। ताञ्छन्दोभिरनु। अप-रूपमात्मञ् जायते। एवम्पर इति किं। तान् स्तव्यान्॥

लपरौ लकारम्॥ २५॥

द्विवचनसामर्थ्यात् गृहीतौ प्रकृतौ तकारनकारौ 'लकारम्'(१) आपद्यते, 'लपरौ'। यथा, यल्लोहितं परापतत्। त्रींल्लोकानुदजयत्। लकारः परः (२) याभ्यां तौ लपरौ॥

नकारोऽनुनासिकम्॥ २६॥

अनुस्वारोत्तमा अनुनासिका इति नकारस्यानुनासिकत्वे सिद्धे पुनरत्रापि तत्कथनमनुपपन्नं। तस्मादत्र लक्षणया 'नकारः' नाम तत्स्थानी लकार इत्यर्थः। असौ 'अनुनासिकं' भजते। पूर्व्वोक्तमेवोदाहरणम्॥

मकारः स्पर्शपरस्तस्य सस्थानमनुनासिकम्॥ २७॥

'स्पर्शपरः' 'मकारः' 'तस्य' स्पर्शस्य, 'सस्थानमनुनासिकं' भजते। यथा, यं कामयेत। शं चमे। तं तेदुश्चचाः। तं प्रत्नथा। समानं स्थानं यस्यासौ सस्थानः, तं। स्पर्शः परो यस्मादसौ स्पर्शपरः॥

अन्तस्थापरश्च सवर्णमनुनासिकम्॥ २८॥

'च'कारो मकारमन्वादिशति। 'अन्तस्थापरः' मकारस्तस्या

---

१ लत्वमिति ग०।

२ लः पर इति ग०, इ० मु० च।

अन्तस्थायाः 'सवर्णं' सदृशम्, 'अनुनासिकम्' अनुनासिकधर्म्म-विशिष्टं, भजते। यथा, संयत्ता आसन्। सुवर्गं लोकम्। संवत्सरः। नन्वनुनासिकमित्यनेन सानुनासिकं कथमुपलभ्या-वहे(१)। उच्यते नितरां परिहारः। यतो धर्म्मवाचकः शब्दो धर्म्मिणमपि कथयति। शुक्लः पटो नीलमुत्पलमित्यादि(२)॥

न रेफपरः ॥ २९ ॥

अन्तस्थात्वाद्रेफपरस्यापि मकारस्य तत्सवर्णानुनासिका-पत्तिः (३) अनेन प्रतिषिध्यते। 'न' खलु मकारो 'रेफ-परः' पूर्व्वोक्तं भजते। यथा, प्रसम्राजं (४)। साम्राज्याय सुक्रतुः। रेफः परो यस्मादसौ रेफपरः॥

यवकारपरश्चैकेषामाचार्य्याणां ॥ ३० ॥

'च'कारो निषेधान्वादेशकः। प्रकृतो मकारः 'एकेषा-माचार्याणां' पक्षे 'यकारपरः (५) 'वकारपरो वा न सवर्ण-मनुनासिकं भजते। यथा, सम् यत्ताः। संवत्सरः॥

उत्तमत्वभावात् पूर्वानुनासिक इत्यात्रेयः ॥ ३१ ॥

'उत्तमस्य नकारस्य वा मकारस्य 'लभावात्' लकारापत्तेः,

---

१ कथं लभ्यते इति ग०, इ० मु० च।

२ इत्यादिवदिति ग०, इ० मु० च।

३ तत्सवर्णानुनासिकप्राप्तिरिति ग०, इ० मु० च।

४ प्रसम्राजं प्रथममध्वराणामिति ग०।

५ यकारपरो वेति ख, ग०, इ० मु० च।

पूर्व्वस्वरः 'अनुनासिकः' भवतीति 'आत्रेयः' नाम मुनिः, मन्यते। यथा, त्रींल्लोकान्। सुवर्गं लोकं। उत्तमयोर्लभावः उत्तमलभावः, तस्मात्। सूत्रद्वयमेतदनिष्टम्॥

ङपूर्वः ककारः सषकारपरः॥ ३२॥

'सकारपरः' 'षकारपरः' वा 'ककारः' आगमो भवति, 'ङकार'पूर्वः'। यथा, प्रत्यङ्क् सोमो अतिद्रुतः। प्रत्यङ्क् षड्ढः(१)। एवम्पर इति किं। प्रत्यङ् होतारम्। एवम्पूर्व्व इति किम्। तत् सवितुः। यत् षोड़शी (२) गृह्यते॥

टनकारपूर्वश्च तकारः॥ ३३॥

'च'कारः सषकारावन्वादिशति। 'टकार'पूर्वः' वा 'नकार'पूर्वः' वा 'तकारः' आगमो भवति, सषकारपरः। यथा, वषट्त् स्वाहा। विद्वान्त् सोमेन यजते। अनूयाजौ षट्त् षड़नूयाजावनूयाजौ षट्। एवम्पर इति किं। षड् वा ऋतवः। तान् रुद्रा अब्रुवन्॥

स्पर्शपूर्वः शकारश्छकारम्॥ ३४॥

'शकारश्छकारम्' आपद्यते 'स्पर्शपूर्व्वः'। यथा, शरच्छ्रौत्री। एवम्पूर्व्व इति किं। आशुः शिशानः। स्पर्शः पूर्वः यस्मादसौ स्पर्शपूर्वः॥

---

१ प्रत्यङ्क् षड़्ढो भवतीति ख० ग० च।

२ तत् षोड़शीति ख०, ग० च।

न मकारपूर्वः ॥ ३५ ॥

'मकारपूर्वः' शकारश्छकारं 'न' आपद्यते। यथा, सᳬशितं मे ब्रह्म। सᳬश्रवाह (१)। स्पर्शत्वान् मकारस्य तपूर्व्वे शकारे प्राप्तं छत्वमनेन निषिध्यते। नन्वेतदनुपपन्नं। रेफोष्मपरः (२) इति मकारस्य लोपविधानान्न शकारस्य छत्वापत्तिनिमित्तमस्तीति। नैवं। छत्वापादकमलोपसूत्रयोश्छत्वापादकस्यैव पूर्व्वत्वात्तत्र पूर्व्वं पूर्व्वमिति न्यायेन (३) छत्वमेव कर्त्तव्यं स्यात्। तथासति मकारः स्पर्शपरस्तस्येति शकारे छत्वमापन्ने (४) सञ्छितं मे ब्रह्मेति स्यात्। तन्माभूदित्यत्र(५) सूत्रमुपपन्नमेव ॥

पकारपूर्वश्च वाल्मीकेः ॥ ३६ ॥

'च'कारः प्रतिषेधाकर्षकः (६)। 'वाल्मीकेः' मते 'पकारपूर्वः' शकारश्छत्वं (७) नापद्यते। यथा, अनुष्टुप्शारदी ॥

व्यञ्जनपरः पौष्करसादेर्न पूर्व्वश्च ञकारम् ॥ ३७ ॥

'पौष्करसादेः' मते 'व्यञ्जनपरः' शकारः स्पर्श'पूर्व्वः' अपि छत्वं

---

१ संश्रवाह्व सौवर्चे न स इति ख०।

२ अथ मकारलोपः रेफोष्मपर इति इ० मु०।

३ नैवं छत्वापादकं मलोपापादकात् पूर्वमतस्तत्र पूर्वं पूर्वं प्रथममितिन्यायेनेति इ० मु०।

४ तथासति मकारस्पर्शस्तत्परे शकारे छत्वमापन्ने इति इ० मु०।

५ तन्माभूदित्येतदिति ख०, ग०, इ० मु० च।

६ प्रतिषेधार्थक इति इ० मु०।

७ छकारमिति ख, ग, इ० मु० च।

'न' आपद्यते। अकारात् 'पूर्वः' नकारस्य 'ञकारं' 'न' आपद्यते। यथा, आदित्यान् श्मश्रुभिः। पापीयान् श्रेयसे। पूर्व इत्युक्ते नकार इति कथं लभ्यते, ञकारापत्तिरस्येति (१) ब्रूमः। प्रसक्तस्यैव प्रतिषेधः (२)। व्यञ्जनं यस्मात् परमिति व्यञ्जनपरः। नैतत् सूत्रद्वयमिष्टं॥

प्रथमपूर्वो हकारश्चतुर्थं तस्य सस्थानं प्लाक्षिकौण्डिन्य-गौतमपौष्करसादीनां॥ ३८॥

'प्लाक्षिप्रभृतीनां मते 'प्रथमपूर्व्वो हकारः' 'तस्य' प्रथमस्य, 'सस्थानं' 'चतुर्थं' भजते। यथा, अर्वाग्घ्येनं। सरड्ढ वा अश्वस्य। तद्धिरण्यं। एवम्पूर्व इति किं। प्रत्यङ् होतारं। हकार इति किं। वाक्त आप्यायतां वषट्ते (३)। तत्ते। प्रथमः पूर्व्वो यस्मादसौ प्रथमपूर्व्वः॥

अविकृत एकेषाम्॥ ३९॥

'एकेषां' मते प्रथमपूर्व्वो हकारः 'अविकृतः' भवति। यथा, अर्व्वाग् ह्येनं॥

चतुर्थोऽन्तरे शैत्यायनादीनां॥ ४०॥

'शैत्यायनादीनां' मते हकारप्रथमयोः 'अन्तरे' मध्ये, प्रथम-

१ ञकारापत्तिरस्यैवेति ख०, ग०, इ० मु० च।

२ प्रसक्तस्यैव हि प्रतिषेधात् इति इ० मु०।

३ वषट ते विष्णो इति ख०।

सस्थाजः 'चतुर्थः' आगमो (१) भवति। यथा, अर्वाग्घ्येनं परैः। आदिशब्देन कौहलीपुत्रभरद्वाजस्थविरकौण्डिन्यपौष्करसादयो गृह्यन्ते॥

मीमा॑ꣳसकानां च मीमा॑ꣳसाकानाञ्च॥४१॥

'च'कारः पूर्व्वोक्तमन्वादिशति (२)। 'मीमांसकानां' चानन्तरातीतं मतं सम्मतं। पूर्व्वमेवोक्तमुदाहरणं। मीमांसकानां पूजार्थं पृथक् सूत्रारम्भः। नैतत् सूत्रत्रयमिष्टम्॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे पञ्चमोऽध्यायः॥५॥

अथ षष्ठोऽध्यायः।

अथ षकारं सकारविसर्जनीयौ॥१॥

'अथ' इत्ययमधिकारः। 'सकारविसर्ज्जनीयौ' 'षकारम्' आपद्यत इत्येतदधिकृतं वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः।

---

१ चतुर्थागम इति ग०, इ० मु० च।

२ पूर्वोक्तविधिमन्वादिशति इति ख०, ग०, इ० मु० च।

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 253.



तैत्तिरीय-प्रातिशाख्यं।

त्रिभाष्यरत्ननाम टीकासहितम्।

THE TAITTIRI'YA PRA'TIS'A'KHYA,

WITH THE

COMMENTARY ENTITLED THE TRIBHA'SHYARATNA.

EDITED BY

RA'JENDRALA'LA MITRA.

FASCICULUS II.

CALCUTTA.

PRINTED AT THE GANES'A PRESS.

1872.

स्वानासोदिव्यापोह्ययमुकमू-मो-प्रो-त्री-मह्नि-द्यवि-पद्य-वग्रहपूर्वः ॥ २ ॥

स्वानासोदिवि आपोहि अयमु कमु ऊ मो प्रो त्री महि द्यवि पदि, इत्येवम्पूर्व्वोवग्रहपूर्व्वस्य सकारः षकारमापद्यते। यथा, उत स्वानासो दिवि षन्तु(१)। स्वानास इति किं। तृतीयस्यामितो दिवि सोम आसीत्। आपो हि ष्ठा मयोभुवः। आप इति किं। न हिं स्वस्वꣳ हिनस्ति। अयमुष्य प्रदेवयुः। कमुष्विदस्य सेनया। अयं कमिति किं। तदु सोम आह। ऊषुण ऊतये (२)। मोषूण इन्द्र। प्रोष्वस्मै (३)। त्रीषधस्था। महिषद्युमत्तमः। य उपद्यविष्ठ। पदिषितां (४)। शुचिषद्वसुः। अयाविष्ठा जनयन् गोष्टोमं द्वितीयं। अवग्रहः पूर्व्वो यस्मादसौ अवग्रहपूर्वः॥

असदामासिञ्चꣳश्च ॥ ३ ॥

असदाम, असिञ्चन्, इत्येतयोः सकारः षकारमापद्यते। यथा, येन कामेन न्यषदामेति। मित्रावरुणावभ्यषिञ्चन्। 'च'कारोवग्रहपूर्व्वत्वान्वादेशकः। अन्वादेशेन किं। अजायां घर्म्मं प्रासिञ्चन्। अवग्रहपूर्व्वत्वेप्यकारेण व्यवेत इत्ययमारम्भः।

---

१ षन्त्वग्ने इति ग०।

२ ऊर्ध्वऊषुण ऊतये इति ख०।

३ प्रोष्वस्मै पुरोरथमिति ख०, ग० च।

४ पदिषितामभुञ्चता यजत्रेति ख०, ग०, च।

ननु, लाघवादकारव्यवेतोपीत्येतावतैवालम्, कण्ठोक्त्या किं। उच्यते, ह्वत्स्वसो मयोभूत् इत्यादौ माभूदिति ॥

उपसर्गनिष्पूर्व्वोऽनुदात्ते पदे ॥ ४ ॥

सर्व्वानुदात्ते 'पदे' वर्त्तमानः सकारः 'उपसर्गनिष्पूर्व्वः' वा[१] षत्वमापद्यते[२]। यथा, अश्मन्नूर्ज्जमिति परिषिञ्चति। इमं विष्यामि। साम्राज्येनाभिषिञ्चामि[३]। यजमाने प्रतिष्ठापयन्ति। निषसाद धृतव्रतः[४]। एतान्युपसर्गपूर्व्वाणि। निष्पूर्व्वं [५] यथा, निष्टनिहि दुरिता। एवम्पूर्व्वं इति किं। सदने सीद[६]। बृहतः शर्म्मणि स्यां। सर्व्वानुदात्त इति किं। विसीमतः [७]। अभिसवना पाहि। पद इति किं। कालार्थं। पदकाले अनुदात्त इत्यर्थः ॥

रासःसप्तेऽग्निर्निर्विदुर्मीढुःपायुभिर्वेःसुमतिर्माकिरीयुरायुराभिःसधिर्नकिस्तकारपरो नित्यं ॥ ५ ॥

रासः सप्ते इत्येताभ्यां विशिष्टे अग्निरित्यस्मिन् ग्रहणे निः विदुः मीढुः पायुभिः वेः सुमतिः माकिः ईयुः आयुः

१ उपसर्गपूर्वो निष्पूर्वो वेति ख०, ग०, इ० सु० च।

२ षकारमापद्यते इति ख०।

३ अभिषिञ्चतीति ग०।

४ धृतव्रतो वरुण इति ग०।

५ निष्पूर्वमपीति ग०।

६ सीद समुद्रे इति ख०, ग० च।

७ विसीमतः सुरुच इति ख०, ग०, च।

आभिः सधिः नकिः, इत्येतेषु च विसर्जनीयः 'तकारपरः' षकारं 'नित्यं' आपद्यते। यथा, अविदुष्टरासः। अग्निष्टत् (१)। मेध्यस्य सप्त अग्निष्टा। एताभ्यां विशिष्ट इति किं। नाकेऽग्निस्ते तनुवं। निष्टपामि गोष्ठं। विदुष्टरꣳ सपेम। अप्यकारादितिवचनादविदुष्टरास इत्युदाहरणं(२)। मीढुष्टम शिवतम। पायुभिष्ट्वा शिवेभिः। पायुिति किं। त्रिभिस्तिष्ठꣳस्तिष्ठति। शोचे वेष्टꣳ हि यज्वा। सुमतिष्टे अस्तु। स्विति किं। प्रमितिस्ते देवानामिति शाखान्तरे। माकिष्टे व्यथिराधर्षीत्। ईयुष्टे पूर्व्वतरां(३)। आयुष्ट आयुर्दाः(४)। आभिष्टे अद्य(५)। अप्स्वग्ने सधिष्टव। नकिष्टं घ्नन्ति। 'नित्य'शब्दः किमर्थः। ऋकाररेफवति अवग्रहप्रतिषेधं (६) वक्ष्यति। अविदुरित्यत्र विसर्जनीयस्यावग्रहस्थत्वात् षत्वं नस्यात्तन्माभूदिति कण्ठोक्तिरपि विदुरित्यस्यैव न त्वविदुरित्यस्येति दौर्बल्यात्। तत्सङ्ग्रहणार्थो नित्यशब्द उपयुज्यते (७)। अघोषपरस्तस्य सस्थानमित्यस्य पुरस्तादपवादोऽयं॥

---

१ अग्निष्टद्विश्वमिति ख०, ग०, च।

२ इत्यप्युदाहरणमिति ख०, ग०, इ० मु० च।

३ पूर्वतरामपश्यन् इति ग०।

४ आयुर्दा अग्ने इति ख०।

५ अद्य गीर्भिरिति ख०, ग०, च।

६ तकारपूर्वौ नित्यं तकारपूर्वत्वात्, तकारात् पर इति निमित्तयोर्नित्यशब्दः। अवग्रह इति निषेधमिति ग०, इ० मु० च। अवग्रह इति प्रतिषेधमिति ख०।

७ प्रयुज्यते इति ख०, ग०, इ० मु० च।

अथ न ॥ ६ ॥

'अथ' इत्ययमधिकारः। 'न' इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः ॥

अवर्णव्यञ्जनशकुनिपत्न्यृतुमृत्युमलिम्लुबृहस्पतिपूर्वः ॥ ७ ॥

'अवर्ण'पूर्वो 'व्यञ्जन'पूर्वश्च शकुनि पत्नी ऋतु मृत्यु मलिम्लु बृहस्पति, इत्येवम्पूर्वश्च सकारः षकारं नापद्यते। यथा, अन्तरिक्षसम् (१)। अवग्रहपूर्वत्वात् प्राप्तिः। आसिञ्चस्व। उपसर्गपूर्वत्वात् प्राप्तिः। ऋक्सामे वै। शकुनिसादेन रथं। पत्नीसंयाजानुप (२)। ऋतुस्था स्तस्य (३)। मृत्युसंयुत इव। नैनं मलिम्लुसेना विन्दति। बृहस्पतिसुतस्य ते। अवग्रहपूर्वत्वादेषां प्राप्तिः॥

ऋकाररेफवति ॥ ८ ॥

ऋकारश्च रेफश्च ऋकाररेफौ, तावस्मिन् स्त इति ऋकाररेफवत् तस्मिन् पदे वर्त्तमानः सकारः षकारं नापद्यते। यथा, विसृजते शान्त्यै। उपसर्गपूर्वत्वात् प्राप्तिः। तस्मात् सविस्रस्यः। अवग्रहपूर्वत्वात् प्राप्तिः ॥

अवग्रहः ॥ ९ ॥

'अवग्रह'स्थः, सकारः षकारं ना पद्यते, उपसर्गपूर्वश्च।

---

१ दुरोणसत्। आसाद्याग्निं मन्यति इति ख०, चिह्नितपुस्तकेधिकः पाठः।

२ पत्नीसंयाजा ऋचमनूच्येति ख०।

३ ऋतस्थास्तस्य वसन्त इति ख०।

अवग्रह इत्यवग्रहस्थो लभ्यते। मन्त्राः क्रोशन्तीत्यत्र मन्त्रस्था यथा। यथाच स्थूलो जानातीति स्थूलदेहस्थः। उदाहरणानि। तस्यां देवा अधिसंवसन्तः। अभिसमगच्छन्तेति। यज्ञानामभि-संविदाने॥

सवस्थानं॥ १०॥

'सव' 'स्थानं' इत्येतयोः सकारः षकारं नापद्यते। सवेति। पदैकदेशो बहूनां पदानामर्थः (१)। यथा, अग्निसवश्चित्यः। अनुसवनं पुरोडाशानां (२)। सवने सवनेभिगृह्णाति। प्रसवा-य सावित्रः। गच्छ गोस्थानं॥

न धिपूर्व्वे॥ ११॥

सवः स्थानमित्येतयोः सकारे 'धिपूर्व्वे' निषेधः 'न' प्रसरति। यथा, अधिषवणमसि। अधिषवणे जिह्वा। अधिष्ठानमारम्भणम्। धीत्ययं वर्णः पूर्व्वो यस्मादसौ धिपूर्व्वः, तस्मिन्॥

सन्तानेभ्यःसप्ताभिःसम्मिताꣳस्तनाꣳसीतꣳस्पशःसक् सनिसनिःसनीःसभेयःसत्त्वासस्यायै॥ १२॥

सन्तानेभ्यः सप्ताभिः सम्मितां स्तनां सीतं स्पशः सक सनि-सनिः सनीः सभेयः सत्त्वा सस्यायै, एतेषु सकारः षकारन्ना-पद्यते। यथा, परिसन्तानेभ्यः स्वाहा। त्रिसप्ताभिः पशुकामस्य। वेदिसम्मितां मिनोति। द्विस्तनां करोति। अनुसीतं वपति।

---

१ बहुपदानामर्थ इति ख०, इ० मु० च।

२ पुरोडाशा इति ग०।

तनू पातः प्रतिस्यग्रः। सगिति पदैकदेशो बहूनाम् (१)। यथा, पश्चात् पृश्निसक्थो भवति। पृश्निसक्थास्त्रयो हैमन्तिकाः। पृश्निसक्थमालभेत (२)। पृश्निसक्थाय स्वाहा। तस्मादेतद्गोसनि। असिस्तनयित्नुसनिरसि। वृष्टिसनीरुपदधाति। सन्नित्येतावतैव सिद्धे किमखिलपदपाठेन। मृधा वा एषोभिषण्णः, निषण्णाय स्वाहा, इत्यादौ माभूदिति। सुसमेयो य एवम्। अभिस त्वा सहोजाः। सुसस्यायै सुपिप्पलाभ्यस्त्वौषधीभ्यः। सन्तानिभ्यः सत्त्वा इत्येतयोरुपसर्गपूर्व्वत्वात् प्राप्तिः। सर्व्वेषामन्येषामवग्रहपूर्व्वत्वात् ॥

न स्वरस्पर्द्धास्तरोमसाहस्रसारथिस्फुरन्तीस्तुब्ज्योतिरायुश्चतुःपूर्वस्तोः ॥ १३ ॥

स्वर स्पर्द्धा स्तरोम साहस्र सारथि स्फुरन्ती स्तुप्, इत्येतेषु सकारः ज्योतिः आयुः चतुः, एवम्पूर्वश्च 'स्तो' इत्यत्र सकारः ऋकाररेफवति अवर्णव्यञ्जन इति चोक्तं निषेधं 'न' आपद्यते, किन्तु षत्वं प्रतिपद्यत इति प्रतिप्रसवार्थोयं 'न'कारः। यथा, अवनिष्वरा। विष्पर्द्धा छन्दः। उपसर्गपूर्वत्वादनयोः प्राप्तिः। सुष्टरोमा जुषाणा। ग्रहणस्य चेदिति वचनादकारगृहीतं साहस्रमनेकार्थम्। यथा, त्रिषाहस्रं चिन्वीत। द्विषाहस्रो वा असौ (३)। कामयते सुषारथिः। विष्फुरन्तो अमित्रान्। सुष्टुप् छन्दः।

---

१ बहुपाठानार्थं इति इ० मु० ख०, च। बहूनां पदानामिति ग०।

२ पृश्निसक्थमालभेत ग्रामकाम इति ख०।

३ असौ लोक इति ग०।

ज्योतिष्टोमं प्रथमम्। आयुष्टोमं तृतीयमुपयन्ति। चतुष्टोमो भवेत्। स्तरीमादीनामिषामवग्रहपूर्वत्वात् प्राप्तिः। ज्योतिरादिपूर्वत्वेन किं। यद् अच्णया स्तोमीयाः। स्तो इति किं। चतुस्तनां करोति। ज्योतिस्त्वा अस्याः॥

तर्हाँ॑स्तस्मिंल्लोकान्विद्वाँ॑स्ताँ॑स्त्रीन्युष्मानूर्द्ध्वान्स्वकानृतूनश्मन्कृण्वन्पितॄननान्कपालाँ॑स्तिष्ठन्नाद्युदात्ते नेमिर्देवान्त्सवनेपशूंस्तकारपरः सकारं प्राक्रतौ नित्ये प्राक्रतौ नित्ये॥ १४॥

तर्हान् तस्मिन् लोकान् विद्वान् तान् त्रीन् युष्मान् ऊर्द्ध्वान् अम्बकान् ऋतून् अश्मन् कृण्वन् पितॄन् अनान् कपालान् तिष्ठन् 'आद्युदात्ते' 'तिष्ठन्' ग्रहणे, नेमिर्देवान् सवनेपशून्, एतेषु ग्रहणेषु 'प्राक्रतः' नकारः 'नित्ये' पदे, वर्त्तमानः 'तकारपरः' 'सकारम्' आपद्यते। यथा, शततर्हाँ॑स्तृहन्ति। तस्मिंस्त्वाद्धामि। इमानेव लोकाँ॑स्तीर्त्वा। विद्वांस्त्रैधातवीयेन यजेत। ताँ॑स्ते दधामि जम्भयोः। त्रीँ॑स्तृचाननु। युष्माँ॑स्तेनु। ऊर्द्ध्वाँ॑स्तानुपव्द्मितः। त्र्यम्बकाँ॑स्तृतीयसवनम्(१)। ऋतूँ॑स्तन्वते(२)। अश्मँ॑स्ते क्षुत्। पुनः कृण्वँ॑स्त्वा(३)। पितॄँ॑स्तन्तुरिति(४)।

---

१ सवनमकुर्वतेति ख०, ग०, च।

२ ऋतूंस्तन्वते कवय इति ख०। ऋतूंस्तन्वते कवयः प्रजानतीरिति ग०।

३ कृण्वंस्त्वा पितरमिति ग०।

४ पितॄंस्तन्तुरिति प्रजा इति ख०।

प्राणाꣳस्तस्यान्तपन्ति। अपिविकृतमितिवचनादेतद्भवति। द्वादशकपालाꣳस्तृतीयसवने। त्रिभिस्तिष्ठꣳस्तिष्ठति। आद्युदात्त इति किं। न प्रत्यतिष्ठन्तावसुकोसि। अप्यकारादिति प्राप्तिः। नेमिर्देवाꣳस्त्वं परिभूरसि। नेमिरिति किं। जातवेदो वपया गच्छ देवान् त्वꣳहि। मध्यन्दिने सवने पशूꣳस्तृतीयसवने। सवन इति किं। प्रजां पशुन्तेनावर्द्धत। तकारपर इति किं। तस्मिन् प्रजापतिः (१)। प्राकृत इति किं। तान् प्रेरय। प्राकृतीयं नकारो मकारस्पर्शपर इति प्राप्तत्वात्। नित्ये तकारऽत किं। विद्वान् सोमेन यजते। अनित्योयन्तकारः। यतः पदसमये नास्ति। तकारः परो यस्मादसौ, तथोक्तः॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे षष्ठोऽध्यायः॥ ६॥

अथ सप्तमोऽध्यायः।

अथ नकारो णकारं॥ १॥

अथेत्यधिकारः। नकारो णकार इत्येतदधिकृतं वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः।

पुषूत्क्रधिसुवःसमिन्द्रास्थूर्युरुवाःषट्त्रिग्रामनिष्पूर्व्वः॥ २॥

पुषू त्क्रधिसुवः समिन्द्रः अस्थूरि उरुवाः षट् त्रिः ग्राम

---

१ प्रजापतिर्लोकान् द्रविणावतः कुरुते इति ख०, चिह्नितपुस्तके धिकः पाठः।

निः, एवम्पूर्व्वौ नकारो णकारमापद्यते। यथा, ऊर्द्ध ऊषुण ऊतये। इन्द्रो धर्त्ता गृहेष्वित्यत्र णत्वं न भवति, पदग्रहणेष्विति-वचनात्। मोषूण इन्द्र। सुसू इत्येतयोर्यदा षत्वं नास्ति तदा णत्वनिषेधार्थम्। वैकृतग्रहणं यथा, सुन ऊतये। सून इन्द्रः। ब्रह्मणा अधि सुवर्ण शुक्रं। अधीति किं। सुवर्न शुक्र स्वाहा। समिन्द्र णो मनसा। समिति किं। वर्त्तयेन्द्र नर्द्दनुद। अस्थूरिणो गार्हपत्यानि सन्तु। उरुक्षद्दुरुणस्कृधि। तस्मा-द्दार्णाम वो हितं। षस्सवत्यै स्वाहा। त्रिणवस्तोमो वसूनां। ग्रामणीय प्राप्नुवन्ति(१)। निर्णिजति ततोऽधि। विसर्गेण किं। निर्नो रयिं सुभोजसं॥

हन्यादुप्यमानश्च॥ ३॥

चकारो निष्पूर्व्वत्वमन्वादिशति। निःशब्दोत्तरयोर्हन्यादुप्य-मानमित्येतयोर्ग्रहणयोर्नकारो णकारमापद्यते। यथा, योनेर्गर्भं निर्हण्यात्। निरुप्यमाणमभिमन्त्रयेत। अन्वादेशः किमर्थः। न निर्हन्यान्न लोहितं(२)।

पारोपरिपरीप्रपूर्व्वः॥ ४॥

पारो परि परी प्र, एवम्पूर्व्वो नकारो णकारमापद्यते। यथा, पारो णश्रश्येसे। परि णो रुद्रस्य(३)। वीरवन्त परी णसं। प्रणो देवी सरस्वती॥

---

१ ग्रामणी राजन्य इति ग०।
२ लोहितं कुर्य्यादिति ख०, ग० च।
३ रुद्रस्य हेतिरिति ख०।

१४

अवर्णव्यवेतोऽपि ॥ ५ ॥

अपिशब्दः पर्य्यायन्वादेशकः(१)। पर्य्यादिपूर्व्वो नकारोऽवर्णव्यवहितोपि(२) णत्वं भजते। यथा, अग्रं पर्य्यणयन्(३)। पर्य्याणीयाहवनीयस्य। प्राणाय स्वाहा। अनुप्राण्यात्(४)। अवर्णव्यवेत इति किं। परिमिनुयात्(५)। प्रमिनाम व्रतानि।

वाहनउह्यमानीयानमयन्यवेनवञ्च ॥ ६ ॥

वाहनः, उह्यमानः, यानं, अयन्, यवेन, वन्, एषु(६) ग्रहणेषु चकाराकृष्टप्रपूर्व्वेषु(७) नकारो णत्वं भजते। यथा, प्रवाहणे वह्निरसि(८)। प्रेति किं। परिमिनुयात्। प्रोह्यमाणोऽधिपतिः(९)। प्रयाणमन्वन्ये(१०)। अयन्निति पदैकदेशो बहुपादानार्थः। तस्मादादित्यः प्रायणीयः। प्रायणीयं कार्य्यं। प्रायणमेषा प्रतिष्ठा(११)। प्रायणीयस्य पुरोऽनुवाक्याः। प्रणी-

---

१ पर्यायन्वादिशतीति ग०, इ० मु० च।

२ अवर्णव्यवेतोपीति ग०, इ० मु० च।

३ अग्र पर्य्यणयतेति ख०।

४ अनुप्राण्यात् प्रथमामिति ख०। प्राण्यात् प्रथमामिति ग०।

५ परिमिनुयात् सप्तेति ख०।

६ एतेष्विति ख०, ग०, इ० मु० च।

७ चकाराकृष्टपूर्वेष्विति ग०,इ०मु०च।

८ प्रवाहणे वह्निरिति ग०।

९ प्रोह्यमाणेधिपतिरिति ग०।

१० प्रयाणमन्वन्यद्दयुरिति ग०। यद्य प्रयाणमन्वय इद्ययुरिति ख०।

११ योवै यज्ञस्य प्रायणं प्रतिष्ठामिति ख०।

यैरन्(१)। वन्निति पदैकदेशो बह्वपादानार्थः। प्रयवेण पश्च(२)। यदि वा तावत् प्रवणं(३)। अन्वादेशेन किं। असि हव्यवाहनः। उदयन् वेद ॥

प्रापूर्व्वस्य ॥ ७ ॥

चकाराकृष्टवन्नित्यत्र ग्रहणे(४) नकारः प्रा इत्येवम्पूर्व्वो णकारं भजते(५)। यथा, प्रावणेभिः सजोषसः ॥

इन्द्रोऽयजुःपूर्व एनंकेन ॥ ८ ॥

इन्द्रः, अयजुः, इत्येवम्पूर्वयोरेनं केन इत्येतयोर्नकारो णत्वं भजते। यथा, इन्द्र एणं प्रथमः। अयजुष्केण क्रियते। एवम्पूर्व इति किं। रुद्र एनं भूत्वा। ब्रह्मवादिनः केन(६)। एनं केनेति किं। इन्द्रो नेषदति(७) ॥

नृश्रोपूर्व्वो मना: ॥ ९ ॥

नृ श्रो इत्येवम्पूर्व्वो मना इत्येवं नकारो णकारं(८) भजते।

---

१ प्रायणीयेष्वन्निति ख०, ग० च।

२ तामासुपयन्ति प्रयवेणेति ख०।

३ आहवनीयात् प्रवणां स्यादिति ग,-चिह्नितपुस्तकेऽधिकः पाठः।

४ चकाराकृष्टवन्नितिग्रहणे इति ग०। चकाराकृष्टे वन्नितिग्रहणे इति इ० मु०।

५ णत्वं भजते इति ख०, ग०, इ० मु० च।

६ केन तद्जाप्नोति ख०, ग० च।

७ नेषदतिदुरितानि विश्वा इति ख०।

८ णत्वमिति ख०, ग०, इ०मु० च।

यथा, नृमणा अजस्रं(१)। श्रीमणाः शतपयाः। एम्पूर्व इति किं। सुमना उपागहि॥

अङ्गानामोने-गानि-गानां-ग्यानि-यामेन ॥ १० ॥

अङ्गानां, ओने, गानि, गानां, ग्यानि, यामेन, एषु(२) नकारः संहितायां णत्वं भजते(३)। यथा, यत्राङ्गाणाᳬ समवद्यति। आयुषि दुरोणे। अतिदुर्गाणि विश्वा(४)। पुरोगाणां चक्षुषे। सुवर्ग्याण्यासन्। अन्तर्यामेणान्तरधत्त॥

रषःपूर्वौ ह्वन्यक्केहन्॥ ११ ॥

ह्वनी, अक्के, हन्, एषु(५) ग्रहणेषु नकारो रेफपूर्वः रष इत्येवम्पूर्वौ वा णत्वं भजते। यथा, अग्निहोत्रह्वणी च। शरद्यपराह्णे। हन्निति पदैकदेशग्रहणं(६) बहूपादानार्थं। रक्षोहणः(७)। वैष्णवान् रक्षोहणः(८)। वृत्रहणं पुरन्दरं। एवम्पूर्व इति किं। साक्क एवास्मै। बलगहनः॥

ऋपूर्वौ मयान्यनी ॥ १२ ॥

मयानी, अनी, इत्यत्र ऋपूर्वौ नकारो णत्वं भजते। यथा,

---

१ नृमणा अजस्रमिन्धान इति ख०।
२ एतेष्विति ग०, इ० मु० च।
३ णत्वमाभजते इति ख०।
४ स नः पर्षदतिदुर्गाणि विश्वा इति ग०।
५ एतेष्विति ग०।
६ पदैकदेश इति ख०, इ० मु० च।
७ रक्षोहणमिति ग०।
८ वैष्णवी रक्षोहणौ इति ख०, ग० च।

दारुमयाणि पात्राणि । त्वे वसूनि पूर्वणीक(१) । एवम्पूर्व इति किं । यानि मृन्मयानि(२) । अग्नयेनीकवते । रेफग्रहणेन किं । स्वनीकसन्दृक् ॥

वाघाषपूर्वस्तष्टं ॥ १३ ॥

वाघा इत्येवम्पूर्वः षकारपूर्वस्य तकारः, टकारमापद्यते(३) । दार्वाघाट इति, दारु आघातः । आयुष्ट आयुर्दाः(४) । वाघा इति किं । प्रवात आदित्यानां । षपूर्व इति किम् । अग्निस्ते तेजः ॥

थस्य ठं ॥ १४ ॥

चकारः षकारपूर्वत्वाकर्षकः । थकारः षकारपूर्वः, ठकारं भजते । यथा, गोष्ठं मा । एवम्पूर्वं इति किं । गच्छ गोस्थानं ॥

न तकारपरः ॥ १५ ॥

वाघाषादिविधिरनधिकृतत्वादुत्पन्नप्रध्वंसी । तस्मादत्र नायं निषेधः(५) । किन्तु प्रकृतौ णत्वविधिरनेन विषयीक्रियते । तकारपरो नकारो णत्वं नापद्यते । यथा, पर्य्यन्तरिच्चात् । पारीपरिपरीप्रपूर्वः, अवर्णव्यवेतीपीत्यादिभ्यां(६) प्राप्तिः ॥

---

१ पुर्वणीक दीन इति ख, ग० च ।
२ मृन्मयानि साचादिति ख०, ग० च ।
३ टकारं भजते इति द० मु० ।
४ आयुर्दा अग्ने इति ग० ।
५ नायं विशेष इति ग० ।
६ अवर्णव्यवेतोपि इत्याभ्यामिति ख०, द० मु० च ।

नह्यतिनूनंनृत्यन्त्यन्योन्याभिरन्यान्यन्तश्चान्तश्च ॥ १६ ॥

चकारो निषेधाकर्षकः। नह्यति, नूनं, नृत्यन्ति, अन्यः, अन्याभिः, अन्यानि, अन्तश्च, एतेषु ग्रहणेषु नकारः, पदान्तश्च नकारो णत्वं(१) न भजते। यथा, वासंसा पर्य्यानंह्यति। अवर्णव्यवेतोपोति प्राप्तिः। प्रनूनं पूर्णबंन्धुरः। परिंनृत्यन्ति(२)। प्रान्यः पंञ्च सति। प्रान्याभिंयच्छति(३)। प्रान्यानिं पात्राणि(४)। पारीपरिपरीप्रपूर्व इत्येषां प्राप्तिः। अनित्येतावता सिद्धे, अन्योन्याभिरन्यानीति किं। प्रतिपदपाठेन अनुप्राप्त्यात् प्रथमामित्यत्र नैष निषेधः प्रसरति। पदान्तो नकारो णत्वं न भजते। यथा, वृत्रहन्क्रूर विद्वान्। रषःपूर्व इति प्राप्तिः॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोध्यायः।

अथ प्रथमः ॥ १ ॥

अथेत्ययमधिकारः। प्रथम इत्येदधिकृतं वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः। विसर्जनीयपर्यन्तोयमधिकारः॥

---

१ पदान्तस्य णत्वमिति ग० इ० सु० च।

२ मार्जालीयं परिनृत्यति इति ख०।

३ यच्छत्वन्वन्यैरिति ग०।

४ पात्राणि युज्यन्त इति ख०।

उत्तमपर उत्तमꣳ सवर्गीयं ॥ २ ॥

उत्तमपरः प्रथम आत्मनः सवर्गीयमुत्तममापद्यते । यथा, वाङ्म आसन् । षण्णवत्यै स्वाहा । तन्महेन्द्रस्य । एवम्पर इति किं । वाक्त आप्यायतां । प्रथम इति किं । इमां नोवाच(१) । उत्तमः परो यस्मादसौ स उत्तमपरः ॥

तृतीयꣳ स्वरघोषवत्परः ॥ ३ ॥

स्वरपरो घोषवत्परश्च प्रथमः, सवर्गीयं तृतीयमापद्यते । यथा, ऋधगया ऋधगुत । यद्वै होतेत्यादि । स्वराश्च घोषवन्तश्च स्वरघोषवन्तः । ते परे यस्मादसौ स तथोक्तः ॥

ककुच्च मकारपरः ॥ ४ ॥

ककुदित्यस्मिन् ग्रहणे अन्त्यो वर्णो मकारपरः, चकाराकृष्टं तृतीयं सवर्गीयमापद्यते(२) । यथा, ककुद्मान् प्रतूर्त्तिः(३) । ककुदिति किं । य उन्मादोत् । एवम्पर इति किं । ककुच्छन्दः(४) । मकारः परो यस्मादसौ मकारपरः । उत्तमपर उत्तमꣳ सवर्गीयमित्यस्यायमपवादः ॥

---

१ वाचं व्याकुर्वितीति इति ख० ।
२ सवर्गीयं तृतीयमापद्यते इति ख०, ग०, इ० सु० च ।
३ प्रतूर्त्तिर्वाजसातम इति ग० ।
४ ककुच्छन्दश्च इति ग० ।

अथ विसर्ज्जनीयः ॥ ५ ॥

अथशब्दो विसर्ज्जनीयं लक्ष्यत्वेनाधिकरोति, इत उत्तरं यदुच्यते । अथ स्वरपरो यकारमित्यवधिभूतोऽयमधिकारः ।

रेफमेतेषु ॥ ६ ॥

स्वरेषु घोषवत्सु च परतः(१) विसर्ज्जनीयो रेफमापद्यते । यथा, तद॒ग्निरा॑ह । आशोर्म॒ ऊर्ज॑ । एतेष्विति(२) बहुवचनान्तस्य सर्व्वनाम्नो निर्द्देशात् स्वरघोषवतां परनिमित्तमुपादानं । तेषामेव प्रकृतत्वात् । एतेष्विति किं । अ॒ग्निश्च॑म॒ इन्द्र॑श्च मे ।

न रेफपरः ॥ ७ ॥

रेफपरो विसर्ज्जनीयो रेफत्वमापद्यते । यथा, सुवो॒ रोहा॑व । अहोरात्रे(३) । घोषवत्वाद्रेफस्य पूर्व्वविधिः प्राप्तः(४) । रेफः परो यस्मादसौ रेफपरः ॥

ह्वारभार्वाहारविभरजीगरकरनन्तर्विवःसुवःपुनरहरहः-प्रातर्वस्तःशमितःसवितःसनुतस्तनुतस्तोतर्होतःपितर्मातर्व्य-ष्टरेष्टर्नेष्टस्त्वष्टः ॥ ८ ॥

ह्वाः, अभाः, वाः, हाः, अविभः, अजीगः, अकः, अनन्तः, विवः, सुवः, पुनः, अहरहः, प्रातः, वस्तः, शमितः, सवितः, सनुतः,

---

१ पर इति ख० ।
२ स्वरेष्वितीति ग० ।
३ रेवती रमध्वमिति ग, चिह्नितपुस्तके-धिकः पाठः ।
४ पूर्व्वविधितः प्राप्तिरिति ख० ।

स्तनुतः, स्तोतः, होतः, पितः, मातः, यष्टः, एष्टः, नेष्टः, त्वष्टः, एतेषु विसर्जनीयो रेफमापद्यते, स्वरघोषवत्परः। यथा, माह्वामि चस्य(१)। योनावभारुखा। तस्माद्धार्णाम वो हितं। मा मे प्र हारस्ति वा इदं। अबिभस्तन्तमबिभरबिभः स्तं। ओषधीरजीगरजोगरोषधीरोषधीरजोगः, अजीगरित्यजीगः। देवत्राकरजत्नारेण। करावरनुदात्ते परे इति वच्यति। तेनैतदपि(२) सिध्यति, अप्यकारादितिवचनादिति चेत्। मैवं। अनुदात्तेऽकःशब्दे तद्भवति। इदन्त्वन्यस्वरार्थमपि(३)। यथा, अर्वाकरकरर्वार्वाकः(४) आद्युदात्तस्वरोयम्(५)। यज्ञपरुषोरनन्तरित्यै(६)। अन्तरनाद्युदात्ते इति वच्यति। तस्मादन्कारादि चेतिवचनात् सिद्धातीति चेत्। मैवं। अनाद्युदात्ते तद्भवति। आद्युदात्तस्वग्मपि ग्रहणं(७)। च विवर्विवश्च च विवः, विवरिति बिवः। सुवरसि सुवर्मे(८)। पुनरासद्य सदनम्। अहरहर्विद्धानिनां। अहारहरित्यनिङ्यान्तो निषिध्यते(९), इत्येवंरूपस्यायं नियमः(१०)। प्रातरुपसदः। दोषा वस्तर्द्धिया वयम्। हवोः शमित-

---

१ दृंहस्व माकार्वसूनामिति ख०।

२ तेनैव तदपि इति ख०, ग०च। तेनैवैतदपि इति इ० मु०।

३ अन्यस्वरार्थमितीति ग०, इ० मु० च।

४ अर्वाकः सलोकः सुकृतं पृथिव्या इति ख, चिह्नितपुस्तकेधिकः पाठः।

५ आद्युदात्तस्त्विदमिति ग०, इ०मु० च।

६ यज्ञपरुषोनन्तरित्यै इति ख०।

७ आद्युदात्तस्वरमिति ख०। आद्युदात्तमिदं ग्रहणमिति ग०। आद्युदात्तार्थमिदं ग्रहणमिति इ० मु०।

८ सुवर्मे यच्छेति ख०, ग० च।

९ अहरहरनोङ्यांभो निषेधिष्यत इति क०। अहरहरिति अनिङ्यान्तो निषिध्यते इति ग०।

१० एवंरूपस्य नायं नियम इति ग०, इ० मु० च।

रिति(१)। देव सवितरेतत्ते। द्वेषः सनुतर्य्युयोतु(२)। स्तनुतरिति(३) शाखान्तरे। एतꣳ स्तोतरेतेन। होतर्य्यदिष्ट सुक्रतो दमूना। मरुतां पितः पितर्मरुतां मरुतां पितः। पृथिवी मातर्मा मा हिꣳसीः। अग्ने यष्टरिदं नमः। अशीयेष्टरेष्टरशीयाशीयेष्टः। नेष्टः पत्नीं पत्नीं नेष्टर्नेष्टः पत्नीं। शिवस्त्वष्टरिहागहि। स्वरघोषवत्पर इति किं। अबिभस्तं भूतानि पुनस्ते मैषां। अवर्णपूर्वस्तु लुप्यत इति क्वचिल्लोपप्राप्तिः। अथ स्वरपरो यकारमिति क्वचिद्यकारप्राप्तिः(४)। ओकारमः सर्व्वोकारपर इति क्वचिदोत्वप्राप्तिः(५)। ता एताः प्राप्तीः प्रतिषेद्धुं ह्यारभाराद्यारम्भः॥

करावरनुदात्ते पदे॥ ९॥

कः, आवः, इत्येतयोर्विसर्ज्जनीयः पदकाले अनुदात्ते पदे वर्त्तमानः स्वरघोषवत्परो रेफमापद्यते। यथा, मिथुयाकर्भागधेयं। सुरुचो वेन आवः, आवरित्यावः। अनुदात्त इति किं। कोस्येश्वरः। आ वो वाजेषु यज्जनाः(६)। एवम्पर इति किं। अधियाम कः समर्च्छौ॥

अन्तरनाद्युदात्ते॥ १०॥

अन्तरित्यस्मिन् पदे अनाद्युदात्ते विसर्ज्जनीयः(७) स्वरघोषवत्

---

१ हवीः३ शमितरिति इति ख०।

२ आराच्चिद् द्वेषः सनुतर्युयोतु इति ख० ग०, च।

३ तनुतरिति ख०।

४ क्वचिद्यत्वप्राप्तिरिति ग०, द० मु० च।

५ क्वचिदोकारप्राप्तिरिति ख०।

६ आ वोवाजेषु यंजुनेति ख०, ग० च।

७ स विसर्जनीय इति ख०।

परो रेफमाप्नोति(१)। यथा, अन्तरग्नेरुचा(२)। अग्निमन्तर्भविष्यन्ती। अन्तर्यामे मघवन्। अनाद्युदात्त इति किं। एषोन्तोन्तं मनुष्यः। एवम्पर इति किं। अन्तस्ते दधामि। अन्तोदात्त-इति वक्तव्ये बहुस्वरत्वं बह्नुपादानार्थं। अन्यथा ह्यन्तोदात्तस्यैव(३)स्यात्। इह तु न स्यात्। अन्तर्वेदि मिथुनौ(४)। अन्तर्यामे मघवन्। आदावुदात्तः(५) यस्य तत् आद्युदात्तं, न आद्युदात्तं अनाद्युदात्तं, तस्मिन्॥

आवृत्परः॥ ११॥

आवृत् इत्येवम्परो विसर्ज्जनीयो रेफमाप्नोति(६)। यथा, जिन्वरावृत् स्वाहा। उग्ररावृत् स्वाहा। भीमरावृत् स्वाहा॥

इतिपरोऽपि॥ १२॥

अपिशब्द आवृत्परत्वकार्य्यमन्वादिशति(७)। असौ विसर्जनीयः, इतिपरो रेफमाप्नोति(८)। इति श्रुतः श्रुतरितीति श्रुतः(९)। अन्वादेशः किमर्थः। हवनश्रुत ह(१०)। इति परः(११) यस्मादसौ इतिपरः॥

---

१ रेफमापद्यते इति ग०, ङ० मु० च।

२ अन्तरग्नेरुचा त्वमिति ख०, ग०च।

३ अन्यथा त्वन्तोदात्तस्यैव स्यादिति ङ० मु०।

४ मिथुनौ सम्भवत इति ख०।

५ आदिरुदात्त इति ख०।

६ रेफमापद्यते इति ख०।

(७) आवृत्परं विसर्जनीयमन्वादिशति इति ग०, ङ० मु० च। आवृत्परं विसर्जनीयं चान्वादिशतीति ख०।

८ रेफमापद्यते इति ख०।

९ इति श्रुतिरितीति श्रुत इति ग०। इति श्रुतिः श्रुतरितीति श्रुत इति ख०।

१० ऋतुभिर्हवनश्रुत इति ग०। हवनश्रुतो हवं हवनश्रुत इति ख०।

११ इतिः पर इति ङ० म०।

अहारहःसुवरनिङ्ग्यान्तः ॥ १३ ॥

अहाः, अहः, सुवः, एतेषु(१) विसर्ज्जनीयोऽनिङ्ग्यान्तः स्वरघोषवत्परो रेफमापद्यते(२)। यथा, अहार्जातवेदः(३)। अहर्देवानामासीत्(४)। सुवर्देवाꣳ अगन्म। अनिङ्ग्यान्त इति किं। अभिपूर्व्वं त्र्यहा भवन्ति। प्रत्यङ् षड़हो भवति(५)। देवसुव इति देवसुवः। एवम्परर इति किं। एवमुक्तममहः स्यात्(६)। सुवश्च मूर्द्धा च। ह्वारभारादिसूत्रे हारित्यनेन ग्रहणेन(७) अहाःशब्दस्य अप्यकारादितिवचनाद्रेफसिद्धौ सत्यामत्र पुनर्वचनमिङ्ग्यान्तस्य अहाःशब्दस्य प्रतिषेधार्थं। नन्वत्रैव हारिति वक्तव्यं, अप्यकारादितिवचनेन कार्य्यसिद्धेः, न तु तत्र गौरवदोषापत्तेरिति चेत्(८)। मैवं। अनिङ्ग्यान्त इत्युक्तेरनिङ्ग्यान्तत्वमपि(९) सम्भावनीयं। तच्च हारित्येवंरूपे ग्रहणे नास्तीत्यत्रेदं विशेषणमनर्थकं स्यात्। तथाप्येवंरूपे माभूत्। अप्यकारादित्वे भवतीत्यन्यः पक्षः(१०)। न तु सरल इति सूत्रे हारिति ग्रहणमुपयुज्यते(११) ॥

---

१ एतेषु पदेषु इति ख०।

२ रेफमाप्नोतीति ग०, ड़० मु० च।

३ अहार्जातवेदा विचर्षणीति ख०, ग० च।

४ अहर्मासैनेति ख०, ग० च।

५ ज्योतिर्गौरायुरिति त्र्यहो भवतीति ग०, चिह्नितपुस्तके भिन्नः पाठः।

६ प्रायणीयमहस्तस्मादिति ग०चिह्निते ड़०, मु० पुस्तके च भिन्नः पाठः।

७ हारित्यनेनैवेति ख०।

८ न तु तद्गौरवापत्तेरिति चेत् इति ड़०मु०। न तु तद्गौरवापत्तिरिति चेत् इति ग०।

९ इत्युक्तेरनिङ्ग्यान्तत्वमिति इति ड़०मु०। इत्युक्तेरिङ्ग्यान्तमेवेति ख०।

१० तथाप्येवंरूपे माभूत्, इति किन्त्वकारादित्वे भवतीति जघन्यः पक्ष इति ग०, ड़० मु० च। तथाप्येवंरूपे माभूत् किन्त्वकारादित्वे भवतीति गौरवं जघन्यः पक्ष इति ख०।

११ ननु सरलेतिगम्यमानस्य चार्थस्य नैव दृष्टं विशेषणमितिन्यायांशे सुतरामस्माद्धारिति ग्रहणमुपयुज्यत इति ख०।

न भिर्भ्याम्परः ॥१४॥

सान्निध्येन लब्धः पूर्व्वसूत्रोक्तो विसर्ज्जनीयो भिः, भ्यां, इत्येवम्परः(१) न रेफमाप्नोति । अर्थात् अहरित्यत्र विसर्ज्जनीयः परिगृह्यते । इतरत्र स्थितस्य एवम्परत्वाभावात् । यथा, उत्तरैरहोभिः(२) । समहोभ्यामिति(३) ।

अꣳहस्व सर्व्वेषां ॥ १५ ॥

चकारो निषेधाकर्षकः(४) । अꣳह इत्यस्मिन् ग्रहणे विसर्ज्जनीयो न रेफमाप्नोति । अहारहरिति प्राप्तिः । अत्र ग्रहणे केचिदनुस्वारमिच्छन्ति केचिन्नेच्छन्ति । सर्व्वेषां तेषामेष निषेधो भवति । अनुस्वारमिच्छद्भिरपि प्राप्तिरेवं प्रतिपाद्यते,

विधेर्मध्यस्थनासिक्यो न विरोधो भवेत् सतः(५) ।
तस्मात् कुर्व्वन्ति कार्य्याणि वर्णानां धर्म्म एव तु ॥ इति ।
यथा, अꣳह इन्द्रमेवाꣳ होमुचं । अꣳहोमुचे प्रभरेम ॥

अनवर्णपूर्व्वस्तु रेफपरो लुप्यते ॥ १६ ॥

अवर्णादन्यस्वरपूर्व्वो विसर्ज्जनीयो रेफपरो लुप्यते । यथा, रेवती रमध्वं । एवम्पूर्व्व इति किं । यो रुद्रो अग्नौ । एवम्पर इति किं । रेवतीर्नः सधमादः । तुशब्दारम्भादवर्णपूर्व्वोऽपि ह्वार-

---

१ भिर्भ्यामेवम्पर इति ग०, इ० मु० च ।
२ उत्तरैरहोभिरित्यस्त्यीति ख०, ग० च ।
३ समहोभ्यामिति निनयतीति ख० ।
अहोभ्यामिति निनयतीति ग० ।
४ निषेधमाकर्षतीति ख०, ग०, इ० मु० च ।
५ भवेत् स्मृत इति इ० मु० ।

भारादीनां विसर्गो(१) लुप्यते, पूर्व्वस्वरश्च दीर्घमाप्नोति(२)। यथा, रुक्मो अन्तरन्ता रुक्मो रुक्मो अन्तः। तर्हि सुवो रोहावेत्यत्र लोपदीर्घे किं न स्यातां। द्विरुक्तत्वादिति ब्रूमः। तत् कथं। ह्वाराभारादिसूत्रे अहारहः सुवरित्यत्र च(३)। नन्वहोरात्रे इत्यत्र कथमोत्वं। अन्यार्थेन ग्रहणसामर्थ्येनेति ब्रूमः। तत् कथं। अहोरात्रे धृतव्रते इत्येवं रूपसाम्यादहोरात्राभ्यां, अहोरात्रयोरित्यादि विज्ञेयं। एवञ्चेदधिषवणे इति ग्रहणसामर्थ्येनैव षत्वे सिद्धे न धिपूर्व्वे इति षत्वनिषेधो न विज्ञेयः(४)। सत्यं। स च शब्दस्य अधिषवणे इति ग्रहणसामर्थ्येन षत्वं सिद्धतु। स्थानशब्दस्य कथं सिद्धेत्, ग्रहणादिसामर्थ्याभावात्। तस्मात्तदर्थं तत् सूत्रं(५) सार्थकमिति सन्तोष्टव्यं(६) तदर्थं चेति गुड़जिह्विकान्यायः। तथाहि ग्रहणसामर्थ्यादिति गमनिकामात्रं, कण्ठोक्तिस्तु विशेषः। तथा सर्व्वशब्दार्थमपि(७) सूत्रमिति भावः। अवर्णादन्यः, अनवर्णः, असौ पूर्व्वो यस्मात् सः तथोक्तः। रेफः परो यस्मादसौ रेफपरः॥

---

१ विसर्जनीय इति ख०।

२ दीर्घत्वमापद्यते इति ग०।

३ ह्वारभारादिसूत्रे सुवः पुनरहरहरिति अहरहः सुवरिति चेति ग०।

४ सत्वे सिद्धे न धिपूर्वे इति निषेधनिषिद्धे न विरोध इति इ० मु०। षत्वे सिद्धे निषिद्धे न धिपूर्वे इति निषेध इति विरोध इति ग०। सत्वे सिद्धे न धिपूर्वे इति षत्वनिषेधनिषेधो न विधेय इति ख०।

५ तावत् सूत्रमिति ग०, इ०, मु०. च। वा तत् सूत्रमिति ख०।

६ सार्थकमिति तदर्थञ्च द्रष्टव्यं इति ग०, इ० मु० च। सामर्थ्यमिति सन्तोष्टव्यमिति ख०।

७ ततः सर्वशब्दार्थमिति ग०, इ०मु०च

दीर्घश्च पूर्वः ॥ १७ ॥

तस्माद्रेफपरविसर्ज्जनीयात्लुप्तात् पूर्व्वो यः(१) स्वरो ह्रस्वः स च दीर्घमापद्यते। यथा, रुरू रौद्रः। तित्तिरी रोहित्। विष्णू रूपं। यदा तस्य विसर्ज्जनीयस्य लोपः,(२) तदैव दीर्घत्वं यथा स्यादित्येवमर्थः, 'च' शब्दः॥

एष्टश्च ॥ १८ ॥

एष्टरित्यस्मिन् ग्रहणे विसर्जनीयो रेफपरोऽवर्णपूर्व्वोऽपि लुप्यते, पूर्व्वस्वरस्य दीर्घः। यथा, एष्टा रायः। 'च'शब्दो लोपदीर्घयोराकर्षकः। नन्वेतदनुपपन्नं। द्वारभाराद्यन्तःपातित्वादेष्टरित्यस्य रुक्मो अन्तरन्ता रुक्मो रुक्म इतिवचनादनवर्णपूर्वस्त्वित्यत्र तुशब्देन लोपदीर्घे सिद्धे(३)। वक्ष्यमाणमतभेदाश्रयत्वज्ञापनाय गृहीतमेतदुपपन्नतरमिति परिहारः॥

नैकेषां ॥ १९ ॥

एकेषां मते एष्टरिति विसर्ज्जनीयो रेफपरो न लुप्यते। अत एव पूर्व्वस्वरदीर्घाभावश्च। किन्तु घोषवत्परश्चेत्योत्वं। यथा, एष्टो रायः। वररुचिविरचितमेतत्। माहिषेयभाषितं त्विवम्,

---

१ पूर्वोऽपि य इति ख०, ग०, ङ० मु० च।

२ यदा विसर्जनीयस्लोप इति ग०। यदा विसर्जनी यस्य लोप इति ङ० मु०।

३ द्वारभाराद्यन्तःपातित्वादेष्टरित्यस्य रुक्मो रुक्मो अन्तरितिवदवर्णपूर्वस्त्वित्यत्र तुशब्देन लोपदीर्घौ सिद्धौ इति ख०। कारभाराद्यन्तःपातित्वादेष्टरित्यस्य रुक्मो अन्तरन्ता रुक्मो रुक्म इति वदनवर्णपूर्वस्त्वित्यत्र तुशब्देन लोपदीर्घे सिद्धे इति ग०।

एष्टरिति विसर्ज्जनीयो रेफपरो न रेफमापद्यत इति। सिद्ध-रूपमुभयोः समानं॥

द्वावुत्तमोत्तरीयस्य रेफं॥ २०॥

उत्तमोत्तरीयस्य शाखिनोर्मते एष्टरिति विसर्ज्जनीयः, तत्परो रेफश्च द्वावेतौ रेफमापद्येते। यथा, एष्टर्रायः। अयमर्थो वाररुचोक्तः। माहिषेयोक्तस्तु, द्वावुत्तमोत्तरीय इति कस्यचिन्नाम, तन्मते एष्टरिति विसर्ज्जनीयो रेफपरो रेफमापद्यते। यथा, एष्टर्राय इति॥

साङ्कृत्यस्योकारं॥ २१॥

साङ्कृत्यस्य मते एष्टरिति विसर्ज्जनीयो रेफपर उकारमापद्यते इति माहिषेयोक्तं। तत उवर्णपर ओकारमित्योत्वं। यथा, एष्टो रायः। अस्य च नैकेषामित्यादिशभेदाद्भिदः। सिद्धोदाहरणं तु समानम्॥

उख्यस्य सपूर्वः॥ २२॥

उख्यस्य मते रेफपर एष्टरिति विसर्ज्जनीयः पूर्व्ववर्णेन सह उकारमापद्यते, इति माहिषेयोक्तम्। यथा, एष्टु रायः। वाररुचोक्तन्तु, एष्टरिति विसर्ज्जनीयो रेफपरो पूर्व्वेण सह रेफमापद्यते इति। यथा, एष्टा रायः। पूर्व्वेण सह वर्त्तत इति सपूर्व्वः। अस्मिन् विकल्पजाले प्रथममिष्टश्चेति सूत्रमेवेष्टं॥

कखपकारपरः षमकारपूर्वः समवग्रहः॥ २३॥

अत्र परनिमित्तविशेषणादेतत्पर्य्यन्ता स्वरघोषवत् परानु

वृत्तिर्मन्तव्या। अवग्रहविसर्ज्जनीयः(१) ककारखकारपकारपरः षकारमापद्यते, अकारपूर्वश्चेत् सकारं। यथा, अथो हविष्कृतानां(२)। असितं निष्खिदति। वहिष्पवमान उपसद्यः। नमस्कारैरेवैनं(३)। पथस्पथस्परिपतिं। अवग्रह इति किं। पुष्पावतीः प्रसुवती। नमः पितृभ्यः। ककारस्य खकारस्य पकारस्य कखपकाराः, एते परे(४) यस्मादसौ तथोक्तः। अकारः पूर्वो यस्मादसौ अकारपूर्वः॥

आविर्निरिडःशश्वतोऽपसोदेवरिषोऽंहसोतिदिवोविश्वतोऽश्मनस्तमसः॥ २४॥

आविः, निः, इडः, शश्वतः, अपसः, देवरिषः, अंहसः, अतिदिवः, विश्वतः, अश्मनः, तमसः, एषु विसर्ज्जनीयः कखपकारपरो यथाविहितं भजते। यथा, आविष्कृणुष्व। घृतं निष्पिवति। इडस्पदे समिध्यसे। शश्वतस्कर्हस्ते(५)। अपसस्पारे अस्य। उरोरानो देवरिषस्पाहि। देवेति किं। सरिषः पातु नक्तं। अंहसस्पातु। अतिदिवस्पाहि(६)। अतोति किं। दिवः पृष्ठं सुवर्गत्वा(७)। विश्वतस्परि हवामहे। त्वमश्मनस्परि। उद्वयं तमसस्परि। अनवग्रहार्थोयमारम्भः॥

---

१ अवग्रहान्तर्वर्त्ती विसर्जनीय इति इ॰ मु॰।

२ हविष्कृतानामेवेति ख॰, ग॰ च।

३ नमस्कारैरेवैनं शमयति इति ख॰।

४ ते परे इति ग॰, इ॰ मु॰ च।

५ शश्वतस्कर्हस्ते दधान इति ख॰।

६ अतिदिवस्पाहि समावदृतन् इति ग॰।

७ सुवर्गत्वा मिश्रा इति ग॰।

क्षधिपिन्वपथेपरः ॥ २५ ॥

क्षधि, पिन्व, पथे, एवम्परो विसर्ज्जनीयो यथाविहितं(१) भजते। यथा, उरुणस्कृधि(२)। अपस्पिन्वः। स प्रथा नमस्पथे॥

न सक्रघकारपरे ॥ २६ ॥

स, क्र, घ, एवम्परे(३) सति क्षध्यादौ विसर्ज्जनीयो यथा-विधिर्नापद्यते(४)। यथा, आमनसः क्षधि स्वाहा। शन्न नः क्षधि(५)। उपध्मानीयः क्रत्वे(६)। रेफेण किं। उत नो मय-स्कृधि(७)। उरुत्तयाय नः क्षधि। घृतं घृतयोने पिव(८)॥

पत्नीवे-पतौ-पते-पतये-पतिष्पतिम्परः ॥ २७ ॥

पत्नीवे, पतौ, पते, पतये, पतिः, पतिं, एवम्परो विसर्जनीयो यथाविहितं(९) भजते। यथा, प्रैतु ब्रह्मणस्पत्नीं वेदीं। वे इति किं। रेतोधाः पत्नीव इत्याह। शुभस्पती इदमहं। वास्तोष्पते प्रति। प्रच्यवस्व भुवस्पते। वाचस्पतये पवस्व। वाचस्पति-र्वाचमद्य। वाचस्पतिं विश्वकर्म्माणं(१०)। पत् इत्येतावतैव सिद्धे प्रतिपदपाठेन किं। दिवं गच्छ सुवः पते इत्यादिनिषे-धार्थः॥

१, यथाविधिमिति ग०।

२ उरुक्रदुरुणस्कृक्षधीति ग०।

३ इत्येवम्परे इति ख०, ग० च।

४ यथाविहितं नापद्यते इति ख०, ग०, इ० मु० च।

५ मन्याशे शन्न नः क्षधि इति ख०।

६ क्रत्वे दत्तायेति ग, चिह्नितपुस्तके भिन्नः पाठः।

७ मयस्कृधि त्तयद्वीरायेति ग०।

८ घृतं घृतयोने इति ख०, ग० च।

९ यथाविधिमिति ग०।

१० विश्वकर्माणमूतये इति ग०।

दिवःसहसस्परिपुत्परः ॥ २८ ॥

दिवः, सहसः, अनयोर्विसर्ज्जनीयः,(१) परि, पुत्, एवम्परो यथाविहितं(२) भजते। यथा, दिवस्परि प्रथमं। दिवस्पुत्राय सूर्य्याय। सहसस्पुत्रो अद्भुतः। अनयोरिति किं। पृथिव्याः पर्य्यन्तरिक्षात्। परुषः परुषः परि। पुꣳसः पुत्रान्(३)। एवम्पर इति किं। दिवः पृथिव्याः परि। अनेकार्थः(४) पुदिति पदैकदेशः॥

रायस्पोपरः ॥ २९ ॥

राय इत्यत्र विसर्जनीयः पो इत्येवम्परो यथाविहितं भजते। यथा, पशवो वै रायस्पोषः। पो इति पदैकदेशो बहुपादानार्थः। रायस्पोषेण(५)। शन्तनुत्वाय रायस्पोषाय। रायस्पोषस्य ददितारः। राय इति किं। विभुः पोष उतत्मना। पो इत्योकारेण किं। रायः प्रेषे भगाय(६)॥

नमस्करोपरः ॥ ३० ॥

नम इति(७) विसर्जनीयः करो इत्येवम्परो यथाविहितं भजते। यथा, संवत्सरेण नमस्करोमि। उभयीभ्यो नमस्करोति(८)। नम इति किं। एकहायनादेनः करोति। करो इति किं। नमः कपर्द्दिने च॥

---

१ इत्यनयोर्विसर्जनीय इति ख०।
२ परिपुत्परो यथाविधिमिति ग०, इ० मु० च।
३ पुंसः पुंत्रां उत विश्वायुषं रयिमिति ग०।
४ अनेकार्थत्वादिति इ० मु०।
५ समहं रायस्पोषेणेति ख०, ग०।
६ एष्टा रायः प्रेषे भगायेति ग०।
७ नम इत्यत्रेति ग०, इ० मु० च।
८ उभयेभ्य इति ख०।

वसुष्ककारपरः ॥ ३१ ॥

वसुरित्यत्र विसर्जनीयो ककारपरो यथाविहितं भजते। यथा, स इधानो वसुष्कविः। वसुरिति किं। विप्रः शुचिः कविः। एवम्पर इति किं। मयि वसुः पुरो वसुः। विश्वावसुः पर्य्युषणात् ॥

नाध्वरंविश्वतोऽन्तर्जातोविविशुःपरुःपुनः ॥ ३२ ॥

अध्वरं, विश्वतः, अन्तः, जातः, विविशुः, परुः, पुनः, इत्येतेषु विसर्जनीयो यथाविहितं नापद्यते(१)। यथा, अग्ने यं यज्ञमध्वरं(२)। विश्वतः परिभूरसि। आविर्निरिड इति प्राप्तिः(३)। अध्वरविशेषणान्निवृत्तिः। अध्वरमितिकिम्। इन्द्रं वो विश्वतस्परि। महादेवमन्तःपार्श्वेन। कखपकार इति प्राप्तिः। भूतस्य जातः पतिः(४)। पत्नीवेपतीति प्राप्तिः। या आविविशुः परुःपरुः। विविशुरिति किम्। परुष्परुरनुयुष्याविशस्तः। पुनः पुनर्हि(५)। पतिः पतिमिति प्राप्तिः(६) ॥

धषवति ॥ ३३ ॥

सान्निध्यादत्र च सूत्रे नञर्थो लभ्यते, धकारस्य षकारस्य

---

१ एतेषां विसर्जनीयो यथाविहितं न भजते इति ग०, इ० मु० च।

२ यज्ञमध्वरमिति ख०, ग०।

३ आविर्निरिति प्राप्ते इति ग०।

४ जातः पतिरेक आसीदिति ग०।

५ पुनः पुनर्ह्यस्मादिति ख०, ग० च।

६ ख, ग, चिह्नितपुस्तकयोः, इ० मु० पुस्तके च कखपकारपर इत्यनयोः प्राप्तिरिति विभिन्नः पाठः।

धषौ तावस्मिन् इति धषवत्, तस्मिन् पदे परभूते[१] सति पूर्वो विसर्जनीयो यथाविहितं नापद्यते। यथा, वहिः परिधि[२]। पुरुषः पुरुषो निधनं[३]। उभयतः क्ष्णुर्भवति। कखपकारेति[४] प्राप्तिः। परभूत इति किं।[५] अधस्पदं कृणुते। ऋतस्य ज्योतिषस्पतिम्[६] ॥

परिवाप्रपरः ॥ ३४ ॥

परि, वा, प्र, एवम्परो[७] विसर्जनीयो यथाविहितं नापद्यते। दिवः परिवाजेषु[८]। वेति किं। दिवस्परि प्रथमं। तस्मादितः प्रदानं देवाः। प्र इति ह्रस्वग्रहणं दीर्घस्याप्युपलक्षणं[९]। यथा, उदथापरस्येति दीर्घग्रहणं ह्रस्वोपलक्षणार्थं[१०]। तर्हि प्रापूर्वस्येति सूत्रं व्यर्थं। प्रशब्दस्यानुवृत्तस्यैव दीर्घोपलक्षकत्वादिति चेत्, उच्यते। प्रत्यक्षगृहीतस्यैवोपलक्षकत्वं नानुकृष्टस्येति विज्ञेयं। तथाहि, वाहन उह्यमान इत्यत्र

---

१ सान्निध्यादत्र परत्र च नञर्थो लभ्यते। धस्य षस्य धषौ, तावस्मिंस्त इति धषवत्, तस्मिन् पदे परभूते इति ग०। इ० मु० पुस्तके तस्मिन् धषवति पदे परभूते इत्यत्र विशेषः। सान्निध्यादत्रापरसूत्रेनञर्थो लभ्यते। धकारस्य षकारस्य धषौ, तावस्मिंस्त इति धषवत्, तस्मिन् पदे उपध्मानीयः परभूते इति ख०।

२ वहिः परिधि स्कन्दादिति ग०। वहिः परिधि स्कन्दतीति ख०।

३ पुरुषः पुरुषो हि रक्षतीति ख०।

४ कखपकारपर इति ग०।

५ अधस्पदं तस्मिं कृधीति ख०, चिह्नितपुस्तकेऽधिकः पाठः।

६ तस्मिन्नितिनिर्दिष्टे पूर्वस्येति ख०, चिह्नितपुस्तकेऽधिकः पाठः।

७ इत्येवम्परइति ग०।

८ परिवाजेषु भूषथ इति ख०।

९ यथाहि वाहन उह्यमान इत्यत्र इति ग, चिह्नितपुस्तकेचापि पाठः।

१० ह्रस्वस्योपलक्षणार्थमिति इ० मु०। ह्रस्वोपलक्षणमिति ख०।

चकारेण प्रशब्दस्तत्रानुकृष्टः। अत्र तु परिवाप्रपर इत्युपलक्षकत्वं(१) भवति। तथासतीदमप्युदाहरणं। वहिः प्राणो वै मनुष्यः॥

न निर्णि निः॥ ३५॥

निरित्यत्र विसर्जनीयस्य परत्वेपि(२) षत्वनिषेधो न भवति, षत्वमेव भवतीत्यर्थः। प्राञ्चौ निर्निंष्प्राञ्चौ प्राञ्चौ निः। आत्मना परा निष्प्र शुक्र शोचिषा॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे अष्टमोऽध्यायः॥ ८॥

---

१ परिवाप्रपर इति गृहीतत्वादुपलक्षकत्वं २ प्रपरत्वेपीति ग०, इ० मु० च। भवतीति ख०।

अथ नवमोऽध्यायः।

ऊष्मपरोऽघोषपरे लुप्यते काण्डमायनस्य ॥ १ ॥

ऊष्मपरो विसर्ज्जनीयः काण्डमायनस्य मते लुप्यते, तस्मिन्नूष्मण्यघोषवत्परे सति। यथा, चतुस्तनां करोति। वायव स्थोपायवस्थ(१)। काण्डमायनग्रहणं विकल्पार्थं। अन्येषां मते घोषवत्परेपि ऊष्मणि विसर्ज्जनीयो लुप्यते। यथा, अद्भ्यः स्वाहा। ये शुक्राः स्युस्तं(२)। यो हतमना स्वयं पाप इव स्यात्। दानकामा मे प्रजा स्युः। एवञ्च विकल्पाश्रयणे सति लक्षणान्तरगतं येषु पदेषु लुप्यते तानि पदानि प्रवक्ष्याम इति सरलं(३) भवति। ऊष्मा परो यस्मात् स ऊष्मपरः(४)। न घोषवानघोषः, असौ परो यस्मात् स तथोक्तः, तस्मिन्नघोषपरे॥

अघोषपरस्तस्य सस्थानमूष्माणम् ॥ २ ॥

अघोषपरो विसर्जनीयस्तस्याघोषस्य सस्थानमूष्माणं भजते। यथा, यः कामयेत। अग्निश्च मे। उलूकः शशः। अग्निस्ते तेजः। यः पाप्मना गृहीतः॥

न क्षपरः ॥ ३ ॥

क्षपरो विर्ज्जनीयः पूर्व्वविधिं न भजते। यथा, मनः

---

१ वायवस्थेति ख०। वायवस्थोपायवस्थेति ग०।

२ ये शुल्काः स्युरिति ग०।

३ इति वचनं सरलमिति ख०, इ० मु० च।

४ यस्मादसावूष्मपर इति ख०, ग०, इ० मु० च।

च्चेमि(१)। उभयतः च्णुर्भवति। घनाघनः च्चोभणः। पूर्व्वौष्टुः च्चीयते। द्यौः च्चामा रेरिहन्(२)। ककारस्याघोषत्वात् प्राप्तिः(३)॥

कपवर्गपरस्याग्निवेश्यवाल्मीक्योः॥ ४॥

चकारो निषेधाकर्षकः(४)। अग्निवेश्यवाल्मीक्योराचार्य्ययोर्मते(५) कवर्गपरः पवर्गपरो वा पूर्व्वविधिं न भजते(६)। यः कामयेत। अग्निः पशुरासीत्। ककारश्च पकारश्च कपौ(७) तयोर्वर्गौ कपवर्गौ, तौ परौ यस्मात् स तथोक्तः। एवम्परः इति किं। मधुश्च माधवश्च। नमस्तल्प्याय(८)। आशुः शिशानः। यः सोमं वमिति॥

ऊष्मपर एवैकेषामाचार्य्याणां॥ ५॥

एकेषामाचार्य्याणां मते ऊष्मपर एव विसर्जनीयः पूर्व्वविधिं न भजते। यथा, आशुः शिशानः। एवकारेण किं। नमस्तल्प्याय(९)। यः कामयेत॥

न प्लाक्षिप्लाक्षायणयोः॥ ६॥

कपवर्गपर ऊष्मपरश्च विसर्जनीयः प्लाक्षिप्लाक्षायणयोः

---

१ च्चेमेन्यासामिति ख०।

२ रेरिह्वदिति ग०।

३ चकारस्याघोषत्वात् प्राप्तिरिति ख०, इ० मु० च०। चकारस्याघोषवत्प्राप्तिरिति ग०।

४ निषेधमाकर्षतीति ख०,ग०,इ०मु०च।

५ अग्निवेश्यवाल्मीक्योः शाखिनोराचार्य्ययोर्मते इति ख०, ग०, इ० मु० च।

६ नापद्यते इति ख०, ग०, इ० मु० च०।

७ कस्य पस्य कपौ इति ख०।

८ मनस्तल्यायेति ख०।

९ नमस्तल्यायेति ख०।

पक्षे(१) न खलु पूर्व्वविधिं भजते। यः कामयेत। यः पाप्मना। आशुः शिशानः। एवम्पर इति किं। नमस्तुभ्याय(२)। कपवर्गादिसूत्रत्रयमनिष्टम्॥

ओकारमः सर्व्वोऽकारपरः॥ ७॥

अः सर्व्वो विसर्जनीयः(३) ओत्वं भजते, अकारपरः। अः सर्व्वं इत्यकारेण सहेत्यर्थः। प्रेद्धो अग्ने। समिद्धो अञ्जन्। सोऽब्रवीत्। अः सर्व्वं इति किं। अन्यथा(४) समिद्धो अञ्जन्निति न सिद्ध्येत्। किन्तु वर्णस्य विकारलोपाविति विसर्जनीयमात्रस्य स्यादोत्वं। तत ओकारौकारपर इत्यौकारे कृते औकार आवमित्यावादेशः(५)। तथासति समिद्धावञ्जन्निति स्यात्। किञ्च। अथ स्वरपरो यकारमिति यत्वं वा भजते(६)। तस्मिंश्च, लुप्यते त्ववर्णपूर्व्वाविति लुप्ते(७) परस्य परस्येति कार्य्यान्तराप्रसिद्धेः(८) समिद्धो अञ्जन्निति स्यात्। तन्माभूदिति अः सर्व्वं इत्युक्तम्(९)॥

---

१ प्लाक्षिप्लाक्षायणयोः शाखिनोः पक्षे इति ख०, इ० मु० च।

२ नमस्तुभ्यायेति ग०। मनस्तुभ्यायेति ख०।

३ अः पूर्व्वो विसर्जनीय इति ख०।

४ ग, चिह्निते इ० मु० पुस्तके च अन्यथेति पाठो नास्ति।

५ आवमित्यादेश इति ग०।

६ अञ्जन्निति स्यात्। यद्वा स्वरपरो यकारमिति यत्वं भवति इति ग०, इ० मु० च।

७ त्ववर्णपूर्व्वौ यवकाराविति यकारे लुप्ते इति ग०, इ० मु० च।

८ कार्य्यान्तराप्रसक्तेरिति ख०।

९ तन्माभूदित्येवमर्थः, अः सर्व्व इत्युक्तमिति इ० मु०। तन्माभूदित्यपवं इत्युक्तमिति ख०।

घोषवत्परश्च ॥ ८ ॥

'च'कार ओकारमः सर्वं चान्वादिशति। अः सर्वो(१) घोषवत्पर(२) ओत्वं भजते। यथा, मा नो मित्रो वरुणः(३)। ननु विधौ समाने पृथक्करणमनर्थकमिति चेत्। तन्माभूदिति अः सर्व इत्युक्तं(४)। उत्तरसूत्रे तुशब्दव्याख्याने(५) स्फुटीकरिष्यत इति परिहारः॥

अवर्णपूर्व्वस्तु लुप्यते ॥ ९ ॥

अवर्णपूर्वो घोषवत्परो विसर्जनीयस्तु(६) लुप्यते। ह्रस्वपूर्वस्य विकार एव(७), दीर्घपूर्वस्य प्लुतपूर्वस्य च लोपः। यथा, देवा गातु विदः। विचिन्त्यः सोमा३ न विचिन्त्या३ इति। ओकारमः सर्वोकारपर इति अकारपरत्वं प्रत्यचन्तुशब्देन निवर्त्य आनुमानिकं(८), घोषवत्परत्वं परिगृह्यते, सान्निध्यात्। अस्यानुवर्त्तनमेवाभीष्टमत्रेति पूर्वसूत्रद्वयस्य पृथक्करणं(९)॥

१, अः पूर्व इति ख०।
२ परश्चेति ख०।
३ वरुणो अर्यमेति ख०।
४ ख०, ग०, चिह्निते इ० मु० पुस्तके च "तन्माभूदिति अः सर्वइत्युक्त" इति पाठो नास्ति।
५ व्याख्यानेनेति ख०, ग०, इ० मु० च।
६ घोषवत्परस्तु विसर्जनीय इति ख०, ग०, इ० मु० च।
७ ह्रस्वपूर्वस्तु विकार एवेति क०। ह्रस्वपूर्वस्य ओकार एवेति इ० मु०।
८ आनुमानिकमिति ख०। आनुमानिकत्वमिति म०।
९ पृथक्कारणमिति ग०।

अथ स्वरपरो यकारम्॥ १०॥

'अथ' शब्दोऽधिकारार्थः(१)। स्वरपरो यस्मात् सोयं(२) स्वरपरः। इत उत्तरं(३) यदुच्यते स्वरपर(४) इत्येवं तत्र निमित्तत्वेनाधिकृतं ज्ञातव्यं(५)। सान्निध्यादवर्णपूर्व इति लभ्यते। स्वरपरो विसर्जनीयः(६) अवर्णपूर्वो यकारमापद्यते। यथा, आप उन्दन्तु। ता अब्रुवन्। अन्वारभ्या३ इति। स्वरपर इति किं। आपो वरुणस्य। अवर्णपूर्व इति किं। अग्निरेकाक्षरेण॥

एकारोऽयम्॥ ११॥

विसृष्टो विसर्गः(७)। इदमिदानीमुच्यते, स्वरपरः पदान्ते एकारः, अयं(८) विकारमापद्यते। इम एवास्मै। त एनं भिषज्यन्ति॥

ओकारोऽवम्॥ १२॥

स्वरपरः पदान्त ओकारः, अवं(९) विकारमापद्यते। विष्णवे हीदं॥

---

१ शब्दोधिकारपर इति ख०।

२ स्वरपरो यस्मादसाविति ख०। स्वरः परो यस्मादसाविति ग०, इ० मु० च।

३ इतः परमिति ग०।

४ तत् स्वरपर इति ख०।

५ वेदितव्यमिति ग०, इ० मु० च।

६ विसर्ग इति ख०।

७ विसर्गो निवृत्त इति ख०। विसृष्टो विसर्गः स्पर्शनीय इति ग०। विसृष्टो विसर्जनीय इति इ० मु०।

८ एकारः, अयमिति इति ग०, इ० मु० च०।

९ अवमितीति इ० मु०।

नाकारपरौ ॥ १३ ॥

द्विवचनसामर्थ्यगृहीतौ(१) सन्निहितावेकारौकारौ अकारपरौ पूर्वविधिं नाप्नुतः(२)। यथा, मा ते अस्यां। समिद्धो अञ्जन्। तेऽब्रुवन्। इत्यादौ एकारोयं, लुप्यते त्वकार एकारपूर्व इति(३) सूत्रद्वयं प्रसक्तं। तत्रापि पूर्वत्वात् प्रबलं यत्वविधिं निषेद्धुमयमारम्भः। अकारः परौ याभ्यां तावकारपरौ ॥

ऐकार आयं ॥ १४ ॥

स्वरपरः पदान्त ऐकारः, आयं विकारमापद्यते। यथा, आशासमहा एवेमौ द्वादशौ मासौ ॥

औकार आवम् ॥ १५ ॥

औकारः पदान्तः(४) स्वरपर आवं विकारमापद्यते। यथा, अहावनदता हते ॥

उकारोऽपृक्तः प्रकृत्या वकारोऽन्तरे ॥ १६ ॥

अपृक्तसञ्ज्ञक उकारः स्वरपरः प्रकृत्यावतिष्ठते। अविकृतो भवतीत्यर्थः। उकारस्वरयोरन्तरे वकारश्चागमो भवति। यथा, स उ एकविꣳशवर्त्तनिः। अदन्त्युवेवास्य मनुष्याः। अपृक्त इति किं। स्वपत्याय देव। उकार इति किं। भिन्धेहि(५) ॥

---

१ द्विवचनसामर्थ्यादिति ख०, ग० च।
२ न प्राप्नुत इति इ० मु०।
३ पूर्व ओकार इतीति ख०।
४ पदान्त इति ग०।
५ भन्धेहि इति ख०, ग०, इ० मु० च।

न तत् तस्मात् साꣳहितः॥ १७॥

तत्,तस्मात्, इत्येताभ्यां संहित उकारोऽप्रक्तः पूर्वविधिं न भजते(१), प्रकृत्या अवस्थानं, वकारागमस्य(२) न भवतीत्यर्थः। (३)तद्वाहुरुत्सृज्य। तस्माद्वाभ्यं। इवर्णाकारौ यवकाराविति दशमेऽस्य विधिर्वक्ष्यते(४)। तत् तस्मात् साꣳहित इति किं। तत्, उ, आहु, तदु, उवाहु,(५) तस्मादु, उवाभ्यं॥

ह्रस्वपूर्वो ङकारो द्विवर्णं॥ १८॥

स्वरपरो ङकारः पदान्तवर्त्ती ह्रस्वपूर्वो द्विवर्णं द्वित्वं भजते(६)। यथा, न्यङ्ङग्निः त्वा दध्यङ्ङृषिः। ह्रस्वपूर्व इति किं। पराङावर्त्तते। स्वरपर इति किं। सद्दङ्क् समानैः प्रत्यङ् षडहः(७)। ह्रस्वः पूर्वो यस्मादसौ ह्रस्वपूर्वः। द्वयोर्वर्णयोः समाहारः, द्विवर्णं॥

नकारस्य॥ १९॥

'च'कारः पूर्वनिमित्तं द्वित्वं चान्वादिशति(८)। ह्रस्वपूर्वो नकारो द्विवर्णं भजते स्वरपरः। निरवपन्निन्द्राय। अब्रुव-

१ नाप्नोतीति ग०, ङ० मु० च। न प्राप्नोतीति ख०।

२ वकारस्येति ग०, ङ० मु० च।

३ ब्रह्मवादिन इति ख०, चिह्नितेऽधिकः पाठः।

४ दशमे तस्य विधिर्वक्ष्यते इति ग०। उकारस्य विधिर्वक्ष्यते इति ख०।

५ आऊरुत्सृज्यमिति ख०, ग० चिह्नितपुस्तकेऽधिकः पाठः।

६ द्विवर्णं भजते इति ग०,ङ०मु० च।

७ प्रत्यङ् षडह इति ग०।

८ चाकर्षतीति ख०।

नृध्रुवत् । एवम्पर इति किं । निरवपन् यान्येव पुरस्तात्(१) । आमन्वतीते(२) । एवम्पूर्व्व इति किं । यानग्नयोन्वतप्यन्त । विद्वानेतमग्निं चिनुते ॥

अनितिपरो ग्रहोख्ययाज्यापृष्ठ्यहिरण्यवर्णीयेषीकारोकारपूर्वो रेफमाकारपूर्वस्य यकारम् ॥ २० ॥

ग्रहोख्यादिषु विषयेषु ईकारपूर्व ऊकारपूर्व्वो वा चकाराकृष्टो नकार इतीत्येतस्मादन्यस्वरपरो(३) रेफमापद्यते, आकारपूर्वस्येयकारं । ग्रहो नाम चतुरोन्त्यानुवाकान्(४) वर्जयित्वा आददे ग्रावेति प्रश्नः, अग्निकाण्डस्याद्यं प्रश्नद्वयम्, उत्तमानुवाकवर्जम्, उख्यम्, इत्याख्यायते(५) । उक्ता याज्याः, समिद्दिशा जीमूतस्य, यदक्रन्दः, मा नो मित्रः, ये वाजिनम्, अग्नेर्मन्वे, समिद्धो अञ्जन्, गायत्री, कस्त्वा, इत्यनुवाकनवकं पृष्ठ्यमिति पठ्यते(६) । हिरण्यवर्णा इत्यनुवाकः(७) हिरण्यवर्णीयः । ग्रहे यथा(८), जहि शत्रूꣳ रपमृधः, मरुत्वाꣳ इन्द्रः(९) । उख्ये यथा, ये वा वनस्पतीꣳ रनु, मधुमाꣳ अस्तु सूर्य्यः । याज्यासु

१ पुरस्ताद्दचांसीति ग० ।

२ ओमन्वतीतेस्मिन्निति ख०, ग० च ।

३ नकारः, अनितिपर इति भिन्नस्वरपर इत्यर्थः । इतीत्यस्मादन्यस्वरपर इति ख० । नकारोनितिपर इतिव्यतिरिक्तस्वरपर इति इ० मु० ।

४ चतुरनुवाकान् इति ग० । चतुरोनुवाकानिति इ० मु० ।

५ उत्तमानुवाकवर्जितमुख्यमित्युच्यते इति ख० । उत्तमानुवाकवर्जमुख्यमाख्यायते इति ग०, इ० मु० च ।

६ पृष्ठ्यमित्युच्यते इति ख० ।

७ इत्यनुवाके इति ग० ।

८ ग्रहो यथेति ख०, ग० च ।

९ मरुत्वां इन्द्र वृषभ इति ख०, ग० च ।

यथा, क्रतूं क्रतु पते(१) अमवाँ इभेन। पृष्ठे यथा, ग्रन्थूं रनपव्ययन्तः, जघनाँ(२) उपजिघ्रते। हिरण्यवर्णीये यथा, अग्निं स्सु षदः सर्व्वाँ अग्नीन्। अनितिपर इति किं। अभ्यवर्त्तन्त दस्यून्, दस्यूनिति दस्यून्। इडावानितीडावाम्। ग्रहादिष्विति किं। द्योनिमाँ लोकानिति। पशूनेवावरुन्धे। तानिन्द्रोन्तर्यामेणान्तरधत्त। इतिपरो यस्मादसावितिपरः, न इति परः, अनितिपरः॥

मर्त्यानुदयानमृतान्दुर्य्यानसोमपूर्वःसोऽस्मानविमान्-गोमान्मधुमान्हविष्मान्हृतमनार्षैंचिकित्वानिडावान्कक्षी-वान्वाणवान्हिपयस्वान्वशान्विद्वानमित्रानरान्पोषान्म-हाँश्च॥ २१॥

मर्त्यान्, उदयान्, अमृतान्, दुर्य्यान्, असोमपूर्व्वः सो अस्मान्, अविमान्, गोमान्, मधुमान्, हविष्मान्, हृतमनार्षैं, चिकित्वान्, इडावान्, कक्षीवान्, वाणवान्, हि पयस्वान्, वशान्, विद्वान्, अमित्रान्, अरान्, पोषान्, महान्, एतेषु ग्रहणेषु नकारोऽनितिपरो यकारमापद्यते। अनितिपरत्वाकर्षकोयं 'च'कारः। विषयाननाहृत्य सर्वाँर्थीयमितः परमारम्भः(३)। यथा, मर्त्याँ आविवेश। उदयाँ अजस्रं। उदिति किं। वयोभिरेवायानवरुन्धे। उदस्थाममृताँ अनु। भद्रान्दुर्य्याँ

१ क्रतूं क्रतुपते यजेहेति ख०। ३ सर्वाँर्थीयमित्ययमारम्भ इति ग०।
२ जघन्वां उपजिघ्रते इति ग०।

अभ्येहि। न सोमपूर्वः, दुर्य्यान्, इत्यत्र नकारः सोमपूर्वो यत्वं नापद्यते। प्रचरा सोम दुर्य्यानदित्याः। सो अस्माँ॒ अधिपतीन् करोतु। सो इति किं। इन्द्रो अस्मानस्मिन्(१)। अविमाँ॒ अश्वी। गोमाँ॒ अग्ने। मधुमाँ॒ इन्द्रियावान्। अविगोमध्विति किं। पशुमानेव भवति। हविष्माँ॒ आविवासति। हूतमानार्षे, हूतमानित्यत्र नकार आर्षे स्वरपरे यत्वं भजते(२)। देवहूतमाँ॒ इत्युखायां(३)। आर्ष इति किं। देवहूतमानिति देवहूतमान्। आर्षग्रहणसामर्थ्याद्दितिपरत्वेपि यत्वं भवति। आर्ष इति काकाक्षिवदुभयत्र(४) सम्बध्यते, ग्रहोख्यादिमहान्पर्य्यन्तं। आर्षः स्वयम्पाठ इत्यर्थः। चिकित्वाँ॒ अनुमन्यतां इडावाँ॒ एषः। कक्षीवाँ॒ औशिजः। विश्वल्यो वाणवाँ॒ उत। इडाकक्षीवाणेति किं। करोति रसवानेव भवति(५)। अस्तृत्महि पयस्वाँ॒ अग्ने(६)। हीति किं। जर्जस्वान् पयस्वानित्याह। आर्ष इति-परत्वाद् देवहूतमाँ॒ इत्युखायां जुहोतीतिवद्यत्वप्राप्तिर्हिग्रहणेन प्रतिषिद्ध्यते(७)। स्तुतो यासि वशाँ॒ अनु। सुविदत्राँ॒ अपि(८)। अमित्राँ॒ अपबाधमानः। अराँ॒ इवाग्ने(९)। पोषाँ॒ अपुष्यन्। अग्ने महाँ॒ असि॥

---

१ यस्मानस्मिन्निति ख०।

२ आर्षे स्वरपरे यत्वं भवति इति ग०। आर्षस्वरपरे यत्वं भजते इति ख०। आर्षे स्वरे परे यत्वमापद्यते इति इ० मु०।

३ इत्युखायां जुहोति इति ख०।

४ काकाक्षिन्यायेनोभयत्रेति इ० मु० पुस्तकधृतपाठान्तरम्।

५ करोतीति ग० चिह्निते नास्ति।

६ अग्न आगममितिति ख०।

७ निषिद्ध्यते इति ग०,इ० मु० च।

८ सुविदत्रा अपि तथमेनेति ख०।

९ स्वाग्नेर्नैमिर्देवानिति ग०।

इन्द्रोमेऽक्रूद्धमिहाप्येत्वगन्मेडेन्यानायजिष्ठआचत्वंकुर्वतादुहदादितिरग्रेऽधरान्त्सपत्नानलम्परश्च ॥ २२ ॥

इन्द्रो मे, अक्रः, ऊद्धं, इहा, अप्येतु, अगन्म, इडेन्यान्, आयजिष्ठ, आच, क्रतु, अकुर्वत, अदुहत्, अदितिः, अग्रे, अधरान् सपत्नान्, अलं, इत्येवम्परो नकार आकारपूर्वो यकारमापद्यते(१)। 'च'कार आकारपूर्वत्वाकर्षकः। यथा, सपत्नाँ इन्द्रो मे। मे इति किं। युष्मानिन्द्रो वृणीतः। निग्राभेणाधराँ अक्रः। यूयं देवाँ ऊद्धम्। अग्ने देवाँ इहावह। दीर्घेण किं। यज्ञियानिह यान् हवामहे। घर्म्मो देवाँ अप्येतु। एत्विति किं। विद्वानपि जन्येषु(२)। सुवर्द्देवाँ अगन्म। ईडामहे देवाँ इडेन्यान्। देवाँ आयजिष्ठ स्वस्ति। देवाँ आचचत्। यजिष्ठश्चेति किं। यानावह उशतः। वाजी देवाँ क्रतुभिः,(३)। वि त्वा कामाँ अकुर्वत। यज्ञोऽसुराँ अदुहत्। विवस्वाँ अदितिः। अग्निस्ताँ अग्रे। अन्याँ अधरान् सपत्नान्। सपत्नानिति किं। भ्रातृव्यानधरान् पादयामि। पुरोडाशाँ अलङ्कुर्व्विति। अन्वादेशः किमर्थः। परिधीनकुर्व्वत। तत्तत्पदग्रहणे कर्त्तव्ये परपदग्रहणम्, अनार्षेपि संहिताविधानग्रहणस्य च(४) यत्वं स्यात् इति, नैमित्तिकस्य च निमित्तापेक्षत्वात्। ग्रहणस्य यथा, अमर्त्यो मर्त्याँ आविवेश, आवि-

---

१ यत्वमापद्यते इति ग०, इ० मु० च। २ जन्येषु भवतीति ख०। ३ येभिर्द्देवा क्रतुभिरिति ख०। ४ संहिताविधावग्रहणस्य चेति इ० मु०। संहिताविधानस्य चेति ग०।

विशामर्त्याँ अमर्त्य आविवेश। उदस्थामृताँ अनु, अमृताँ अन्वमृताँ अनु। एवं नैमित्तिकग्रहणस्य। अग्नेविमाँ अवि माँ अग्ने[1]। उदयाँ अजस्रं, उदयाँ अयाँ उदयान्[2]। एवं ग्रहणस्य नैमित्तिकस्य[3]। अग्निस्ताँ अग्ने ताँ अग्निः। अन्याँ अधरान्, अन्याँ अधराँ अधराँ अन्याँ अधरान्[4]। एवं सर्वत्र नकारस्य यकारोत्पत्तिर्द्रष्टव्या॥

न रश्मीन्त्समपयान्यमान्पतङ्गान्त्समानानर्वान्यजीयान्॥ २३॥

रश्मीन्, अपयान्, यमान्, पतङ्गान्, समानान्, अर्वान्, यजीयान्, एषु[5] ग्रहणेषु नकारः स्वरपरोपि न खलु रेफं वा यकारं वा भजते[6]। यथा, पुरुचा च रश्मीननु। अदितिः अपयानिति। उभयत्वादनयोः प्राप्तिः। ननु अदितिः अपयानित्यस्य[7] इति परत्वादेव निषेधे सति ग्रहणमनर्थकमिति-

१ अग्नेविमां अविमां अग्नेग्नेविमान् अमृतां अन्वन्वमृतां अमृतां अनु इति ग०। अग्नेविमां अग्नी अविमां अग्ने इति क०। अग्नेविमां अग्नी अविमान् अग्ने तथा अग्नेविमां अविमां अग्नेविमान् अविमा अग्ने इति द्० मु०।

२ उदया अजस्रं, अया अजस्रं, अजस्रमजस्रमया अया अजस्रं, उदया अया उदयान् इति ख०।

३ एवं ग्रहणनैमित्तिकस्येति ग०, द्०मु०च,

४ अग्निस्ता अग्ने ता अग्नेग्ने तां तान् ता अग्निः। अन्या अधरान् सपत्नान् अन्या अधरानधरानन्या अन्या अधरानिति ख०। तां अग्नेग्ने तांस्तां। अन्यां अधरां अधरानन्यां अधरान् इति ग०।

५ एतेष्विति ग०, द्० मु० च।

६ स्वरपरोपि रेफयकारं नापद्यते इति ख०। स्वरपरोपि न खलु रेफं यकारं वा भजते इति ग०, द्० मु०, च।

७ अपयानस्येति द्० मु०।

चेत् । आर्ष इतिपरत्वात् पुनः प्राप्तिः । तन्माभूदिति ब्रूमः । सुयमानूतये[1], पृष्ठरत्वात् प्राप्तिः । पतङ्गानसन्दितः । याज्यात्वात् प्राप्तिः । समानानुसन्नग्ने । अर्व्वानिन्द्र ग्रावाणः । यजोयानुपस्थे मातुः[2] । एषामपि सैव प्राप्तिः ॥

उदथापरश्चोदथापरश्च ॥ २४ ॥

उत, अथा, इत्येवम्परो नकारो यथाविहितं रेफं यकारं वा नापद्यते । यथा, अमित्रानुन्नयामि । उदिति किं[3] । तोऽ३ ऋतयून् । विद्वानथा भव । दीर्घोऽत्र ह्रस्वोपलक्षणमपि[4] यथा, विद्वानथा भव । यथासंहितास्थमेव निमित्तमत्र कार्य्यं[5] करोति निषेधरूपं । यथा, अमित्रानुदुदमित्राऽ३ अमित्रानुत् । विधिरप्येवं । यथासंहितास्थनिमित्त एवं[6] सर्वत्र भवतीत्यवोचाम[7] । यथा, सो अस्माऽ३ अस्मान्त् सो अस्मान् । अस्माऽ३ अवहायावहायास्मानस्माऽ३ अवहाय । एवमादि वेदितव्यम् ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे नवमोऽध्यायः ॥ * ॥

---

१ सुयमानूतये इत्यत्रेतिख० ।
२ यजोयानुपस्थे मा नु इति ख० ।
३ हल्मात्रेण किमिति ग०, इ० मु० च ।
४ अथेति ह्रस्वोपलक्षणमपि इति ख० ।
५ निमित्तं स्वकार्यमिति इ० मु० । निमित्ते स्वकार्यमिति ग० । निमित्तमत्र स्वकार्यमिति ख० ।
६ यथासंमितास्थनिमित्तैरेवेति ख० ।
७ भवत्यतोवोचामेति ग०, इ० मु० च ।

अथ दशमोऽध्यायः ।

अथैकमुभे ॥ १ ॥

'अथ' इत्ययमधिकारः । उभे अक्षरे एकं रूपं सजातीयमापद्यते इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः ॥

दीर्घं समानाक्षरे सवर्णपरे ॥ २ ॥

समानाक्षरे आत्मनः सवर्णपरे सति पूर्वापरीभूते एते उभे दीर्घमेकमाप्नुतः । यथा, त्वष्ट्रीष्वान्तरितं(१) । रात्रासीन्द्रियाण्यै(२) । सूपस्थादेवः(४) । सवर्णं परं यस्मात् तत्, सवर्णपरम्, तस्मिन् ॥

अथावर्णपूर्वे ॥ ३ ॥

'अथ' इत्ययमधिकारः । अवर्णपूर्वे सतीत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः । इदमधिकारान्तरम्, उपसर्गपूर्व आरम्, इतिपर्य्यन्तं । अवर्णश्चासौ पूर्वश्च अवर्णपूर्वः, तस्मिन् ॥

---

१ त्वचं त्वष्ट्रीष्वान्तरितं रक्ष इति इ० मु० । रात्रासीन्द्राण्यै इति ग०, इ० मु० च ।
२ सास्नासीन्द्राण्यै सन्नरनमिति ख० ।
४ सूपस्था देवो वनस्पतिरिति इ० मु० ।

इवर्णपर एकारं ॥ ४ ॥

अवर्णपूर्वं इवर्णपरे च सति, उभे(१) अक्षरे एकारमाप्नुतः। नेष्टिर्भवति। (२), इवर्णश्चासौ परश्च इवर्णपरः, तस्मिन् ॥

उवर्णपर ओकारं ॥ ५ ॥

अवर्णपूर्वं उवर्णपरे च सति, ते उभे(३) ओकारमाप्नुतः। इषे त्वोर्जे त्वा ॥

एकारैकारपर ऐकारं ॥ ६ ॥

अवर्णपूर्व्वं एकारैकारे च परे सति ते उभे(४) पूर्व्वापरीभूते ऐकारमाप्नुतः। सꣳ ब्रह्मणा पृच्यस्वैकताय(५)। सोमैन्द्राबभ्रुललमास्तूपराः। एकारश्च ऐकारश्च एकारैकारौ, तयोः समाहारः, एकारैकारं। समाहारे द्वन्द्वः। तच्च तत् परञ्च एकारैकारपरं, कर्म्मधारयः। तस्मिन्, एकारैकारपरे। एवमुपरितनेपि सूत्रे समासः ॥

ओकारौकारपर औकारं ॥ ७ ॥

अवर्णपूर्वं ओकारौकारे परे च सति, ते उभे(६) औकारमाप्नुतः। ब्रह्मौदनं पचति। दाम्नापौम्भन् ॥

---

१ ते उभे इति इ० मु०।

२ महेन्द्रायेति इ० मु० पुस्तकेऽधिकपाठः।

३ ते उभे अक्षरे इति ग०, इ० मु० च।

४ उभे अक्षरे इति ग०, इ० मु० च।

५ पृच्यस्वैकताय स्वाहेति ख०, इ० मु० च।

६ उभे अक्षरे इति ग०, इ० मु० च।

अरमृकारपरे ॥ ८ ॥

अवर्णपूर्वे ऋकारपरे च सति ते उभे(१) अरमिति विकारमाप्नुतः। अर्द्धर्च एकां(२)। आग्नेय्यर्चाग्नीध्रमतिमृशेत् ॥

उपसर्गपूर्व आरं ॥ ९ ॥

अवर्णपूर्वं इत्यनुवर्त्तते। तस्मादुपसर्गपूर्वं इत्यविशेषोक्तावथावर्णान्तोयमुपसर्गस्तस्यैव ग्रहणं(३)। ऋकारः सान्निध्याल्लभ्यते। उपसर्गपूर्वे ऋकारपरे च सति उभे(४) आरमिति विकारमाप्नुतः। उपार्च्छति(५)। अवार्च्छति। ऋतव्या उपोपार्त्तव्या ऋतव्या उप। अवर्णान्त उपसर्गविशेषणेन किं। व्यृद्धं वा एतत्। उपसर्गस्यासौ पूर्वस्तस्मिन्, उपसर्गपूर्वे(६) ॥

उदात्तमुदात्तवति ॥ १० ॥

उदात्तधर्म्मविशिष्टे वर्णे पूर्व्वतः परत उभयतो वा स्थिते उभे(७) अप्येकादेशमापन्न उदात्तधर्म्ममाप्नुतः(८)। उदात्तोऽस्यास्तीत्युदात्तवान्, तस्मिन् उदात्तवति। समानाक्षरमारभ्य सर्व्वस्यैकीभावे(९) यथाक्रममुदात्तानुदात्तस्वरितपूर्वे उभयोर-

---

१ उभे अक्षरे इति ग०, इ० मु० च।

२ एकां दध्यादिति ख०।

३ इत्यविशेषवर्णान्तोक्तावववर्णान्तोयमुपसर्गस्तस्यैव ग्रहणमिति इ० मु०। इत्यवधिविशेषोक्तावप्यवर्णान्तोयमुपसर्गस्तस्यैव ग्रहणमिति ख०।

४ ते उभे अक्षरे इति इ० मु०।

५ उपार्च्छत्यथ क इति ख०।

६ उपसर्गस्यासौ पूर्वस्य उपसर्गपूर्वः, तस्मिन् उपसर्गपूर्वे इ० मु०। उपसर्गस्यासौ पूर्वस्य स तथोक्तः, तस्मिन् उपसर्गपूर्वे इति ख०।

७ स्थिते सति ते उभे इति ख०, इ० मु० च।

८ उदात्तधर्ममेकमाप्नुत इति ख०।

९ सर्वस्मादेकीभावे इति ख०, ग० च।

दात्ते चोदाहरणानि(१) दर्शयिष्यामः। सविता प्रार्पयतु। शुचार्पयति। ब्रह्म यच्छापाग्नेर्ग्निं। याज्यैवैनं। पूषाधत्त। दिवीव चक्षुः। अद्य वसु वसतीतीन्द्रो हि देवानां। मैत्रावरुणी-त्याह। ननु सूत्रीयमित्यत्रोदात्तैकादेशे सति किं न स्यात् अयं विधिः। उदात्तपूर्व्वाधिकारे(२) सत्युभावे चेति सूत्रेण स्वरितस्य विशेषविधानादिति ब्रूमः। रेतो दधातूरुसक्थ्योः(३)। वनस्पतयोनूत्तिष्ठन्ति। ता दिक्षूपादधत। एवं समानाक्षर-संहितायामिकोभावोऽन्यत्रापि द्रष्टव्यः। एवमवर्णपर्वत्वेऽपि वक्ष्यते। सेमान्नो हव्यदातिं(४)। तं घेदग्निः(५)। कार्य्येति सवनमुखा-न्(६)। सेदु होतः प्रोक्षितं गोपायत। ऊर्ज्जस्थोर्जं बोभक्षी-येति। स्वायुषोद्दोषधीनां। इमे एवोपधत्ते। नैनं प्रत्योषति। एक एव यजतैकः। अथैकमुत्थानं। यन्नैकाष्ठ रशनां। इन्द्रिय-मेवैन्द्रेण। विहितदेवैर्यतेति। देवेभ्य ऐन्धं(७)। क्षत्रस्य चौजसे(८)। स्वाहौषधीभ्यः। सौषधीरनुरुध्यसे(९)। प्रौक्षीः केन(१०)। अरुणी ह स्माहोपवेशिः। आग्नेय्यर्चाग्नीध्रं। सैवा-स्पर्द्धिः। ऐन्धविरष्टुतः। एवविरखदयत्। आर्त्तिमार्च्छति। अवर्च्छात्येवं(११)। एवमादि॥

---

१ वोदाहरणानीति ग०, इ० मु० च।
२ उदात्तपूर्वस्याधिकारे इति ख०।
३ दधातूरुसक्थ्योरिति ख०। दधातू-रुसक्थ्येरा इति ग०।
४ हव्यदातिं जुषाण इति ख०।
५ घेदग्निर्वृधावतीति ख०।
६ सवनमुखे सवनमुखे कार्यत्तीति ख०, ग० च।
७ देवेभ्य ऐधेधं देवेभ्यो देवेभ्य ऐन्धेति ख०, ग० च।
८ लौजसे इति ख०, ग० च।
९ सौद्यषधीरनुरुध्यसे इति ख०।
१० हविषी प्रौक्षीरितिति ख०। प्रौक्षीः केनाप इतीति ग०।
११ अथार्च्छ त्येवमवारमिति ग०।

अनुनासिके अनुनासिकं ॥ ११ ॥

अप्रग्रहाः समानाक्षराण्यनुनासिकानीत्येषां मतमुद्दिश्यायं विधिः(१)। अस्मिन्(२) उदात्तवत्यनुनासिके पूर्वतः परत उभयतो वा स्थिते सति ते उभे अप्यक्षरे अनुनासिकं धर्म्ममेकमाप्नुतः। उक्तान्येवोदाहरणानि। एतदनिष्टं॥

स्वरितानुदात्तसन्निपाते स्वरितं ॥ १२ ॥

स्वरितानुदात्तयोः सन्निपाते एकादेशे सत्युभावपि तौ स्वरितमापद्येते। यथा, कन्येव तुन्ना। क्वीं क्व्योपाकृताय। याज्यैषा वै सप्तपदा(३)। अथ क्वास्य(४)। इह स्वरितस्याविशेषेण ग्रहणे नित्यस्वरित एव गृह्यते। तस्य सव्यञ्जनानामक्षराणाञ्च(५) पदावयवानामुत्पत्तिकाल एव सम्भवात्। अन्येषाञ्च(६) पदोत्पत्तिकालादूर्द्ध्वमक्षराणां पदानाञ्च संहितायामुदात्तात् परोनुदात्त इति विधानात्। तस्मिन्ननुदात्ते पूर्व उदात्त इत्यादि(७)। तस्मान्नित्यस्यैव मुख्यत्वम्। सामान्योक्तौ च सत्यां मुख्ये सम्प्रत्यय इति तस्यैव स्वीकारो युक्तः। अथाब्रवीदित्यादावेकादेशस्योदात्तानन्तरभावित्वादुदात्तात्परोऽनुदात्तस्वरितमिति अनेनैव स्वरितत्वं विज्ञेयं॥

---

१ अनुनासिकान्येकेषामित्येकेषां मतम्। तानुद्दिश्यायं विधिरिति इ० मु०। अनुनासिकानीत्येषां मतं तदुद्दिश्यायं विधिरिति ग०।

२ तस्मिन्निति इ० मु०।

३ सप्तपदा शक्वरी इति ग०।

४ क्वास्याहवनीय इति ग०।

५ स्वरितव्यञ्जनानामक्षराणाञ्चेति ग०। स्वरितस्य व्यञ्जनानामक्षराणाञ्चेति इ० मु०।

६ अन्येषान्तु इति ग०, इ० मु० च।

७ उदात्तस्वरितमित्यादि चेति ग०, इ० मु० च।

न धामापासिपरो बुध्नियाज्यापूषामिनन्तार्षे ॥ १३ ॥

धा, मा, पा, एष्वन्त्यस्वर आर्षपाठकाले[१] असिपरः, बुध्निया, ज्या, आ, पूषा, अमिनन्त, एष्वन्त्यस्वर[२]आर्षे स्वरपरः पूर्वविधिं न प्राप्नोति। यथा, स्वधा अस्युर्वी। सहस्रस्य प्रमा असि। धन्वन्निव प्रपा असि। असि पर इति किं। स्वधेति स्वाधा। प्रमेति प्रामा। प्रपेति प्राप[३]। आर्ष इति किं। स्वधा अस्यसि स्वधा स्वधासि। एवमादि। प्रपा अस्यसि प्रपा प्रपासि। प्र बुध्निया ईरते। ज्या इयं[४]। आ पूषा एत्वावसु। आकारः किमर्थः। तं पूषाधत्त। आ ते सुपर्णा अमिनन्त[५]। आर्षस्वरपर इति किं। बुध्निया ईरत ईरते बुध्निया बुध्नियेरते। ज्या इयमियं ज्या इयम्। आ पूषा पूषा पूषा। पूषा पूषा एत्वेतु पूषा पूषैतु। अमिनन्त एवैरेवैरमिनन्तामिनन्तैवैः। आर्षेयस्वर-पर[६]इति कि। असि स्वधा स्वस्यसि स्वधा। सुपर्णा अमिनन्ता-मिनन्त सुपर्णाः सुपर्णा अमिनन्त। इदमेव प्रत्युदाहरणं। ननु ज्येयममिनन्त वैरित्यादिजटायामपि तृतीयपर्य्यायस्य प्रकृतित्वात्। पूषा एत्वेतु पूषा पूषैतु। अमिनन्त एवैरमिनन्तामिनन्त एवैः। आ पूषा पूषा पूषा[७]॥

एष्टरेतनेमन्नोह्मन्नोष्ठवःपरो लुप्यते ॥ १४ ॥

एष्टः, एतन, एमन्, ओह्मन्, ओष्ठ, एवः, इत्येवम्परो अवर्णो

---

१ आर्षे पाठे इति इ० मु०।

२ एतेष्वन्त्यस्वर इति इ० मु०।

३ स्वधेति स्वऽधा। प्रमेति प्रऽमा। प्रपेति प्रऽपा इति ग०।

४ धन्वन् ज्या इयं मिति इ० मु०।

५ अमिनन्त एवैरिति ग०।

६ आर्षस्वरपर इति इ० मु०।

७ आपषा इत्यारभ्य अमिन्त एवैरिति पाठो ग०, चिह्नितपुस्तके नास्ति। इ० मु० पुस्तकेत्तु आपूषेत्यारभ्य सर्वस्वरम-पाठो नास्ति। तत्र केवलं पूषा अमिनन्त इत्युदाहरणद्वय मेवास्ति।

लुप्यते। अथावर्णपूर्व्वे इत्यनुवर्त्तमानादवर्ण(१) इति लभ्यते। अशीयेष्टा रायः। शमितार उपेत न। अपान्त्वेमन्त्सादयामि- त्यपान्त्वोन्नन्त्सादयामि। स्वाहोष्ठाभ्यां। ओष्ठशब्दस्य सर्व्वा- वस्थस्य ग्रहणं भवति, ग्रहणस्येति(२) वचनात्। उपयाम- मधरेणोष्ठेन। निरमिमतेवम्छन्दः। अवर्णो लुप्यत(३) इति किं। शित्योष्ठः शितिभ्रुः। शित्योष्ठाय स्वाहा॥

इवर्णोकारौ यवकारौ॥ १५॥

अवर्णपूर्व्वोऽधिकारो निवृत्तः। स्वरपराधिकारस्तु वर्त्तते। अथ स्वरपरो यकारमिति पूर्व्वाध्याये प्रक्रान्तः। इवर्णोकारौ पदान्तौ स्वरपरौ यथासङ्ख्येन यकारवकारावापद्येते(४)। अभ्यस्थात्। भवोत्यश्यामः(५)। आ पूषा एत्वावसु। दीर्घस्य प्रग्रहत्वविधानात्(६) प्लुतस्य(७) सन्धिनिषेधात्, उकारस्य कारो- त्तरत्वं कृतम्, इवर्णोकारौ यवकाराविति॥

उदात्तयोश्च परोऽनुदात्तः स्वरितं॥ १६॥

'च'कारः पूर्व्वसूत्रोक्तनिमित्तिनाविवर्णोकारावन्वादिशति। उदात्तयोरिवर्णोकारयोः परोऽनुदात्तः(८) स्वरितमापद्यते। व्यैवैनेन। अप्स्वग्ने। उदात्तयोरिति किं। नोचातं धच्यतसं।

---

१ इत्यनुवर्त्तनादवर्ण इति ग०, इ० मु० च।

२ ग्रहणस्य चेति इति ग० इ० मु० च।

३ अवर्णपूर्वो लुप्यते इति ग०।

४ यवकारावापद्येते इति इ० मु०।

५ ऊत्यश्यामेति ग०, इ० मु० च।

६ प्रग्रहधानादिति ग०।

७ तस्येति ग०।

८ परोनुदात्तयोस्वेति ग०। परोनुदात्तस्वेति इ० मु०।

मध्वग्नौ जुहोति। परोऽनुदत्त इति किं। तद्यद्दच्यध्यचराणि(१)। सलै यजेत। इन्वानं उपस्तीर्णं(२)॥

ऊभावे च॥ १७॥

'च'कारः पूर्व्वस्योदात्तत्वान्वाकर्षकः(३), परस्य चानुदात्तत्वमन्वादिशति। पूर्व्वेणोदात्तेन परस्य चानुदात्तस्य(४) ऊभावे क्रियमाणे स्वरितं जानीयात्। यथा, सून्नीयमिव। सून्नाता। मा सूत्तिष्ठन्। दिद्यूपदधाति। पूर्व्वेणोदात्तेनेति किं(५)। सूपस्थादेव। परस्यानुदात्तस्येति किं(६)। ता दिद्यूपादधतत॥

न श्येतौ मिथुनौ॥ १८॥

श्येतौ, मिथुनौ, इत्येतयोरन्त्यस्वरौ यथाविहितं(७) नापद्यते। यथा, श्यैतेन श्येती अकुरुत। मिथुनौ(८) अभवन्॥

लुप्येते त्ववर्णपूर्व्वौ यवकारौ॥ १९॥

अवर्णपूर्व्वौ स्वरपरौ यकारवकारौ लुप्येते। यथा, आप उन्दन्तु। ध्रुवा अस्मिन् गोपतौ स्यात्। न विचिन्त्या३ इति। इम एवास्मै। आसामद्दा एवैमौ। अवर्णपूर्व्व इति किं। वाय-

---

१ तद्यदृच्याचराणि इति क०।

२ इन्वा उपस्तीर्णमिच्छन्ति इति इ० मु०। इन्वा उपस्तीर्णमिच्छंढढन्ति इति ग०।

३ पूर्वोदात्तत्वान्वाकर्षक इति इ० मु०।

४ परस्यानुदात्तस्येति ग०, इ० मु० च।

५ पूर्वेणोदात्तेन किमिति ग०, इ० मु० च।

६ परस्यानुदात्तेन किमिति ग०।

७ यथाविहितं स्वत्वमिति ग०, इ० मु० च।

८ न मिथुनौ इति इ० मु०।

विष्टये दुरोणे। अहावनद्त। मर्त्यां॑ आविवेश। एवम्पूर्व्वाविति किं। अभ्यस्थात्। हृत्स्वसः। 'तु'शब्द इतरौ यवकारौ(१) निवर्त्तयन्नादेशप्राप्तयोरेवानयोर्लोपविषयत्वं द्योतयति। अवर्णः पूर्व्वो याभ्यां ताववर्णपूर्व्वौ॥

नोख्यस्य॥ २०॥

उख्यस्य शाखिनः पक्षे अवर्णपूर्व्वौ यवकारौ न लुप्येते। उक्तान्येवोदाहरणानि॥

वकारस्तु साङ्कृत्यस्य॥ २१॥

सान्निध्यान्निषेधो लभ्यते। साङ्कृत्यस्य मते अवर्णपूर्व्वो वकारो न लुप्यते, यकारस्तु लुप्यत एवेत्यर्थः।(२) अहावनद्त(३)। पूर्व्वाचार्य्यमतनिवर्त्तकः, 'तु'शब्दः। सूत्रमिदमेवेष्टम्। न तु पूर्व्वद्वयं परद्वयञ्च॥

उकारौकारपरौ लुप्येते माचाकीयस्य॥ २२॥

यकारवकाराववर्णपूर्व्वौ उकारौकारकपरौ लुप्येते, यथासङ्ख्यं माचाकीयस्याचार्य्यस्य मतेन(४)। आप उन्दन्तु। या जाता ओषधयः(५)। एवम्पराविति किं। त एनां भिषज्यन्ति। वायविष्टये। लुप्येते इति इह पुनरारम्भः। पूर्व्वसूत्रप्रयोजनसम्बन्धशङ्कानिराकरणार्थः(६)॥

---

१ यवौ इति ग०।

२ वायव इष्टये दुरोणो इति इ०मु० पुस्तकेऽधिकः पाठः।

३ अह्वावनद्दताहृते इति ग०, इ० मु० च।

४ मते इति इ० मु०।

५ ग, चिह्नितपुस्तके जाता इति पाठो नास्ति।

६ पूर्वसत्रद्वयस्थितजननसम्बन्धशङ्कानिराकरणार्थं इति ग०। पूर्वसूत्रद्वयस्थितनजः सम्बन्धशङ्कानिराकरणार्थं इति इ० मु०।

लेशो वात्सप्रस्यैतयोः॥२३॥

वात्सप्रस्यमते(१) यकारवकारयोः(२) अवर्णपूर्व्वयोर्लेशः स्यात्। लेशो नाम लुप्तवदुच्चारणं(३)। एतयोरित्युकारौकारपरौ निर्द्दिशति। उक्तान्येवोदाहरणानि॥

न प्लुतप्रग्रहौ॥२४॥

न खलु प्लुतः प्रग्रहश्च सन्धिविधिं भजते(४)। यथा, अस्तुही३ इत्यब्रूताम्। ते एनमभि। इत्यादिविधौ निषिद्धे अन्यस्मिंश्चानारभ्यमाणे प्रकृतिवद्भवति॥

परस्य परस्य॥२५॥

चकाराकृष्टयोर्य्यकारवकारयोर्लोपे(५) सति परसन्धिर्न(६) भवति। यथा, आप उन्दन्तु। अय इमं। सान्निध्यान्निषेधो लभ्यते। ननु लोपे सतीत्येतावतैवालं यकारवकारयोरिति किं(७)। सेदुहोता। सैनानीकेन। सोषधीरनु(८)। इत्यादि।

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे दशमोऽध्यायः॥

---

१ एतयोरिति इ० मु० पुस्तकेऽधिकः पाठः।

२ यवकारयोरिति ग०।

३ लुप्तमुच्चारणमिति ग०।

४ सन्धिविधिं भजेते इति इ० मु०। सम्बन्धिविधिं भजते इति क०।

५ यवकारयोर्लोपे इति ग०, इ०मु०च।

६ परः सन्धिर्नेति इ० मु०।

७ यवकारयोरिति किमिति ग०, इ० मु० च।

८ सौषधोरिति ग०।

अथैकादशोऽध्यायः ।

लुप्यते त्वकार एकारौकारपूर्व्वः ॥ १ ॥

एकारपूर्व्वं ओकारपूर्व्वो वा अकारो लुप्यते । यथा, तेऽब्रुवन् । (१),'तु' शब्दो न प्लुतप्रग्रहाविति निषेधसम्बन्धं(२) निवर्त्तयतीति केचित् । स्वरपराधिकारं निवारयतीत्यपरे सङ्गिरन्ते । एकारौकारौ पूर्व्वौ यस्मात् सः, तथोक्तः ॥

अथालोपः ॥ २ ॥

'अथ' इत्ययमधिकारः । अलोप उच्यते, इत्येतदधिकृतं वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः । न लोपः, अलोपः, लोपाभाव इत्यर्थः ॥

धातारातिरूपवाजपेयजुष्टश्येनायोव्यध्रुवच्चितिरियमेवसायाग्निर्मूर्द्धारुद्रप्रथमोपोत्तमविकर्षविद्वव्यह्निरण्यवर्णोययाज्यामहापृष्ठेत्र ॥ ३ ॥

धातारातिरित्यादिष्वनुवाकेषु एकारपूर्व्वं ओकारपूर्व्वो वा अकारो न लुप्यते । धातारातिरित्यत्र यथा, निधिपतिर्नो अग्निः ।

---

१ सोऽब्रवीदिति इ॰ मु॰ पुस्तकेऽधिकः पाठः ।

२ निषेधसम्बन्धविधिमिति ग॰, इ॰ म॰ च ।

रातिरिति किं। धाता देवेभ्योऽसुरान्, इति शाखान्तरे। उप-प्रयन्तो अध्वरमित्यत्र यथा, आरे अस्मे च, देव सवितः प्रसुव, इत्यादिषड़नुवाकानां वाजपेयसञ्ज्ञा। अत्र यथा, ते नो अर्व्व-न्तः। ते अग्ने अश्वं(१)। जुष्टोवाच इत्यत्र यथा, यस्ते अꣳशुः। यो द्रप्सोः अꣳशुः। श्येनायेत्यत्र यथा(२), नमः पितृभ्यो अभि। विश्वे अरपा एधते। उख्ये यथा, शृण्वन्ति विश्वे अमृतस्य। नमो अस्तु सर्पेभ्यः। ध्रुवच्चितिरित्यत्र यथा, विश्वे अभिगृणन्तु। ऊर्मिर्द्रप्सो अपां। च्चितिरिति किं। ध्रुवेत्यकारान्तस्य यदि ग्रहणं स्यात्। ध्रुवोसि ध्रुवोहमित्यत्रापि भवेदिति। इयमेव सायेत्यत्र, केतुं कृण्वाने अजरे। त्रयो घर्म्मासो अनु। इयमित्येतावतैवालं किमन्येन(३)। इयं ते शुक्र तनूरित्यत्र, सगर्भ्यो(४) अनुसखेत्यत्र, माभूदिति, सायेति पदद्वयं मन्दधियां प्रतिपत्त्यर्थमिति केचित्। अन्येत्वन्यथापि(५) कथयन्ति। अस्यानुवाकस्य शेषभूता या(६) ऋग-न्यत्र स्थिता सापि स्वीकर्त्तव्येति(७)। यथा, ये अपरीषु पश्यात्(८)। अग्निर्मूर्द्धा दिव इत्यत्र यथा, स योजते अरुषः। एनावो अग्निं(९)। मूर्द्धेति किं। अग्निर्मादुरिष्टादित्यत्र, यो मेतिदूरे रातीत्यत्र माभूदिति(१०)। रुद्रप्रश्नस्य प्रथमोपोत्तमानुवाकयोर्यथा, नमो

---

१ अश्वमा युञ्जन्निति ग०।

२ श्येनाय पत्वने इत्यत्र यथेति ग०, इ० मु० च। इ० मु० च।

३ किमन्यैरिति ग०।

४ सगर्भ इति ग०।

५ अन्ये त्वन्यथेति ग०, इ० मु० च।

६ शेषीभूता या इति ग०।

७ ऋगन्यत्र स्थितामपि स्वीकरोतीति ग०।

८ आो ते यन्ति ये अपरीषु पश्यादिति ग०,

९ अग्नि नमसेति ग०।

१० योमेतिदूरेरातीयतीति ग, चिह्नित-पुस्तके पाठोस्ति। माभूदितीति पाठस्तु नास्ति।

अस्तु नीलग्रीवाय (१) उत मा नो अर्भकम्। उत्तमस्य पूर्व्वतः सन्निकृष्टः, उपोत्तमः। अश्मन्नूर्ज्जमित्यनुवाकपञ्चकस्य(२) विकर्षसञ्ज्ञा। तत्र, अन्यन्ते अस्मत्। पावको अस्मभ्यम्। यो नः सतो अभि रायस्पोषे अधियज्ञो अस्यात्। वाजो नः सप्तेत्याद्यनुवाकत्रयस्य(३) विहव्य सञ्ज्ञा। तत्र, विश्वे अद्य मरुतः। देवासो अधिवोचत(४)। हिरण्यवर्णीये यथा, एको देवो अप्यतिष्ठत्। याज्यासु यथा, सुपथा राये अस्मान्। कामेन कृतो अभि(५)। समिद्दिशां, जीमूतस्य, यदक्रन्दो, मानो मित्रो, ये वाजिनम्, अग्निर्मन्वे, षण्णामेषामनुवाकानां महापृष्ठ्यसञ्ज्ञा। तत्र, विवस्वद्वाते अभि नः। सोमो अधिब्रवीतु। महेति किं। पृथिवी तेन्तरिक्षेण॥

अꣳहसोꣳहतिरनिष्टतोऽवन्त्वस्मानवद्यादहनि च॥ ४॥

'च'कारो धातारातिरित्यादिविषयान्वादेशकः(६)। अꣳहसः, अꣳहतिः, अनिष्टृतः, अवन्त्वस्मान्, अवद्यात्, अहनि, इत्येतेषु ग्रहणेषु धातारातिरित्यादिस्थलेष्वन्तर्वर्त्तिष्वेकारपूर्वं ओकारपूर्वो वा(७) न लुप्यते। यथा, प्रमुञ्चतो नो अꣳहसः। परिद्विषसो

---

१ द्वापे अन्वसस्पते इति ग० चिह्नितपुस्तके इ० मु० पुस्तके चाधिकपाठः।

२ अश्मन्नूर्जमित्यत्रानुवाकपञ्चकस्येति ग०, इ० मु० च।

३ वाजो नः सप्त प्रदिश इत्यत्राद्यनुवाकत्रयस्येति ग०, इ० मु० च।

४ विश्वे देवासो अधिवोचता मे इति इ० मु०।

५ कामेन कृतो अभ्यानदिति इ० मु०।

६ विषयान्वादिशतीति ग०।

७ एकारपूर्वो वौकारपूर्वो वा अकार इति ग०, इ० मु०।

अꣳहतिः । बर्द्धतान्ते अनिष्टृतः । ते अवन्त्वस्मान् । अस्मानिति किं । तेनोऽवन्तु पितरः । मित्रमहो अवद्यात् । शुचिः शुक्रे अहनि(१) । यवनहपरत्वादेषु प्राप्यमाणलोपेषु अलोपोऽयं विहितः । अन्वादेशः किमर्थः । स एवैनं पाप्मनोꣳहसो मुञ्चति ॥

अनु घर्म्मासआपोमर्त्तोरथस्त्वोदत्तेवातःपूर्वः ॥ ५ ॥

अत्र विसर्गान्तानामोत्वमापन्नानां पूर्वनिमित्तत्वमिति विज्ञेयं। घर्म्मासः, आपः, मर्त्तः, रथः, त्वः, दत्ते, वातः, एवम्पूर्वः(२) अन्वित्यत्र अकारो न लुप्यते । यथा, त्रयो घर्म्मासो अनु । तस्मादापो अनु(३) । यदा ते मर्त्तो अनु । अनु त्वा रथो अनु । पीयति त्वो अनु । शुक्रमादत्ते अनुहाय(४) । धनुस्तद्वातो अनु(५)। अन्विति किं । वातोऽभिपवते(६) । एवम्पूर्व इति किं। अनुगावोऽनुभगः(७) । यवनहपरत्वनिषेधार्थोऽयमारम्भः ॥

अभिवात्वपश्च ॥ ६ ॥

'च'कारो वात इत्यन्वादिशति । अभिवातु, अपः, इत्येतयोरकारो वातःपूर्वो न लुप्यते । मयोभूर्वातो अभिवातु(८) ।

---

१ अहन्योजसीनेति ग०, इ० मु० च ।
२ इत्येवम्पूर्व इति ग०, इ०मु० च ।
३ अनु स्य नेति ग०, इ०, मु० च ।
४ अनुहाय जार्यै इति ग०,इ० मु० च ।
५ अनुवातु ते इति ग०, इ० मु० च ।
६ अमुष्मिंल्लोके वातोऽभिपवते इति इ० मु० ।
७ अनुगावोनुभगः कनीनामिति इ०मु० ।
८ अभिवातूस्र इति इ० मु० ।

वात्विति किं। वातोऽभिषवते(१)। यद्वातो अपो अगमत्। अन्वादेशेन किं(२)। अवरुन्धेऽपोऽग्नेऽभिव्याहरति॥

अन्वगमश्च॥ ७॥

अप इति 'च'कारोऽन्वादिशति। अनु, अगमत्, इत्येतयोरकारो न खल्वपःपूर्वौ लुप्यते। अपो अन्वचारिषं। अपो अगमदिन्द्रस्य। एवम्पूर्व इति किं। पश्वोनूदायन्॥

आपःपूर्वोऽद्भिरपान्नपादस्मान्॥ ८॥

अद्भिः, अपान्नपात्, अस्मान्, एतेषु अकार आपःपूर्वो न लुप्यते। समापो अद्भिरग्मत। देवी रापो अपान्नपात्। नपादिति किं। वारुणीरापोपाञ्च। आपो अस्मान्मातरः(३)। एवम्पूर्व इति किं। सोऽस्मान् पातु॥

रायेसइन्द्रःपूर्वश्चाकारपरे॥ ९॥

'च'काराकृष्टे अस्मान्ग्रहणे अकारपरे(४) वर्त्तमानोऽकारो राये, सः, इन्द्रः, एवम्पूर्वो(५) न लुप्यते। रायेपूर्वस्योदाहरणं शाखान्तरे, अथवा जटायाम्भवति। राये अस्मा ऽ॒ अस्मान् राये राये अस्मान्। यथासंहितायां नोदाहरणम्, अकारपरत्वाभावात्, तर्हि तदा(६) कथमलोप इति चेत्। त्रिपदप्रभृतिपुनरुक्तत्वादिति ब्रूमः। मा सो अस्मा ऽ॒ अवहाय(७)। इन्द्रो अस्मानस्मिन्(८)।

---

१ वातोभिपवते इति ग०।
२ वातपूर्व इति किमिति ग०।
३ अस्मान्मातरः शुन्धन्त्विति ग०।
४ अकारपरे सति इति इ० मु०।
५ इत्येवम्पूर्व इति ग०, इ० मु० च।
६ तदेति पदं ग० चिह्निते इ०मु० पुस्तके च नास्ति।
७ सामो अस्मानवहायेति ग०।
८ इन्द्रो अस्मानस्मिन् द्वितीये इति ग०,इ० मु० च।

अकारपर इति किं । सोऽस्मान् पातु । एवम्पूर्वं इति किं । सोऽस्मानमुत्र । अकारः परो यस्मात् तत् अकारपरम्, तस्मिन् ॥

तेपूर्वोऽद्यान्धोऽंशुरग्ने ॥ १० ॥

अद्य, अन्धः, अंशुः, अग्ने, एतेष्वकारः, ते इत्येवम्पूर्वो न लुप्यते । यथा, पशुं पशुपते ते अद्य । उपो ते अन्धः । अंशुना ते अंशुः । यत्ते अग्ने तेजस्तेनाहं । एतेष्विति किं । तेऽग्नये-प्रवते(१) । तेपूर्व इति किं । प्रथमोऽंशु स्कन्दति । तेन त्वा दधेग्ने अङ्गिरः ॥

मेपूर्वश्च ॥ ११ ॥

'च' काराकृष्टे सति अग्न इत्यस्मिन् अकारो मे इत्येवम्पूर्वो न लुप्यते(२) । यथा, यन्मे अग्ने अस्य । इमा मे अग्न इष्टकाः । मेपूर्व इति किम् । तेन त्वा दधेऽग्ने अङ्गिरः । अन्वादेशेन किं । प्राणश्च मेऽपानश्च मे । तदशकं तन्मे राधि ॥

अस्याश्विनापरा च ॥ १२ ॥

मेपूर्व इति 'च'कारोऽन्वादिशति । अस्य, अश्विना, अपरा, एतेष्वकारो मेपूर्वो न लुप्यते । वियन्तु देवा हविषो मे अस्य । पुनर्मे अश्विना युवं(३) । यद्दा मे अपरागतं ॥

---

१ ते तेग्नये प्रवते इति द० मु० । मे पूर्वोऽग्ने इत्यत्राकारो न लुप्यते इति द०मु० ।
२ चकारोऽग्ने इत्यन्वादिशति । ३ युवं चच इति द० मु० ।

नःपूर्वोऽसदग्निरघान्तमोऽभ्यस्मिन्नद्यपथि ॥ १३ ॥

असत्, अग्निः, अघ, अन्तमः, अभि, अस्मिन्, अद्यपथि, एतेष्वकारो न इत्येवम्पूर्वो न लुप्यते। यथा, सुपारा नो असद्वशे। अयं नो अग्निर्वरिवः। रक्षामाकिर्नो अघशंस ईशत। अग्ने त्वं नो अन्तमः। स्विष्टिन्नो अभि(१)। शिक्षा नो अस्मिन्। तेभिर्नो अद्यपथिभिः(२)। पथीति किं। नोद्य वसु वसतीति। नःपूर्वं इति किं। तस्मादश्वाद्गर्दभोऽसत्तरः। सोऽग्निर्जातः। उत्तरतोघायुरभिदासति। तेस्मिन्नैच्छन्त। एतेष्विति किं(३)। ते नः पान्तु ते नोऽवन्तु॥

नमःपूर्वोऽग्रेऽश्वेभ्योऽग्रियाय ॥ १४ ॥

अग्रे, अश्वेभ्यः, अग्रियाय, एतेष्वकारो नमःपूर्वो न लुप्यते। नमो अग्रेबधाय च। नमो अश्वेभ्योऽश्वपतिभ्यः। नमो अग्रियाय च। नमःपूर्वं इति किं। अपोऽग्रेऽभिव्याहरति। एतेष्विति किं। नमोग्नये प्रतिविद्धाय॥

आविन्नःसोमःपूर्वो ग्निपरः(४) ॥ १५ ॥

आविन्नः, सोमः, एवम्पूर्वोऽकारोऽग्निपरो न लुप्यते। ग्नीतिपदैकदेशः शाखान्तरे बह्वपादानार्थः। आविन्नो अग्निर्गृहपतिः। सोमो अग्निरुप देवाः। एवम्पूर्वं इति किं। सोग्निर्जातः। एवम्पर इति किं। आविन्नोयमसौ॥

---

१ स्विष्टिं नो अभिवसीय इति इ० मु०। स्विष्टिं नो अभिवसीयो नयन्त्विति ग०।

२ अद्यपथिभिः सुगेभी रक्षा च न इति इ० मु०।

३ नमोग्नये प्रतिविद्धायेति पाठः इ० मु० पुस्तकेधिकोस्ति।

४ पूर्वोऽग्निपरः इति क०।

धीरासोऽदब्धासएकादशासऋषीणांपुत्रःशार्य्यातेऽषाढःपितारःपृथिवीयज्ञआसतेयेगृह्णाम्यग्रेवाꣳएषजज्ञेसꣳस्फानोयुवयोर्य्यःपृष्ठेपतिर्व्वागोशुष्मःपुवःसमिद्धऋषभःपाथोवचोवर्षिष्ठेजुषाणोयोरुद्रोवृष्णःपूर्व्वः ॥ १६ ॥

धीरासः, अदब्धासः, एकादशासः, ऋषीणां पुत्रः, शार्य्याते, अषाढः, पितारः, पृथिवी यज्ञे, आसते ये, गृह्णाम्यग्रे, वाꣳएषः जज्ञे, सꣳस्फानः, युवयोर्य्यः, पृष्ठे, पतिर्व्वः, गो, शुष्मः पुवः, समिद्धः, ऋषभः, पाथः, वचः, वर्षिष्ठे, जुषाणः, यो रुद्रः, वृष्णः, एवम्पूर्व्वा न खल्वकारो लुप्यते। यथा, धीरासो(१) अनुदृश्य यजन्ते। अदब्धासो अदाभ्यं। एकादशासो, अप्सुषदः। ऋषीणां पुत्रो अधिराज एषः। ऋषीणामिति किं। यस्य पुत्रो जातः। यथा शार्य्याते अपिवः। अषाढो अग्निः। त्वत्पितारो अग्ने देवाः। पृथिवी यज्ञे अस्मिन्। पृथिवीति किं। ते मास्मिन् यज्ञे, इत्यत्र(२) जटायां। अध्यासते ये अन्तरिक्षे। आसत इति किं। पृथिव्यां(३) येन्तरिक्षे। मयि गृह्णाम्यग्रे अग्निं। गृह्णामीति किं। अष्टौ-कृत्वोग्रेभिषुणोति। इडावाꣳएषो असुर। वानिति किं। शुक्र एषोऽन्तोऽन्तं मनुष्यः। प्रथमं(४) यज्ञे अग्निः। सꣳस्फानो अभिरक्षतु। समिति किं। गयस्फानोऽग्निषु, इति शाखान्तरे।

---

१ तां धीरास इति ग०, इ० मु० च। ३ ये पृथिव्यामिति इ० मु०।
२ यज्ञ इतीति ग०। ४ इतः प्रथममिति ग०, इ० मु० च।

युवयोर्यो अस्ति। युवयोरिति किं। योप्सु भस्म(१)। नाकस्य पृष्ठे अधि(२)। यज्ञपतिर्वो अत्र। पतिरिति किं। नवो भागानि हव्यं। गो अर्धमेव सोमं करोति। अप्यकारादिति वचनात् अगो अर्वम् इति चोदाहरणं। उच्छुष्मो अग्ने यजमानाय(३)। अग्रे पुवो अग्रे गुवः। समिद्धो अञ्जन्। द्यामृषभो अन्तरीक्षं। प्रियं पाथो अपीहि। उग्रं वचो अपावधीत्(४)। वर्षिष्ठे अधिनाके। जुषाणो अप्तुराज्यस्य वेतु। यो रुद्रो अग्नौ यः। य इति किं। यदुपत्न्याद्रुद्रोस्य(५)। वृष्णो अश्वस्य सन्दानं(६)॥

अरतिमस्ययज्ञस्यातिद्रुतोऽतियन्त्यनृणोऽविष्यन्ननमीवोऽन्नेष्वर्चिरजीतानज्यानिमक्रियाअम्बाल्यर्वन्तमस्त्वकृणोदङ्गिरोऽप्सु योअस्कभायदच्युतोऽश्वसनिरस्थभिरशिश्रेदङ्गेऽघ्निय॥१७॥

अरतिं, अस्य यज्ञस्य, अतिद्रुतः, अतियन्ति, अनृणः, अविष्यन्, अनमीवः, अन्नेषु, अर्चिः, अजीतान्, अज्यानिं, अक्रियाः, अम्बालि, अर्वन्तं, अस्तु, अकृणोत्, अङ्गिरः, अप्सु यः, अस्कभायत्, अच्युतः, अश्वसनिः, अस्थभिः अशिश्रेत्, अङ्गे, अघ्निय, एतेष्वकारो न खल्वेकारपूर्व ओकारपूर्वो वा लुप्यते। यथा, मूर्द्धान-

१ योप्सु भस्म प्रवेशयति इति दू० मु०। ४ अपावधीमिति ग०, दू०, मु० च।
२ अधिरोचने दिव इति ग०, दू० मु० च। ५ यदुपत्न्याद्र द्रोस्येति दू० मु०।
३ यजमानायैधीति दू० मु०। ६ सन्दानमसीति ग०, दू० मु०।

न्दिवो अरतिं(१)। यन्मे अग्ने अस्य यज्ञस्य। यज्ञस्येति किं। एतेऽस्याममुष्मिन्। प्रत्यङ्क्सोमो अतिद्रुतः। पश्यन्तो अतियन्ति। द्रुतीयन्तोभ्यां किं(२)। नैनꣳ सोमोतिपवते। तदग्ने अनृणो भवामि। नयवसे अविष्यन्। स्वावेशो अनमीवः(३)। ये अन्ने षु विविध्यन्ति। जातवेदो यो अर्च्चिः। शरदो अजीतान्। तेषां यो अज्यानिं। तिरो अह्निया मा सुहुताः। अम्बे अम्बालि। यो अर्वन्तं जिघाꣳसति। वहिस्ते अस्तु बालिति। इत इन्द्रो अक्षणोत्। अग्ने अङ्गिरो योस्यां। यो अप्सु य ओषधीषु। य इति किं। अश्वोप्सु योवेतसः(४)। यो अस्कभायदुत्तरं। मदाय रसो अच्युतः। यो भक्तो अश्वसनिः। सनिरिति किं। अश्वे-भ्योऽश्वपतिभ्यः(५)। इन्द्रो दधीचो अस्थभिः। भिरिति किं (६)। दद्दीशमस्थभ्यो मज्जभ्य(७) इत्यत्र जटायां(८) अस्थभ्यो मज्जभ्यो मज्जभ्योऽस्थभ्योऽस्थभ्यो मज्जभ्यः। वरुणो अशिश्रेत्। अङ्गे अङ्गे निदेध्यत्(९)। अघ्नियेत्यकारग्रहीतः पदैकदेशो बह्वपादा-नार्थः। एतानि ते अघ्निये नामानि। यदापो अघ्निया वरुणेति(१०)। पयो अघ्नियासुहृत्सु।

---

१ अरतिं पृथिव्या इति इ० मु०।

२ द्रुतो यन्तीत्याभ्याकिमिति इ० मु०। द्रुतोतियन्ती इत्येताभ्यां किमिति ग०।

३ अनमीवो भवामि इति इ० मु०।

४ अप्सुजो वेतस इति ग०,इ० मु० च।

५ अश्वपतिभ्यश्चेति इ० मु०।

६ अस्थभिरिति किमिति इ० मु०, ग० च। अस्थभिरितिकिमिति ग०।

७ ग, चिह्नित इ० मु० पुस्तके च दद्दीति पदं नास्ति।

८ इति जटायामिति ग०।

९ निदध्यदिति ग०।

१० वरुणेति शपामहे इति इ० मु०।

अध्वर स्वरपरे ॥ १८ ॥

अध्वर इत्यस्मिन् ग्रहणे स्वरपरे वर्त्तमानोऽकारो न खल्वेकारौकारपूर्व्वो वा[१] लुप्यते। सत्यधर्म्माणो अध्वरे। हविष्मान् देवो अध्वरः। उपप्रयन्तो अध्वरमित्याह। अत्र त्रिपदप्रभृतिन्यायेन[२] प्रसरति। तल्लक्षणासम्भवात्[३]। स्वरपर इति किं। घ्रुग्वा अग्निः सोध्वर्युं[४] ॥

स पूर्व्वस्यार्द्धसदृशमेकेषामर्द्धसदृशमेकेषाम् ॥ १९ ॥

योऽयमकारोऽलुप्तः स पूर्व्वस्य एकारस्य ओकारस्य वा अर्द्धमात्रसदृशं कालं भजते इत्येकेषामृषीणां मतं। अध्यर्द्धमात्रः स्यादित्यर्थः। उक्तान्येवोदाहरणानि दर्शनात्[५]। अर्द्धेन सदृशः अर्द्धसदृशः, तम्, अर्द्धसदृशम् ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे एकादशोऽध्यायः ॥

———

१ वेति पदं इ० मु० पुस्तके नास्ति।
२ त्रिपदन्यायेनेति ग०।
३ तल्लक्षणाभावसम्भवादिति ग०।
४ सोध्वर्युरिति ग०।
५ विशेषदर्शनादिति ग०, इ० मु० च।

अथ द्वादशोऽध्यायः ।

अथ लोपः ॥ १ ॥

'अथ' इत्ययमधिकारः । अकारस्य लोप उच्यते, इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः । धातारातिरित्यादिविषयोऽयमध्यायारम्भः ॥

असि ॥ २ ॥

'असि' इत्यस्मिन् अकारो लुप्यते, एकारौकारपूर्व्वः । यथा, सुपर्णोऽसि गरुत्मान् । प्रथोऽसि पृथिव्यसि ॥

न गर्भःसन्नद्धोयमोभद्रःपूर्व्वः ॥ ३ ॥

गर्भः, सन्नद्धः, यमः, भद्रः, एवम्पूर्व्वः सान्निध्याल्लब्धे असीत्यस्मिन् अकारो(१) न लुप्यते । गर्भो अस्योषधीनां । सन्नद्धो असि वोड़यस्व । समिति किं । उपनद्धोऽसुर इति केचिदुदाहरन्ति, तच्चिन्त्यं । धातारातिरित्याद्यन्तःपातित्वाभावात्, असिशब्दादर्शनाच्च । मुख्यन्तु शाखान्तरे विज्ञेयं प्रत्युदाहरणं । असि यमो अस्यादित्यः । त्वं भद्रो असि क्रतुः ॥

---

१ असीत्यस्मिन्ग्रहणेऽकार इति इ० मु० ।

यवनह्वपरः स्वरपरेषु ॥ ४ ॥

यकारवकारनकारहकारपरोऽकारो लुप्यते, तेषु यकारादिषु स्वरपरेषु सत्सु। हिरण्यशृङ्गो यो अस्य पादाः। वनस्पतेऽव सृजाररराणः। वरेण्योऽनुप्रयाणं। जम्भयन्तोऽहिं(१)। स्वरपरेष्विति किं। शुक्रान्ते अन्यत्। अग्ने अङ्गाꣳहितः॥

जकारग्नपर उदात्तः ॥ ५ ॥

जकारपरस्य(२) ग्नपरस्य अकार उदात्तो लुप्यते। ओजोऽजायथाः। शुचिः पावक वन्द्योऽग्ने। उदात्त इति किं। न तत्पाणो अजरः। निधिपतिर्नो अग्निः॥

मोवचोदधानस्थेपूर्व्वश्च ॥ ६ ॥

ग्नपर इति 'च'कारो ज्ञापयति। मः, वचः, दधानः, स्थे, इत्येवम्पूर्व्वो ग्नपरोऽकारलोपः(३) भवति। यथा, अङ्गिरस्वदच्छेमोग्निं मे, इत्यत्र पदैकदेशग्रहणं सङ्क्षेपार्थं। अङ्गिरस्वद्भरिष्यामोऽग्निं। वचोऽग्नये भरता बृहत्। दधानोऽग्निर्होता। सधस्थेऽग्निं पुरीष्यं। अन्वादेशः किमर्थः। सधस्थे अध्युत्तरस्मिन्। ग्नपरस्यानुदात्तार्थोयमारम्भः(४) ॥

---

१ जम्भयन्तोऽहिं वृकमिति ग०, इ० मु० च।

२ जकारपर इति ग०, इ० मु० च।

३ ग्नपरोऽनुदात्तोप्यकारलोप इति इ० मु०।

४ ग्नपरस्याकारस्यानुदात्तार्थोयमारम्भ इति इ० मु०। ग्नपरस्यानुदात्तोयमारम्भ इति ग०।

अभ्यावर्त्तिन्नपूपमपिदधाम्यद्यान्वदितिःशर्म्माग्नेर्जिह्वामग्नयःपप्रयोऽस्माकमस्मेधत्ताश्माश्वाश्रुतिरश्यामामार्यमस्मत्पाशानस्मिन्यज्ञेऽस्ताव्यथमानाभिद्रोहमधाय्यदोऽथोदुग्धाअरिष्टाअरथाअर्चन्त्यन्तरस्यामस्थान्नायाङ्गिरस्वदकरं ॥ ७ ॥

अभ्यावर्त्तिन्, अपूपम्, अपिदधामि, अद्यानु, अदितिः शर्म्म, अग्नेर्जिह्वां, अग्नयःपप्रयः, अस्माकं, अस्मेधत्त, अश्मा, अश्वा अश्रुतिः, अश्याम, अमा, अर्य्यमन्, अस्मत्पाशान्, अस्मिन् यज्ञे, अस्ता, अव्यथमाना, अभिद्रोहं, अधायि, अदः, अथो, अदुग्धाः, अरिष्टाः, अरथाः, अर्चन्ति, अन्तरस्यां, अनस्थ, अन्नाय, अङ्गिरस्वत्, अकरं, एतेष्वकारो लुप्यते, एकारौकारपूर्वः। यथा, अग्नेऽभ्यावर्त्तिन्। अभ्यावर्त्तिन्निति किं(१)। कामेन कृतो अभ्यानडर्कं। भद्रशोचेऽपूपन्देव। अग्नेऽपिदधाम्यास्ये। दधामीति किं। वद्दा अपि कच्च आसनि(२)। अनु नोऽद्यानुमतिः। अन्विति किं। प्रतत्ते अद्य शिपिविष्टनाम। अधिब्रवीतु नोऽदितिः शर्म्म यच्छतु। शर्म्मेति किं। यथानो अदितिः करति। अध्वरन्नोऽग्नेर्जिह्वामभि गृणीतं। जिह्वामिति किं। व्रतादद्न्ते अग्नेः। ते नोऽग्नयः पप्रयः। पप्रय इति किं। पुरीष्यासो

---

१ आवर्त्तिन्निति किमिति ग०, ह० मु० च। २ आसिनीति ग०।

अग्नयः(१)। नरोऽस्माकमिन्द्र। विश्वेऽस्मे धत्त। धत्तेति किं। द्रविणं वाजो अस्मे वाजस्य मा। परिवृङ्धि नोऽश्मा भवतु(२) 'अश्वाश्रुतिः' अश्वा इत्यस्य यत्र यत्र श्रुतिः, तत्र तत्र लोपः। वृषपाण्योऽश्वा रथेभिः। श्रुतिरिति किं। प्रचेतसोऽश्वान्। भरन्तोऽश्वायेव। दीर्घग्रहणेन किं। चषालं ये अश्वयूपाय तक्षति। सुचक्रो अश्वो वनतां। वाजयन्तोऽश्याम द्युम्नं। पुनस्तेऽमैषां। ये तेऽर्यमन्। तेऽस्मत्पाशान्। पाशानिति किं। अन्यन्ते अस्मत्(३)। यः पिता तेऽस्मिन् यज्ञे। यज्ञ इति किं। ते अस्मिन् जवमादधुः। प्रसितिं द्रूणानोऽस्तासि। मा सुपर्णोऽव्यथमाना। जनेऽभिद्रोहं मनुष्याश्चरामसि। द्रोहमिति किं। बृहस्पते अभिशस्तेः(४)। सुमन्मेऽधायि मन्म(५)। येऽदो रोचने दिवः। मह्यमग्नेऽथो सीद। शूर नोऽनुमोदुग्धाः। पूर्वेऽरिष्टाः स्याम। पवयोऽरथाः(६)। गायत्रिणोऽर्चन्ति(७)। अभिशुशुचोऽन्तरस्यां। अस्यामिति किं। रुक्मो अन्तर्विभाति। येऽत्रस्थ पुराणाः। स्थेति किं। त्वष्टा नो अत्र वरिवः(८)। रायस्पोषोऽन्नाय त्वा। पृथिव्याः सधस्थेऽङ्गिरस्वत्। अर्हन्तेभ्योऽकरं नमः॥

गाहमानोजायमानोहेतयोमन्यमानोवनस्पतिभ्यःपतेसिधस्तपसःस्वधावोभामितोऽग्नयआयोऽध्वर्यॉक्रतोपूर्वः॥८॥

१ अग्नयः प्रावणेभिरिति ग०,इ०मु० च।
२ अश्मा भवतु नस्तनूरिति इ० मु०। अश्मा इ० मु०। भवातु इति ग०।
३ अस्मत्तपन्त इति इ० मु०।
४ अभिशस्तेरमुञ्च इति इ० मु०।
५ उपप्रागात् सुमन्मेधायि मन्मे इति
६ ये पवयोऽरथा इति इ० मु०।
७ गायत्रिणोर्चन्त्यर्कमिति इ० मु०।
८ वरिवः कृणोतु इति ग०।

गाहमानः, जायमानः, हेतयः, मन्यमानः, वनस्पतिभ्यः, पतेस्त्विषः., तपसः, स्वधावः, भामितः, अग्नयः, आयो, अध्वर्य्यो, क्रतो, इत्येवम्पूर्वोऽकारो लुप्यते । यथा, गाहमानोऽदायः । जायमानोऽक्ना केतुः । हेतयोऽन्यमस्मत् । मन्यमानोऽमर्त्यं । वनस्पतिभ्योऽधिसम्भृतां । वनस्पतीति किं । नमः पिपलभ्यो अभि । अन्नपतेऽन्नस्यनिहो अतिस्त्विषोत्यचित्तिं । तपसोऽधिजातः । देव स्वधावोऽमृतस्य धाम । स्वधेति किं । अन्यावो अन्यामवतु । भामितोमित्रस्य(१) । यानग्नयोऽन्वतप्यन्त । उकारस्य वकारविक्रियायां व्यञ्जनपरो नकार इति(२)यवनहनिषेधाभावादलोपे प्राप्ते तदपवादोयं । अग्ने दब्धायोऽशीततनो । अध्वर्य्योविरपाः३(३) । शतक्रतोऽनु ते दायि । अत्र यवनहेत्यादिनैव लोपे सिद्धे पुनरस्य ग्रहणं नियमार्थं । आयोऽध्वर्य्यो क्रतो इत्येतत्पदत्रयपूर्वाकारस्यैव(४) लोपः । नत्वितरत्र(५)प्रग्रहपूर्वस्येति । यथा, इमे अश्विना संवत्सरः ॥

तस्मिन्ननुदात्ते पूर्व उदात्तः स्वरितं ॥ ९ ॥

यमधिकृत्यायं प्रबन्ध उक्तः, तस्मिन्नकारानुदात्ते(६) लुप्ते सति पूर्व एकार ओकारो वा उदात्तः स्वरितमापद्यते । यथा, तेऽब्रुवन् । सोऽब्रवीत् ॥

---

१ मित्रस्याभिदासत इति ग०, इ० मु० च ।

२ नकारपर इति ग० ।

३ अध्वर्य्योविरपा३ इति ग० ।

४ इत्येतत्पदत्रयपूर्वस्यैवाकारस्य इति ग०, इ० मु० च ।

५ नत्वितरेति इ० मु० ।

६ तस्मिन्नकारेनुदात्ते इति ग०, इ० मु० च ।

उदात्ते चानुदात्त उदात्तं ॥१०॥

तस्मिन्नेवाकारे उदात्ते लुप्ते[१] पूर्वं एकार ओकारो वा अनुदात्त उदात्तमापद्यते। यथा, अवरुन्धतेऽसत्रं वै। अन्नपतेऽन्नस्य नः॥

स्वरितश्च सर्वत्र स्वरितश्च सर्वत्र ॥११॥

उदात्त इति शब्दो ज्ञापयति चकारः[२]। तस्मिन्नकारे उदात्ते लुप्ते सर्वत्र[३] एकार ओकारो वा स्वरित उदात्तमापद्यते। भेषजं गवेऽश्वाय। ओजोऽजायथाः। सर्वत्रेति वचनान्नित्यस्वरितेष्वपि तथैव तद्विधानं स्यात्। उक्थ्योऽथातिरात्र[४]॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे द्वादशोऽध्यायः॥ * ॥

इति प्रथमः प्रश्नः।

---

१ लुप्ते सतीति ग०, इ० मु० च।
२ चशब्दो ज्ञापयति इति ग०,इ०मु० च।
३ उदात्ते सति सर्वं इति इ० मु०। उदात्ते सति लुप्ते सति सर्वत्रेति ग०।
४ अथोक्थ्योऽथातिरात्र इति ग०,इ० मु० च।

अथ त्रयोदशोऽध्यायः ।

अथ मकारलोपः ॥ १ ॥

'अथ' इत्ययमधिकारः । मकारस्य लोप(१) उच्यते, इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः । मकारस्य लोपः, मकारलोपः ॥

रेफोष्मपरः ॥ २ ॥

रेफपरश्चोष्मपरश्च पदान्तो मकारो लुप्यते । यथा, प्रत्युष्टꣳ रक्षः । सꣳशितं मे ब्रह्म । तꣳ षडहानि । सꣳसमिद्युवसे(२) । त्वꣳह यद्यविष्ठ्य । एवम्पर इति किं । इदं वामास्ये । पदान्त इति किं । तस्मात्ताम्रा आपः । रेफश्च ऊष्मा च रेफोष्माणौ, तौ परौ यस्मात् सः, तथोक्तः(३) ॥

यवकारपरश्चैकेषामाचार्याणां ॥ ३ ॥

यकारपरो वकारपरो वा मकारो लुप्यते, इत्येकेषां मतं ।

---

१ मकारलोप इति ग०, इ० मु० च ।

२ संसमिद्युवसे दृषन् इति इ० मु० ।

३ रेफश्च ऊष्माणश्च रेफोष्माणः, ते परे यस्मात् सः, तथोक्त इति इ० मु० ।

य एवास्य पञ्चमानुवाके(१) सवर्णापत्तिं प्रतिषेधन्ति(२), तेषामेवैष लोप इति विधिरन्वादिशति(३)। चकारः(४) सिंहावलोकनेन। यथा, त्वꣳयज्ञेष्वीड्यः। तꣳ एवा एतꣳयजमानः। एवम्पर इति किं। यं कामं कामयते(५)। यकारश्च वकारश्च यकारवकारौ(६) तौ, परौ यस्मात् सः, तयोक्तः। नैतत् सूत्रमिष्टं(७)॥

न सꣳसामिति रापरः॥ ४॥

रा इति परः(८) सं, सां, इत्येतयोर्ग्रहणयोर्मकारलोपो न भवति(९)। यथा, प्र सम्राजं। साम्राज्याय सुक्रतुः। सꣳसामिति किं। शꣳराजन्नोषधीभ्यः। रापर इति किं। सꣳरराणः। पदान्तस्य व्यञ्जनपरः प्राकृतः, इति वक्ष्यमाणं द्वित्वनिषेधम् 'इति' शब्दो निवारयति। तस्मादत्र द्वित्वसिद्धिः॥

अथ वर्णानां॥ ५॥

'अथ' इत्ययमधिकारः। वर्णानां संहिता वक्ष्यते, इत्येतदधिकृतं वेदितव्यं। अथवा 'अथ' शब्दः पदसंहितानिषेधकः॥

ऋकारर्काररषपूर्वो नकारो णकारꣳ समानपदे॥ ६॥

समानपदे एकपदे ऋकार ॠकार रेफषकारपूर्वो नका-

---

१ पञ्चमाध्याये इति ग०, इ० मु० च।

२ प्रतिषेधयन्तीति इ० मु०।

३ तेषामेवैष लोपविधिरिति तानन्वादिशति इति ग०, इ० मु० च।

४ चकारः पर इति क०।

५ यं कामयते इति ग०, इ० मु० च।

६ यवकाराविति ग०, इ० मु० च।

७ एतत्सूत्रमनिष्टमिति ग०, इ० मु० च।

८ रा इत्येवम्पर इति इ०, मु०।

९ मकारो न लुप्यतेइति ग०, इ०, म० च।

रो णकारमाप्नोति(१)। विभिक्तं णवा जायते। त्वष्ंहोतृणां। एष वा ऋचो वर्णः। कृष्णोसि। एवम्पूर्वं इति किं। देवानां वा अन्तं(२)। समानपद इति किं। एभिर्नो अर्कैः। समानञ्च तत् पदञ्च, समानपदं, तस्मिन्॥

व्यवेतोऽपि ॥७॥

उक्तनिमित्तपूर्वो नकारः, अन्येन व्यवेतो व्यवहितोऽपि(३) णत्वमाप्नोति। यथा, अपरशुवृक्णं दहति। आ रमणं कुरुते(४)। अधिषवणे(५)। कृषमाणः प्रतिष्ठाकामः॥

हिरण्मयं ॥ ८ ॥

हिरण्मयम् इत्यस्मिन् ग्रहणे नकारो णकारमाप्नोति(६)। यथा, हिरण्मयं दाम दक्षिणा। स्पर्शपर इति वक्ष्यमाणप्रतिषेधस्य(७) प्रतिप्रसवार्थमिदं सूत्रं॥

पाणि-गण-पुण्य-कण्व-काण-गाण-बाण-वेणु-गुण-मणि-प्रवादेषु पूर्वः ॥ ९ ॥

पाणीत्यादिशब्दानां प्रवादेषु पूर्वतः(८) प्रथमो णकारः

---

१ णकारमापद्यते इति इ० मु०।

२ अन्तं जगमुषामिति ग०, इ० मु० च।

३ व्यवेतोऽपि व्यवहितोपि इति ग०, इ० मु० च।

४ आत्मन्नेवारमणं कुरुते इति इ० मु०।

५ अधिषवणमिति इ० मु०। अधिषवणी इति ग०।

६ णत्वमाप्नोतीति ग०, इ० मु० च।

७ वक्ष्यमाणनिषेधस्य इति ग०।

८ पूर्व इति ग०, इ० मु० च।

प्रकृत्यैव वेदितव्यः। प्रकर्षेण वादः प्रवादः। लिङ्गविभक्तिभेद-समासतद्धितादिभिर्निर्दिश्यत इत्यर्थः(१)। यथा, सुपाणिः स्वङ्गुरिः। वृषपाणयोऽश्वाः। हिरण्यपाणिमूतये। गणानान्त्वा गणपतिं(२)। गणा मे मा वितृषन्। गणेन गणं। दूरे अमित्रस्य गणः। पुण्यो भवति वसन्तम् ऋतूनां। सा मा सर्वान् पुण्यान्। कण्वा अभिप्रगायत। तस्यै काणो या(३)। (४)गाणपत्यान्मयो-भूरेहि। विश्वल्यो बाणवाꣳ उत। वेणुर्वैणवो भवति। वेणुना विमिमीते(५)। यद्वेणोः सुषिरं। यथा गुणे गुणं। मणिना रूपाणि नः। ननु गणशब्दप्रवादत्वाद्गाणग्रहणमयुक्तं। नैवं। गणप्रवादे सति(६) तद्भवेत्। किन्तु गणपतिशब्दप्रवादोयं। पूर्वं इति किं। गणानां त्वा, वेणुना वि, मणिना रूपाणि, इत्यादिषूत्तरणकारस्य णत्वं(७) मा भूदिति॥

पणि-पणिं-वीयमाण-ऊर्ण्वोः॥ १०॥

पणीत्यादिषु ग्रहणेषु(८) णकारः प्रकृत्यैव विज्ञेयः(९)। अप्रवादार्थोऽयमारम्भः। अग्ने देवपणिभिः(१०)। पणिं गोषु स्तरामहे। वीयमाणः। तन्त एतं। ऊर्ण्वोः कविक्रतुं॥

---

१ निर्दिश इत्यर्थ इति ग०, इ० मु० च।
२ गणपतिं हवामहे इति ग०, इ०मु०च।
३ यादत इति इ० मु०।
४ अकर्णया कर्णया इति ग,चिह्नित-पुस्तके इ० मु० पुस्तके चाधिकः पाठः।
५ वेणुमामिमीते इति ग०।
६ गणप्रवादत्वे सतीति ग०, इ०म०च।
७ इत्यादिषूत्तरस्य णत्वमिति ग०, इ०, मु० च।
८ पणीत्यादिग्रहणेष्विति ग०,इ०मु०च।
९ प्रकृत्यैव वेदितव्य इति ग०,इ० मु०च।
१० पणिभिर्वीयमान इति इ० मु०।

टवर्गपरः ॥ ११ ॥

टवर्गपरो(१) णकारः प्रकृत्यैव वेदितव्यः। शितिकण्ठाय च(२)। कण्डूयेत पामनं भावुकाः। टवर्गः परो यस्मात् सः, तथोक्तः॥

चङ्कुण-फणत्-स्थूणौ-ह्विणुयाद्धिणोति-कौणेयोऽणिष्ठा-उल्वणमुगणाश्रुतिश्चुपुणीका-बाणिजायाणवश्चाट्णार-स्थाणुन्तूणवेवीणायामश्लोणया-पणेत-वाणीः-कल्याणी-कुणपं-वाणः शत-शोणाश्रुतिर्धाणिका-मेणी ॥ १२ ॥

चङ्कुण, फणत्, स्थूणौ, ह्विणुयात्, ह्विणोति, कौणेयः, अणिष्ठाः, उल्वणं, उगणाश्रुतिः, चुपुणीका, बाणिजाय, अणवश्च, आट्णार, स्थाणुं, तूणवेवीणायां, अश्लोणया, पणेत, वाणीः, कल्याणी, कुणपं, वाणः शत, शोणाश्रुतिः, धाणिका, मेणी, एषु णकारः प्रकृत्यैव वेदितव्यः। अवभृथनिचङ्कुण(३)। अन्वापनीफणत्। अयस्थूणावुदितौ। भ्रातृव्याय प्रह्विणुयात्। एवास्मै प्रह्विणोति। रजनो वै कौणेयः। येऽणिष्ठास्तान्। यन्न उल्वणं क्रियते। यत्र यत्र श्रुतिः उगणाग्रहणस्य तत्र तत्र णत्वं करणीयं। यथा, अव्याधिनीरुगणा उत। उगणाभ्यस्तृंहतीभ्यः। चुपुणीका नामासि(४)। बाणिजाय कक्षाणां पतये(५)। प्रियङ्गवश्च मेऽणवश्च

१ टवर्गे परे इति इ० मु०।
२ शितिकण्ठाय स्वाहा इति इ० मु०।
३ निचङ्कुण निचेरुरिति इ० मु०।
४ वर्षयन्ती चुपुणीकानामासीति इ० मु०।
५ मन्त्रिणे बाणिजाय कक्षाणां पतये इति इ० मु०।

मे। चेति किं। अनवस्ते रथं(१)। एतं ते पर आट्णारः। य स्थाणुं हन्ति। या तूणवे या वीणायां। अस्नोणया सप्तशफया(२)। पणेतागो अघं। इन्द्रं वाणीरनूषता। कल्याणी रूपसमृद्वा(३)। पुरुषकुणपमश्वकुणपं(४)। वाणः शततन्तुर्भवति। शतेति किं। ऋतावानश्चयमानाः(५)। शोणा धृष्णू(६)। श्रुतिरिति किं। शोनाय स्वाहा। निजल्गुलीति धाणिका। वनस्पतीनामेणी। मकारेण किं। उभयत एनी स्यात् (७)॥

अवग्रहो वृषण्-शीर्षण्-ब्रह्मण्वन्-चर्मण्-चर्षण्॥ १३॥

वृषण्मित्यादिग्रहणेष्ववग्रहो णकारः प्रकृत्यैव विज्ञेयः(८)। वाता अपां वृषण्वान्। शीर्षण्वान्मेध्यो भवति। ब्रह्मण्वन्तो देवाः(९)। अच्चण्वते स्वाहा। चर्मण्वते स्वाहा। चर्षण्ग्रहणस्य शाखान्तरविज्ञेयमुदाहरणं(१०)। मित्रस्य चर्षणी धृत इति केचिदुदाहरन्ति। तन्न साधुः। अन्तो लोपात्, इति वक्ष्यमाणप्रतिषेधप्रतिप्रसवार्थमुक्तत्वादेषां ग्रहणानां चर्षणीधृत इत्यत्र णकारस्य पदान्तत्वाभावात्। अथवा ऋकारादिप्राप्तेरत्र(११) णकारो वैकृत

---

१ अनवस्थे रथमिति ग०।
२ सप्तशफया क्रीणाति इति इ० मु०।
३ रूपसमृद्वा सा स्यात् इति इ० मु०।
४ कुणपं गौरिति इ० मु०।
५ चयमाना ऋणानि इति इ० मु०।
६ धृष्णू नृवासा इति इ० मु०।
७ एनी स्यात्तदाङ्करिति ग०,इ० मु० च।
८ प्रकृत्यैव वेदितव्य इति ग०,इ० मु० च।
९ देवा आसन्निति इ० मु०।
१० शाखान्तरे विज्ञेयमुदाहरणमिति ग०, इ० मु० च।
११ ऋकारकोररषादिप्राप्तेरवेति इ०मु०, ऋकारकोररषादिप्राप्ते तत्रेति ग०।

इति शङ्कानिराकरणार्थमेतानि ग्रहणानीत्यन्ये मन्यन्ते। तथा सति मित्रस्य चर्षणी धृत इत्युदाहरणं रमणीयं। अवग्रह इति किं। वृषन्नग्ने विश्वान्यर्य्य आ। तस्मात् सप्तशीर्षन्। ब्रह्मन्विशम्बि। अत्तन्नमीमदन्त। पशूनाञ्चर्म्मन्। अवग्रहस्योऽवग्रह इति लक्ष्यते(१)॥

ऋटस,षस,ष्णाम,रावण चेति प्राकृताः॥ १४॥

अत्र सूत्रे एते पदैकदेशा बहूपादानार्थमुक्ताः। ऋटसादिष्वेषु च णकारः प्रकृत एव विज्ञेयः(२)। स्वयमातृणामुप। असंतृणे हि हनू। स्वयमातृणा ज्योतिः। अभिषणा यस्मात्। निषणाय स्वाहा। दशमासा निषणा आसन्। पूष्णो रंह्यै(३)। पूष्णा सयुजा(४)। पूष्णे प्रपथ्याय(५)। अर्य्यम्णे चरुं(६)। दधिक्राव्णः(७)। आग्राव्णः। प्राकृतशब्दोयं पाण्यादिष्वेव चर्म्मण्पर्य्यन्तेषु(८) मुख्यः। चतसृषु संहितासु णत्वसद्भावात्। ऋटणेत्यादिषु तु न मुख्यः। किन्तु प्राप्त्यभावेपि णत्वप्रापणार्थः। तथाहि, ऋटणादौ पूर्वणकारस्य स्पर्शपरत्वान्निषेधः, उत्तरस्य सवर्गीयव्यवहितत्वात्(९)। ष्णाम्णग्रहणयोस्त्वलोपा-

---

१ वक्ष्यते इति क०।

२ णकाराः प्राकृता एव ज्ञेया इति ग०।

३ पूष्णो रंह्यै इति ग०, इ०मु० च।

४ सयुजा सह इति इ० मु०।

५ पूष्णे प्रपथ्याय स्वाहा इति ग०, इ० मु० च।

६ चरुं निर्वपेदिति ग०।

७ दधिक्राव्णो अकारिषमिति ग०।

८ चर्षण पर्यन्तेषु इति ग०, इ०मु० च।

९ इतरस्य उत्तमस्य टवर्गव्यवहितत्वादिति इ० मु०।

दिति निषेधः। ग्रहणसामर्थ्यादेव णत्वं सिध्यतीति चेत्। एवं स्वभावत्वमेव ग्रहणस्यापि मूलमिति परिहारः। किञ्च अन्वाचये वर्त्तमानश्चकारोऽप्येतेषु णत्वमसुख्यमिति द्योतयति। मुख्यञ्चेत्तर्ह्येतेषु संहितासु विद्येत, न चात्र विद्यते। तथाहि। अभिषस इत्यभिसन्नः, निषसायेति निषन्नाय, इत्यत्र पदसंहितायां पूषन्नर्य्यमन्निति नकारान्तशब्दयोः पूष्णोरऌ्वौ, अर्य्यम्णे चरुम्, इत्यादिसिद्धरूपत्वादत्र वर्णसंहितायामेतत्साहचर्य्यादेकसूत्रस्थयोरप्युणषसयोर्वर्णसंहितायां णत्वे णत्वाभावोमन्तव्यः(१)। प्रसिद्धपदसमभिव्याहारेण अप्रसिद्धपदार्थसमर्थनं सर्वशास्त्रविदः सर्वे खलु स्वीकुर्वते। तस्मादस्मदुक्त एव युक्तः प्रकृतशब्दार्थः।

न द्युम्नोऽग्निर्युष्मानीतोऽन्तोऽलोपात्स्पर्शपरो व्यवायेषु शसचटतवर्गीयेषु ॥१५॥

द्युम्नः, अग्निः, युष्मानीतः, एतेषु नकारो णत्वं नापद्यते। सुषुम्नः सूर्य्यरश्मिः। इन्द्राग्निभ्यां त्वा(२)। युष्मानीतो अभयं(३)। अन्तः पदान्तो नकारो णत्वं नापद्यते। पितॄन् हविषे अत्तवे। प्रमृणीहि शत्रून्। अलोपात्परोपि(४) नकारो णत्वं नापद्यते।

---

१ वर्णसंहितायां णत्वभाव इति ग०, ङ० मु० च।

२ इन्द्राग्निभ्यां त्वा सयुजेति ग०, ङ० मु० च।

३ अभयं ज्योतिरिति ङ० मु०।

४ अलोपादकारलोपात्परोपीति ङ० म०।

वृत्रघ्न इन्द्राय त्वा। वृत्रघ्न स्तोमः(१)। नन्वत्र निमित्तनिमित्ति-नोर्भिन्नपदस्थत्वाद्विषमो दृष्टान्तः। सत्यम्। सिंहावलोकनेन च प्रथमे प्रश्ने(२) सप्तमाध्याये शेषोदाहरणरूपेण घटते। तत्र च समानपदत्वे नियमो(३) नास्ति। घ्न इत्यस्य हन्शब्दविकृत-त्वात् रषःपूर्व्वो हवनि, इति प्राप्तिः। स्पर्शपरो नकारस्य णत्वं नाप्नोति। सङ्क्रन्दनोऽनिमिषः। अवरुन्धे तार्क्ष्यं। नखनिर्भिन्नं। स्पर्शोऽत्र प्रसिद्धलक्षणविषयो विवक्ष्यते। अन्यथा पूर्णा पश्वा-दित्यादौ णत्वं न स्यात्। रेफात् परश्चेति हि सिद्धलक्षणं,(४) तन्मूलञ्च पूर्णत्यत्र द्वित्वं। प्रसिद्धपदेन किं। नखनिर्भिन्नमित्या-दावपि कथञ्चिन्मूलत्वं(५) सम्भवति। किं तल्लक्षणमिति चेत्। द्वितीयचतुर्थयोरित्यत्र सूत्रे व्यञ्जनोत्तरयोरिति(६) वाच्यो युक्त्य-न्तरमिति ब्रूमः। तस्य लक्षणं तत्रैव स्फुटीकरिष्यते महा-प्रबन्धेन(७)। स्पर्शः परो यस्मादसौ, स्पर्शपरः। शसचटतव-र्गीयेषु व्यवायेषु व्यवधायिकेषु सत्सु नकारो णत्वं नापद्यते। यथा, रशनामादत्ते। अग्ने रसेन(८)। रोचन्ते रोचना दिवि। सोमꣳ राजानं। प्रक्रीडिनः पयोधाः। पृतना जयेम(९)। जन-प्रमथनाय(१०)। ऋकाररकारादिप्राप्तेः प्रतिषेधोऽयं विहितः॥

---

१ स्तोमा इति ग०, इ० मु० च।

२ सिंहावलोकनन्यायेन प्रथमप्रश्ने इति ग०, इ० मु० च।

३ समानपदनियम इति ग०, इ० मु० च।

४ रेफात्परश्चेति हि प्रसिद्धं लक्षणमिति इ० मु०। रेफात्परश्चेति प्रसिद्धलक्षणमिति ग०।

५ कथञ्चित् लक्षणमूलत्वमिति ग०, इ० मु० च।

६ स्वेनोक्तव्यञ्जनोत्तरयोरितीति इ०मु०।

७ महता प्रबन्धेनेति इ० मु०।

८ रसेन तेजसा इति इ० मु०।

९ जयामेति ग०, इ० मु० च।

१० जनप्रथनाय इति ग०। जनप्रथनाय स्वाहा इति इ० मु०।

पृक्तस्वरात्परो लो ङं पौष्करसादेः पौष्करसादेः ॥ १६ ॥

पृक्तस्वरात् ऋकारात् परो लकारो दुस्पृष्टसञ्ज्ञो(१) ङकारमापद्यते, पौष्करसादेर्मते(२) । मृडातीदृशे । पृक्तस्वरादिति किं । नलं प्लव इति, शाखान्तरे । पौष्करसादिग्रहणं(३) पूजार्थं, न तु विकल्पार्थं । मूर्द्धास्थानतया दुस्पृष्टङलकारयोः(४) सादृश्यमस्तीति व्याकरणानुसारी सूत्रपाठोऽयं कथमनुसारितमिति चेत् । तथाहि, स्थानेन्तरतमः । स्थाने प्राप्यमाणानां वर्णानान्तरतम आदेशो भवतीति सूत्रपाठान्तरमपि(५) व्याख्यायते । पृक्तस्वरात्परो लो ड़मिति पौष्करसादेः । अत्र समानपद इत्यस्मादनुवर्त्तनं(६) विज्ञेयं । पौष्करसादेः शाखिनः समानपदे पृक्तस्वरादृकारात्परो लकारो ड़कारमापद्यते । यथा, ते नो मृडयन्तु । पृक्तस्वरादिति किं । इलान्दं भवति । समानपद इति किं । पितृलोकꣳ सोमेन । सहचरितत्वादेकस्य(७) निषिद्धे इतरस्यापि पितृलोककामस्येति अस्य समानपदत्वे सत्यपि निषेधो भवति । इदमपि पाठान्तरं बह्वादृतं ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे त्रयोदशोऽध्यायः ॥ * ॥

---

१ दुःस्पृष्टसञ्ज्ञिक इति इ० मु० । दुःस्पृष्टसञ्ज्ञक इति ग०, ।

२ मतेन इति ग० ।

३ पौष्करसादेर्ग्रहणमिति इ० मु० ।

४ दुःश्लिष्टङलकारयोरिति ग० । दुःश्लिष्टलङकारयोरिति इ० म० ।

५ सूत्रस्य पाठान्तरमपीति ग०, इ० म० च ।

६ इत्यस्यानुवर्त्तनमिति ग०, इ० मु० च ।

७ सहचरितत्वादेकस्मिन्निति ग० ।

अथ चतुर्दशोऽध्यायः।

स्वरपूर्वं व्यञ्जनं द्विवर्णं व्यञ्जनपरं ॥ १ ॥

स्वरपूर्वं व्यञ्जनं व्यञ्जनपरं द्विवर्णमापद्यते(१)। यथा, उरुपप्रथस्व। एवम्पूर्वं इति किं। तत् प्रवाते। पर इति(२) किं। उरुक्षदुरुण्स्कृधि। व्यञ्जनमिति किं। प्रउगमुक्थ्यं। स्वरः पूर्वो यस्मात् तत्, स्वरपूर्वं। व्यञ्जनमस्मात् परम्, इति व्यञ्जनपरं। द्वयोर्वर्णयोः समाहारो द्विवर्णं ॥

लवकारपूर्वः स्पर्शश्च पौष्करसादेः ॥ २ ॥

तस्य मते(३) लकारपूर्वो वकारपूर्वो वा स्पर्शो द्विवर्णमापद्यते। कल्यान् ज्जुहोति। विभूदावन्ने। स्वरपूर्वं द्वित्वं चान्वादिशति, 'च'कारः। स्पर्श इति किं। कल्याणी रूपसमृद्धा वायव्यं। एवम्पूर्वं इति किं। कूश्माण्डैकभिः। तस्मादेतद् गोसनि। लकारश्च वकारश्च लवकारौ, तौ पूर्वौ यस्मात् सः, तथोक्तः ॥

स्पर्श एवैकेषामाचार्य्याणां ॥ ३ ॥

एकेषां मते लवकारपूर्व स्पर्श एव द्विवर्णमाप्नोति(४)। अने-

---

१ द्विवर्णं स्यादिति ग०।

२ एवम्पर इतीति ग०, इ० मु० च।

३ पौष्करसादेर्मते इति ग०, इ० मु० च।

४ द्वित्वमाप्नोति न लगकाराविति ग०।

नावधारणेन सूत्रान्तरारम्भणेन(१) पौष्करसादिमते(२) लवकारयोश्च द्वित्वमस्तीति गम्यते। इदमेव सूत्रमिष्टं न पूर्वं(३)। पूर्वोक्तान्येवोदाहरणानि ॥

रेफात्परञ्च ॥ ४ ॥

रेफात्परं व्यञ्जनं द्विवर्णमापद्यते। यथा, अर्च्चन्त्यर्कमर्क्किणः। अर्क्कैण वै। ऊर्ग्ग्वा उदुम्बरः। स्वरपूर्वत्वद्वित्वयोः(४) आकर्षकः 'च'कारः। ननु व्यञ्जनपरत्वाकर्षकः किं न स्यात्। नेति ब्रूमः। नियमाभावात्। तथाहि, अवसाने, ऊष्मा स्वरपर इति एतन्निषेधद्वयेन रेफात्परस्य स्वरपरत्वाभावे व्यञ्जनपरत्वाभावेपि(५) द्वित्वमस्तीति निश्चीयते, अप्रसक्तप्रतिषेधानुपपत्तेः। स्वरपूर्वत्वान्वादेशेन किं। त्र्यम्बकमित्यादौ माभूदिति। किञ्च। अचो रहाभ्यां द्वे इति पाणिनीयसूत्रेणापि स्वरपूर्वत्वे सत्येव द्वित्वं विधीयते। तस्यायमर्थः, अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवत इति केचिदूचुः(६)। स्वरपूर्व्वादिशब्दवद्रेफपूर्वमिति वक्तव्ये रेफात्परमिति वाचो युक्त्यन्तरमर्थान्तरं समर्थयति(७)। अहर्द्दैवानामित्यादौ वैकृतरेफादुत्तरस्यान्तस्य

---

१ सूत्रान्तरारम्भेण चेति ग०,इ०मु० च।

२ पौष्करसादेर्मते इति ग०।

३ न तु पूर्वमिति ग०।

४ स्वरपूर्वद्वित्वयोरिति ग०,इ०मु०च।

५ रेफात्परस्य व्यञ्जनस्य व्यञ्जनपरत्वाभावे स्वरपूर्वत्वेपि इति इ० मु०। रेफात्परस्य व्यञ्जनपरत्वाभावे च स्वरपूर्वत्वे पि इति ग०।

६ विधीयते। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे स्त इति सूत्रार्थः। केचिदेवमूचुरिति ग०।

७ रेफात् पूर्वमिति वाच्ये वाचो युक्त्यन्तरमर्थान्तरं समर्थयति इति ग०, इ० मु० च।

न द्वित्वमिति(१)। तदेतदध्ययनविरुद्धपद्धतिमध्यास्ते। वयन्तु वदामो(२), वाचो युक्त्यन्तरप्रयोजनं। रेफपूर्वमित्युक्तेर्वि-रुद्धविग्रहेण(३) सूत्रं सन्दिग्धं स्यात्, रेफात् पूर्वं रेफपूर्व-मिति। तत्र एष विग्रह इति चेत्(४)। अध्यायादिसूत्रेणैतद् गतमिति पौनरुक्त्यमस्य सूत्रस्यापद्यते। ननु पौनरुक्त्यभयादेव विरुद्धविग्रहं निवारयामः। नेयं सरला वृत्तिः। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात् अत्र विरुद्धशङ्कालेशोपि नावकाशं लभतामिति वाचो युक्त्यन्तरेण सूत्रमाचार्य्यः प्रो-वाच(५)॥

द्वितीयचतुर्थयोस्तु व्यञ्जनोत्तरयोः पूर्वः॥ ५॥

स्वरपूर्वयोर्व्यञ्जनोत्तरयोर्द्वितीयचतुर्थयोस्तु पूर्व आगमो भवति(६), यथाक्रमेण द्वितीयस्य प्रथमः, चतुर्थस्य तृतीयः। यथा, विक्ख्याय चक्षुषा त्वमभितिष्ठ। मेग्घ्या विद्युतो वाचः। (७)द्वितीय-चतुर्थयोरिति किं। आद्यमस्थान्नं। एवम्पूर्वयोरिति किं(८)। वट् स्वयमभिगूर्त्ताय नमः,(९)। पङ्क्त्यां द्वे षवने। एवम्परयोरिति किं।

---

१ वैक्लतरेफाद्वित्तरस्य न स्यादुत्वमिति इति इ० मु०।

२ अन्ये त्वेवमाहुरिति ग०।

३ विरुद्धाविरुद्धविग्रहणेनेति ग०।

४ रेफपूर्वमिति। भवत्वेष विग्रह इति चेत् इति ग०, इ० मु० च।

५ लेशोपि नाप्नोति सूत्रकार आह। वयं ब्रूमो युक्त्यन्तरं प्रयोजनस्वरभक्तेर्द्वित्वं माभूदितीति ग०।

६ आगमः स्यादिति ग०।

७ तत् सवितुः साद्ध्या वै देवा इति इ० मु० पुस्तकेधिकः पाठः।

८ एवम्पूर्वः किमिति ग०। एवम्पूर्व इति किमिति इ० मु०।

९ वषट्थ् स्वाहेति ग०।

उखायै सदने । मेधायते स्वाहा । प्रथमसूत्रेण प्रसक्तं द्वित्वं निवर्त्तयति 'तु'शब्दः । अन्ये त्वन्यथा मन्यन्ते[१], पूर्व्वागमस्य द्वित्वं निवारयतीति[२] । नैतत्सारं । सवर्णसवर्गीयपर इत्युत्तरनिषेधादेव तस्य तन्निवृत्तिः[३] ।

अत्र केचिदाहुः, व्यञ्जनपर इति वाच्ये वाचो युक्त्यन्तरमर्थान्तरं[४] सूचयति । साꣳहितासाꣳहितसाधारणं परनिमित्तमुक्तं, तत्त इहान्यतरस्यागमनिमित्तत्वे[५], प्राप्तेऽसाꣳहितपदानां नित्यत्वात्तद्ग्रहणमेव न्याय्यमिति कृत्वा वैकृतव्यञ्जनपरत्वे सति नैतद्विधानं भवति । यथा, अभ्यस्थादित्यादि । नायं पक्षः । अध्ययनधर्म्मविरोधान्[६] मूलसूत्रविरोधाच्च । तथाहि, तन्मूलसूत्रे[७] स्वरपूर्व्वत्वे व्यञ्जनमात्रपरत्वे च सति विहितं द्वित्वमत्र निषेध्यते[८] । ननु तत्र व्यञ्जनविशेषिते[९] तदपवादकत्वादत्रापि तद्विशेषो वक्तुमयुक्तः । शिक्षादिपरीक्षणादध्ययनानुरोधाच्च वाचो युक्त्यन्तराभिप्रायोऽस्माभिरभिधीयते[१०] । अपवादापवादकयोरनयोर्नियमो नास्ति, किमिति । स्वरपूर्व्वत्वे सति व्यञ्जन-

---

१ अन्ये त्वन्यथाऽऽहुरिति ग० ।

२ द्वित्वं नेतीति ग० ।

३ इत्युत्तरत्र निषेधादेव तन्निवृत्तिरिति ग० ।

४ व्यञ्जनपरयोरिति वाच्येऽर्थान्तरमिति ग० ।

५ तत्र इहान्यतरस्यागमनिमित्तत्वे इति ग० ।

६ अध्ययनविरोधादिति ग०, इ० मु० च ।

७ मूलसूत्रे इति ग०, इ० मु० च ।

८ द्वित्वमात्रं निषिध्यते इति ग० । द्वित्वमत्र निष्पाद्यते इति इ० मु० ।

९ व्यञ्जनविशेषितमिति ग० । व्यञ्जनं विशेषितमिति इ० मु० ।

१० अस्माभिरुच्यते इति ग० ।

परमेव व्यञ्जनं द्वित्वं भजते। द्वितीयचतुर्थौ तु(१) व्यञ्जनपरावेव पूर्वागममभजत इति। किन्तु प्राचुर्य्याभिप्रायेणेदं सूत्रद्वयं प्रवृत्तं(२) कथं नियमाभावः। अन्यथा(३) कुत्रचित् कार्य्यद्वयदर्शनात्। अत्ता हवीꣳषि अन्नपत इत्यादौ द्वित्वं। वियच्छदः(४)। अद्धि त्वं देव प्रयत इत्यादौ पूर्वागमः। ताꣳहस्ते इत्यत्र तु प्राप्तौ सत्यामपि नेदं कार्य्यं दृश्यत इति च नियमाभावः। शिक्षा चैवं वक्ष्यति,

स्वरात् पूर्वस्य वर्णस्य क्वचिद्द्वित्वञ्च कथ्यते।
न च वर्गद्वितीयस्य न चतुर्थे कथञ्चन(५)॥

व्याख्यातञ्च वचनमेतद्विद्वद्भिः।

कुत्रचित् स्वरयोर्मध्ये द्वित्वं लक्ष्यानुसारतः।
पूर्वागमस्तथा तत्र ज्ञेयो वर्णविचक्षणैः॥

एवं रूपमनियमं सूचयितुं व्यञ्जनोत्तरयोरित्यन्तरस्वीकारः। व्यञ्जनमुत्तरं याभ्यान्तौ व्यञ्जनोत्तरौ, तयोः॥

रेफपूर्वयोश्च नित्यं॥ ६॥

रेफात्परञ्च, इत्यस्यापवादः(६)। क्रमेण द्विवचनेन द्वितीयचतुर्थौ गृह्येते, न सविशेषणौ(७) रेफपूर्वयोरनयोर्नित्यं(८) पूर्वा-

---

१ द्वितीयचतुर्थौ चेति इ० मु०।

२ किन्तु प्राचीनाभिप्रायेणेदं सूत्रद्वयं प्रज्ञातमिति ग०।

३ अन्यथापीति ग०।

४ प्रच्छच्छन्द इति ग०, इ० मु० च।

५ चतुर्थे कदाचन इति ग०, इ०मु० च।

६ इत्यस्यापवादकमेतदिति इ० मु०।

७ गृह्यते सविशेषणयोरिति इ० मु०।

८ रेफपूर्वयोरुभयोर्नित्यमिति ग०।

गमो भवति । आगमान्वादेशकः, 'च'कारः । यथा, ऊर्द्ध्वा भव । अदुर्ध्यवाङ् । नित्यमिति किं । स्वरपरत्वे(१) भवत्वेतदिति । अर्थ्यैतस्याताम्(२) । मूर्खान्तज्जवन्यां । गो अर्घमेव ॥

लकारपूर्वे च ॥ ७ ॥

चतुर्थागमयोराकर्षकः, 'च'कारः । चतुर्थे स्पर्शे लकारपूर्वत्वे(३) सति पूर्वागमो भवति । प्रगल्भ्भोस्य अपगल्भ्भो जायते । नमो मध्यमाय चापगल्भ्भाय च । यस्माल्लकारः पूर्वः, स लकार पूर्वः(४) ॥

उपसर्गपाथ-एषोऽत्याति-धाम-परम-भूते-पूर्वेषु क्खिभुजेषु च ॥ ८ ॥

उपसर्गेषु(५) पाथः, एषः, अति, आति, धाम, परम, भूते, एवम्पूर्वेषु च सत्सु क्खिभुज इत्येतेषु पूर्वागमो भवति । 'च'कार आगमान्वादेशकः । यथा, आक्कृणत्ति । आख्खिदत्ते च प्रख्खिदत्ते च(६) । अयक्ष्मया परिभ्भुजा । जे इति किं । विभू च मे प्रभू च मे । या च विच्छन्दाः । खीति किं । (७)निखातं मनुष्याणां ।

---

१ स्वरपरत्वेपीति ग०, द० मु० च ।

२ अर्थैतस्येति ग० । अर्थैतस्यापामिति द० मु० ।

३ चतुर्थस्पर्शे लकारपूर्वे इति ग०, द० मु० च ।

४ लकारः पूर्वो यस्मात् असौ लकारपूर्वः तस्मिन् इति ग०, द० म० च ।

५ उपसर्गपूर्वेषु इति ग०, द० मु० च ।

६ नम आख्खिदते च प्रख्खिदते चेति द० मु० ।

७ तौ बल्गं निखनत इति ग-चिह्नितेधिकः पाठः ।

अधिखखादति(१) । उपसर्गपूर्वं इति किं । सच्छन्दाः(२) । एतान्युपसर्गपूर्वाणि । अन्यान्यप्युच्यन्ते(३) । अप्येति पाथः(४) । एष च्छागः । पाथ इति किं । ऋतुभिर्वा एष छन्दोभिः । अतिच्छन्दसमुप(५) । सविच आतिच्छन्दसाय । धामच्छद्दिव(६) । परमच्छदो यद्भूते च्छदाᳪ सामानि(७) ॥

अघोषादूष्मणः परः प्रथमोऽभिनिधान स्पर्शपरात्तस्य सस्थानः ॥ ९ ॥

स्पर्शपरादघोषादूष्मणः परः प्रथम आगमस्तस्य स्पर्शस्य सस्थानः समानस्थानोऽभिनिधानो भवति । अभिनिधीयत इति अभिनिधानः । आरोपणीय इत्यर्थः । वेदान्तरे तस्याभावादनारोपणीयत्वं । यथा, यᳫक्कामयेत । अश्मन्नूर्ज्जं । ग्रीष्मे मध्यन्दिने । अयस्मयं विभृत(८) । यः पाप्मना । अघोषादिति किं । शरद्यपराह्णे । ऊष्मग्रहण इति किं(९) । रुक्ममुपदधाति । स्पर्शपरादिति किं । इष्वा च वज्रेण च । सूत्रमिदमेवेष्टं । नतु परद्वयं.(१०) ॥

---

१ इतस्त्वधिखादति इति इ० मु० ।
२ सच्छन्दाया इति ग० ।
३ अन्यान्युच्यन्ते इति ग०, इ० मु० च ।
४ प्रियं अप्येतु पाथ इति इ० मु० ।
५ अतिच्छन्दसमुपदधातीति ग०, इ० मु० च ।
६ धामच्छद्दिव खलु वै इति इ० मु० ।
७ छन्दांसि सामानि भवन्तीति ग० ।
८ रसेप्मयं विचृता बन्ध इति ग० । अयसृप्ययं विचृताबन्धनिति इ० मु० ।
९ ऊष्मण इति किमिति इ० मु० च ।
१० न ततपरद्वयमिति इ० मु० ।

अघोषे प्लाक्षेः ॥ १० ॥

अघोष एव स्पर्शे परे सति अघोषादूष्मणः परः प्रथमागमो भवतीति प्लाक्षेः पक्षः। यथा, निष्क्केवल्यं। यः४क्कामयेत(१) पश्चात् प्राचीं। निष्टत्पामि। (२)द्दोषावस्त्तोः। यः पाप्प्मना। अस्प्पात्रम्(३)। अघोषेति किं(४)। कूश्मान्(५)॥

उत्तमपरात्तु प्लाक्षायणस्य ॥ ११ ॥

प्लाक्षायणस्य तु पक्षे उत्तमपरादघोषादूष्मणः परः प्रथमागमो भवति। यथा, अक्ष्णया व्याघारयति। अश्त्नाति। (६)उत्तमपरादिति किं। निस्केवल्यं। यः४क्कामयेत पश्चात्। (७)'तु'शब्दः प्लाक्षेः पक्षमपक्षिपतीति(८) केचिदेवमचूः। अघोषत्वमूष्मणः, 'तु' शब्दो निवर्त्तयति(९)। तत्रायं सूत्रार्थः। उत्तमपराद् घोषवतः (१०)ऊष्मणः परः प्रथमागमो भवति। अक्ष्णां कक्केतुः। शरद्यपराह्णे। ब्रह्मवादिनः। घोषवत इति किं। ग्रीष्मो हेमन्तः। अश्मा च मे। अयस्मयं वि(११)॥

---

१ यः कामयते इति ग०।

२ अक्ष्णया व्याघारयति इति ग०, चिह्निते द०मु० पुस्तके च अधिकः पाठः।

३ आस्नात्रं जुहूर्देवानामिति ग०, द० मु० च।

४ अघोष एवेति किमिति ग०, द० मु० च।

५ कुश्माञ्छकमिति द० मु०।

६ तीर्थे स्नाति इति ग०, चिह्निते, द० मु० पुस्तके चाधिकः पाठः।

७ यः पाप्मना इति द० मु० पुस्तकेऽधिकः पाठः।

८ पक्षं प्रक्षिपतीति द० मु०। पक्षमपक्षिपतीति ग०।

९ निवर्त्तयतीति इति ग०, द० मु० च।

१० उत्तमपरात्तु घोषवत इति द मु०।

११ विचृत इति द० मु०।

प्रथम ऊष्मपरो द्वितीयं ॥ १२ ॥

प्रथमः स्पर्श ऊष्मपरः स्ववर्गीयद्वितीयमापद्यते(१)। विरफ्शिन्(२) उदादाय। तथ् षोडशी(३)। प्रत्यङ्ख् सोमः। तथ् सवितुः। प्रथम इति किं। ताः सं रोहः(४)। ऊष्मपर इति किं। वाक्ते(५)।(६) ऊष्मा परो यस्मात्स ऊष्मपरः(७)॥

वाडभीकारस्यासस्थानपरः ॥ १३ ॥

वाडभीकारस्य मते आत्मनोऽसस्थानोष्मपरः प्रथमः सवर्गीयं द्वितीयमापद्यते। समानं स्थानं यस्यासौ सस्थानः, न सस्थानः, असस्थानः। सः परो यस्मात्सः, तथोक्तः। यथा, विसृपो विरफ्शिन्। तथ् षोडशी। असस्थान इति किं। तत्सवितुः। नेदं सूत्रमिष्टं॥

---

१ सवर्गीयं द्वितीयमापद्यते इति ग०, इ० मु० च।

२ विसृपो विरप्शिन् इति इ० मु०।

३ षोडशी अभवत् इति इ० मु०।

४ संरोहोसि इति ग०।

५ वाक्त आप्यायतामिति इ० मु०।

६ (ततः) अर्वाक् हि एनं परैः, इत्यत्र प्रथमपूर्वो हकारश्चतुर्थं तस्य सस्थानं, इति हकारस्य चतुर्थापत्तिः, विशेषविहितत्वात्। ततः तृतीयं स्वरघोषवत्परस्तृतीयत्वम्। इदमेव सूत्रमिष्टम्। इति इ० मु० पुस्तकेऽधिकपाठः।

७ यस्मादसावूष्मपर इति ग०,इ०मु०च।

अथ न ॥ १४ ॥

'अथ' इत्ययमधिकारः। उक्तस्य द्वित्वविधेर्यथासम्भवं निषेधोऽधिक्रियते, इति(१) वेदितव्यम्, इत उत्तरं यद्वक्ष्यामः॥

अवसाने रविसर्ज्जनीयजिह्वामूलीयोपध्मानीयाः॥ १५॥

पदावसाने वर्त्तमानो वर्णा रेफो विसर्ज्जनीयो जिह्वामूलीय उपध्मानीयश्च(२) इत्येते वर्णा द्वित्वं नापद्यन्ते। यथा, ऊर्क्। रेफात् परस्येति(३) प्राप्तिः। अवसानवचनं विरामाभिप्रायम्। तस्मान्न सन्धाने निषेधः। यथा, ऊर्क्क् च मे सूनृता(४)। नार्त्तिमार्च्छन्ति(५)। मनᳲक्त्वेमे। यᳲक्कामयेत। यᳲपाप्मना। स्वरपूर्वमित्यनेनैषां प्राप्तिः। अवसान इति चतुर्णा(६) पृथगेव सूत्रं केचिदूचुः। एकीकरणे(७) दोषदर्शनात्। कोसौ दोषः(८)। अवसाने वर्त्तमाना विसर्ज्जनीया(९) इत्यन्वयसम्पादनं। अवग्रह आशीर्धूः सुवरितिवदिति चेत्। नैष दोषः। रविसर्जनीयादीनां पदावसाने द्वित्वप्राप्तिदूरोत्सारिता, इति नैयमत्र

१ निषेधोधिकृत इत्येतदधिकृतमिति ग०, इ० मु० च।

२ रेफविसर्जनीयजिह्वामूलीयोपध्मानीयाश्चेति ग०।

३ परस्येतीति ग०, इ० मु० च।

४ सूनृता च मे इति ग०, इ० मु० च।

५ नार्त्तिमार्च्छति ग०, इ० मु० च।

६ चतुर्णां वर्णानामिति इ० मु०।

७ एकीकरणपक्षे इति ग०।

८ असौ दोष इति इ० मु०।

९ रेफविसर्जनीयादय इति ग०, इ० मु० च।

शङ्का(१)। किञ्च पृथक्करणे(२) सति अवसाने किं वा भवतीति साकाङ्क्षतया वचनमनर्थकं स्यात्। एकीकरणे तु रविसर्जनीय इति वर्णसाहचर्य्यादवसाने वर्त्तमानो वर्ण इति च लभ्यते(३)। तस्मादेकीकरणमेव रमणीयम्॥

ऊष्मा स्वरपरः॥ १६॥

स्वरपर ऊष्मा द्वित्वं नापद्यते। स्वरः परो यस्मादसौ स्वरपरः। यथा, दर्शपूर्णमासौ। वर्षाभ्यः। वर्षं नह्यति। बर्हिषा। रेफात् परश्चेति प्राप्तिः। ऊष्मेति किं। एभिर्नो अर्कैः। स्वरपर इति किं। पार्श्वे। वर्षाभ्यः(४)। वर्षर्भिः। अग्निर्ह्यस्य॥

प्रथमपरश्च प्लाक्षिप्लाक्षायणयोः॥ १७॥

तयोः पक्षे(५) प्रथमपर ऊष्मा द्वित्वं नापद्यते। 'च'कार ऊष्माणमन्वादिशति। सुश्चन्द्रदस्म। अष्टौ क्षत्वः। तस्मादेवं विदुषा। प्रथमः परो यस्मादसौ प्रथमपरः(६)। 'च'कारोऽत्र यद्यप्यू-

---

१ शङ्कास्तीति ग०, इ० मु० च।
२ अवसाने पृथक्करणे इति इ०मु०।
३ इति लभ्यते इति इ० मु०, ग० च।
४ वर्ष्याभ्यः स्वाहेति इ० मु०।
५ प्लाक्षिप्लाक्षायणयोः पक्षे इति इ० मु०, ग० च।
६ अष्टौ क्षत्वः। तस्मादेवं विदुषा। प्रथमः परो यस्मादसौ प्रथमपरः। प्रथमपर इति किं। इष्वा च वज्रेण चेति ग०। अष्टौ क्षत्वः। प्रथमपर इति किम्। तस्मादेवं विदुषा। प्रथमः परो यस्मादसौ प्रथमपर इति इ० म०।

समासाकर्षकः, तथापि शषसहेष्वेव सम्प्रत्ययः। अन्यथा अवसाने रविसर्जनीयः, इति सूत्रे जिह्वामूलीयोपध्मानीययोर्ग्रहणं व्यर्थम्। अनेनैव निषेधसिद्धिः॥

ऊष्माघोषो हारीतस्य॥ १८॥

हारीतस्य मते अघोष ऊष्मा द्वित्वं नापद्यते। वैश्वो मनुष्याणां। पुष्यति प्रजया पशुभिः। अस्यापरूपं(१)। अघोष इति किं। महह्यमिमान्(२)। ऊष्मग्रहणं पूर्व्वसूत्रानापेक्षार्थम्। अत्राप्यूष्मग्रहणं(३) न क्रियेते। ऊष्मेत्येतत् स्वरपरत्वेन पृथक्कारत्वेन च सम्बन्धं(४)। तस्मादिहापि तत्सम्बन्धस्यैवाघोषत्वविशेषणं स्यात्(५)। अतस्तन्निवृत्त्यर्थमूष्मेति ग्रहणं कृतम्(६)। अतः सर्व्वावस्थ ऊष्मात्र निषेधभाक्॥

रेफपरश्च हकारः॥ १९॥

पूर्व्वमूष्माघोष इत्युक्ते घोषोष्मणो नित्यद्वित्वे(७) प्राप्ते विशिनष्टीदानीं(८)। रेफपरो हकारश्चकाराकृष्टहारीतमते द्वित्वं नापद्यते। यथा, दुदुह्रे अह्रंयः। रेफपर इति किं। जुहुह्वे ह-

---

१ वैश्वानरस्य रूपमिति ग०।

२ तिरी अक्रियामिति ग०।

३ अत्र यद्यप्यूष्मग्रहणमिति ग०।

४ स्वरपरत्वेन प्रथमपरत्वेन च सम्बद्धमिति ग०।

५ सम्बन्धस्यैवाघोषत्वविशेषो न स्यात् इति ग०। तत्सम्बन्धस्यैवाघोषत्वविशेषः स्यादिति इ० मु०।

६ ग्रहणमत्र कृतमिति ग०। इ० मु० च।

७ नित्यं द्वित्वे इति ग०, इ० मु० च।

८ विशिष्ट इदानीमिति इ० मु०।

ह्यग्निः(१)। हकार इति किं। युक्रान्ते अन्यत्। रेफः परो यस्मादसौ, रेफपरः॥

टवर्गश्च तवर्गपरः॥ २०॥

'च'कारो हारीतत्वान्वादेशकः(२)। टवर्गस्तवर्गपरो न द्वित्वमापद्यते। यथा, वषट् ते विष्णो। विड् द्रविणं। तवर्गः परो यस्मादसौ तवर्गपरः। टवर्ग इति किं। वात्तं। तत्ते। एवम्पर इति किं। षट्ट् कपालं(३)। विड्ड् वै मरुतः॥

लतवर्गौ यवकारपरौ॥ २१॥

हारीतः सान्निध्याल्लभ्यते। तन्मते लतवर्गौ न खलु यवकारपरौ द्वित्वमापद्यते(४)। यथा, लकारः, कल्याणी। वैल्वो यूपः(५)। तवर्गोपि(६)। कन्येव तुन्ना। इषे त्वा। यवकारौ परौ याभ्यान्तौ, तयोक्तौ॥

परश्च॥ २२॥

'च'कारो हारीताकर्षकः। पर इत्येकवचनेन चकारो गृह्यते। पूर्व्वसूत्रोक्तस्थनिमित्तयोः परः(७) सोपि न द्वित्वमापद्यते,

१ जुह्वे ह्यग्निस्ताक्रयति, इति इ० मु०।
२ हारीतान्वादेशक इति ग०, इ० मु० च।
३ षट्कपालं निः, इति ग०, इ० मु० च।
४ द्वित्वमापनुत इति ग० इ० मु० च।
५ यूपो भवतीति इ० मु०।
६ तवर्गेपीति ग०, इ० मु० च।
७ पूर्वसूत्रस्थनिमत्तयोर्यः पर इति ग०।

हारीतमते। यथा, विभूदाव्ने(१)। ग्राव्णः(२)। वकार इति किं। कल्ल्यान् जुहोति। स्पर्श एवेत्येकेषामित्यत्रावधारणानिराकरणायायमारम्भः(३)। (४)द्वित्वे कृते परो द्वितीयपर्य्यायो द्वित्वविधिर्नास्ति। अनवस्थाप्रसङ्गात्। ननु सवर्णसवर्गीयपर इति परसूत्रेणापि पुनर्द्वित्वनिषेधः। पौनरुक्त्यं माभूदिति(५)। मतभेदान्नैष दोष इति ब्रूमः। हारीतमतमेतत्, ऊष्मा घोषो हारीतेत्यादिसूत्रपञ्चकमनिष्टं(६)॥

सवर्णसवर्गीयपरः॥ २३॥

सवर्णपरः सवर्गीयपरश्च द्वित्वं नापद्यते। सवर्णत्वं नाम सादृश्यमुच्यते(७), न तुल्यस्थानकरणतामात्रं। सवर्गीयः समानवर्गसम्बन्धी। यथा, अत्वक्काय। अत्ता हवींऽषि। पिप्पका ते(८)। संयत्ताः। यन्नोहितं। त्वं वातैः(९)। सवर्णपराण्येवमादीनि

---

१ विभूदावन्ने इति ग०।

२ आ ग्राव्ण इति इ० मु०।

३ स्पर्श एवैकेषामाचार्य्याणामित्यत्रावधारणनिराकरणायायमारम्भ इति इ० मु०। अत्र ग, चिह्नितपुस्तके अवधारणे निराकरणेयमारम्भ इतिविशेषः।

४ ग,चिह्निते इ० मु० पुस्तके च 'अथ वा' इत्यधिकपाठः। इ०मु० पुस्तकधृतमस्य पाठान्तरं 'यथा' इति।

५ पुनर्द्वित्वनिषेधात्पौनरुक्त्यमालम्ब्यत इति केचिदिति ग०।

६ हारीतमते ऊष्मा घोष इत्यादि सूत्रपञ्चकमिष्टमिति ग०। हारीतमतादूष्मा घोष इत्यादि सूत्रपञ्चकमनिष्टमिति इ० मु०।

७ सारूप्यमुच्यते इति ग०,इ० मु० च।

८ ते शरव्यायै इति इ० मु०।

९ त्वं वातैररुणैरिति इ० मु०।

सवर्गीयपराण्यपि([1]) वदामः । अङ्क्तो न्यङ्क्तो । प्राङ्क्सुप । काण्डात् काण्डात् । तन्ते दुग्धच्चाः । अक्मस्य ॥

अनुनासिकपूर्वस्तु ककारो मध्य आगमः ।
गकारस्य तकारे च धकारे च यथाक्रम् ॥

इति वचनादिदमप्युदाहरणं । पाङ्क्तो यज्ञः पाङ्क्ताः । तान् ब्रूयाद्युङ्ध्वमिति । एवम्पर इति किं । ताङ् मे आसन् । पत्नासः । विद्यानि मन्महे । दाम्नापा([2]) ॥

नानुत्तम उत्तमपरः ॥ २४ ॥

'न'कारोऽयं प्रतिप्रसवार्थः । उत्तमपरोऽनुत्तमो द्वित्वमापद्यत इति([3]) । यथा । याच्ञा । यज्ञे यज्ञेन । आट्ट्णारः । स प्रत्नवत् । पाप्मानं । अनुत्तम इति किं । तस्मा देवाः । उत्तमः परो यस्मादसावुत्तमपरः । सवर्णसवर्गीयपर इति प्राप्तावयमारम्भः([4]) ॥

अथैकेषामाचार्य्याणां ॥ २५ ॥

'अथ' इत्यधिकारः । एकेषां मतमधिक्रियत इत्येतद्वेदितव्यं([5]), इत उत्तरं यद्वक्ष्यामः ॥

---

१ सवर्णपराण्यपीति ग० । सवर्णपराण्यपीति इ०मु० पुस्तकधृतपाठान्तरं ।

२ दाम्नापोभन् इति इ० मु० ।

३ ग,चिह्निते इ० मु० पुस्तके च 'इति' पदं नास्ति ।

४ इति प्रतिषेधप्राप्तावयमारम्भ इति ग०, इ० मु० च ।

५ एकेषां मते क्रियत इत्येतधिकृतं वेदितव्यमिति ग०, इ० मु० च ।

लकारो हशवकारपरः ॥ २६ ॥

एकेषां मते हशवकारपरो लकारो द्वित्वं नापद्यते। मह्ला आलभेत[१]। वल्शो विरोह[२]। ततो विल्वः[३]। एवम्पर इति किं। कल्माषी। कल्याणी। हकारश्च शकारश्च वकारश्च हशवकाराः, ते परे यस्मात् सः, तथोक्तः। अत्र हशपरे कार्य्य मिष्टं, न तु वकारपरे। नापि परसूत्रमिष्टं[४]॥

स्पर्श स्पर्शपरः ॥ २७ ॥

एकेषां मते स्पर्शपरः स्पर्शो न द्वित्वमापद्यते। वाग्देवी। आपामोज्मानं। आट्णारः। सप्तवत्। यमप्नवानः। स्पर्शः परो यस्मा दसौ स्पर्शपरः॥

पदान्तश्च व्यञ्जनपरः प्राकृतः ॥ २८ ॥

व्यञ्जनपर इति स्पर्शव्यतिरिक्तव्यञ्जनपर इत्यर्थः। अन्यथा स्पर्शानामपि ग्रहणे पूर्वसूत्रेपि स्पर्शपर[६] इत्युक्तत्वात् पौनरुक्त्यं

---

१ आतभन्त इति ग०, इ० मु० च।

२ शतवल्शो विरोह इति ग०, इ० मु० च।

३ वैल्वो यूप इति इ० मु०।

४ न तु वकारपरे लकारस्य हश् वकारपर इति सूत्रे स्थितः। किं कारणं। न तु वकार इति प्रयोजनमस्ति। लकारस्य वकारस्य संयोग स्वरितो यदि। तदा संयुक्त एव स्यादसंयुक्तस्तदन्यथा इति वचनमस्ति। तस्मात् कारणात्, यदा लकारवकारयोः स्वरितसंयोगलकारस्य तदा द्वित्वमस्ति। असंयुक्तो द्वित्वं नास्तीति गमनिका। अत एव न तु वकारपर इति। ततो विल्वः। नापरसूत्रमिष्टं। इति ग,चिह्नितपुस्तकेऽधिकः पाठः।

६ स्पर्श इति इ० मु०।

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 45, Park Street.

I.—THE SOCIETY'S PUBLICATIONS.

A. Bibliótheca Indica.

Sanskrit Works complete.

Old Series, Nos. 1 *to* 230 *demi* 8vo. Rs.

The first two Lectures of the Sañhitá of the Rig Veda. Edited by Dr. E. Röer, Nos. 1 to 4, ... 2

Uttara Naishadha Charita, by S'ri Harsha, with a Commentary. Edited by Dr. E. Röer. 12 Fasciculi, ... 7

Chaitanya Chandrodaya, Náṭaka by Kavikarṇapura. Edited by Bábu Rájendralála Mitra. 3 Fasciculi, ... 1

Vásavadattá, by Subandhu, with its commentary entitled Darpaṇa Edited by Professor F. E. Hall M. A. 3 Fasciculi, .. 1

The Márkaṇḍeya Purána. Edited by the Rev. K. M. Banerjea. 7 Fasciculi, ... 4

The Elements of Polity, by Kámandaki. Edited by Rájendralála Mitra. 3 Fasciculi, ... 1

New Series, Nos. 1 *to* 259, *demi* 8vo.

The S'rauta S'útra of A'svaláyana, with the Commentary of Gárgya Náráyaṇa. Edited by Paṇḍita Rámanáráyaṇa Vidyáratna. 10 Fasciculi. .. ..

The S'añkara Vijaya of Anantánanda Giri. Edited by Paṇḍita Jayanáráyaṇa Tarkapañchánana. 3 Fasciculi, ...

Vais'eshika Dars'ana, with Commentaries of S'añkara Mis'ra &c. Edited by Paṇḍita Jayanáráyaṇa Tarkapañchánana. 5 Fasciculi,

The Nyáya Dars'ana of Gotama, with the Commentary of Vátsyáyana Edited by Paṇḍita Jayanáráyaṇa Tarkapañchánana. 3 Fasciculi, 1

Páli Grammer, by Káccháyana, Edited by Dr. F. Mason. 2 Fasciculi, 1

The Das'a-Rúpa, with Dhanika's Commentary. Edited by Professor F. E. Hall, D. C. L. 3 Fasciculi, ... 1

The Aphorisms of S'aṇḍilya, with the commentary af Svapnes'vara. Edited by J. R. Ballantyne, LL. D., ... 0

The Nárada Pancharátra. Edited by the Rev. K. M. Banerjea. 4 Fasciculi, ...

The Kaushítaki-Bráhmaṇa-Upanishad with Commentary, and a translation by E. B. Cowell. M. A. 2 Fasciculi, ... 1

The Kávayadars'a of S'rí Daṇḍin. Edited with a Commentary by Paṇḍita Premachandra Tarkavágis'a. 5 Fasciculi, ...

The Sáñkhya Sára of Vijnána Bhikshu. Edited by Dr. F. E. Hall, 1 Fasciculus, ... 0

The Brihat Sanhitá of Varáha-Mihira. Edited by Dr. H. Kern, 7 Fasciculi, ... 4

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 234 253 & 259.

तैत्तिरीय-प्रातिशाख्यं ।

त्रिभाष्यरत्ननाम टीकासहितम् ।

THE TAITTIRI'YA PRA'TISA'KHYA,

WITH THE

COMMENTARY EN TITLED THE TRIBHA'SHYARATNA.

EDITED BY

RA'JENDRALA'LA MITRA.

CALCUTTA.

PRINTED AT THE GANES'A PRESS.

1872.

CONTENTS.

सूची ।

PREFACE.

In 1847, the Council of the Asiatic Society of Bengal resolved to bring out an edition of the Rig Veda Sañhitá with an English translation; but before four fasciculi of the work could be issued, intimation was received from England that the Honorable Court of Directors had sanctioned the publication of that work under the editorship of Professor Max Müller, together with an English translation by Professor H. H. Wilson, at the expense of the Indian Government, and the Society's undertaking had therefore to be given up. It was, thereupon, resolved that a complete edition of the Black Yajur Veda along with its Prátíṣákhya and a Kalpa Sútra, should be brought out in this country. As the carrying out of this scheme would prove too much for a single individual, the Sañhitá of the Veda was made over to the late Dr. E. Roer, and the Bráhmaṇa, the A'raṇyaka and the Prátiṣákhya to the writer of this note. Owing to various causes—not a little to the difficulty of the task—the printing of the Bráhmaṇa and the A'raṇyaka progressed but slowly, and it was not until the beginning of 1870, that the editor was in a position to go to press with the Prátiśákhya. Just about that time he, however, found that Professor W. D. Whitney of New York had undertaken that work, and published the first ten chapters of it, together with an English translation and a commentary, in the Journal of the American Oriental Society. A reference to his colleagues in the Philological Committee of the Asiatic Society, therefore, became necessary, to decide upon the propriety or otherwise of the Society's edition being proceeded with. On the one hand, Professor Whitney's edition was so complete in every respect that nothing further could be desired for European readers; on the other, the bulk of the work was printed in the

Roman character, and the examples on which its value greatly depends, were dislocated from their proper places in the Bháshya, and enterspersed in the editor's commentory, so as to render the edition utterly unsuited for Indian Paṇdits who can neither read English, nor Sanskrit in the Roman character; the conclusion was, therefore, arrived at that it did not supercede the necessity of the work which the Society had resolved upon, and it was accordingly sent to press.

The edition now offered to the public is the result of that undertaking. It is founded upon three MSS. of great age and accuracy. One of them, क, was obtained from the late Bábu Ṣitalaprasáda of Benares, who very obligingly placed it at the disposal of the editor. It comprises 133 folia, measuring $8\frac{1}{2} \times 3\frac{1}{4}$ inches each, and having 7 lines on each page. Its writing is excellent, and it is nearly three hundred years old, being dated, "Sunday, the 1st. of the wane in the month of Kártika Sm. 1643"=A. D. 1585. It appears to have been very carefully corrected by more than one individual, and is altogether a most valuable MS. The copyist of the work was one Keṣava Káya stha of Benares.

The 2nd, ख, comprises 69 folia, measuring 9×4 inches each, and having 9 lines on each page. It is written in a cramped bad hand, and has never been revised; it is nevertheless generally correct.

The 3rd, ग, was purchased at Benares for the Asiatic Society of Bengal. It comprises 82 folia, each 9×4 inches, having 13 lines on each page. Its writting, like that of the last, is small cramped and bad, but it is throughout scrupulously correct, and on the whole even more valuable than the first.

Although all the three codices are of Benares origin, they have peculearities of their own which clearly show that they are independent of each other, and had been copied from very different texts.

In addition to the above Professor Whitney's edition has been freely made use of, and all the important *varæ lectiones* to be found there have been noticed in foot-notes.

The substance of this edition, like that of Professor Whitney, comprises two seperate works of very different ages; 1st a Sútra text of great antiquity, and 2nd, a commentary of a comparatively modern date. The former is mode up of 535 short, obscure, almost enigmatical aphorisms, and eight stanzas, arranged in 24 chapters. In four instances the stanzas appear at the ends of chapters (XVII, 8, XX, 12, XXII, 14-15, and XXIV 5-6,), and once in the middle, (XXIII, 2). The final stanzas duplicate the last words in the same way as do the final sútras; but, with the exception of this duplication, there is nothing to show that they are parts of the Sútra text. Their construction and language are entirely different, and their omission would not in any way affect the text. With reference to the verse at about the commencement of chapter XXIII Professor Whitney says, "It was hardly worth while to give a rule introductory to so very brief a statement of the subject as is here to follow." (p. 403). Ordinarily measured compositions are not introduced in the Stûra works of the Hindus, and their presence in the present instance suggests the idea of their being foreign to it. In none of my MSS. the sútras are numbered, and it is not at all certain, therefore, whether the MSS. ever intended them as sútras. The duplication does not appear in the case of the verse which occurs in the middle of Chapter XXIII, and where it does occur, it unsettles the measure. Nor is the fact of these verses having been commented upon by the Bháshyakára at all favorable to the theory of their being sútras, inasmuch as he has commented upon the introductory verses which are avowedly his own composition, and likewise done the same with reference to verses which he has quoted. It should be added further that the verse at the end of Chapter XVII has very much the character of a memorial ṣloka, probably

by the A'treya who is described at the beginning of the commentary as a commentator of the text, and not that of an original text by a rishi, such as the A'treya referred to in Su. 31, Cap. V was. A commentator can not possibly be quoted as an authority by the text on which he comments, and two A'treyas have therefore to be presumed; and the conclusion to be arrived at is that the later commentator, who acknowledges to have founded his work on the commentaries of Vararuchi, Máhiseya and A'treya, quoted the verses from his predecessor, and explained the quotations in his own way; and that the duplications where they occur are probably the results of mistaken corrections which have since been perpetuated by ignorant copyists.

The text is anonymous, and its date is unknown. Looking, however, to the circumstance of its having been commented upon by Vararuchi, who is probably the same with Kátyáyana, we may without much hesitation place it before the first century B. C. How long anterior to that age it existed it is difficult to determine with anything like precision. There are internal evidences, however, which suggest a far greater antiquity. Avowedly a treatise on orthography, it does not regularly use the terminology of Páṇini, and, in the absence of handy technical terms, treats of word after word in seperate rules in tedious iteration, instead of disposing of groups of words in seperate classes. In this respect the work under notice differs entirely from the other Prátiṣákhyas which freely use well-established and current technical terms for groups of words, and the natural inference is that in the time of its author long-continued usage had not given currency and fixity to such orthographic technical terms, and that what had been current and used by the author have since been set aside by Páṇini. Professor Whitney has noticed the absence of class terms. He is of opinion, however, that this is owing to a studied avoidance on principle of such terms. He says, "it (the subject of *pro-*

graha) occupies here a great deal more space, because the Taitt, Pr. avoids on principle the mention of grammatical categories in its rules, and is at infinite pains to catalogue word by word, what the other treatises dispose of summarily by classes."* There is nothing, however, to show that the terms were avoided on principle. No class of writers on earth has studied brevity more scrupulously than the authors of Sútras, who have one and all borne in mind the maxim which says that "a Sútrakára rejoices as exultingly on the saving of a half-syllable in his composition as on the birth of a son and heir," and it would be inconsistent to suppose that the author of the text was an exception to the class, and multiplied the number of his sútras, and expressed in many rules what by the adoption of technical terms could have been condensed in a few. The only incentive to such a course of proceding would be the desire to disown his predecessors and contemporaries; but this was entirely wanting in him, for of all others of his time he was the most prone to quote the opinions of others, either in support of his own position, or to controvert them. Altogether he has quoted by name 21 sages, teachers and schools,† and among them we miss the name of Páṇini, though he was the greatest grammarian of his time, and has maintained that proud preeminence for over five and twenty centuries. Páṇini treated of most of the topics

* Taittiríya Prátiṣákhya p. 99.

† There names are as follow ;

Agnivesya,	... ...	128
Agnivesyáyana,	.. ..	195
A'treya, ...	...	219, 92
Bádadhikára,	... ...	185
Gautama,	... ...	95
Hárita, ...	.. ...	188
Kauhaliputra,	... ...	217
Káṇḍamáyana,	...	199, 127
Kauṇḍinya,	...	222, 224 95
Máchákeya,	... ...	148
Paushkarasádi,		176, 17J 95 95
Plaksha,		95, 187, 184; 128, 222
Plákshäyana,		187 184, 229, 222
Sáñkṛitya,	..	120 148, 207
Saityáyana,	...	207, 219 95 222
Sáñkháyana,	... ...	199
Sthavira Kauṇḍinya,	..	218
Ukhya,	..	211, 148, 120
Uttamottariya (Sákhá),	..	120
Vátsapra,	... ...	149
Válmíki,	...	94 223

which form the theme of the author of the Prátisákhya, and had he known Páṇini he could not have omitted to notice him, and the presumption is therefore strong that he lived before the date of Páṇini, and probably also of Yáska whose name, likewise, does not occur in his treatise.

The commentary, like the text, is anonymous, and its date likewise is uncertain. The manner in which it receives the text as something authoritative and sacred, clearly shows that it is of a much later date. It quotes not only from Páṇini, but also from the Mahábháshya, or rather from Kaiyaṭa's gloss, from the Amarakosha, from the Mimánsakas, from the Kálanirnaya, and from some of the Puráṇas including the Bhavishya, the last probably not older than the 8th or the 7th century of the Christian era, and must therefore be set down to a later period, though what the period is it is not possible now to determine.

Of the nature, character and value of the work nothing need be said after what has been so fully and ably stated by Professor Whitney in his edition of it, and by Dr. Weber in the *Indische Studien* (vol IV.), I must, therefore, refer the reader to those works for information on the subject.

स्यात्। न तु निमित्तविशेषनिमित्तिविशेषोऽप्यस्ति(१)। पदान्तत्वं प्राकृतत्वञ्च निमित्तिनो विशेषः। निमित्तस्य तु सर्व्वव्यञ्जनात्मकत्वमिति चेत्। तथापि स्पर्शभागे निमित्तविशेषस्य वैयर्थ्यं। स्पर्शपर इत्यत्र सामान्येन(२) निमित्तविशेषस्य विगतत्वात्। तस्मादन्तस्था यरलवा इत्यत्र(३) व्यञ्जनशब्देनोच्यन्ते। 'च'कारस्पर्शाच्चरपारिशेष्यान्नकारस्याकर्षणं(४)। तथाहि, अन्तस्थादिव्यञ्जनपरत्वे सत्यन्यस्पर्शानामविकृतानां पदान्ते स्थितिर्नास्ति। सम्राडित्यत्रास्तीति चेत्। नैवं(५)। न सङ्शामिति रापर इत्यत्र वैयर्थ्यात् इति शब्दो मकारस्य ह्रित्वसद्भावं बोधयतीत्यध्ययनानुरोधादुपपादितं। तस्मान्नैष निषेधविषयः। नापि ब्रह्मण्वन्तः, न्यङ्ग्रश्मिभिः, इत्यादिविषयः। कुतः, इह प्राकृत इति विशेषणं विकृतसद्भावं कल्पयति। अन्यथा स्वस्ववैयर्थ्यात्(६)। तच्च विकृतित्वं नकारस्य(७) ङकारस्य वा अन्तस्थादिपरत्वे सति क्वचिदपि पदान्ते न दृश्यते। तस्मात् प्राकृत इति प्रयोगसाफल्याय नकारस्यैवानुकर्षणं युक्तमिति पारिशेष्यम्। किञ्च माहिषेयेऽपि नकारस्यैवानुकर्षणं सिद्धवत्कृत्योक्तं। तत्रैवं (८)सूत्रयोजना। एकेषां मते पदान्तः प्राकृतो नकारोऽन्तस्थादिव्यञ्जन-

---

१ न तु निमित्तिविशेषान्निमित्तविशेषोस्ति इति ग०, इ०मु० च।

२ सामान्येनापि इति ग०,इ०मु०च।

३ तस्मादन्तस्थाद्य एवात्र इति ग०, इ० मु० च।

४ चकारो यद्यपि स्पर्शमात्राकर्षकस्तथापि पारिशेष्यान्नकारस्यानुकर्षणम् इति इ०मु०। ग,चिह्नितपुस्तके स्पर्शाकर्षकः, इति विशेषः। समानमन्यत्।

५ नैवमिति ग०।

६ स्वस्य वैयर्थ्यादिति ग०, इ०मु० च।

७ विकृतत्वं णकारस्येति ग०, इ० मु० च।

८ तत्रेयं इति ग०, इ० मु० च।

परो द्वित्वं नापद्यते। यथा, जनान् पाययति[१]। श्रीमन्वतीते। एतान् होमान्। पदान्त इति किं। अन्वायन्ति[२]। अन्तस्थादिपर इति किं। तान् कल्पयति। इमान् भद्रान्। दुर्य्यान्। प्राकृत इति किं। मान् रक्षध्वं। वैष्णवा रक्षोहणः। ननु कथमत्र विकृतत्वं।

रेफाट्टवर्णात् पूर्वश्च तवर्गाच्च परश्च नः।
तवर्गस्थान इत्याहुरन्तस्थानोन्यदुच्यते॥

इति वचनादस्ति स्थानभेदकृतं[३] विकृतत्वमिति ब्रूमः। शिक्षा चैवं वक्ष्यति,

रेफपूर्वो नकारो यः पदान्ते यत्र दृश्यते।
विशेषं तत्र जानीयाद् द्वित्वमित्यभिधीयते॥ इति।

व्यञ्जनमस्मात् परमिति[४] व्यञ्जनपरः। प्रकृतिरिति[५], स्वभावः, तत्सम्बन्धी प्राकृतः॥

उदात्तात्परोऽनुदात्तः स्वरितम्॥२९॥

प्रातिहतपादवृत्ततैरोव्यञ्जनविषयमेतत्। उदात्तात्परोऽनुदात्तः स्वरितमापद्यते। यथा, स इधानः। अथाब्रवीत्। वस्व्यसि। प्रउगमुक्थ्यम्। तथा देवतया। वर्णविभागावस्थायामनुदात्तत्वे सत्येव पुनस्तत्संहितायामेतल्लक्षणात् स्वरितत्वं प्रउगमित्यादौ विज्ञेयं॥

---

१ मित्रो जनान् पातयतीति इ० मु०।
२ ग, चिह्नितपुस्तके इ० मु० पुस्तके च अन्वाहमास इति अधिकः पाठः।
३ स्थानभेदे कृतमिति इ० मु०।
४ पर इति ग०।
५ प्रकृतिः इति ग०, इ० मु० च।

व्यञ्जनान्तर्हितोऽपि ॥ ३० ॥

व्यञ्जनान्तर्हितोप्युदात्तात् परोऽनुदात्तः स्वरितमापद्यते(१)। यथा, तदग्ने अनृणः(२)। यस्त्वा हृदा, इत्यादि। अन्तर्हितो व्यवहित इत्यर्थः ॥

नोदात्तस्वरितपरः ॥ ३१ ॥

उदात्तपरः स्वरितो(३) वा अनुदात्तात् परोऽनुदात्तः स्वरितं नापद्यते। यथा, य इमं लोकं(४)। ता आद्याः। कीरिणा मन्यमानः। तस्यै वृद्धे(५)। उदात्तस्य स्वरितस्य उदात्तस्वरितौ, तौ परौ यस्मात् सः, तथोक्तः ॥

नाग्निवेश्यायनस्य ॥ ३२ ॥

पूर्व्वसूत्रस्य प्रतिप्रसवार्थोऽयं(६) नकारः। उदात्तपरोऽनुदात्तः स्वरितमाग्निवेश्यायनस्य मते उदात्तात् परोऽनुदात्तस्वरितपरो वा स्वरितं नापद्यत इति(७)। पूर्व्वोक्तान्येवोदाहरणानि ॥

---

१ स्वरितं स्यादिति ग०।

२ अनृणो भवामीति इ० मु०।

३ उदात्तस्वरितपर इति इ० मु०।

४ स इमां लोकाम् इति इ० मु०। स इमं लोकमिति ग०।

५ तस्यै वृद्धमिति ग०। तस्यै वृद्धामानन्यामजायत इति इ० मु०।

६ पूर्वसूत्रप्रतिप्रसवार्थोयमिति ग०, इ० मु० च।

७ आग्निवेश्यायनमते उदात्तस्वरितपरो वा नापद्यते इति न इति ग०। आग्निवेश्यायनस्य मते उदात्तपरो वा स्वरितपरो वा नापद्यत इति न इति इ० मु०।

सर्वो नेत्येके सर्व्वो नेत्येके ॥ ३३ ॥

न केवलमुदात्तात् परः, किन्तु सर्व्व एव सप्तविधस्वरितो नास्तीत्येके शाखिनो मन्यन्ते। तथाहि वाजसनेयिब्राह्मणे, द्वावेव स्वरावुदात्तोऽनुदात्तः(१)। नेदं सूत्रद्वयमिष्टं ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे चतुर्दशोऽध्यायः ॥ ० ॥

---

१० द्वावेव स्वरावुदात्तश्चानुदात्तश्चेति इ० मु०। द्वावेव स्वरावुदात्तानुदात्तौ इति ग०।

अथ पञ्चदशोऽध्यायः ।

नकारस्य रेफोष्मयकारभावाल्लुप्ते च मलोपाच्च पूर्व्व- स्वरोऽनुनासिकः ॥ १ ॥

नकारस्य रेफभावादूष्मभावाद्यकारभावाच्चकाराक्लृष्टयकारे लुप्ते सति मलोपाच्च (१)। पूर्व्वस्वरोऽनुनासिको भवति, सानुनासिको भवतीत्यर्थः । यथा रेफभावात्, अग्नीँ्रप्सुषदः(२)। अथोष्मभावात्(३), कर्णाँ्श्चाकर्णाँ्श्च। त्वीँ्स्तचान् । यकारभावाद्यथा, महाँ्इन्द्रः। यकारे लुप्ते यथा, महाँ् इन्द्रः । अथ मकारलोपः(४), प्रत्युष्टँ्रक्षः। सँ्शितं मे ब्रह्म। इत्यादि। मकारस्य लोपो मलोपः(५), तस्मात् ॥

नैकेषां ॥ २ ॥

एकेषां मते पूर्व्वसूत्रोक्तेषु सानुनासिकं(६) न भवति। उक्तान्येवोदाहरणानि। इदमेवेष्टं न तु पूर्व्वं ॥

---

१ मकारलोपाच्चेति इ० मु०।

२ सचो रेकादशां ह्वि इतिइ० मु० पुस्तकेऽधिकः पाठः।

३ ऊष्मभावादिति ग०।

४ मकारलोपात् इति ग०।

५ मकारस्य लोपः, मकारलोप इति इ० मु०।

६ सानुनासिक्यमिति इ० मु०।

ततस्त्वनुस्वारः ॥ ३ ॥

तत इति सर्व्वनाम्नः परामृष्टात् पूर्व्वस्वरात् (१)परोऽनुस्वारागमो भवति। यथा, सात्वीꣳरेकादशाꣳ इह। परामृष्टस्य पूर्व्वस्वरस्यानुनासिकं गुणं(२) तु शब्दो निवर्त्तयति। तस्मादनुनासिकप्रतिषेधपक्ष एवायमनुस्वारागमः स्यात् ॥

स्वादिषु चैकपद ऊष्मपरः ॥ ४ ॥

आगमान्वादेशकः,'च'कारः। स्वादिष्वेकपदे अखण्डपदे ऊष्मपरे सति(३) अनुस्वारागमो भवति। यथा, शीꣳसामोद इव(४)। स्वादिष्विति किं। तासां त्रीणि च। एकपद इति किं। तं मा सꣳसृज। (५)अखण्डविशेषणेन किं(६)। त्रिसाहस्रो वै। ऊष्मपर इति किं। माया मायिनां ॥

नान्तविकारात् पूर्व्वः ॥ ५ ॥

न खलु पदान्तविकारात् पूर्व्वस्मिन्ननुस्वारागमो भवति। वहिस्ते अस्तु(७)। द्विपुजिगेति प्राप्तिः। अन्तविकारादिति किं मा हिꣳसीर्द्विपादं। अन्तस्य विकारः, अन्तविकारः, तस्मादन्तविकारात् ॥

---

१ स्वरादिति ग० इ०मु० च।

२ परामृष्टस्वरस्यानुनासिकं गुणमिति इ०मु०। परामृष्टस्वरस्यानुनासिकं गुणमिति ग०।

३ ऊष्मपरः इति ग०, इ० मु।

४ मोद इवेतीति ग०, इ० मु० च।

५ प्रस्तर मा हिंसीद इति इ० मु० पुस्तकेधिकः पाठः।

६ अखण्ड इति किमिति ग०।

७ अस्तु अवालितीति ग०,इ० मु०च।

अप्रग्रहाः समानाक्षराण्यनुनासिकान्येकेषां॥ ६॥

यानि समानाक्षराणि अप्रग्रहसञ्ज्ञानि तानि एकेषां मते भवन्त्यनुनासिकानि(१)। कुलायिनी(२)। अप्रग्रहा इति किं। अमो इति। तन् इति। समानाक्षराणीति किं। (३)सो एवैषैतस्याः। प्रग्रहाक्षरयोर्नियतलिङ्गतया परस्परान्वयो घटते। न प्रग्रहाः अपग्रहाः॥

पदञ्च प्लुतꣳ शाङ्खायनकाण्डमायनयोः॥ ७॥

यत् प्लुतवत् पदं तच्च पदकाले शाङ्खायनकाण्डमायनयोर्मते अनुनासिकं भवति। त्वौ३ इत्य ब्रवीत्। अस्तुही३ इत्यब्रूतां। पदमिति किं। संहितायां मा भूत्। 'च'शब्दः पूर्व्वसूत्रोक्तविधेयसमुच्चयं करोति। अपरे त्वाहुः(४)। प्लुतैकस्वरं पदमिति अन्यं मा भूत्। न छिनत्ति इति। न विचिन्त्या३ इति। नेदं सूत्रद्वयमिष्टं॥

अकारस्तु सꣳहितायामपि॥ ८॥

सान्निध्यादनुनासिकप्लुतौ गृह्येते। 'तु'शब्दः प्राक्तनाचार्य्यमतनिवर्त्तकः। अत एव संहितायामसंहितायाञ्च अकारः पदान्तेऽनुनासिको(५) भवति। यद्यकारः(६) इति सामान्योक्तः, तथाप्य-

---

१ एकेषां मते अनुनासिकानि स्युरिति ग०।

२ कुलायिनी वसुमतीतिग०। कुलायिनीं वसुमतीमिति द० मु०।

३ साध्या वै इति ग० चिह्नितपुस्तके- विभिन्नः पाठः।

४ अपर आऊरिति द० मु०।

५ अकारः पदान्तः प्लुतोऽननासिक इति ग०, द० मु० च।

६ यद्यप्यकार इति ग०, द० मु० च।

न्वादेशोन्त्यस्येतिवचनादपिशब्दोनुनासिकतया निमित्तं(१)पदान्तमेव चकारमन्वादिशति। यथा, सुश्लोका३सुमङ्गला३ऌ। उपहूता३। यशोममां३। यद्भ्रां(२) इत्यन्यस्यां शाखायां। 'अपि'शब्दः किमर्थः। सत्यराजा३न्। अग्ना३ इत्याह। विचिन्त्यः सोमा३न विचिन्त्या३ इति। शाङ्खायनकाण्डमायनयोरप्ययं विधिरकारप्लुते(३) सम्मतः॥

सर्व्वमेकयमं पूर्व्वेषा३ऌ सर्व्वमेकमयं पूर्वेषाम्॥ ९॥

एकजातमेकयमं(४) एकश्रुतिरिति पूर्व्वेषां(५) मतम्। यमो नाम स्वरः, उदात्त इत्यर्थः। पूर्व्वे नाम याज्ञिकाः, तेषां यज्ञकर्म्मणि सर्व्वमेकश्रुति भवति। अन्ये मन्यन्ते, पूर्व्वे नाम केचिच्छाखिनः, तेषां सर्व्वमेकश्रुतोति। अथापरे कथयन्ति(६), सर्वमेकस्वरमनुनासिकं भवतीति(७) समानाचरमाचापिचामधिचेमुं। नेदं सूत्रमिष्टं॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे इत्यापस्तम्बानां शाखानां यजुर्वेदलक्षणः(८) पञ्चदशोऽध्यायः॥ ०॥

---

१ अननुनासिकधर्मतया निमित्तिनं इति ग०, इ० मु० च।

२ ब्रह्मा३न् इति इ० मु०।

३ विधिरकारे प्लुते इति ग०,इ०मु०च।

४ सर्वं वर्णजातमेकयममिति इ० मु०।

५ सर्वेषामिति ग०।

६ अपरे तु इति ग०।

७ भवतीति वदन्ति इतिग०।

८ इत्यापस्तम्बानां शाखानां यजुर्वेदलक्षण इति पाठो ग, चिह्निते इ० मु० पुस्तके च नास्ति।

अथ षोडशोऽध्यायः ।

अथ सकारपराः ॥ १ ॥

'अथ' इत्यधिकारः(१)। इत उत्तरे ग्रहणविशेषाः सकारपरा इत्येतदधिकृतं वेदितव्यं । सकारः परो येभ्यस्ते 'सकारपराः' ॥

स्रशोह्पाश पदादयः स्वरपरे ॥ २ ॥

'स्र, शो, ह, पा, श,' इत्येते ग्रहणविशेषाः(२) पदादयः सकारपराः, तस्मिन् सकारे स्वरपरे सत्यनुस्वारागमं भजन्ते । यथा, विस्रꣳसयेत्(३)। शोꣳसामोद इव(४)। ओकारेण किं। आशासाना(५)। हꣳसः शुसिषत्। ह्रस्वेन किं(६)। प्रजा मा मा हासीत्। पाꣳसुर इरावती। दीर्घेण किं। आहतं गभे-पसः। यदासीनः शꣳसति(७)। पदादय इति किं। अग्निरुक्-थेन वाहसा। सोमं पिपासेत। दहाशसः। स्वरपरे इति किं। विस्रस्य(८)। हस्तयोः। कविशस्तः। केचिदत्र सूत्रे ह्रियहणम-

---

१ अथेत्ययमधिकार इति ग०, इ० मु० च।

२ ग्रहणविशेषाणामिति ग०।

३ विस्रंसयेदमेहेनाध्वर्युरिति ग०, इ० मु० च।

४ इवेति, इति म०, इ० मु० च।

५ आशासाना सौमनसमिति इ० मु०।

६ ह्रस्व इति किमिति ग०, इ० मु० च।

७ शंसति तस्मात् इति इ० मु०।

८ तस्मात् स विस्रस्य इति इ० मु०।

ङ्गीकुर्वते। तदनुपपन्नं(१)। पदादय इति नियमात्। अहिꣳसा(२), इत्यत्रानुस्वाराभावप्रसङ्गात्। ननु हिꣳसीः परम इत्येतदत्रोदाहरणमिति चेत्। तन्नैवं(३)। हिपुजिगा इत्यत्र नियमाभावात्। पदादावपदादौ च हिग्रहणस्य कार्य्यसिद्धेः पुनरत्र ग्रहणं व्यर्थं। स्वरः परो यस्मादसौ 'स्वरपरः,' तस्मिन्॥

विकृतेऽपि॥ ३ ॥

'अपि'शब्दः स्वरान्वादेशकः। सकारात् परे तस्मिन् स्वरे विकृतिमापन्नेऽपि व्यञ्जनतामुपगतेऽपि स्यादनुस्वारविधिः(४)। यथा, अपहꣳस्यग्ने॥

रापूर्व्वश्च॥ ४ ॥

शग्रहं स्वादिषु चकारोऽन्वादिशति (५)। एतदर्थमेव स्वरव्यत्ययेऽपि शकारग्रहणं तत्रान्ते कृतं। रा इत्येवं पूर्व्वः शकारः सकारपरोऽनुस्वारागमं भजते। यथा, नाराशंꣳसोऽश्यः। अपदाद्यर्थोऽयमारम्भः॥

शꣳस्तानन्तोदात्ते॥ ५ ॥

'शꣳस्ता,' इत्येतस्मिन् ग्रहणे अनन्तोदात्ते सकारपरेः(६)।

---

१ तन्नेति ग०।

२ अहिंसायामिति ग०।

३ उदाहरणमिति चेत्, नैवमिति ग०, ह० मु० च।

४ सकारात् परे स्वरेपि कृते व्यञ्जनत्वमापन्ने प्यनुस्वारविधिरिति ग०।

५ चशब्दः स्वादिषु शकारमन्वादिशतीति ह० मु०। स्वादिषु शकारमन्वादिशति चकार इति ग०।

६ सकारे इति ग०।

भवत्यनुस्वारागमः । उत सᳫंस्तासुविप्रः (१) । अनन्तोदात्ते इति किं(२) । अश्वस्या विशस्ता । स्वशोहेति प्राप्तौ सत्यां सकारस्य स्वरपरत्वाभावेऽपि नायं विधिर्निषिध्यतामिति पदग्रहणम्(३)। अन्ते उदात्तो यस्य तत् अन्तोदात्तं, न अन्तोदात्तं अनन्तोदात्तं, तस्मिन् ॥

अशᳫंसन् ॥ ६ ॥

'अशᳫंसन्' इत्यस्मिन् ग्रहणे स्यादनुस्वारागमः । अभिव्यशᳫंसन् । अपदाद्यर्थोयमारम्भः ॥

न शसनं विशसनेन ॥ ७ ॥

'शसनं, विशसनेन,' इत्येतयोर्ग्रहणयोरनुस्वारागमो न भवति(४)। शसनं वाज्यर्वा । शुनो विशसनेन । स्वशोहेति प्राप्तिः ॥

मा पदादिरनुदात्तः ॥ ८ ॥

'मा' इत्येवं वर्णः पदादिरनुदात्तः सकारपरोऽनुस्वारागमं भजते । अत्र नियमाभावात् सकारस्य स्वरपरत्वाभावेऽपि निमित्तत्वं भवत्येव । यथा, अहर्माᳫंसेन । माᳫंस्चन्याः(५) । पदादिरिति किं । सिलिकमध्यमासः (६) । अनुदात्त इति किं । मासं दोचितः(७) ॥

---

१ स्वविप्र इति इ० मु० ।

२ अनन्तरोदात्ते किमिति क० ।

३ निषिध्यतामिति ग्रहणमिति ग०, इ० मु० च ।

४ न स्यादिति इ० मु० ।

५ मांस्पाचन्या इति इ० मु० ।

६ शिलिकमध्यमास इति इ० मु० ।

७ दोचितः स्यादिति इ० मु० ।

पुमीपूर्व्वस्य नित्यं ॥ ९ ॥

'च'शब्दो मा इति ज्ञापयति। पु, मी, इत्येवम्-'पूर्व्वो' मा, इत्येवं वर्णः सकारपरो नित्यमनुस्वारागमं भजते। उत्पुमाꣳसꣳ हरन्ति। मीमाꣳसन्ते कार्य्यं। अनुदात्तत्वनियमनिवर्त्तको नित्य-शब्दः(१) ॥

सकायपरश्च ॥ १० ॥

'च'शब्दो मा इति ज्ञापयति। मा, इत्ययं वर्णो 'सकाय-परो' अनुस्वारागमं भजते। यथा, अमाꣳसकाय स्वाहा ॥

नावग्रहपूर्व्वः ॥ ११ ॥

मा पदादिरनुदात्त इत्यस्यापवादः(२)। अवग्रहपूर्व्वो मा, इत्ययं(३) वर्णो नानुस्वारागमं भजते। यथा, पूर्णमासे वै। अर्द्धमासै देवाः। अवग्रहः पूर्व्वो यस्मादसौ 'अवग्रहपूर्व्वः' ॥

मासिमासुमासोमासामिति च ॥ १२ ॥

'च'कारो निषेधाकर्षकः। 'मासि, मासु, मासः, मासां,' इत्येतेषु ग्रहणेषु न स्यादनुस्वारागमः(४)। एषामपि(५) मा पदादिरिति प्राप्तिः। केचिदत्र प्रथमे मासि पृष्ठानीत्युदाहरन्ति। तदसार(६)। न पदे हिस्वरे नित्यमित्यनेनैव सिद्धेः(७)। तस्मादन्यशाखायां

---

१ अनुदात्तत्वनिवर्तक इति ग०, इ० मु० च।

२ इत्यस्यायमपवाद इति इ० मु०।

३ इत्येवमिति इ० स०।

४ एष अनुस्वारागमो न इति ग०।

५ एषाम् इति ग०।

६ तदसाधुरितिइ० मु०।

७ निषेधसिद्धेरिति ग०, इ० मु० स।

बहुस्वरमुदाहरणमवधारणीयं(१)। दशसु माःसूत्तिष्ठन्। षण्मा-
सः(२)। मासां प्रतिष्ठित्यै॥

ह्वि-पु-जिगा-जिघा-कꣳसिनेऽतꣳसयदाताꣳसीत्-कनी-
या-ज्याया-द्राघीया-रघीया-श्रेया-ह्रसीया-वसीया-भूयाꣳ
सो-जज्ञिवा-जघ्निवा-जिगिवा-जीगिवा-तस्थिवा-दाश्वा-दीदि-
वा-पपिवा-पीपिवा-विद्वा-विविश्विवा-शुश्रुवा-सस्वा॥१३॥

ह्वि, पु, जिगा, जिघा, कꣳसिने, अतꣳसयत्, आताꣳसीत्,
कनीया, ज्याया, द्राघीया, रघीया, श्रेया, ह्रसीया, वसीया,
भूयाꣳसः, जज्ञिवा, जघ्निवा, जिगिवा, जीगिवा, तस्थिवा,
दाश्वा, दीदिवा, पपिवा, पीपिवा, विद्वा, विविश्विवा, शुश्रुवा,
सस्वा, इत्येवम्पूर्व्वः सकारपरोऽनुस्वारागमं भजते(३)। यथा,
ह्विꣳसीः परमे(४)। चिनुते ह्विꣳसायै। तेन पुꣳस्वतीः। पुꣳसः
पुत्रान्। लोकमजिगाꣳसन्। त्वष्टारमजिघाꣳसन्। ब्राह्मणा-
च्छꣳसिने। ने इति किं। प्रयच्छस्युभे(५)। भगे मुष्टिमतꣳस-
यत्(६)। यदिति किं। अतसं न शुष्कं। अन्वाꣳतासीत् त्वयि।
सीदिति किं(७)। अनुव्रातासस्तव। कनीयाꣳसोद्देवाः। ज्यायाꣳ-
सो भ्रातरः। द्राघीयाꣳसौ भवतः। अथो रघीयाꣳसः।

---

१ बहुस्वरमपरमुदाहरणमवधारणीय-मिति इ० मु०। बहुस्वरपरमुदाहरणमा-दरणीयमिति ग०।

२ षण्मासो दाक्षिणेन इति इ० मु०।

३ अनुस्वारागमो भवति इति इ० मु०।

४ परमे व्योमन् इति ग०, इ० मु० च।

५ प्रयच्छस्युभे निपासीति ग०, इ० मु० च।

६ गभे मुष्टिमतंसयदिति ग०, इ० मु० च।

७ इद्दिति किमिति ग०, इ० मु० च।

प्रश्रेयाꣳसं। अथ क्षणीयाꣳसमाक्रमणं। वसीयाꣳसं भागधेयेन। भूयाꣳसोऽन्येभ्यः। विसर्गेण किं(१)। अन्नादो भूयासं। जक्षिवाꣳसः(२)। जघ्निवाꣳसस्रद्रः(३)। वाजं जिगिवाꣳसं(४)। जीगिवाꣳसमिति शाखान्तरे(५)। द्युम्ना तस्थिवाꣳसः(६)। दाश्वाꣳसो दाशुषः(७)। शुचये दीदिवाꣳसं(८)। पपिवाꣳसंश्च(९)। पीपिवाꣳसꣳ स्वरन्तः(१०)। विद्वाꣳसो वै अविद्वाꣳसश्चक्रम(११)। अथ कारादीतिवचनात्, प्रविविशिवाꣳसमीमहे। शुश्रुवाꣳसः(१२)। वाजꣳससवाꣳसः। दाश्वाविविशिवाशुश्रुवेत्यत्र स्वादिषु चैकपद इति प्राप्त्या शकारपरोऽनुस्वारागमः(१३) किं न स्यात्। अथ सकारपरा इत्यूष्मविशेषस्य सकारस्यानुवृत्तेरिति वदामः। तर्हि क्षीया वसीया तस्थिवा सस्रवा इत्यत्र सकारपर एवागमः किन्न स्यात्। उच्चारणसामर्थ्यादेवेति प्रथमः परिहारः। अथवा आताꣳसीत् कनीयाꣳसमित्यादिषु(१४) सर्व्वत्र

---

१ सविसर्गेण किमिति ग०।

२ जक्षिवांसः पपिवांस इति ग०, इ० मु० च।

३ वृत्रं जघ्निवांसं स्पृधोभि इति ग०, इ० मु० च।

४ वाजजिगिवांस इति ग०। वाजं जिगिवांस इति इ० मु०।

५ जीगिवांसः स्वामेति शाखान्तर इति ग०।

६ तस्थिवांसो जनानामिति इ० मु०।

७ दाशुषः सुतमिति इ० मु०।

८ शुचयो दीदिवांसमिति ग०, इ०मु० च।

९ पपिवांसश्च विश्वे इति ग०, इ०मु०च।

१० पीपिवांसः सरस्वत इति ग०, इ० मु० च।

११ विद्वांसो वै पुरा होतार इति इ० मु०।

१२ यच्छुश्रुवांस इति ग०, इ० मु० च।

१३ प्राप्त्या अपरोनुस्वारागम इति ग०।

१४ कनीयाज्यायेत्यादिषु इति ग०, इ० मु० च।

दीर्घानन्तरमेवानुस्वारमिति च स्थानसाहचर्य्यादवाप्ति(१) न स्यादनुस्वारस्य ह्रस्वानन्तरं(२) स्थानमित्यपरः परिहारः ॥

आकारेकारोकाराः सिषिपराः पदान्तयोः ॥ १४ ॥

सिषिपरा अकारेकारोकारास्तयोः सिषोः पदान्तयोः सतोरनुस्वारागमं भजन्ते। यथा, ययाꣳसि पक्वगन्धेन। तस्माꣳसि गृहतां(३)। दशहवीꣳषि। ज्योतीꣳषि कुरुते। अग्न आयूꣳषि। अवभृथयजूꣳषि(४)। पदान्तयोरिति किं। तस्माद्वासिष्ठः(५)। मनीषिणो मनसा। आकारेकारोकारा इति दीर्घेण किं। यथा, नसि युक्ता(६)। ज्योतिस्त्वा ज्योतिषि। आयुषि दुरोणे। सिषोत्यत्र इकारेण किं। प्रजास्त्वेव प्रजातासु। ओषधीषु तनूषु सहम् ॥

विकृतेऽपि ॥ १५ ॥

'अपि'शब्दान्वादिष्टे, सिषोरिकारे विकृतेऽपि यकारमापन्ने(७) भवत्यनुस्वारागमः। यथा, छन्दाꣳस्युपदधाति। हवीꣳष्यासादयेत्। तपूꣳष्यग्ने जिह्वा ॥

अनाकारो ह्रस्वꣳसाङ्क्रत्यस्य ॥ १६ ॥

आकारादन्यः, 'अनाकारः' ईकार ऊकारश्चेत्यर्थः। तयोरेव

---

१ अनुस्वार इति साहचर्य्यादवाप्नीति म०।

२ ह्रस्वान्तरमिति ग०।

३ गृहतामजुष्टा इति ढ० मु०।

४ अवभृथयजूꣳषि जुहोमीति म०, ढ० मु० च।

५ वासिष्ठो ब्रह्मा इति ढ० मु०।

६ नसि युक्ता आधीयते इति ढ० मु०।

७ यकारमापन्नेऽपि इति म०, ढ० मु० च।

प्रकृतत्वात् सांकृत्यस्य मते ईकार ऊकारस्य ह्रस्वमापद्यते। हवीꣳषि भवन्ति। समिष्टयजूꣳषि जुहोति। अनाकार इति किं। वयाꣳसि। नेदं सूत्रमिष्टं॥

न पदे द्विस्वरे नित्यं॥ १७॥

'द्विस्वरे पदे' वर्त्तमाना:(१) आकारेकारोकारा: पदान्ता: सिषिपरा(२) नानुस्वारागमं नित्यं भजन्ते। यथा, स्तुतो यासि(३)। यासि दूत:। 'नित्य'शब्द: प्राप्त्यन्तरप्रतिषेधार्थ:। विधत: पासि नुत्मना। स्वशोहेतिप्राप्ति:। प्रथमे मासि पृच्छानि(४)। सा पदादिति(५) प्राप्ति:। द्वौ स्वरौ यस्मिन् विद्येते तद्द्विस्वरं, तस्मिन्॥

ऋजीषि-जिगासि-जिघांस्यजासि-यजासि-ददासि-दधासिवर्त्तयासि च॥ १८॥

'च'कारो निषेधाकर्षक:। ऋजीषिप्रभृतिषु ग्रहणेषु नानुस्वारागम: स्यात्। अकारेकारोकारा इति प्राप्ति:। बहुस्वरत्वादेषु पूर्व्वसूत्रनिषेधान्निषिध्यति(६) अत्रायमारम्भ:। यथा, तेनर्जीषि(७) अच्छाजिगासि। जिघांसीति शाखान्तरे। आत्मजासि गर्भधं। हविषा यजास्यग्ने बृहत्। याभिर्ददासि दाशुषे। दधासि दाशुषे कवे। अश्वमावर्त्तयासि न:॥

---

१ द्विस्वरे वर्त्तमाने इति क०।

२ पदान्तसिषिपरा इति दु० मु०।

३ स्तुतो यासि वशां अनु इति दु० मु०।

४ पृष्ठानि इति ग०।

५ सा पदादिरितीति ग०, दु० मु० च।

६ पूर्वसूत्रनिषेधान्ननिषिध्यतीति ग०। पूर्वसूत्रनिषेधो न सिध्यतीति दु० मु०।

७ तेनर्जेषि सर्वाणि इति दु० मु०।

द७ँसनाभ्यो-द७ँसोभिर्द७ँसं-वृषद७ँशो-द७ँशुका-द७ँष्ट्राभ्यां परः॥ १८॥

'द७ँसनाभ्यः' इत्यादिषु ग्रहणेषु 'परः' एवानुस्वारागमो भवति। यथा, वैश्वानरस्य द७ँसनाभ्यः। सजोषावश्विना द७ँसोभिः। भिरिति किम्। ऊतोरिशादसः(१)। पुरुद७ँस७ँ सनिम्। गोवृषद७ँशस्ते(२)। पशून् द७ँशुकाः(३)। द७ँष्ट्राभ्यां मलिम्लून्। द७ँसेत्येतावतैवालम्, किमखिलपाठेन(४)। कुर्वतो ममापदसदित्यादौ(५) मा भूदिति। पर इति किं। वृषद७ँश इत्यत्र स्थानद्वयेऽपि स्वादिषु चैकपद इति प्राप्तौ सत्यां पूर्वत्र मा भूदिति। ननु ग्रहणसामर्थ्यादेवानुस्वारागमः(६) पूर्वत्र न भवति। यथा, ऋसोथावसोयेत्यादौ ग्रहणसामर्थ्यादुपपादितं। नष दोषः। स्वादिषु चैकपद इत्यत्र ऊष्मसामान्यमुक्तं। अथ सकारपरा इत्यत्र तु तद्विशेष उक्तः। सामान्यविशेषयोर्विशेषो बलीयानिति न्यायः(७)। तथा सति बलवद्बाधनमेव(८) भवेत् न तु दुर्बलबाधनमिति(९)। तत्रैव ग्रहणसामर्थ्यं समर्थनीयं,

---

१ युष्माकोतोरिशादस इति ग०, इ० मु० च।

२ वृषदंशस्ते धातुरिति इ० मु०। वृषदंशस्ते धातुरिति ग०।

३ पशुः दंशुकाः स्युरितिग०। पशून् दंशुकाः स्युर्द्विपूचोनम् इति इ० मु०।

४ किमखिलपदपाठेनेति ग०, इ० मु० च।

५ कुर्वतो मे मोपदसत् इति इ० मु०, ग० च।

६ अनुस्वार इति इ०, मु०, ग० च।

७ बलवानिति न्याय इति ग०, इ० मु० च।

८ बलवता बलवद्बाधनमेवेति ग०।

९ न तु दुर्लभबाधनमिति इति ग०।

न्त्वत दुर्बले स्थाने(१)। तथाहि(२) अधिकः पुरुषोऽधिकं विरोधिनमेव बाधते, भूषणत्वात्, न तु कदाचिदल्पमिति(३) परशब्द(४) उपपद्यते॥

मꣳस्ये-मꣳसतै-यꣳसद्यꣳसन्वꣳसते वꣳसगः॥ २०॥

'मꣳस्ये' इत्यादिषु स्यादनुस्वारागमः(५)। यथा, पशूनाभि मꣳस्ये(६)। शूरमꣳसतै भद्रा इन्द्रस्य(७)। शोचिषा यꣳसद्विश्वं न्यत्रिणं। इषवः शर्म्म यꣳसन्(८)। अग्निर्नो वꣳसते रयिं। तिग्मशृङ्गो न वꣳसगः। मꣳस्, यꣳस्, वꣳस्, इत्येतावतैवालं, किमुत्तरपाठेन(९)। उत्तमस्यावद्यति। यस्य भूयाꣳसः(१०)। अद्य वसु वसति। इत्यादौ मा भूदिति॥

उन्न वꣳशं॥ २१॥

'उत् न' इत्येवम्पूर्वे 'वꣳशम्' इत्यस्यानुस्वारागमः(११)। उद्वꣳशमिव येमिरे। प्राचीनवꣳशं करोति। एवम्पूर्व इति किं। भवति वशं वा एष चरति(१२)॥

---

१ दुर्बलस्थाने इति ग०, इ० मु० च।

२ तथापीति इ० मु०।

३ कदाचिदप्यल्पमिति इति ग०। कदाचिदल्पबलमिति इति इ० मु०।

४ अत्र परशब्दप्रयोग इति ग०। परशब्दप्रयोग इति इ० मु०।

५ एषु अनुस्वारागम इति ग०।

६ पशूनाभि मंस्ये इति इति ग०, इ० मु० च।

७ अनु नो शूर मंसतै भद्रा इन्द्रस्य रातय इति इ० मु०।

८ शोचिषा इषव शर्म यंसन् इति इ० मु०।

९ किमखिलपदपाठेनेति ग०, इ० मु० च।

१० भूयांसो यज्ञक्रतव इति इ० मु०।

११ वंशमित्यस्मिन् ग्रहणे स्यादनुस्वारागम इति ग०, इ० मु० च।

१२ ब्रह्मवर्चस्य एव भवति वशं वा एष चरति इति इ० मु०।

अक्रꣳस्त-क्रꣳस्यते-रꣳस्यते-भ्रꣳशते ॥ २२ ॥

एतेषु(१) स्यादनुस्वारागमः। यां वाज्यक्रꣳस्त(२)। उत्क्रꣳस्यते स्वाहा। उपरꣳस्यते स्वाहा। नास्माद्राष्ट्रं भ्रꣳशते ॥

रꣳह्यै च ॥ २३ ॥

'रꣳह्यै' इत्यस्मिन् ग्रहणे स्यादनुस्वारागमः। पूष्णो रꣳह्यै। 'च'कारस्य व्यतिहारेणान्वयादुत्तरसूत्रे(३) प्रयोजनमुच्यते ॥

ऐकार उख्यस्य नितान्तः ॥ २४ ॥

'रꣳह्यै' इति ग्रहणे(४) पूर्वसूत्रस्थचकारसमर्पितः 'ऐकारः', 'नितान्तः', भवति, 'उख्यस्य,' मते(५)। 'नितान्तः' तीव्रतरप्रयत्न इत्यर्थः(६)। नैतन्मतमिष्टं ॥

विरिन्ति सङ्ख्यासु ॥ २५ ॥

'वि,रि,त्रि,' इत्येवम्पूर्वं जश्परोऽनुस्वारागमः स्यात्, एभिर्यदि 'सङ्ख्या', उच्यते, 'असु' सुशब्दं वर्जयित्वा। सु इति सप्तमी विभक्तिरुक्ता। यथा, अःकारःप्रथमाविभक्त्युपलक्षणं। विꣳशत्यै(७) स्वाहा। यद्विꣳशतिर्द्वे(८)। चत्वारिꣳशते स्वाहा। त्रिꣳशते

---

१ अक्रंस्तेत्यादिषु इति ग०, इ० मु० च।

२ यां वाक्रंस्त इति ग०।

३ व्यतिहारेणान्वय उत्तरसूत्रे इति इ० मु०। प्रतिहारेणान्वय उत्तरसूत्रे इति ग०।

४ रंह्या इत्यस्मिन् ग्रहणे इति ग०, इ०मु०च।

५ मतम् इति ग०।

६ तीव्रप्रयत्न इति ग०।

७ विट्शत्यै इति क०।

८ यद्विंशतिर्द्वे तेन विर जौ इति ग०, इ० मु० च।

स्वाहा। त्रिꣳशत्त्रयश्च। त्रिग्रहणं विस्पष्टार्थं। यतो विरिसङ्ख्यास्त्विन्येतावदेवास्तु(१)। यथा वा घोषपूर्वं इत्यत्र वकारो विस्पष्टार्थः। सङ्ख्येति किं। त्रिंशि जनाय। स त्रिषः पातु(२)। त्रिष्टुभैवास्मै। अस्त्विति किं। त्रिष्वारोचने दिवः॥

शिꣳशुमारः-शिꣳपत्सꣳस्था-सꣳस्था-सꣳसृष्ट-सꣳस्कृत्य-सꣳस्कृत-सꣳशित-सꣳशिता-किꣳशिल किꣳशिला॥२६॥

'शिꣳशुमारः' इत्यादिग्रहणेषु स्यादनुस्वारागमः। सिन्धोः शिꣳशुमारः(३)। किन्तत उच्छिषꣳतीति(४)। उभयतः सꣳस्थायि कुर्यात्(५)। सꣳस्थावभागा स्थ(६)। सꣳसृष्टजित्(७)। शरीरमेव सꣳस्कृत्य(८)। तन्नः सꣳस्कृतं। ब्रह्म सꣳशितो ह्येष(९)। शरव्ये ब्रह्मसꣳशिता। किꣳशिल वन्यया ते। परकिꣳशिलग्रहणं पदैकदेशतया बहूपादानार्थं। किꣳशिलस्तुर्यः(१०)। नमः किꣳशिलाय च(११)। ननु सꣳसृष्टेत्यत्र षकारपरोऽनुस्वारागमः किं न स्यात्। नैवं। अत्र सूत्रे सर्व्वत्र पदादिवर्णानन्तरमेवानुस्वार-

---

१ विरिसङ्ख्यास्त्वित्येतावत्तेवालम् इति ग०, इ० मु० च।

२ पातु नक्तमिति ग०, इ० मु० च।

३ शिंशुमारो हिमवत इति इ० मु०।

४ उच्छिषतीति यदधिरण्येका इति इ० मु०।

५ कुर्यादवद्यायाभिरिति इ० मु०।

६ संस्थवभागा स्थेति ग०।

७ संसृष्टजित् सोमपा इति ग०।

८ संस्कृत्याभ्यारोहतीति इति इ० मु०।

९ ह्येष एवहन् इति इ० मु०। ह्येषां स्वादुपंसद इति ग०।

१० चतुर्थो वन्य इति इ० मु०।

११ किं शिलाय च चयणाय च इति इ० मु० ग० च।

दर्शनात्। तत्साहचर्य्यादत्रापि तथैव विज्ञेयं, न वैपरीत्ये कारणमस्ति॥

सिटह्र हकारपरः॥ २७॥

'सि, ट, ह्र,' इत्येवम्पूर्व्वो 'हकारपरः,' स्यादनुस्वारागमः। यथा, सिꣳहो वयः। शततर्हाꣳस्तृꣳहन्ति। हꣳह स्म मा ह्वाः। एवम्पूर्व्व इति किं। सपत्नसाहो स्वाहा। अनतिदाहायोवाच। ऋकारेणैवालं, किं तकारदकाराभ्यां। ग्रहाणामसमत्यै। एवम्पर इति किं। सिषासन्तीः। त्विषीमनु। नक्तं दृशे दीप्यते। हकारः परो यस्मादसौ, 'हकारपरः'॥

मꣳहिष्ठस्य च॥ २८॥

'मꣳहिष्ठस्य' इत्यस्मिन् ग्रहणे 'च'काराकृष्टहकारोऽनुस्वारागमो भवति(१)। यथा, मꣳहिष्ठस्य प्रभृतास्य। 'च'कारः किमर्थः। अत्रैव ग्रहणे ससकारपरो मा भूदिति॥

आदिरहꣳतिरꣳहोऽꣳहारꣳहोमुगत्यꣳहा-अꣳहसोऽꣳहसाꣳशमꣳशुभिरꣳशभुवाꣳस्वꣳशूक्रꣳशवोऽꣳशूरꣳशुमꣳशूनꣳशुनाꣳशोरꣳशायोपाꣳस्वꣳशौ॥ २९॥

अवग्रहः,(२)अꣳहतिः, अꣳहः, अꣳहो, अꣳहोमुक्, अꣳहाः, अꣳहसः, अꣳहसा, अꣳशं, अꣳशुभिः,अꣳशभुवा,अꣳशु,अꣳशू,

---

१ चकाराकृष्टहकारपरोनुस्वारागमो भवतीति ग०, द० मु० च। चकाराकृष्ट- हकारपरानुस्वारागमः स्यादिति ग०।

२ द० मु० पुस्तके ग, चिह्नितपुस्तके च अवग्रहः, इति पाठो नास्ति।

अꣳशवः, अꣳशुः, मꣳशुं, अꣳशून्, अꣳशुना, अꣳशोः, अꣳशाय, उपाꣳशु, अꣳशौ, एतेष्वादिरनुस्वारादिकं भजते(१)। यथा, परिद्वेषसो अꣳहतिः। अꣳहोमुचं वृषभं(२)। सूत्रे संहितायामोत्वविधनात्(३)। अहर्देवानामित्यादौ न स्यादयं विधिः। किन्तु यस्मिन् विसर्जनीयो रेफं नापद्यते, तस्यैवोपादानं। अꣳहोभिर्वा। अꣳहोमुग्भ्यां(४)। नन्वयं चैकबन्धः, रेफप्राप्तस्यायं(५) विधिः, विहितानुस्वारस्यैव रेफनिषेधतेति, नैषदोषः(६)। सिद्धस्यैवानुस्वारस्य स्याद्बाध्यता नतु विधिरितिदिक्पालः(७)। ऋतपाश्चात्यꣳहाः। अतीतिकिं। षड्हा भवन्ति। तेनो मुञ्च तमꣳहसः। अꣳहसा वा एष गृहीतः। अꣳहेत्येतावता सिद्धे कुतः सकलपदपाठः(८)। स रसमह वसन्तायेत्यत्रादि निषेधार्थः(९)। परिश्यामोꣳशं(१०)। षड्भिरꣳशुभिः पवयति। त्वया अꣳशभुवा सोमं। भुवेति किं। अꣳशेत्येतावता(११)। ग्रहणे

---

१ अनुस्वारागमो भवतीति ग०, द० मु० च।

२ वृषभं यज्ञियानामिति ग०।

३ संहितायामोत्वस्याम्नानादयं विधिरिति क०।

४ अंहोमुग्भ्यां दिकपाल इति ग०। द० मु० च।

५ चैकबन्धो रेफप्राप्तस्यायं विधिरिति ग०।

६ निषेध इति नायं दोष इति ग०, द० मु० च।

७ अनुस्वारस्य बोधनं नतु विधिरिति द० मु०। शुद्धस्यैवानुस्वारस्य बोधनान्नतु विधिरिति ग०।

८ सिद्धे सकलपाठः किमर्थ इति। द० मु०।

९ वसन्तायेत्यत्र निषेधार्थ इति द० मु०। वसन्तायेतिनिषेधार्थ इति ग०।

१० परिपश्यामोशं सेति ग०, द० मु० च।

११ एतावत इति ग०।

तथाविधपदसद्भावादꣳशमित्यत्र न स्यात्(१)। तेनाꣳशुमत् षड्भिरꣳशुभिः। अनुकारादितिवचनात् जनꣳशु कुर्व्वन्तः, इत्यप्युदाहरणं। कृष्ण ह्येतावꣳशू,(२)। प्राणा वा अꣳशवः। अꣳशुरꣳशुस्ते। यमादित्या अꣳशु(३) अꣳशूनपञ्जाति। अꣳशुना ते अꣳशुः। यो वा अꣳशोरायतनं(४)। अꣳशाय स्वाहा भगाय। उपाꣳशू सवनोपाꣳशु सवनं(५)। तमुपाꣳशुमवस्थापयन्(६)। अꣳश्वित्येतावति गृहीत इतरेषां परिग्रहणं(७) स्यात्। तथाविधपदसद्भावात्। अथोभयं गृह्यते पदमेकदेशश्च किꣳशिलवत्। तथा सति पदैकदेशेषु पशुं पशुपते अद्येत्यादिषु प्राप्नुयात्, अनुस्वारागमः(८)। तच्चानिष्टं। आदिरिति किं सर्व्वेषु स्थानेषु मा भूदिति। यथा, अꣳहस इत्यादि॥

अवग्रह उदात्तोऽꣳसेऽꣳसायाꣳसाभ्यामꣳसाविति॥ ३०॥

'अवग्रहः,' आदिरित्यर्थः। यदि पदादिरुदात्तः स्यात् तर्हि 'अꣳसे अꣳसाय, अꣳसाभ्यां, अꣳसौ', इत्येतेषु स्यादनुस्वारागमः। 'इति'शब्दः स्वरूपवाची। दक्षिणꣳस उपदधाति। शिल्यꣳसासाय स्वाहा। अꣳसाभ्यां स्वाहा। उत्तरेꣳसावेव प्रतिदधाति। आदिरुदात्त इति किं। असावब्रवीच्चित्रविहिता॥

---

१ अथकारादिति ग०, इ० मु० च।
२ कृष्णोह्येत.वꣳशू इति ग०।
३ अꣳशमाप्यायन्तीति इ० मु०।
४ चायतनं वेदेति ग०, इ मु च।
५ यदुपांशु सवनमिति ग०, इ०मु०च।
६ तमुपांशौ समस्थापयन्निति ग०।
७ इतरेषामपरिग्रहः स्यादिति इति ग०, इ० मु० च।
८ प्राप्नुयादनुस्वार इति ग०, इ० मु० च।

नासावा नासावा ॥ ३१ ॥

आद्युदात्ते[1] सत्यस्मिन् ग्रहणे न खलु स्यादनुस्वारः[2]। ब्रूयादसाविहोत्येवं ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे षोड़शोऽध्यायः ॥ * ॥

---

१ आद्युदात्तत्वे इति ग०।

२ सत्यप्यसावेत्यस्मिन् ग्रहणे न खलु स्यादनुस्वारागम इति ड०, मु० च।

अथ सप्तदशोऽध्यायः ।

तीव्रतरमानुनासिक्यमनुस्वारोत्तमेष्विति शैत्यायनः ॥ १ ॥

'अनुस्वारश्च उत्तमाश्च अनुस्वारोत्तमाः', तेषु, 'तीव्रतरं', भवति, 'आनुनासिक्यम्', इति 'शैत्यायनः' नाम मुनिर्मन्यते। तीव्रादधिकः, 'तीव्रतरः'(१)। अनुनासिकानां भावः, 'आनुनासिक्यं'(२)। नासिकाविवरणादानुनासिक्यमित्यस्य विधेः प्रयत्नदार्ढ्यमुपदिश्यते। यथा, अग्नौ ँ रप्सुषदः। (३)यज्ञामङ्गामयते। वञ्चते परिवञ्चते स्नायूनां। मणिना रूपाणीन्द्रेण। एतेष्विति किं। रुक्ममुपदधाति। तिग्ममायुधं। सुश्लोकान्३ सुमङ्गलान्३ ॥

समं ँ सर्वत्रेति कौहलीपुत्रः ॥ २ ॥

'सर्वत्र' आनुनासिक्यवर्णेषु(४), तीव्रतरत्वं समानमिति(५) 'कौहलीपुत्रः', मन्यते। स ँ रराणः। संयत्ताः। न्यङ्ङग्निः(६)। उपहूतान्३ हो इत्याह। इत्यादि ॥

---

१ तीव्रादधिकं तीव्रतरमिति ग०, इ० मु० च।

२ अनुनासिक एवानुनासिक्यमिति ग०। अनुनासिकताऽनुनासिक्यमिति इ०मु०।

३ तांस्ते दधामि, मर्त्यान् आविवेश, इति इ० मु० पुस्तकेऽधिकः पाठः।

४ अनुनासिकवर्णेषु इति इ० मु०।

५ सममिति इति ग०, इ० मु० च।

६ न्यङ्ङग्निरेतव्य इति इ० मु०।

अनुस्वारेऽण्विति भारद्वाजः ॥ ३ ॥

'अणु' सूक्ष्मतमं आनुनासिक्यम्, 'अनुस्वारे', स्यादिति 'भारद्वाजः', मन्यते। यथा, तनुवा जयत्वꣳ सत्वा। अनुस्वारादन्यत्र शैत्यायनविधिः, उत्तमेषु तीव्रतरत्वं, यमादिषु तीव्रमात्रमिति ॥

नकारस्य रेफोष्मयकारभावाल् लुप्ते च मलोपाच्चोत्तरमुत्तरन्तीव्रतरमिति स्थविरः कौण्डिन्यः ॥ ४ ॥

'नकारस्य' 'रेफोष्मयकारभावात्', 'च'काराकृष्टयकारे 'लुप्ते' सति 'मलोपाच्च', 'उत्तरमुत्तरम्', आनुनासिक्यं आनुपूर्व्येण 'तीव्रतरं' स्यादिति 'स्थविरः कौण्डिन्यः' मन्यते। यथा, त्रीꣳ रेकादशानित्यत्र(1) आनुनासिक्यं संयोगमात्रत्वात्। शुक्लाꣳश्च कृष्णाꣳश्चेत्यत्र तु संश्लिष्टं। महाꣳइन्द्र इत्यत्र तीव्रतरम्(2)। सꣳशितमित्यत्र तीव्रततममित्यानुपूर्व्येण विज्ञेयं(3)। अत्र(4) शैत्यायनविधिः ॥

व्यञ्जनकालस्य स्वरस्यात्राधिकः ॥ ५ ॥

'च'कारः स्थविरकौण्डिन्यमन्वादिशति। 'अत्र'अनुस्वारविधाने, सानुनासिक'स्वरस्य' 'व्यञ्जनकालः' ह्रस्वार्द्धकालः 'अधिकः' स्यादिति स्थविरः कौण्डिन्यो मन्यते। युञ्जाथाꣳ रासभं युव-

---

१ त्रीन् एकादशान् इत्येत्यत्रेति इ० मु०।

२ तीव्रतर इति क०।

३ आनुपूर्व्यं विज्ञेयमिति ग०, इ० मु० च।

४ अतोन्यत्रेति इ० म०।

मित्यादि । अत्रैव स्वरस्येतिकिं, स्वरादिषूत्तमेषु उत्तमभावेनैव-मधिककालं मा भूदिति(१) । स्वोग्निः(२) ॥

स्वारविक्रमयोर्द्दढप्रयत्नतरः पौष्करसादेः ॥ ६ ॥

स्वारे विक्रमे च प्रयोगः 'पौष्करसादेः' मते 'दृढ़प्रयत्न-तरः'(३) भवति । 'स्वारः' स्वरित इत्यर्थः । 'विक्रमः' नाम अनु-दात्तविशेषः । यथा, योऽस्य स्वोग्नि.(४) । आस्ये हविः प्रियं । स्वारविक्रमयोरिति किं । गां वाव तौ तत्(५) । दृढ़ः प्रयत्नो यस्मादसौ दृढ़प्रयत्नः(६), अतिशयेन दृढ़प्रयत्नः 'दृढ़प्रयत्न-तरः' ॥

प्रयत्नविशेषात् सर्व्ववर्णानामिति शैत्यायनः ॥ ७ ॥

'सर्व्ववर्णानां' प्रयोगस्योचित'प्रयत्नविशेषात्'(७) दृढप्रयत्नतरो भवतीति 'शैत्यायनः' मन्यते । यथा, इषे त्वेत्यादि । एतानि(८) सप्त सूत्राणीष्टानि ॥

नातिव्यक्तं न चाव्यक्तमेवं वर्णानुदीरयेत् ।
पयःपूर्णमिवामत्रꣳहरन्धीरो यथामति ॥

---

१ स्वादिषूत्तमेषूत्तमत्वभावे चैतदधि-ककालविधानं मा भूत् इति इ० मु०।ग०, चिह्निते 'स्वादिषूत्तमेषूत्तमाभावे' इति वि-शेषः ।

२ स्वोग्निः इति पाठः क० एव ।

३ दृढप्रयत्न इति क० ।

४ स्वोग्निस्तमपि इति ग०, इ० मु० च ।

५ तौ तात्पार्थं अवदतामिति इ०मु० ।

६ दृढः प्रयत्नो यस्य स इति ग० । दृढः प्रयत्नो यस्मासौ दृढप्रयत्न इति इ० मु० ।

७ प्रयोगः स्वोचितप्रयत्नविशेषादिति इ०मु० ।

८ नैतानीति ग०, इ० मु० च ।

इत्यात्रेय आत्रेयः(१) ॥ ८ ॥

'अतिव्यक्तम्' अतिस्पष्टम्, 'अव्यक्तम्', अस्पष्टञ्च, यथा, 'न' भवति, 'एवं', 'वर्णान्', 'उदिङ्गयेत्' उच्चारयेदित्यर्थः। 'पयः-पूर्णमिवामत्रं' क्षीरपरिपूरितं भाजनं, 'हरन्निव', 'यथामति' मतिमनतिक्रम्य वर्त्तमानः, धीरः अध्येता, भावयेत्(२) 'इत्यात्रेयः', मन्यते ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे सप्तदशोऽध्यायः ॥ * ॥

---

१ सूत्रग्रन्थे पद्यरचनाम्नायो न दृश्यते। अतोऽन्यत्र तु सूत्राष्टकं पद्येनोपन्यस्तं। अपितु आत्रेयो भाष्यकृद्भूत्वा कथमर्वाचीनस्य तस्य सूत्रे प्रामाण्यं गृहीतं, तस्मात पद्यमयसूत्राणि न सूत्रकारकृतानीत्याशङ्क्यते। यथा भाष्यकारः स्वीयमङ्गलाचरण श्लोकयो र्व्याख्यं। स्वयं कृतवान्, तथाचापि स्वोद्धृत प्रमाण पद्यानां व्याख्यानं कृतं नतु सूत्रत्वेव परिगणित मित्यनुमीयते।

२ पराभिकारो धीरो भवेदिति क०।

अथाष्टादशोऽध्यायः।

ओंकारन्तु प्रणव एकेऽर्द्धतृतीयमात्रं ब्रुवते ॥ १ ॥

'प्रणवे' 'ओंकारम्', 'अर्धतृतीयमात्रम्', 'एके ब्रुवते' एके आचार्याः, अर्धतृतीयमात्रमाहुः, इत्यर्थः। अर्द्धं तृतीयं ययोस्ते अर्द्धतृतीये, अर्द्धतृतीयमात्रे यस्यासौ अर्द्धतृतीयमात्रः। यथा, समुद्रो बन्धुः, ओम्। ओं येभ्यश्चैनत् प्राहुः(१)। ओं इषे त्वा। ओं ब्रह्म सन्धत्तं। कालनिर्णयेप्येवं निर्णीतं(२),

स्वाध्यायारम्भशेषस्य प्रणवस्य स्वरस्य च।

अध्यायस्यानुवाकस्या,-न्ते स्यादर्द्धतृतीयता(३) ॥

'तु'शब्दस्य प्रयोजनमुच्यते। सन्ध्यक्षराणां वेदश्च प्रणवश्चान्तरा(४) तथा, इति कालनिर्णये। सन्ध्यक्षराणां ह्रस्वा न सन्तीति पाणिनीये अपि। ओंकारमात्रस्य दीर्घकालो निरूपितः। इह तु प्रणवस्थत्वविशेषणादसौ(५) कालो निषिध्यते। वेदस्य प्रणवे तु स्यात् समकालद्विमात्रता इति प्रणवविशेषे कालविशेषकालः प्रत्येकं प्रत्येतव्यः(६) ॥

---

१ येभ्यश्चैनत् प्राहुः, ओमिति ग०, इ०, मु० च।

२ एवं वर्णितमिति इ० मु०।

३ स्वाध्यायस्यानुवाकस्यान्ते इति क०।

४ वेदे च प्रणवो नान्तरा इति ग०। वेदप्रणवान्तरा इति इ० मु०।

५ प्रणवस्थत्वविशेषेणासौ इ० मु०।

६ प्रणवविशेषे कालविशेषः प्रत्येतव्य इति ग०, इ० मु० च।

उदात्तानुदात्तस्वरितानां कस्मिꣳश्चिदिति शैत्यायनः ॥ २॥

तेषां मध्ये(१) 'कस्मिꣳश्चित्' स्वरे, प्रणवः प्रयोक्तव्य इति 'शैत्यायनः' मन्यते(२)। यथा, ओम्।

धृतप्रचयः कौण्डिन्यस्य ॥ ३ ॥

तस्य मते(३) प्रणवो 'धृतप्रचयः' भवति। चतुर्थः स्वरो 'धृतप्रचयः' इति कथ्यते। ननु प्रचयपूर्वस्य कौण्डिण्यस्येति वत् प्रचय इत्येतावतैवालं, किं धृतशब्देन। मैवं। पदद्वयेनाप्यनेन नामधेयमेवाभिधीयते। यथा(४), अर्थभेदाभावेपि प्रयोगभेदोस्तीति प्रयोगाचार्य्यः प्रकटयति(५)। यथा, भीमसेनो भीमः। सत्यभामा सत्या(६)। पिधानमपिधानं। दीपः प्रदीपः। इत्यादि॥

मध्यमेन स वाक्प्रयोगः ॥ ४ ॥

प्रयुज्यत इति 'प्रयोगः'। 'मध्यमेन' उच्चनीचसमाहारविचक्षणेन(७) प्रयत्नेन प्रणवः, यत्र क्वच न वाचस्थाने 'प्रयोगः' भवति 'सः' इति कौण्डिण्याभिमतः पूर्वोक्तो गृह्यते। वाचि प्रयोगो 'वाक्प्रयोगः'॥

स्वरितः प्लाक्षिप्लाक्षायणयोः ॥ ५ ॥

'प्लाक्षिप्लाक्षायणयोः' पक्षे(८) 'स्वरितः' भवति। नैतत्सूत्रचतुष्टयमिष्टं॥

---

१ उदात्तुदात्तस्वरितानां मध्ये इति ग०, इ० मु० च।

२ ब्रूते इति ग०, इ० मु० च।

३ कौण्डिन्यस्य मते इति ग०, इ० मु० च।

४ तथाहीति ग०, इ० मु० च।

५ प्रयोगान्तरचातुर्यमाचार्यः प्रकटयतीति ग०। प्रयोगाचार्यमाचार्यः प्रकटयति इति इ० मु०।

६ भामा सत्यभामा इति ग० इ० मु० च।

७ समाहारविलक्षणेनेति ग०।

८ तयोर्मध्ये इति क०।

उदात्तो वाल्मीकेः ॥ ६ ॥

तस्य मते(१) प्रणवः 'उदात्तः', भवति ॥

यथाप्रयोगं वा सर्वेषां यथाप्रयोगं वा सर्वेषां ॥ ७ ॥

'यथाप्रायोग'शब्देनोदात्तोऽभिधीयत इति माहिषेयपक्षः । प्रणवं(२) 'यथाप्रयोगम्', 'वा' कुर्य्यादिति 'सर्वेषां' ऋषीणां मतं । वररुचिपक्षस्तु वक्ष्यते, अध्येष्यमाणं 'यथाप्रयोगं' यथाविधस्वरं तथाविधेन वा(३) स्वरेण प्रयोक्तव्य इति 'सर्वेषां', मतमिति । यथा, इषे त्वेत्यनेनाध्येष्यमाणानुदात्तेन प्रणवेप्यनुदात्तः(४) । आप उन्दन्त्वित्युदात्तेनोदात्तः व्यृद्धमिति स्वरिते स्वरितः(५) । नेदं सूत्रमिष्टं ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे अष्टादशोऽध्यायः ॥ * ॥

---

१ वाल्मीकेर्मते इति इ० मु० । वाल्मीकिमते इति ग० ।

२ प्रणवे इति ग०, इ० मु० च ।

३ तथाविधेनेति ग० ।

४ इषे त्वेत्यध्येष्यमाणमनुदात्तं तत्र प्रणवोप्यनुदात्त इति ग० । इषे त्वेत्यनेनाध्येष्यमाणेनानुदात्तेन प्रणवोप्यनुदात्त इति इ०मु० ।

५ आपउदन्तु इत्यत्र उदात्ते उदात्तः स्वरिते स्वरित इति ग० । आपउदन्तु इति उदात्तेनोदात्तः,व्यृद्धमिति स्वरितेन स्वरित इति इ० मु० ।

अथ एकोनविंशोऽध्यायः ।

स्वरितयोर्मध्ये यत्र नीचं स्यादुदात्तयोर्वान्यतरतो वोदात्तस्वरितयोः स विक्रमः ॥ १ ॥

'यत्र' स्थले, 'स्वरितयोर्मध्ये' उदात्तयोः मध्ये, 'उदात्तयोर्व्वान्यतरतो वा' इति(१) स्वरितोदात्तयोर्वेत्यर्थः । 'उदात्तस्वरितयोः' मध्ये(२) 'नीचं' यदक्षरं, 'स विक्रमः', भवति । स्वरितयोर्मध्ये यथा, योस्य स्वोग्निः(३) । उदात्तयोर्यथा, वोढवे । स्वरितोदात्तयोर्यथा, धन्व नागाः । उदात्तस्वरितयोर्यथा, तस्य क्व सुवर्गो लोकः । विक्रमसञ्ज्ञायाः प्रयोजनं । स्वारविक्रमयोर्दृढप्रयत्नतर इति ॥

प्रचयपूर्व्वश्च कौण्डिन्यस्य ॥ २ ॥

'च' शब्दो(४) विक्रम इति ज्ञापयति । तस्य मते उदात्तः स्वरः स्वरितपरो वा(५) 'प्रचयपूर्व्वश्च', (६) विक्रमो विज्ञेयः । उदात्तपरो यथा, पर्य्यवदता या(७) । स्वरितपरो यथा, उपरिष्टाल्लक्ष्मा यज्या । प्रचयः पूर्व्वो यस्मादसौ, 'प्रचयपूर्वः' ॥

---

१ यत्र स्वरितयोर्मध्ये उदात्तयोर्वा अन्यतरतो वेति इति इ० मु० ।

२ उदात्तस्वरितयोर्वा मध्ये इति ग०, इ० मु० च० ।

३ योस्य स्योग्निस्तमपोति ग० । यस्य स्वोग्निस्समपीति इ० मु० ।

४ चकार इति ग०, इ० मु० च ।

५ कौण्डिस्य मते उदात्तपरः स्वरितपरो वेति इति ग०, इ० मु० च ।

६ प्रचयपूर्वस्य नीच इति ग० ।

७ पर्यवदतां या यज्ञे दीयत इति इ० मु० ।

द्वियम एके द्वियमपरे ता अणुमात्राः ॥ ३ ॥

'यम'शब्दः स्वरितपर्य्यायः । द्वौ यमौ यत्र देशे नैरन्तर्य्येण वर्त्तेते, स 'द्वियमः,' तस्मिन् । द्वियमः परो यस्मादसौ 'द्वियमपरः,' तस्मिंश्च द्वियमे सति(१) याः स्वरित प्रकृतयः 'ताः' सर्व्वा अन्ततः 'अणुमात्राः', अभिहता(२) भवन्तीति 'एके' मन्यन्ते। द्वियमा यथा, तन्व्यान्यं(३)। द्वियमपरा यथा, सो३पो३स्य आम्रियत। अन्तत इति कथं प्रतीयते, पदान्ते च तथा(४) कम्पा, अन्ततो निहताणुका इति वचनादिति ब्रूमः। निहतन्तु स्वरितयोर्मध्ये यत्र नीचतम-मेतत्सान्निध्यात्(५) लभ्यते। शिक्षा चैवं वक्ष्यति,

नित्योभिनिहतश्चैव क्षैप्रः प्रश्लिष्ट एव च ।
एते स्वराः प्रकम्पन्ते यत्रोच्चस्वरितो यथेति(६) ।
शेषस्योदात्तता वा स्यात् स्वारता वा व्यवस्थया ॥ इति ।

व्यवस्थाशब्देनानेन द्विविधः कम्प उक्तः। संहितायां स्वरित उक्तः कम्पः(७) इतरे वेदभागे(८) उदात्तकम्प इति कम्पाः प्रसिद्धाः तेष्वेव लक्षणं(९), नतु कम्पविधायकं। अन्यथा योपा-म्पुष्पमित्यादौ कम्पः प्रसज्येत। नेदं सूत्रमिष्टं ॥

१ त्रिद्वयमे सति इति क० ।
२ अन्ततोऽणुमात्राः सहिता इति ग० । अन्ततोणुमात्रानिहता इति ङ० मु० ।
३ तन्व्योन्यस्मै इति ङ० मु० ।
४ यथेति ग० ।
५ नीचमित्येतत्सान्निध्यादिति ग०,ङ० मु० च० ।
६ यत्रोच्चस्वरितोदया इति ग०,ङ०मु०च ।
७ संहितायां स्वरितकम्प इति ग०, ङ० मु० च ।
८ इतरवेदभागेति ग०,ङ० मु० च ।
९ तेष्वेतल्लक्षणमिति ग०, ङ०मु० च ।

तस्यामेव प्रकृतौ ॥ ४ ॥

द्वियमस्थले पूर्वस्यामेव 'तस्यां' स्वरितप्रकृतावणुमात्रेपि(१) निहतत्वं भवति। द्वियमपरे तु स्थले पूर्वयोरेव प्रकृत्योरणुमात्रया निहतत्वं भवति। नतु ताः सर्व्वा अणुकार्य्यभाज इत्येवकारो बोधयति। एवमेव कौहलीय आह(२), द्वयोः पूर्व्वोऽणुमात्रिकस्त्रिषु(३) पूर्व्वावणुमात्रिकावुत्तरः प्रकृत्येति ॥

न पूर्वशास्त्रे न पूर्व्वशास्त्रे ॥ ५ ॥

'पूर्व्वशास्त्रं' नाम विक्रमविधिः, तस्मिन्नेतदणुकार्य्यं न भवति। एवं वा सूत्रार्थः, पूर्व्वंशास्त्रे अध्यायप्रथमसूत्रे या क्रमसञ्ज्ञा उक्ता, सा कम्पविधावत्र न भवति। विक्रमस्य दृढ़प्रयत्नत्वात्, कम्पस्य तदभावात्।

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे एकोनविंशोऽध्यायः ॥ * ॥

---

१ पूर्वस्यामपरस्यां स्वरितप्रकृतावणुमात्रयापीति म०।

२ कौहलेय आह इति ग०, इ०

मु० च।

३ अणुमात्रिकस्त्रिष चेति ग०।

४ अणुमात्रिकादिति म०।

अथ विंशोऽध्यायः।

इवर्णोकारयोर्यवकारभावे क्षैप्र उदात्तयोः ॥ १ ॥

उदात्तयोः 'इवर्णोकारयोः' यथोपदेशं 'यवकारभावे' सति स्वरितो यो विहितः स 'क्षैप्रः' इति सञ्ज्ञायते। यथा, व्यैवैनेन(१)। क्वधीस्वास्मान्। उदात्तयोरिति किं। वस्व्यसि(२)। अन्वेनं माता(३) ॥

सयकारवकारं त्वक्षरं यत्र स्वर्यते स्थिते पदेऽनुदात्तपूर्वेऽपूर्वे वा नित्य इत्येव जानीयात् ॥ २ ॥

'सयकारं वा सवकारं' वा 'अक्षरं' स्वर इत्यर्थः(४)। 'स्थिते पदे' पदकाल इत्यर्थः। 'यत्र' स्थले, 'स्वर्य्यते' 'अनुदात्तपूर्वे' 'अपूर्वे' वा पूर्व्वाभावे सति, 'नित्य एव इति' सर्वत्र 'जानीयात्'। सर्वत्रेति संहितापदजटास्वित्यर्थः। यथा, वायव्यं। कन्येव तुन्ना। ततो विल्वः। न्यञ्चं चिनुयात्। न्यञ्चं(५)। क्व जगती च। क्वास्यास्य क्वा, क्वास्येति जटायां। तुशब्दो नित्यादावुच्चोदयविषये नोदात्तस्वरितपर(६) इति निषेधं निवारयति। ननु नित्यः

---

१ व्येवैनेनेति ग०, इ० मु० च।

२ वध्यसि इति ग०। वास्यसि इति इ० मु०।

३ अन्वेनं माता मन्यताम् इति ग०।

४ ययकारं वा सत्यावाकारं अक्षरः स्वरूप इत्यर्थ इति क०।

५ अन्वञ्चमिति ग०।

६ उच्चारकविषयान्नोदात्तस्वरितपर इति क०।

कथमेतन्निषेधविषयः। उदात्तात्परोनुदात्त इति लक्षणासम्भवात्। अत्रोच्यते(१), वर्णविभागवेलायामुदात्तपूर्वत्वमस्ति, समाहारः स्वरितः इत्युच्चपूर्वत्वात्(२), स्वरितस्येति निषेधविषयत्वं। अनुदात्तश्चासौ पूर्वश्च अनुदात्तपूर्वः, तस्मिन्। पूर्वाभावः, अपूर्वः, तस्मिन्। शून्ये सपूर्वत्वात् पूर्वत्वविशेषद्वयस्य(३) अन्यथा वैयर्थ्यात्। तस्मात्तत्र नित्यत्वस्वरितत्वमेव(४) न सञ्ज्ञान्तरमिति विज्ञेयं॥

अपि चेन्नानापदस्थमुदात्तमथ चेत् साꣳहितेन स्वर्यते स प्रातिहतः॥ ३॥

'अपि'शब्दः पूर्वत्वमात्राकर्षकः। 'अथ'शब्दो नित्यसञ्ज्ञाव्यवच्छेदकः, नानापदस्थोदात्तपूर्वत्वाधिकारको वा। 'नानापदस्थं', अक्षरमुदात्तपूर्वं 'चेत्' परतः। नीचं 'सांहितेन' विधिना 'स्वर्य्यते', 'चेत्' 'स प्रातिहतः' वेदितव्यः(५)। यथा,(६), इषे त्वा। तन्ते दुश्चक्षाः(७)। सांहितेनेति किं। यन्नाश्वम्। नानापदस्थमिति किं। तया देवतया॥

---

१ उच्यते इति ग०।

२ समाहारे स्वरितः, स्वरित इत्युच्यते पूर्वत्वात् इति ग०।

३ शून्ये तु सर्वत्रापूर्वत्वविशेषद्वयस्येति ग०। शून्ये तु सर्वत्र पूर्वत्वात् पूर्वत्वविशेषणद्वयस्येति इ० मु०।

४ तस्मान्नित्यत्वमेवेति ग०।

५ प्रातिहारोत्र वेदितव्य इति इ० मु०। प्रातिहतो ज्ञेय इति ग०।

६ मा ते अस्यां। यास्त्वा हृदाकीर्णा इति इ० मु० पुस्तकेऽधिकः पाठः।

७ तां ते दुश्चक्षा इति इ० मु०।

तस्मादकारलोपेऽभिनिहतः ॥ ४ ॥

'तस्मात्' नानापदस्योदात्तात्, परभूतानुदात्तस्य अकारस्य[१] 'लोपे' सति यः स्वरितः सः 'अभिनिहतः' वेदितव्यः[२]। यथा, सोऽब्रवीत् । तेऽब्रुवन् । तस्मादिति किं । भ्राजोसि देवानां ॥

ऊभावे प्रश्लिष्टः ॥ ५ ॥

'ऊभावे' यत्र स्वर्य्यते, सः 'प्रश्लिष्टः' वेदितव्यः[३]। सून्नीयमिव । सूद्गाता । मा सूत्तिष्ठन् । दिव्यूपदधाति ॥

पदविवृत्त्यां पादविवृत्तः ॥ ६ ॥

पदयोर्विवृत्तिः पदविवृत्तिः, तस्यां, यः स्वर्य्यते सः 'पादविवृत्तः' भवति[४]। यथा, ता अस्मात्,[५]। स इधानः[६], य उपसदः। 'विवृत्तिः' व्यक्तिरित्यर्थः[७]। पदयोरिति किं। प्रउगमुक्थं ॥

उदात्तपूर्व्वस्तैरोव्यञ्जनः ॥ ७ ॥

उदात्तपूर्व्वाधिकारे सति पुनरत्र तत्कथनादेकपदस्योदात्तविशेषोभिगम्यते[८]। तस्मादेकपदस्योदात्तपूर्व्वो यः स्वरितः, स

---

१ परभूतानुदात्ताकारस्येति इ०मु० ।
१ सोभिनिहतो ज्ञेय इति ग० ।
३ प्रश्लिष्टो ज्ञेय इति ग० ।
४ पादविवृत्तो वेदितव्य इति इ०मु० । पादविवृत्तो ज्ञेय इति ग० ।
५ अस्मात् सृष्टा इति इ० मु०,ग० च ।
६ सा इधाना इति इ० मु० ।
७ विवित्तिर्व्यक्तिरित्यर्थ इति क० ।
८ एकपदस्यत्वविशेषो गम्यते इति क० । एकपदस्योदात्तविशेषोवगम्यते इति इ० मु० ।

तैरोव्यञ्जनो वेदितव्यः(१)। यथा, युञ्जन्त्यस्य। वस्व्यसि। स इन्द्रो मन्यत(२)। तदश्वोऽभवत्। प्रउगं। तं त्वष्टाधत्त(३)॥

इति स्वरनामधेयानि ॥ ८ ॥

'इति' एतानि, स्वरितनामानि, व्याख्यातानि(४)। यथा, अभ्यस्यात्। अध्वर्य्युरिति चैप्र.(५)। वायव्यं(६)॥ क्वास्येति नित्यः। स ते लोकः(७)। यत्त्वा क्रुद्ध(८) इति प्रातिहतः। सोऽब्रवीदित्यभिनिहतः॥ सून्नातेति प्रश्लिष्टः। त एतामिति(९) पादवृत्तः। मम न मेति(१०) तैरोव्यञ्जनः।

चैप्रनित्ययोर्दृढतरः॥ ९ ॥

'चैप्रे' नित्ये च प्रयत्नो 'दृढतरः' कार्य्यः॥

अभिनिहते च ॥१० ॥

अन्वाचये वर्त्तमानः 'च'कारो दृढमात्रं(११) बोधयति॥

---

१ तैरोव्यञ्जनो ज्ञेय इति ग०।
२ स इन्द्रो मन्यतेति इ० मु०।
३ तां त्वष्टाधत्तेति इ० मु०।
४ स्वरितनामान्युक्तानीति ग०। सप्त-स्वरितनामधेयानि व्याख्यातानीति इ० मु०।
५ अध्वर्य्यवेरिति चैप्र इति इ० मु०।
६ वायव्यामिति इ० मु०।
७ स ते लोक इति इ० मु०।
८ यत्त्वा क्रुद्ध इति ग०।
९ त एतामिति इति इ० मु०।
१० मामनाम इति इ० मु०।
११ दृढमोल्लमिति क०।

'अभिनिहते' प्रयत्नो दृढः स्यात्। नतु दृढतर इति पृथक् सूत्रारम्भः(१) प्रतीयते॥

प्रश्लिष्टप्रातिहतयोर्मृदुतरः॥ ११॥

'प्रश्लिष्टे प्रातिहते' च प्रयत्नो 'मृदुतरः' कार्य्यः।

तैरोव्यञ्जनपादवृत्तयोरल्पतरोऽल्पतरः॥ १२॥

'तैरोव्यञ्जने पादवृत्ते' च प्रयत्नः 'अल्पतरः' स्यात् यद्यप्यल्पमृदुदृढभावस्तत्रोक्तः(२) तथापि दीपवद्वेणुपत्रवदिति शिक्षानुरोधात् कोमलशिरस्कत्वं विज्ञेयं(३)॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे विंशोऽध्यायः॥ *॥

---

१ पृथक्सूत्रारम्भादपि इति ग०, इ० मु० च।

२ यद्यल्पमृदुदृढभावं तत्रोक्त इति क०। यद्यप्यल्पत्वमृदुभावस्तत्र तत्रोक्त इति ग०।

३ सर्वत्र विज्ञेयमिति इ० मु०, ग० च।

अथ एकविंशोऽध्यायः ॥

व्यञ्जनꣳस्वराङ्गं ॥ १ ॥

व्यञ्जनं स्वराङ्गं भवति। श्वासो नादोऽङ्गमेव चेति विज्ञेयत्वेन विधानादयमारम्भः। ननु कूपो यूप इत्यादौ(१) व्यञ्जनमेवार्थविशेषनिबोधकमिति(२) स्वरो व्यञ्जनाङ्गं किन्न स्यात्। उच्यते, व्यञ्जनं केवलमवस्थातुं न शक्नोति, किन्तु सापेक्षं, स्वरस्तु, निरपेक्षः। सापेक्षनिरपेक्षयोर्निरपेक्षमेव विशिष्टमाचक्षते(३) प्रेक्षावन्तः। विशिष्टं प्रत्यङ्गत्वमवशिष्टस्यैव। किञ्च स्वरवैशिष्ट्यबोधकमन्यदपि विद्यते,

दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः।
दुर्बलं व्यञ्जनं तद्वद्धरेत(४) बलवान् स्वरः(५)।
स्वरास्तु ब्राह्मणा ज्ञेया इत्यादि।
उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः(६)।

---

१ कूपो यूपो धूप इत्यादाविति ग०।
२ बोधकमिति इति ग०, इ० मु० च।
३ निरपेक्षमेव बलवदित्याचक्षते इति ग०।
४ हरते इति ग०, इ० मु० च।
५ किञ्च, शिक्षाव्याकरणे। यः स्वयं राजते तन्तु स्वरमाह पतञ्जलिः। उपरिस्थायिनातेन व्यङ्गं व्यञ्जनमुच्यते। इति इ० मु० पुस्तकेऽधिकः पाठः।
६ स्वरितश्चेति त्रयः स्वराइति क०।

ह्रस्वो दीर्घः प्लुतश्चैव(१) कालतो नियमा अपि(२)॥ इति।

स्वराणामेवोदात्तादयो धर्म्माः, व्यञ्जनं तु(३)तदङ्गतया व्यञ्जनमर्द्धमात्रं। स्वरस्य मात्राकालः तयोः सन्धिरर्द्धमात्रा(४) इत्येवं दीर्घकालः प्रसक्तः। तत्प्रतिषेधकार्य्यं(५) व्यञ्जनꣳस्वराङ्गमित्युक्तम्। स्वरसंसृष्टस्य व्यञ्जनस्य स्वरकाल एव कालो द्रुतवृत्तौ(६) न तु स्वरस्यैव सर्व्वत्रेत्यर्थः(७)। द्रुतवृत्ताविति किं। ह्रस्वार्द्धकालं व्यञ्जनमिति व्यर्थं स्यादिति ब्रूमः। यथा क्षीरोदकसम्पर्के क्षीरस्यैवोपलब्धिर्नोदकस्य, तथा स्वरव्यञ्जनसम्पर्के स्वरस्यैवोपलब्धेर्वैशिष्ट्यं॥

तत् परस्वरं ॥ २॥

स्वरप्रधानतया केवलमवस्थातुमसहमानं(८) व्यञ्जनं कदा पूर्व्वस्याङ्गतां(९) कदा परस्याङ्गमिति सन्देहे व्यवस्थापयति। 'तत्' अङ्गभूतं व्यञ्जनं 'परस्वरं' भजते। यथा, इमानेव लोकानुपधाय। परश्चासौ स्वरश्च परस्वरः, तं 'परस्वरं'॥

अवसितं पूर्व्वस्य॥ ३॥

'अवसितं' पदान्तवर्त्ति व्यञ्जनं, 'पूर्व्वस्य' स्वरस्य, अङ्गं स्यात्। यथा, ऊक्। वषट्। हविः॥

---

१ प्लुत इति ग०, इ० मु० च।

२ अचि इति ग०, इ० मु० च।

३ व्यञ्जनानान्तु इति ग०।

४ सन्धिरद्धार्द्धमात्र इति ग०, इ० मु० च।

५ प्रतिषेधार्थमिति ग०, इ० मु० च।

६ द्रुतद्रुतौ इति क०।

७ सर्वत्रेत्यर्थं इति ग०।

८ असहमानमिति क०।

९ पूर्वस्याङ्गमिति ग०, इ० मु० च।

संयोगादि ॥ ४ ॥

तयोर्बहूनां(१)वा 'संयोगो' भवति, तस्य संयोगस्य 'आदि' व्यञ्जनं पूर्वस्याङ्गं भवति। यथा, यज्ञान्वगादिशत्। अप्स्वन्तः(२)। परसूत्रे चकारः पूर्वस्वराङ्गं भवति(३) ॥

परेण चासꣳहितम् ॥ ५ ॥

'परेण' स्वरेण, 'असꣳहितं' असंयुक्तं च व्यञ्जनं पूर्वस्वराङ्गं भवति। यथा, तत् सवितुः। ननु तर्हि पूर्व्वसूत्रमनर्थकं। संयोगादिभूतस्यापि व्यञ्जनस्यानेनैव पूर्व्वस्वराङ्गत्वसिद्धेः। मैवं मंस्थाः। मर्य्यश्रीः, अर्व्वासि, इत्र यवकारयो रेफात् परं चेति द्वित्वे कृते प्रथमयवकारयोः परेण चासꣳहितमित्यनेन पूर्व्वस्वराङ्गत्वं प्राप्तं। रेफस्य नान्तस्थापरमसवर्णमित्यनेन परस्वराङ्गत्वं प्राप्तं। तच्चाशक्यं। तथोच्चारणासम्भवात्। अन्यतरबाधे कर्त्तव्ये सति किं बाध्यमिति सन्देहः। तत्र नियामकत्वेन(४) संयोगादिसूत्रमुपतिष्ठते ॥

अनुस्वारः स्वरभक्तिश्च ॥ ६ ॥

'च'कारः समुच्चयकथनद्वारा पूर्व्वस्वराङ्गत्वाकर्षकः(५)। 'अनुस्वारः' पूर्व्वस्वरं भजते। यथा, अꣳशुना ते। 'स्वरभक्तिश्च'

---

१ द्वयोर्बहूनामिति ग०, ङ० मु० च।
२ अप्स्वग्ने इति क०।
३ अत्र सूत्रे चकारः पूर्वस्वराङ्गबोधक इत्यत्रापितत्त्वलभ्यते इति ग०।
४ निश्चयत्वेनेति ग०।
५ पूर्वस्वराङ्गत्वाकर्षक इति ग०।

पूर्व्वस्वरं भजते । यथा, गार्हपत्यः । विधौ समाने सूत्रस्यास्य पृथक्करणं क्वचित् स्वरभक्तेः पराङ्गत्वमापादयतुं(१) । तथाहि,

स्वराद्र्स्वात् परां भक्तिं प्रचयत्वं नयेद् बुधः ।
ऋतस्य धूर्षदं चेति स्वतन्त्रा भक्तिरुच्यते ॥

नान्तस्थापरमसवर्णं ॥ ७ ॥

'न'कारः पूर्व्वस्वराङ्गत्वव्यावर्त्तकः । 'अन्तस्थापरं' व्यञ्जनं तस्या अन्तस्थाया 'असवर्णं' विलक्षणं पूर्व्वस्वराङ्गं(२) न भवति । अर्थात् परस्वरान्त इति विज्ञेयं(३) । स्वरं विना स्थातुमशक्यत्वात्(४) यथा, अध्यवसायद्दिशः । मधुमिश्रेण । अश्लोणया । इषे त्वा । अन्तस्था परा यस्मात्तत्, 'अन्तस्थापरं' । असवर्णमितिकिं । परिचाय्यं चिन्वीत ॥

नासिक्याः ॥ ८ ॥

'नासिक्या' यमाः स्वरं(५) भजन्ते । यथा, रुक्ममुपदधाति । राज्ञे सूकरः(६) ॥

स्पर्शश्चोष्मपर उष्मा चेत् परस्य ॥ ९ ॥

पूर्व्वः 'च'कारो नासिक्या इत्यनेन समुच्चयवाचकः । उत्तरस्तु परस्वराङ्गाकर्षकः(७) । 'ऊष्मपरस्पर्शश्च' परस्वराङ्गं भवति । असौ

---

१ स्वराङ्गमापादिश्येदिति ग० ।

२ पूर्वस्वराङ्गव्यञ्जनमिति क० ।

३ परस्वराङ्ग तदिति वेदितव्यमिति ग०, इ० मु० च ।

४ स्वतःस्थातुमशक्यत्वादिति ग०, इ० मु० च ।

५ नासिक्यायमाः परस्वरमिति इ०मु० । यमाः नासिक्या यमाःपरस्वराङ्गमिति ग० ।

६ इन्द्राय राज्ञे इति ग० ।

७ परस्वराङ्गत्वाकर्षक इति ग०,इ० मु०च ।

'ऊष्मपरश्चेत्' परस्वराङ्गं चेदित्यर्थः। षट्त् सम्पद्यन्ते। वषट्त् स्वाहा। ऊष्मपरश्चेदिति किं। अच्छया व्याघारयति। ऊष्मा परो यस्मात् असौ, 'ऊष्मपरः'॥

स्वरितात् सꣳहितायामनुदात्तानां प्रचय उदात्तश्रुतिः॥ १०॥

'स्वरितात्' परेषां 'अनुदात्तानां' अनुदात्तयोरनुदात्तस्य वा 'संहितायां' 'प्रचयः'नाम धर्म्मो भवति। यथा, अग्ने दुध्र गह्य किꣳ शिल वन्यया ते। अनुदात्तानामिति किं। ते अग्नये प्रवते(१)। संहितायामिति किं। अग्ने दुध्र गह्य किꣳशिल वन्य। उदात्तस्य श्रुतिरिव श्रुतिर्यस्य असौ, 'उदात्तश्रुतिः'। इति प्रचयस्वरूपनिरूपणं। अतो न पुनरुक्तिशङ्का॥

नोदात्तस्वरितपरः॥ ११॥

'उदात्तस्वरितपरः, वा अनुदात्त स्वरितो न भवति, प्रचयो न भवति(२)। यथा, तया देवतया(३)। तदाहुः क्वजगती(४)। उदात्तश्च स्वरितश्च उदात्तस्वरितौ, एतौ परौ(५) यस्मात् सः, तथोक्तः॥

---

१ अग्नये प्रवते इति ग०, इ० मु० च।

२ उदात्तपरः स्वरितपरो वा अनुदात्त-प्रचयो न भवति इति ग०, इ० मु० च।

३ तया देवाः सुताम्। इति इ० मु०। तया देवा इति ग०।

४ क्वजागती इति इ०मु०। क्वजगती चेति ग०।

५ तौ पराविति इ० मु०, ग० च।

स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान्नासिक्याः ॥ १२ ॥

'उत्तमपरात् अनुत्तमात् स्पर्शात्' 'आनुपूर्व्यात्'[१] यथाक्रमं 'नासिक्याः' आगमा भवन्ति। प्रथमस्पर्शात् प्रथमनासिक्यः। द्वितीयाद् द्वितीयः। एवमन्यत्रापि। यथा, तं प्रत्नथा। विद्मा ते अग्ने। दारुणि दध्मसि। इत्यादि। स्पर्शादिति किं। कल्माषी भवति। अनुत्तमादिति किं। सुम्नाय सुम्निनी। उत्तमपरादिति किं। उमाः सब्दः सगरः[२] ॥

तान्यमानेके ॥ १३ ॥

'तान्' नासिक्यान्, 'एके' शाखिनः 'यमान्' ब्रुवते। उक्ता-न्येवोदाहरणानि ॥

हकारान्नणमपरान्नासिक्यं ॥ १४ ॥

'हकारात्' इति कर्म्मणि ल्यब्लोपे पञ्चमी। तस्मात् 'नणं' अपरं हकारमारुह्य नासिक्यं भवति। सानुनासिको[३] हकारः स्यादित्यर्थः। अह्नां केतुः। अपराह्णे। ब्रह्मवादिनः ॥

रेफोष्मसंयोगे रेफस्वरभक्तिः ॥ १५ ॥

'रेफस्योष्मणश्च[४] 'संयोगे' सति 'रेफस्वरभक्तिः' इति जानीयात्। स्वरस्य भक्तिः, 'स्वरभक्तिः'। योऽस्य रेफस्य समानकरणः स्वरः[५] तद्भक्तिः स्यात्। ऋकारश्चास्य जिह्वाग्रकरणत्वे-

---

१ स्पर्शाच्चानुपूर्व्यादिति ग०। स्पर्शा-यत्त आनुपूर्व्यामिति क०।

२ सब्दः सगरः सुमेक इति इ० मु०।

३ सानुनासिक्य इति ग०, इ० मु० च।

४ रेफस्य चोष्मणश्चेति ग०, इ० मु० च।

५ समानस्वर इति ग०, इ० मु० च।

न(१) रश्रुत्या च समानधर्म्मः। 'भक्तिः' अवयवः, एकादेश इति यावत्। एतदुक्तं भवति, ऋकारावयवो भवतीत्यर्थः। सूत्रेणानेन स्वरभक्तिरेव विहिता। स्वरभक्तिस्वरूपन्तु विस्पष्टं व्याचष्टे वररुचिः। ऋकारादिरणुमात्रा रेफोर्द्धमात्रा, मध्ये शेषा स्वरभक्तिः, इति(२)। अस्यार्थः(३)।

इन्द्रियाविषयो(४) योसावणुरित्युच्यते बुधैः।
चतुर्भिरणुभिर्मात्रा परिमाणमिति स्मृतं॥

मात्रिकस्य ऋकारस्यादिरणुमात्रा स्वरभागः, मध्ये रेफः, अर्द्धमात्रा, शेषा अणुमात्रा(५) स्वरभागः। एतदृकारस्वरूपं(६)। अत्र रेफोर्द्धमात्रे भज्यमाने सति तौ भागौ पूर्व्वोत्तराणुसहितौ प्रत्येकं स्वरभक्तिनामधेयं भजेते। सा च स्वरभक्तिरर्द्धमात्रा कुत्र वा(७) स्वरभक्तिरित्याशङ्क्य शिक्षाकारैरुक्तं,

शषसेषु स्वरोदयां हकारे व्यञ्जनोदयां(८)।
शषसेषु च विवृतं(९) हकारे संवृतां विदुः॥ इति।

यो वै श्रद्धामित्यादौ सूत्रोक्तस्वराभावात्(१०) न स्वरभक्तिः। स्वरभक्त्यन्तरमपि शिक्षायामुक्तं,

करेणुः कर्विणी चैव हरिणी हारिणीति च।

---

१ जिह्वाग्रहणत्वे नेति क०।

२ ऋकारादिरणुमात्रा मध्ये शेषा स्वरभक्तिरिति इति ग०। क,चिह्नितपुस्तके "स्वरभक्तिरर्द्धमात्रे"ति। इति विशेषः। समानमन्यत्।

३ अस्यायमर्थ इति इ० मु०।

४ इन्द्रिय विषयइति क०, इ० मु० च।

५ शेषोप्यणुमात्रा इति इ० मु०। शेषा शेषोप्यणुमात्र इति ग०।

६ एतदृकारस्वयमिति क०।

७ कुत्रेति ग०।

८ हकारव्यञ्जनोदयामिति क०।

९ शषसेषु त विवृतामिति ग०, इ० मु० च।

१० सूत्रोक्तक्रमाभावादिति ग० इ०, मु० च।

हंसपदेति विज्ञेया पञ्चैताः स्वरभक्तयः ॥
करेणू रेफशयोर्योगे(१) कर्विणी लहकारयोः ।
हरिणी रशसानाञ्च(२) हारितां लशकारयोः ॥
या तु हंसपदा नाम सा तु रेफषकारयोः ।
एवं पञ्चविधां भक्तिमुच्चरेत्स्वर्गकामुकः ॥

यथा, करेणुः, वर्हिः । कर्विणी, माल्हा । हरिणी, दर्शपूर्ण-मासौ । वर्षं, हारिता । सहस्रवल्शा, हंसपदा । वर्षाभ्य इत्यादि ।

न क्रमे प्रथमपरे प्रथमपरे ॥ १६ ॥

'क्रम'शब्दो द्वित्वपर्यायः । कथमेतत् प्रकृतिक्रमः(३) क्रम इत्यत्र द्वित्वस्यैव क्रमशब्देनाभिधानात् । अत्रापि स एवार्थं इति निश्चिनुमः । उष्मणः क्रमे सति तस्मिन्नूष्मणि प्रथमपरे वा सति न स्वरभक्तिर्भवति । क्रमे यथा दार्श्यं(४), वर्षाभ्यः, वर्षैभिः । एतर्ह्यां(५) । प्रथमपरे यथा, अदर्शञ्ज्योतिः । कार्ष्णी उपानहौ । प्रथमः परो यस्मादसौ 'प्रथमपरः' ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे एकविंशोऽध्यायः ॥ ० ॥

---

१ रहयोर्विद्यादिति ग० । करेणु रषणयोर्विद्यादिति क० ।

२ हरिणीरशयोर्योगे इति ग० ।

३ प्रकृतिविक्रम इति इ० मु० ।

४ दार्श्यं यज्ञमिति इ० मु० ।

५ एतर्ह्यं चारूढ इति इ० मु० ।

अथ द्वाविंशोऽध्यायः।

शब्दः प्रकृतिः सर्व्ववर्णानां। १।

'सर्वर्णानां' 'शब्दः' ध्वनिः, 'प्रकृतिः' मूलकारणं भवति। सर्व्वशब्देन(१) स्वरव्यञ्जनात्मको राशिरुच्यते। सर्व्वे च ते वर्णाश्च 'सर्ववर्णाः' तेषां॥

तस्य रूपान्यत्वे वर्णान्यत्वं॥ २॥

प्रातिश्रुत्कस्थानभेदात् 'तस्य' प्रकृतिभूतस्य, 'रूपान्यत्वे' सति 'वर्णान्यत्वं' स्यात्। यथा, अ इ उ इत्यादि॥

तत्र शब्दद्रव्याण्युदाहरिष्यामः॥ ३॥

तेषां वर्णानां सर्व्वत्र सङ्घातप्रयोगे सति शास्त्रमित्युच्यते(२)। तस्य शब्द इति पर्य्यायनाम। तत्र तस्मिंच्छास्त्रे यानि द्रव्याणि भवन्ति, तान्युदाहरिष्यामः। यत् कर्म्म येन क्रियते, तत्तस्य, द्रव्यसाधनमिति यावत्। यथा, घटस्य मृदिति। एवं शास्त्रस्य वर्णाः। यानि द्रव्याणि संव्यवहारार्थानि, कर्त्तव्यानि तानि व्याख्यास्यामः। शब्दस्य द्रव्याणि, 'शब्दद्रव्याणि' तानि॥

---

१ वर्णशब्देनेति ग०, इ० मु० च। २ प्रयोगे वा शास्त्रमुच्यते इति ग०, इ० मु०च।

वर्णकारौ निर्द्देशकौ ॥ ४ ॥

'वर्ण' शब्दः 'कार' शब्दश्च 'निर्द्देशकौ' वाचकौ(१) स्यातां। यथा, अवर्ण-व्यञ्जन-शक्नोति। अथ षकारः सकारविसर्ज्जनीयाविति। वर्णश्च कारश्च 'वर्णकारौ' ॥

चापीत्यन्वादेशकौ ॥ ५ ॥

'च अपि', इत्येतौ 'अन्वादेशकौ' स्यातां। पूर्व्वापि चयान्वादेशक(२) इत्युच्यते। यथा, असदामासिञ्चश्च। इति परोपि ॥

त्वथैवेति विनिवर्त्तकाधिकारकावधारकाः ॥ ६ ॥

'तु, अथ, एव,' इत्येते शब्दा यथाक्रमेण 'विनिवर्त्तकाधिकारकावधारकाः' भवन्ति। यत्र 'तु' शब्दः श्रूयते, तत्र निवृत्तिः। यत्र 'अथ' शब्दः, तत्राधिकारः। यत्र 'एव' शब्दः, तत्रावधारणमिति वेदितव्यं। यथा, एफस्तु रस्य। अथ संहितायामेकप्राणभावे। स्पर्श एवैकेषामाचार्य्याणां। विशेषेण निवर्त्तयतीति, 'विनिवर्त्तकः'। अधिकरोतीति 'अधिकारकः'। अवधारयतीति 'अवधारकः' ॥

वेति वैभाषिकः ॥ ७ ॥

'वा' इत्येष शब्दो वैभाषिको वैकल्पिको भवति। यथा, मुखनासिक्या वा ॥

---

१ निर्द्देशकौ निर्द्देशवाचकौ इति ग०, इ० मु० च।

२ पूर्व्वापेचावन्वादेशक इति क०। पूर्व्वापेचोन्वादेश इत्युच्यते इति ग०।

नेति प्रतिषेधकः ॥ ८ ॥

'न' इति शब्दः 'प्रतिषेधकः' स्यात्(१)। यथा, न पुन्नोग्निरिति॥

आयामो दारुण्यमणुता खस्येत्युच्चैःकराणि शब्दस्य ॥ ९ ॥

उच्चैरुदात्त इत्युक्तं, तदर्थमिदमारभ्यते, लोकवद्यादृच्छिको-च्चारणप्रतिषेधार्थं(२)। 'आयामः' गात्राणां दैर्घ्यं। 'दारुण्यं' स्वरस्य कठिनता। 'अणुता' 'खस्य' गलबिवरस्य संहतता। एतानि नामधेयानि(३) शब्दस्य 'उच्चैःकरणानि'(४) शब्दमुच्चैः उदात्तं कुर्व्वन्तीत्यर्थः। उच्चशब्दमुच्चारयता एतत् कर्त्तव्यमिति विधिः। उच्चैः कुर्व्वन्तीति 'उच्चैःकरणानि' ॥

अन्ववसर्गो मार्दवमुरुता खस्येति नीचैःकरणानि ॥ १० ॥

'अन्ववसर्गः' गात्राणां विस्तृतता(५)। 'मार्द्दवं' स्वरस्य स्निग्धता। 'खस्य उरुता' कण्ठस्य स्थूलता, इत्येतानि, साधनानि शब्दस्य नीचैःकारणानि, शब्दं नीचमनुदात्तं कुर्व्वन्तीत्यर्थः। नीचशब्दमुच्चारयता एतत् कर्त्तव्यमिति विधिः। नीचैः कुर्व्वन्तीति 'नीचैःकरणानि' ॥

मन्द्रमध्यमताराणि स्थानानि भवन्ति ॥ ११ ॥

'मन्द्रं, मध्यमं, तारं', चेत्येतानि स्थानानि भवन्ति। 'मन्द्रं' इति प्रथमं। 'मध्यमं' इति द्वितीयं। 'तारम्' इति तृतीयं।

---

१ नेत्येष शब्दः प्रतिषेधको भवति इति इ० मु०, ग० च।

२ प्रतिषेधार्थेति ग०।

३ एतानि साधनानि इति ग०, इ० मु० च।

४ उच्चैःकराणि इति ग०।

५ विततता इ ग०, इ० मु० तच।

एषां(१) स्थानानां प्रयोजनमुत्तरत्र वक्ष्यते। एतानि स्थानानि केषामित्यपेक्षायामाह परसूत्रं॥

तत्रैकविꣳशतिर्यमाः॥ १२॥

तेषु स्थानेषु(२)'एकविंशतिः' 'यमाः'स्वरा भवन्ति। तेषां यमानामुत्तरत्र प्रयोजनं वक्ष्यते॥

ऋग्विरामः पदविरामो विवृत्तिविरामः समानपदविवृत्तिविरामस्त्रिमात्रो द्विमात्र एकमात्रोऽर्द्धमात्र इत्यानुपूर्व्येण॥ १३॥

ऋग्विरामादयस्त्रिमात्रादिकाला यथाक्रमं भवन्ति। यथा, उभावाजस्य सातये हुवे वां, इत्यृग्विरामः। इषे, त्वा, ऊर्ज्जे, त्वा, इति पदविरामः। स इधानः, त एनं, ता अस्मान्, इति विवृत्तिविरामः। प्रउगमिति समानपदविवृत्तिविरामः। ऋचि विरामो 'ऋग्विरामः'। पदस्य विरामः 'पदविरामः'। पदद्वयविवृत्तौ विरामः 'विवृत्तिविरामः'। शिक्षायामस्य विशेष उक्तः,

पिपीलिकादीर्घसमे च मध्ये सवर्णता पाकवती पदैक्ये।
दृष्ट्वा च वत्सानुसृजस्त्वसाम्ये त्वयोचि मुख्यस्तु विरामकालः॥
स्वरोदये त्वनुस्वारो भवेदध्यणुमात्रिकः।
विरामश्च तयोर्मध्ये वैशेषिकाच्च दीर्घयोः॥
ह्रस्वादिर्वत्सानुसृतिरन्ते वत्सानुसारिणी।

---

१ एतेषामिति ग०, इ० मु० च। २ तेषु लिषु स्थानेष इति ग०।

पाकवत्युभयह्रस्वा दीर्घोभया(१) पिपीलिका ॥
मात्रिका(२) वत्सानुसृतिस्तथा वत्सानुसारिणी ।
पादोना स्यात् पाकवती पादमात्रा पिपीलिका ॥

समानञ्च तत् पदञ्च 'समानपदं' । एकपदमित्यर्थः । समानपदे विवृत्तिः, तस्यां(३) विरामः, 'समानपदविवृत्तिविरामः' । तिस्रो मात्रा यस्यासौ 'त्रिमात्रः' । द्वे मात्रे यस्यासौ 'द्विमात्रः' । एका मात्रा यस्यासौ 'एकमात्रः' । अर्द्धमात्रा यस्यासौ 'अर्द्धमात्रः' ॥

यद्व्यञ्जनान्तं यदु चापि दीर्घꣳ
संयोगपूर्व्वञ्च तथानुनासिकं ।
एतानि सर्व्वाणि गुरूणि विद्यात् शेषाण्यतोऽन्यानि ततो लघूनि ॥ १४ ॥

'व्यञ्जनान्तं' 'यत्' अक्षरं, । व्यञ्जनमन्ते यस्य तद् 'व्यञ्जनान्तं' । 'यदुचापि दीर्घं' अक्षरं, । 'संयोगपूर्व्वं च' यदक्षरं, संयोगात् पूर्व्वं 'संयोगपूर्व्वं' । 'तथा' 'अनुनासिकं' सानुनासिकं यदक्षरं, उक्तानि 'एतानि'(४) 'सर्व्वाणि' अक्षराणि 'गुरूणि' 'विद्यात्' जानीयात् । यथा, व्यञ्जनान्तं, मातेव पुत्रं । यथा, दीर्घं । ते तेऽधिपतयः । यथा, संयोगपूर्व्वं, अश्मा च मे । यथा, अनुनासिकं, विꣳशत्यै स्वाहा । 'शेषाण्यतोन्यानि' अत एभ्यो गुरुभ्यः शेषाण्यन्यानि अक्षराणि, 'ततः' अनन्तरं, 'लघूनि'

१ उभयदीर्घेति ग० ।
२ मात्रा चेति ङ० मु० ।
३ समानपदे विवृत्तिः समानपदवृत्तिः, तस्यामिति ग०, मु० ङ० च ।
४ उक्तान्येव इति क० ।

विजानीयात्। अव्यञ्जनान्तंयद्ध्रस्वम्। शेषाणि कानीत्याशङ्क्यो-त्तरश्लोकेन विवृणोति॥

अव्यञ्जनान्तं यद्ध्रस्वमसंयोगपरं च यत्।
अननुस्वारसंयुक्तमेतल्लघु निबोधतै-
तल्लघु निबोधत ॥ १५॥

'अव्यञ्जनान्तं' 'यत्' अक्षरं, 'यत् च' 'अह्रस्वं,'यत्' च 'संयोगपरं' यत् 'अनुस्वारसंयुक्तं' 'एतत्' सर्व्वमक्षरं 'लघु' 'निबोधत' जानीध्वं। यथा, मदुदयना इत्यादि(१)। व्यञ्जनमन्ते यस्य तत् व्यञ्जनान्तं, न व्यञ्जनान्तं 'अव्यञ्जनान्तं'। संयोगः परो यस्मात् तत् संयोगपरं, न संयोगपरं 'असंयोगपरं'। अनुस्वारेण संयुक्तं अनुस्वारसंयुक्तं, न अनुस्वारसंयुक्तम् 'अननुस्वारसंयुक्तं'॥

इति त्रिभाष्यरत्ने प्रातिशाख्य-विवरणे द्वाविंशोऽध्यायः॥ ०॥

---

१ मदुदयना वसन्नित्यादि इति ग०, मु०, इ०, च।

अथ त्रयोविंशोऽध्यायः

अथ वर्णविशेषोत्पत्तिः ॥ १ ॥

'अथ' इत्ययमधिकारः। वर्णानां 'विशेषोत्पत्तिः' कथ्यते(१), इत्येतदधिकृतं वेदितव्यं, इत उत्तरं यद्वक्ष्यामः। वर्णानां विशेषो वर्णविशेषः, तस्य उत्पत्तिः, सा तथोक्ता ॥

अनुप्रदानात् सꣳसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्, इति ॥ २ ॥

अनुप्रदानादिभिः पञ्चभिः करणैर्वर्णानां 'वैशेष्य'(२) जायते। अकारस्य तावत् 'अनुप्रदानं' नादः। 'संसर्गः' कण्ठे। 'स्थानं' हनू। 'करणविन्ययः' ओष्ठौ। 'विन्ययः' नाम विन्यासः। 'परिमाणं' मात्राकालः। एवं सर्व्ववर्णानां बोध्यं(३)। विशेषभावो वैशेष्यं, वर्णानां वैशेष्यं, 'वर्णवैशेष्य' ॥

वर्णपृक्तः शब्दो वाच उत्पत्तिः ॥ ३ ॥

'पृक्तः' मिश्र इत्यर्थः। 'वर्ण' मिश्रः 'शब्दः' 'वाचः' वाक्यस्य, 'उत्पत्तिः' उपादानकारणं भवति। वर्णपृक्त इति किं। दुन्दुभ्यादिशब्दानां वाक्यत्वं(४)मा भूदिति ॥

---

१ उच्यते इति ग०, इ० मु० च।
२ वर्णवैशेष्यमिति ग०, इ० म० च।
३ बोद्धव्यमिति इ० म० क० च।
४ वाक्यता इति ग०, इ० मु० च।

सप्त वाच स्थानानि भवन्ति ॥ ४ ॥

'वाचः सप्त स्थानानि भवन्ति'। तानि उत्तरसूत्रे वक्ष्यन्ते(१)। यैर्वाक्यं युज्यते(२) यस्मिंश्च तिष्ठति, तत् स्थानं। तानि यथाक्रममुदाहरिष्यामः ॥

उपांशुध्याननिमदोपब्दिमन्मन्द्रमध्यमताराणि ॥ ५ ॥

'उपांशु' इति प्रथमं वाच स्थानं। 'ध्यानः' इति द्वितीयं। 'निमदः' इति तृतीयं। एवमितराण्यपिनामतः सप्तैतानि स्थानानि जानीयात्। उपरितनं सूत्रमारभ्य प्रत्येकमेषां लक्षणं वक्ष्यते ॥

करणवदशब्दममनःप्रयोगमुपांशु ॥ ६ ॥

'करणवत्' प्रयत्नवदित्यर्थः। नास्ति शब्दो ध्वनिरित्यस्मिन्(३) 'अशब्दः' मनसा प्रयोगः, 'मनःप्रयोगः' नास्ति मनःप्रयोगोस्मिन्(४) इति 'अमनःप्रयोगः'। वाचस्थानमोष्टशम् 'उपांशु' इत्युपदिश्यते। तत्र करणवदिति तूष्णीम्भावनिवृत्त्यर्थः। शब्दमिति शब्दस्यात्यन्ताल्पतार्थम्। अमनःप्रयोगमित्युदात्तादीनां साङ्कल्पिकप्रतिषेधार्थम्(५) ॥

अक्षरव्यञ्जनानामनुपलब्धिर्ध्यानः ॥ ७ ॥

'अक्षराणि' स्वराः। 'अक्षराणां व्यञ्जनानां च 'अनुपलब्धिः',

---

१ भण्यन्ते इति ग०।
२ यैवाक् प्रयुज्यते इतिग०, इ०मु०च।
३ ध्वनिरस्मिन् इति इ० मु०।
४ प्रयोगो यस्मिन्नति इ० मु०, ग० च।
५ साङ्कल्पिकप्रयोगप्रतिषेधार्थमिति ग०, इ० मु० च।

'ध्वानः' नाम द्वितीयं वाच स्थानं। उपांशुलक्षणेप्यनुपलब्धौ सत्यां पुनर्वचनं शब्दोपलब्धिविधानार्थम्। अक्षरव्यञ्जनानां भेदग्रहणमभिख्यार्थम्(१), अत्यन्तानुपलब्धिरित्यर्थः। (२)अन्ये त्वाहुः, अक्षरव्यञ्जनानां विसर्जनीयादीनामनुपलब्धिरिति॥

उपलब्धिर्निमदः॥ ८॥

अक्षरव्यञ्जनानाम् 'उपलब्धिः' 'निमदः' नाम तृतीयं वाच स्थानं(३)॥

सशब्दमुपब्दिमत्॥ ९॥

अक्षरव्यञ्जनानां 'सशब्दम्' उपलब्धिः, 'उपब्दिमत्' नाम चतुर्थं वाच स्थानं भवति।

उरसि मन्द्रं कण्ठे मध्यमꣳ शिरसि तारं॥ १०॥

यत्र 'उरसि' स्थाने प्रयोग उपलभ्यते, तत् 'मन्द्रं' नाम पञ्चमं वाच स्थानं। यत्र 'कण्ठे' स्थाने प्रयोग उपलभ्यते, तत् 'मध्यमं' नाम षष्ठं वाच स्थानं। यत्र 'शिरसि स्थाने, प्रयोग उपलभ्यते, तत् 'तारं' नाम सप्तमं वाच स्थानं। एतेष्वादितश्चतुर्णां यज्ञादिषु प्रयोगः। मन्द्रं प्रातःसवने प्रयुज्यते(४)। मध्यमं माध्यन्दिने। तारं तृतीये(५)। शिक्षा चैवं वक्ति,

प्रातः पठेन् नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन।

---

१ भेदग्रहणमाभोगार्थमिति ग०।

२ ग्रामणस्य पर्भेरारणापितूच्चमिति ग, चिह्नितपुस्तकेऽधिकः पाठः।

३ स्थानं भवति इति ग०, इ० मु० च।

४ उपयुज्यते इति ग०, इ० मु० च।

५ तृतीयसवने इति ग०, इ० मु० च।

मध्यन्दिने कण्ठगतेन चैव चक्राह्वसङ्कूजितसन्निभेन ॥
तारन्तु विद्यात् सवने तृतीये शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतः स्वनानां तुल्येन नादेन शिरस्थितेन ॥

मन्द्रादिषु त्रिषु स्थानेषु सप्तसप्त यमाः ॥ ११ ॥

'त्रिषु मन्द्रादिषु स्थानेषु' एकैकस्मिन् 'सप्त सप्त यमाः', भवन्ति। 'यमाः' स्वरा उदात्तादय इति यावत्। सप्तसप्तेति वीप्सया एकैकस्मिन्निति लभ्यते। के ते यमा इत्याशङ्क्योत्तरसूत्रेणोत्तरमाह ॥

क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्य्याः ॥ १२ ॥

क्रुष्टश्च प्रथमश्च द्वितीयश्च तृतीयश्च चतुर्थश्च मन्द्रश्च अतिस्वार्यश्च 'क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याः, ते तथोक्ताः। एते खलु यमा नाम(१) ॥

तेषां दीप्तिजोपलब्धिः ॥ १३ ॥

'तेषां' खलु सप्तस्वराणां, 'दीप्तजा'(२) पूर्व्वपूर्व्वोपलब्धिः स्यात्। तत्कथम्। अतिस्वार्य्यदीप्तिजा मन्द्रोपलब्धिः, मन्द्राच्चतुर्थोपलब्धिः। चतुर्थात् तृतीयः, तृतीयात् द्वितीयः, द्वितीयात् प्रथमः, प्रथमात् क्रुष्ट उपलभ्यते ॥

द्वितीयप्रथमक्रुष्टास्त्रय आह्वारकस्वराः ॥ १४ ॥

द्वितीयादय(३) एते त्रय आह्वारकस्वराः स्युः। एषां तैरेव प्रयोगो वेदितव्यः। आह्वारकाणां स्वरा 'आह्वारकस्वराः' ॥

---

१ क्रुष्टादयो यमा नामेति क० ।
२ सप्त यमा नाम उत्तरोत्तरदीप्तिजेति ग०, इ० मु० च ।
३ द्वितीयश्च प्रथमश्च क्रुष्टश्च ते तथोक्ता इति ग०, इ० मु० च ।

मन्द्रादयो द्वितीयान्तास्चत्वारस्तैत्तिरीयकाः ॥ १५ ॥

'मन्द्रादयश्चत्वारो द्वितीयान्ताः' स्वराः मन्द्रचतुर्थतृतीयद्विती-याः, 'तैत्तिरीयकाः' स्युः ॥

द्वितीयान् मन्द्रस्तैत्तिरीयाणां तृतीयचतुर्थावनन्तरं तच्चतुर्यममित्याचक्षते ॥ १६ ॥

'तैत्तिरीयाणां' 'द्वितीयात्' खलु 'मन्द्रः' जायते । तदनन्तरं 'तृतीयचतुर्थौ' स्यातां । एतदेव द्वितीयादिस्वरमण्डलं 'चतुर्यम्' इत्याचक्ष्यते । यो द्वितीयः, स उदात्तः, यो मन्द्रः सोनुदात्तः, यौ तृतीयचतुर्थौ तौ स्वरितप्रचयावित्यर्थः । अनेन सूत्रेण पूर्वोक्तानामेव(१) चतुर्णां स्वराणां क्रमनियमः क्रियते । चतुःसङ्ख्या तु पूर्वसूत्रेणैवोक्ता। तस्मादत्र चतुर्यममित्येतत् सञ्ज्ञाविधिपरमिति प्रतीयते ॥

तस्मिन् द्वियमान्तरा वृत्तिः ॥ १७ ॥

द्वौ च तौ यमौ च 'द्वियमौ, तयोः(२) 'अन्तरा वृत्तिः' मध्यवृत्तिः, तस्मिन्ननुदात्ते भवति, स्वरितत्वं प्रचयत्वञ्चानुदात्ते भवतीत्यर्थः । यथा, स नः पर्षत् । पर्य्यवदतां । केचिदन्यथा वदन्ति(३), तस्मिंश्चतुर्यमे स्वरमण्डले द्वियमान्तरा वृत्तिः, स्वरद्वयस्य मध्ये वर्त्तमानः(४) स्यात् । तथाहि,

अनुदात्तो हृदि ज्ञेयो मूर्द्धुदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्व्वाङ्गे प्रचयः स्मृतः ।

---

१ पूर्वेषामेवेति ग०, इ० मु० च ।
२ द्वियमयोरिति इ० मु० ।
३ कथयन्तीति ग०, इ० मु० च ।
४ वर्त्तमानमिति ग०, इ० मु० च ।

अयमर्थः(१), उदात्तानुदात्तयोर्मध्ये स्वरितप्रचययोरन्तरावृत्तिर्भवति। तथा कौहलीये(२), हस्तविन्याससमयेपि स्वरितप्रचययोरन्तरावृत्तिरुपदिश्यते ॥

उदात्त आख्याति वृषोङ्गुलीनां प्रदेशिनी मूलनिविष्टमूर्द्धा ।
उपान्तमध्ये(३) स्वरितं धृतञ्च कनिष्ठिकायामनुदात्तमेव ॥ इति ।

शिक्षावचनमपि चैवं वक्ष्यते(४),

कनिष्ठिकानामिका च मध्यमा च प्रदेशिनी ।
नीचस्वरधृतोदात्तानङ्गुष्ठाग्रेण निर्द्दिशेत् ॥

मुख्यमेव व्याख्यानद्वयमेतत् ।

तामुपदेक्ष्यामः ॥ १८ ॥

यदेतदाचार्य्यैश्चतुर्यमसुक्तं(५) तस्य चतुर्भेदभिन्ना वृत्तिर्नाम 'तामुपदेक्ष्यामः' इत्युच्यते। तामिति तच्छब्देन पूर्व्वोक्तं द्विमात्रमनुक्रष्यते(६) ॥

तच्चतुर्यममित्युक्तं ॥ १९ ॥

'इति' अनेन प्रकारेण, 'चतुर्यममित्युक्तं'। यद्यपि मन्द्रादयो द्वितीयान्ता इत्यादिसूत्रद्वयेन यमचतुष्टयं न सिद्धं(७) तथाप्युपसंहारमिषेण मतान्तरनिवृत्त्यर्थमिममर्थं दृढ़यति। यतः कारणादेवमन्ये मन्यन्ते, स्वरत्रयमात्रं।

१ अस्यायमर्थ इति इ० मु० ।
२ कौहलेयेति ग०, इ० मु० च ।
३ अन्ते च मध्ये इति ग० ।
४ वक्ष्यति इति ग० ।
५ चतुर्यममित्युक्तमिति ग०, इ०मु० च ।
६ पूर्वोक्तवृत्तिमात्रमनुक्रष्यते इति ग०, इ० मु० च ।
७ यमचतुष्टयञ्चेति ग० ।

उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥

क्रमविक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
नीचोच्चस्वारसम्पन्नां वदेद्धृतवतीꣳसमां
वदेद्धृतवतीꣳ समामिति ॥ २० ॥

तैत्तिरीयाम्नायक्रमतनिरूपकोयं श्लोकः । 'क्रमविक्रमाभ्यां सम्पन्नां'[१] 'क्रमः' नाम द्वित्वं 'विक्रमः' तु स्वरितयोर्मध्ये यत्र नीचम्, इत्युक्तलक्षणः । 'अद्रुताम्' अत्वरितां । 'अविलम्बितां' अमन्दां । 'नीचोच्चस्वरसम्पन्नां'[२] अनुदात्तोदात्तस्वरितप्रचयसहितां, 'धृतवतीं' प्रचयवतीं 'समां' उदात्तादिभिर्न्यूनातिरेकादिदोषरहितां[३] 'वदेत्' ब्रूयात्, वृत्तिमित्यर्थः । वृत्तिमिति कथं लभ्यते, अस्मिन् द्वियमान्तरावृत्तिरिति[४] प्रकृतत्वादिति ब्रूमः ॥

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे त्रयोविंशोऽध्यायः ॥ * ॥

---

१ क्रमविक्रमसम्पन्नामिति ग० ।
२ नीचोच्चस्वारसम्पन्नामिति क० ।
३ न्यूनातिरेकरहितामिति क० ।
४ तस्मिन् द्वितीयामान्तराद्गतीति ग० । अस्मिन् द्वितीयानन्तरावृत्तिरितीति क० ।

अथ चतुर्विंशोऽध्यायः।

अथ चतस्रः सꣳहिताः ॥ १ ॥

'अथ' इत्यधिकारः(१)। चतस्रः संहिता उच्यन्त इत्येतदधिकृतं वेदितव्यं, इत उत्तरं वक्ष्यामः ॥

पदसꣳहिताक्षरसꣳहिता वर्णसꣳहिताङ्गसꣳहिता चेति ॥ २ ॥

'पदाक्षरवर्णाङ्गाश्रयाः चतस्रः(२) संहिताः क्रमेण बोद्धव्याः। पञ्चमाध्यायमारभ्य आनवमादेकादशद्वादशौ त्रयोदशस्यादौ सूत्रचतुष्टयञ्च पदसंहिता। दशमेऽक्षरसंहिता। त्रयोदशचतुर्दशौ षोड़शश्च वर्णसंहिता। एकविंशोऽङ्गसंहिता(३)। एताश्चतस्रः संहिताः। एतेष्वन्यत्र च विहितं निषिद्धञ्च कार्य्यं सर्व्वसंहितासु कुर्य्यात्। यत्रार्षग्रहणादिको(४) विशेषो नास्ति ॥

नानापदसन्धानसंयोगः पदसꣳहितेत्यभिधीयते ॥ ३ ॥

ननाभूतयोः पदयोः सन्धाने यः संयोगः स 'पदसꣳहिता इति' 'अभिधीयते' उच्यत इत्यर्थः। यथा, अग्ने इदं दुग्ध गह्य किꣳशिल वन्य या ते(५)। एकार्थयोः सन्धानसंयोगयोः(६) प्रयोगः

१ अथेत्ययमधिकार इति ग०, इ० मु० च।

२ पदाक्षरवर्णाङ्गाख्यास्तस्र इति ग०।

३ व्यञ्जनंस्वराङ्गमित्येषाङ्गसंहिता इति ग०, इ० मु० च।

४ अत्रार्षग्रहणादिक इति ग०।

५ वन्यय ते इषेरिति इ० मु०।

६ सन्धानसंयोगशब्दयोरिति ग०, इ० मु० च।

सन्धानाधिक्यार्थः। तथा च वैयाकरणाः भणन्ति(१)। परः सन्निकर्षः संहितेति॥

यथास्वमक्षरसꣳहितादीनामप्येवम्॥४॥

स्वं स्वमनतिक्रम्य वर्त्तत इति 'यथास्व' क्रियाविशेषणमेवैतत्। एवमक्षरसꣳहितादीनामपि यथास्वं स्वरूपं निरूपणीयं। नानाक्षरसंयोगोऽक्षरसंहिता(२)। नानावर्णसंयोगो वर्णसꣳहिता। नानाङ्गसंयोगोऽङ्गसंहिता। क्रमेणोदाहरणानि भवन्ति(३)। यथा, अथाब्रवीत्। अधिषवणमसि। अक्ष्णया व्याघारयति। केवलस्वरयोः संयोगोऽक्षरसंहिता(४)। एकपदे स्वरव्यञ्जनसंयोगो वर्णसंहिता। एकपदे केवलव्यञ्जनसंयोगोऽङ्गसंहिता। अन्यत्र पदसंहितेत्यवान्तरभेदो विज्ञेयः॥

गुरुत्वं लघुता साम्यꣳ ह्रस्वदीर्घप्लुतानिच।
लोपागमविकाराश्च प्रकृतिर्विक्रमःक्रमः॥
स्वरितोदात्तनीचत्वꣳ श्वासो नादोऽङ्गमेवच।
एतत् सर्वन्तु विज्ञेयं छन्दोभाषामधीयता॥५॥

यद् गुरुत्वाद्यष्टादशविधं, 'एतत् सर्वं','छन्दोभाषां' वेदरूपां वाचं,'अधीयता' पठता, 'विज्ञेयं'। अथवा 'छन्दोभाषां' 'वेदलक्षण- मित्यर्थः। 'तु' शब्दोऽध्येतृव्यतिरिक्तनिषेधार्थः। अनेन तु सर्वथा विज्ञेयमित्यर्थः। गुरुत्वं यथा, वषट् स्वाहा। लघुता यथा, अकु-

१ वैयाकरणाः पठन्तीति ग०, द० मु० च।

२ नानाक्षरसन्निरक्षरसंहितेति क०।

३ भणाम इति ग०, द० मु० च।

४ केवलस्वरयोः संयोगोऽक्षरसंहितेति ग०, द० मु० च।

रत। साम्यं यथा. स्थानकरणकालादिभिरनयोरस्ति तौल्यमिति। ह्रस्वदीर्घप्लुतानि च यथा, गमयति। वायाविवास्य अस्तुहीऽ३। लोपो यथा, इमन्द्रा सुप्रयसः। आगमो यथा, तपुष्मि। विकारो यथा,समिन्द्रणः(१)। प्रकृतिर्यथा, अग्ने दुध्र गह्य किल्बिल वन्य याते। प्रपा असि। मिथुनो अभवन्(२)। विक्रमो यथा, वोढवे। क्रमो नाम द्वित्वं यथा, यद्दै होता। स्वरितोदात्तनीचानां भावः 'स्वरितोदात्तनीचत्वं'। तद्यथाक्रमं निर्दिश्यते, न्यक्षम्। गां वाव तौ(३)। अवदतां। विवृते श्वास इत्युक्तं। श्वासो यथा, पूते। संवृते कण्ठे नाद(४) इत्युक्तो नादः। यथा, भागधे भागधाः। व्यञ्जनं-स्वराङ्गमित्युक्तमङ्गं यथा, तं मत्स्यः प्राब्रवीत्। विज्ञेयमिति विधिः(५)। विपत्ति बाधाः, मन्त्रो हीनः स्वरतो वर्णतो वेत्यादिना(६)॥

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः।
स्वरमात्राविभावज्ञो गच्छेदाचार्य्यसंसदं
गच्छेदाचार्य्यसंसदमिति ॥ ६ ॥

पदानां क्रमस्तस्य विशेषः तं जानातीति 'पदक्रमविशेषज्ञः'। 'वर्णानां' 'क्रमः' तस्मिन् 'विचक्षणः' निपुणः। 'स्वराश्च मात्राश्च

१ समिन्द्रणो मनसा इति इ० मु०।

२ न मिथुनौ अभवन् इति ग०, इ० मु० च।

३ वाव तौ तदिति ग०,इ० मु० च।

४ नादः क्रियते इति ग०,इ० मु० च।

५ विज्ञेयत्वमिति नित्यविधिरिति ग०, इ० मु० च।

६ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् इति ग०।

'स्वरमात्राः' तेषां'विभागज्ञः'। 'मात्रा'शब्देन कालविशेषः कश्चिदुच्यते। सोपि चतुरणुरित्यादि। एवंविधः पुरुषो 'गच्छेदाचार्य्यसंसदं' स्थानं। आचार्य्यास्तु व्यासादयः। तेषां ब्रह्मलोको हि स्थानं। यश्चेदं शास्त्रं जानीते सोयमाचार्य्यः, तेषां सदनं ब्रह्मलोकं गच्छति। तथा च पौराणिका वदन्ति,

गरुडपुराणे।

आहुः समस्तविद्यानां वेदविद्यामनुत्तमां।
अतस्तद्दातुरस्यैव लाभः स्वर्गापवर्गयोः॥
विद्यानाञ्च परा विद्या ब्रह्मविद्या समीरिता।
अतस्तद्दानतो राजन् सर्वदानफलं(१) लभेत्॥

देवीपुराणे।

वेद एव द्विजातीनां साधनं श्रेयसं परम्।
ततोस्याध्ययनाभ्यासात् परं ब्रह्माधिगच्छति॥
तमेव शीलयेत् प्राज्ञः शिष्येभ्यस्तं प्रदापयेत्।
तदभ्यासप्रदानाभ्यामेतत् किन्नाधिगच्छति॥

तथा याज्ञवल्क्यः।

यज्ञानां तपसाञ्चैव शुभानाञ्चैव कर्म्मणां।
वेद एव द्विजातीनां निःश्रेयसकरः परः॥
योनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

१ सर्वं दानफलमिति द० मु०।

महाभारतेपि।

यो ब्रूयाच्चापि शिष्याय(१) धर्म्यां ब्राह्मीं सरस्वतीम्।
पृथिवीगोप्रदानाभ्यां स दानफलमश्नुते(२)॥

विष्णुधर्म्मोत्तरे।

वेददानादवाप्नोति सर्वयज्ञफलं नरः।
उपवेदप्रदानेन गन्धर्वैः सह मोदते॥

ब्रह्मपुराणे।

न तत्कल्पसहस्रेण गदितुं शक्यते फलम्।
यद्वेददानादाप्नोति स्वल्पादपि महामते॥

भविष्यत्पुराणे(३)।

अपुत्रो लभते पुत्रमधनो लभते धनम्।
वेदाध्ययनयुक्तस्तु परे ब्रह्मणि लीयते॥

वेदस्वरूपमुच्यते।

यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्गलः।
बृहत्कपोलकृष्णाङ्घ्रिः स्ताम्रः काश्यपगोत्रजः॥

वेदाङ्गान्युच्यन्ते।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।

१ शिष्येभ्य इति इ० मु०।
२ स तुल्यफलमश्नुते इति इ०मु०।
३ भविष्यपुराणेपि इति इ० मु०।

छन्दसां लक्षणञ्चेति षडङ्गानि विदुर्बुधाः ॥
अनुपदञ्चानुपदं छन्दो भाषासमन्वितम् ।
मीमांसान्यायतर्कश्च तथाङ्गानि विदुर्बुधाः ॥

एवं साङ्गोपाङ्गं वेदं गोत्रस्वरूपादीनि विजानन्नधीयानः पूतो भवति(१)।

ग्रन्थान्तरे यथा, तद्वदिदं शास्त्रं यदृच्छया ।
अभूतेषु च स्थानेषु पौरुषेयेषु वर्त्तते ॥

तथा हि। प्र नक्षत्राय देव्याय स इन्द्रमादमहि कर्मकर्त्तवै महामनुं। मह्नि सप्तदशेनावस्युजाताः। अपि सीदमियन्यष्टा च अस्मिꣳस्तनुवस्त्वं हि पिनाकमित्यादौ न वर्त्तते। सिंहेव्याघ्र(२) द्वादशाग्निष्टोमस्य स्तोत्राणि आत्मना परां निःप्रशुक्रशोचिषा। उष्णतोपोषमित्यादौतु वर्त्तते। गच्छेदाचार्य्यसꣳसदं। वीप्सा शास्त्रपरिसमाप्तिं द्योतयति(३)॥

इति श्रोत्रिभाष्यरत्ने प्रातिशाख्यविवरणे चतुर्विंशोऽध्यायः ॥ * ॥

समाप्तश्चायं ग्रन्थः ॥ * ॥

---

१ एवं साङ्गोपाङ्गवेदस्य लक्षणं सम्पूर्णमिति इ० मु०।

२ सिंहव्याघ्र उपाध्यायदाको इति इ० मु०।

३ वीप्सा शास्त्रपरिसमाप्तिज्ञापनार्थं भवतीति इति ग०।

	Rs.	As.
The Maitrí Upanishad with a commentary and a translation. By E. B. Cowell, M, A., 3 Fasciculi, ...	1	14
The Gopála Tápaní. Edited by Paṇḍita Harachandra Vidyábhushana	0	10
The Grihya Sutra of A'svaláyana, with the commentary of Gárgyanáráyaṇa. Edited by A'nandachandra Vedántavágis'a 4 Fasciculi,	2	8
The Nrisinha Tápani with the commentary of Sankara A'chárya, edited by Paṇḍita Rámmaya Tarkálankára. 3 Fasciculi, ..	1	14
Gopatha Brahmana, Edited by Babu Rájendralála Mitra. 2 fasc.,...	1	10
The Taittiriya Prátisákhya. Edited by Bábu Rájendrálála Mitra. 3 fasc., ...	1	4

SANSKRIT WORKS IN PROGRESS.

Old Series Nos. 1 *to* 230, *demi* 8vo.

The Lalita-Vistara, or Memoirs of the Life and Doctrines of S'ákya Sinha. Edited by Babu Rájendralála Mitra. Published 5 Fasciculi, ...	3	2
The Taittiríya Bráhmaṇa of the Black Yajur Veda, with the commetary of Sáyaṇa. Edited by Bábu Rájendralála Mitra. Published 24 Fasciculi, ...	15	0
Taittiriya, Sanhitá. Edited by Dr. E. Röer, E. B. Cowell, M. A. and Mahesachandra Nyáyaratna. Published 26 Fasciculi, ...	16	4

New Series, Nos. 1 *to* 257, *demi* 8vo.

The Taittiriya A'raṇyaka of the Black Yajur Veda. Edited by Bábu Rájendralála Mitra. Published 10 Fasciculi, ...	6	4
The Mímáñsá Darśana, with the Commentary of S'avara Svámí. Edited by Paṇḍita Maheśa-chandra Nyáyaratna. Published, 10 Fasciculi, ...	6	4
The Tándya Mahábráhmaṇa with the Commentary of Sáyaṇácharya. Edited by A'nandachandra Vedántavágísa, 18 Fasciculi, ..	11	4
The Látyáyana Sutra. Edited by Paṇḍita A'nandachandra Vedántavágiśa. 8 Fasciculi, ...	5	
The Agni Purána. Edited by Paṇḍita Harachandra Vidyábhushaṇa, 3 Fasciculi, ...	1	14
Chhandah Sutra of Pingala Achárya. 2 fasc.	1	4
Gobhiliya Grihya Sutra with a commentary by the Editor, Pandit Chandrakánta Tarkalankar. 2 fasc., ...	1	4
Sáma Veda Sañhita with the commentary of Sayaṇa Achárya. Edited by Paṇdit Satyavrata Sámasrami, 5 fasc., ., ...	3	2
Chaturvarga Chintámani by Hemádri. Edited by Paṇḍit Bharata Chandra Siromani, 5 fasc., ...	3	2
Atharvanopanishad No. 249.	0	10

English Translations complete, demi 8vo.

An English Translation of the Brihad A'raṇyaka Upanishad, and Commentary. By Dr. E. Röer, 3 Fasciculi, ...	1	14
An English Translation of Chhándogya Upanished, by Babu Rájendralála Mitra, 2 Fasciculi, ...	1	4
An English Translation of the Taittiríya, Aittaréya, Svetáśvatara. Kéna, Iśa, Katha, Muṇḍka and Máṇḍukya Upanishads, by Dr. E. Röer. 2 Fasciculi, ...	1	4
The Súrya-Sidhánta, translated by Paṇḍita Bápú Deva Sástri. 1 Fasciculus, ...	0	10
The Siddhánta Siromani, translated by the late Lancelot Wilkinson, Esq. C. S., and revised by Paṇḍita Bápú Deva Sástrí. 2 Fasciculi, ...	1	4
A Translation of the Sánkhya Aphorisms of Kapila, by Dr. Ballantyne, published 2 Fasciculi,	1	4

Rs. As.

English Translation in progress, demi 8vo.

Sáhitya Darpana or Mirror of Composition, a treatise on Literary criticism by Visvanátha Kavirája. Translated into English by Babu Pramadádása Mitra. 3 Fascicúli, — —	1	14
The Brahma Sutra with the commentary of Sankar Achárya. Translated into Englishby Rev. K. M. Banerjea, No. 214, —	1	0
Aini Akbari English 6 fasc., — — —	10	8

B. Miscellaneous.

One complete set of the Journal of the Asiatic Society of Bengal, —	750	0
Journal of the Asiatic Society, from Vol. XII. for 1842, to Vol. XXXVI. for the 1867, except Vols. XXIII, XXIV. and XXIX. prices as per title page.		
Asiatic Researches, from Vols. VI to XII. and Vols. XVII. to XX., each at., — — — — —	10	0
Ditto ditto Index, — — — —	5	0
Catalogue of the Books and Maps in the Library of the Asiatic Society, By Rájendralála Mitra. 1856, — — —	3	0
——— of the Sanskrit Books and MSS. of the Asiatic Society, —	1	0
——— of Persian, Arabic, and Urdu, ditto, — —	1	0
——— of the Fossil Remains of Vertebrata from the Sewalik Hills, the Nerbudda, Perim Island, &c. in the Meseum of the Asiatic Society of Bengal. By H. Falconer, Esq., M.D., F. R. S andH. S.,	2	0
——— of the Recent Shells in the Museum of the Asiatic Society, by W. Theobald, Esq., Jnr., — — —	3	0
——— of the Reptiles in the Asiatic Society's Museum by W. Theobald, Esq., Jr., — — — —	3	0
Catalogue of Mammâlia, — — — —	2	0
Harivansa, 563 pages, royal 4to., — — —	3	0
Mahábhárata. Vols. 3rd and 4th, royal, 4to., and Index, —	40	0
Rájatarangini, 440 pages, 4to., — — —	4	0
Csoma's Tibetan Grammar, — — —	8	0
——— ——— Dictionary, — — —	10	0
Vedánta-Sára, translated by Dr. E. Roer., — —	0	8
Puraná Sangraha, edited by the Rev. K. M. Banerjea, No. I., —	1	0

1 —PRIVATE PUBLICATIONS.

Wise's Hindu System of Medicine, — — —	9	0
The pilgrimage of Fa Hian, — — —	5	0
Lassen's Bactrian Coins, by Dr. Edward Roer, — —	5	0
Meng Tseu, in Latin, by Stanislaus Julien. Two parts in one vol.,	6	0
Aborigines of India, by B. H. Hodgson, — —	3	0
History of the Afghans, Pt. I., by Dorn, — —	5	0
Examination and Analysis of Mackenzie Manuscripts, by the Rev. W. Taylor, — — — —	2	0
Low's Siamese Grammar, — — — —	2	0
Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis, F.R.S.,	1	8
Dictionarium Anamittico-Latinum, by A. J. L. Tabard, —	14	0
Blank Vocabulary for Ethnographical purposes, — —	1	0
Collection of Oriental Proverbs, by Thomas Roebuck, — —	2	0
Mataparikhá, — — — — —	0	8
Travels of Macarius, Pt. I., by F. C. Balfour, — —	4	0
Contributions towards an Index to Indian Bibliography, F. Hall, —	2	0
Outlines of Indian Philology, by J. Beames, — —	2	8
Translations from the Tárikh Fíruzshahí, — — —	1	8

N. B.—For Arabic, Persian and Urdu works vide the covers of the Persian series.

SHASTRA-PRAKASHA.

VOLUME I.

KALKI-PURANA

EDITED BY

JAGANMOHANA TARKALANKARA

LIBRARIAN OF THE CALCUTTA GOVERNMENT SANSKRIT COLLEGE.

PUBLISHED BY

KEDARNATH BANERJEE,

BURTOLLAH, CALCUTTA.

कल्किपुराणम् ।

श्रीजगन्मोहनतर्कालङ्कार-

परिशोधितम् ।

श्रीकेदारनाथवन्द्योपाध्यायेन

प्रकाशितम् ।

PRINTED AT THE KAVYAPRAKASHA PRESS.

CALCUTTA

1873.

मूल्य सार्द्ध मुद्रा । Price 1 rupee 8 annas.

In

SHASTRA-PRAKASHA.

vol. I.

KALKI-PURANA

EDITED BY
JAGANMOHANA TARKALANKÁRA
LIBRARIAN OF THE CALCUTTA GOVERNMENT SANSKRIT COLLEGE.

PUBLISHED BY
KEDARNATH BANERJEE,
BURTOLLAH, CALCUTTA.

PRINTED FOR KEDARNATH BANERJEE AT THE
KAVYAPRAKASHA PRESS.
CALCUTTA
1873.

कल्किपुराणम्।



श्रीजगन्मोहनतर्कालङ्कार-
परिशोधितम्।

श्रीकेदारनाथवन्द्योपाध्यायेन
प्रकाशितम्।

कलिकाता-काव्यप्रकाशयन्त्रे
मुद्रितम्।

शकाब्दाः १७९४।

विज्ञापनम् ।

कलौ भूसुराणां शक्तिह्रासमाकलय्य भगवान् वेदव्यासो वेदान् चतुर्धा व्यभजत् । अथ तत्शिष्यैरपि ते चत्वारो वेदा बह्वीषु शाखासु विभक्ताः । भगवान् कृष्णद्वैपायनस्तु पुनरपि ब्राह्मणान् गूढ़तमवेदार्थपरिज्ञानासमर्थान् द्विजेतरानपि वैदिकमन्त्रश्रवणानधिकारिणो विलोक्य कृपया वेदार्थानशेषान् समाहृत्य बहुविधोपाख्यानसमेतानेतानेव सुललितभाषयैकत्र प्रकटयितुं सुविस्तीर्णां पुराणसंहितामेकां प्रणिनाय । स च पुराणसंहिताध्यापनार्थं प्रख्यातं लोमहर्षणं शिष्यमकरोत् । सुमतिः, अग्निवर्चाः, मित्रयुः, शांशपायनः, अकृतव्रणः, सावर्णिश्चेति लोमहर्षणस्यासन् षट् शिष्याः । एतेषु अकृतव्रणेन, सावर्णिना शांशपायनेन च गृहीतविद्येन पुराणसंहितामेवावलम्ब्य संक्षिप्य चापरं पुराणत्रयं प्रणीतम् । तत्पुराणत्रितयन्तु अकृतव्रणसंहिता, शांशपायनसंहिता, सावर्णिसंहिता चेति नाम्नैव विश्रुतमासीत् । अधुना एतन्मूलपुराणचतुष्टयं सर्वसंहारकेण कालेन कवलितम् ।

अथान्यैर्वेदव्यासशिष्यप्रशिष्यैरन्यैर्महर्षिभिश्च तस्मादेवादिपुराणचतुष्टयात् उपाख्यानादिसंग्रहपुरःसरं पृथक् पृथक् अष्टादश महापुराणानि बहून्युपपुराणानि च संकलितानि, तानि तानि च महापुराणान्युपपुराणानि गुरुभक्त्या आदिगुरु पुराणप्रवर्त्तक-श्रीकृष्णद्वैपायनस्य नाम्नैव प्रायशः प्रख्यापितानि । कल्किपुराणन्तूपपुराणमध्ये परिगणितम् । एतत्तु कदा केन महर्षिणा संगृहीतमिति दुर्ज्ञेयमस्माकम् । वराहसंहितायां ज्योतिर्विदाभरणे राजतरङ्गिण्याञ्च उल्लिखितं, "शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले । कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः ॥" "आसन् मघासु मुनयः शासति

पृथिवीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्यस्य॥" इति। विक्रमादित्यस्य शकप्रवर्त्तनसमये युधिष्ठिराब्दाः २५२६ अधुना विक्रमादित्यसंवत् १९२७ सुतरां ४४५३ संवत्सरेभ्यः पूर्वं युधिष्ठिरो राजसिंहासनमलञ्चकार। युधिष्ठिरस्य राजत्वसमये भगवता वेदव्यासेन वेदा व्यस्ताः, पुराणसंहितापि प्रणीता। अथ अल्पकालानन्तरमेव नैमिषारण्ये लोमहर्षणपौत्रेण सर्वाणि महापुराणानि उपपुराणानि च साकल्येन पठितानि। एतदेव वयं वक्तुं समर्थाः, प्रणयनकालनिरूपणन्त्वस्माकमसाध्यमेव।

अस्मिन् कल्किपुराणे भगवतः कल्केर्भविष्यावतारकथा दुराचारम्लेच्छादिसंहारपूर्वकसत्ययुगप्रवर्त्तनविवरणञ्च प्रकटितम्। सर्गः, प्रतिसर्गः, वंशः, मन्वन्तराणि, वंशानुचरितञ्चेति पञ्च पुराणलक्षणानि कल्किपुराणेऽस्मिन्नविस्पष्टं लक्ष्यन्ते। अष्टादश महापुराणानि बहून्युपपुराणानि च वेदार्थप्रकाशकतयाधुना सर्वेषामेवार्य्याणां धर्म्मकर्म्मप्रवर्त्तकानि। अतो विलोपोन्मुखानामेतेषां धर्म्मशास्त्राणां संरक्षणे सनातनधर्म्मसंरक्षणार्थिभिः सर्वैरेव सर्वथा प्रयत्नः करणीयः। अतोऽस्माभिश्च शक्त्यनुसारेण वङ्गभाषानुवादसमेतं विष्णुपुराणं भविष्यपुराणं मत्स्यपुराणञ्च प्रकाश्यते। अस्मद्दृष्टान्तानुसारेण च अन्यैः कतिपयैः सुविचक्षणैरन्येषां केषाञ्चिदपि पुराणानां प्रकाशारम्भः कृतः। यदा येन केनापि प्रकारेण पुराणानि उपपुराणानि चाशेषाणि मुद्राङ्कितानि प्रकाशितानि च भविष्यन्ति तदैवास्माकं संपूर्णा मनोरथसिद्धिः संपत्स्यते इति॥

श्रीजगन्मोहनशर्म्मा।

कलिकाता पुराणप्रकाशयन्त्र।

सूचीपत्रम् ।

१ अंशः । १ अध्यायः ।

२ अध्यायः ।

३ अध्यायः ।

४ अध्यायः ।

५ अध्यायः ।

६ अध्यायः ।

७ अध्यायः ।

कल्किपुराणम्।

प्रथमोऽध्यायः।

ओं नमो गणेशाय।

सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा
स्वं स्वं कर्म्म सुसिद्धये* प्रतिदिनं भक्त्या भजन्त्युत्तमाः।
तं विघ्नेशमनन्तमच्युतमजं सर्व्वज्ञसर्व्वाश्रयं
वन्दे वैदिकतान्त्रिकादिविविधैः शास्त्रैः पुरोवन्दितम्॥१

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥ २॥

यद्दोर्दण्डकरालसर्पकवलज्वालाज्वलद्विग्रहाः
नेतुः सत्करवालदण्डदलिता भूपाःक्षितिक्षोभकाः।
शश्वत् सैन्धववाहनो द्विजजनिः कल्किः परात्मा हरिः
पायात् सत्ययुगादिकृत् स भगवान् धर्म्मप्रवृत्तिप्रियः॥३

इति सूतवचः श्रुत्वा नैमिषारण्यवासिनः।
शौनकाद्या महाभागाः पप्रच्छुस्तं कथामिमाम्॥ ४॥

हे सूत! सर्व्वधर्म्मज्ञ! लोमहर्षणपुत्त्रक!।
त्रिकालज्ञ! पुराणज्ञ! वद भागवतीं कथाम्॥५॥

---

* यं सर्व्वार्थसुसिद्धये इत्येवं पाठः सङ्गच्छते।

कः कलिः? कुत्र वा जातो जगतामीश्वरः प्रभुः ।
कथं वा नित्यधर्म्मस्य विनाशः कलिना कृतः? ॥ ६ ॥
इति तेषां वचः श्रुत्वा सूतो ध्यात्वा हरिं प्रभुम् ।
सहर्षपुलकोद्भिन्नसर्व्वाङ्गः प्राह तान् मुनीन् ॥ ७ ॥

सूत उवाच ।

शृणुध्वमिदमाख्यानं भविष्यं परमाद्भुतम् ।
कथितं ब्रह्मणा पूर्व्वं नारदाय विपृच्छते ॥ ८ ॥
नारदः प्राह मुनये व्यासायामिततेजसे ।
स व्यासो निजपुत्त्राय ब्रह्मराताय धीमते ॥ ९ ॥
स चाभिमन्युपुत्त्राय विष्णुराताय संसदि ।
प्राह भागवतान् धर्म्मान् अष्टादशसहस्रकान् ॥ १० ॥
तदा नृपे लयं प्राप्ते सप्ताहे प्रश्नशेषितम् ।
मार्कण्डेयादिभिः पृष्टः प्राह पुण्याश्रमे शुकः ॥ ११ ॥
तत्राहं तदनुज्ञातः श्रुतवानस्मि याः कथाः ।
भविष्या कथयामीह पुण्या भागवतीः शुभाः ॥ १२ ॥
ताः शृणुध्वं महाभागाः समाहितधियोऽनिशम् ।
गते कृष्णे स्वनिलयं प्रादुर्भूतो यथा कलिः ॥ १३ ॥
प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः ।
ससर्ज्ज घोरं मलिनं पृष्ठदेशात् स्वपातकम् ॥ १४ ॥

स चाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात्।
श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते ॥ १५ ॥
अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना।
तस्य पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः ॥ १६ ॥
स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम्।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥ १७॥
स हिंसायां भगिन्यान्तु जनयामास तं कलिम्।
वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम् ॥ १८ ॥
काकोदरं करालास्यं लोलजिह्वं भयानकम्।
पूतिगन्धं द्यूतमद्य-स्त्रीसुवर्णकृताश्रयम् ॥ १९ ॥
भगिन्यान्तु दुरुक्त्यां स भयं पुत्त्रञ्च कन्यकाम्।
मृत्युं स जनयामास तयोश्च निरयोऽभवत् ॥ २० ॥
यातनायां भगिन्यान्तु लेभे पुत्त्रायुतायुतम्।
इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः ॥ २१ ॥
यज्ञाध्ययनदानादिवेदतन्त्रविनाशकाः।
आधिव्याधिजराग्लानिदुःखशोकभयाश्रयाः ॥ २२ ॥
कलिराजानुगाश्चेरुर्यूथशो लोकनाशकाः।
बभूवुः कालविभ्रष्टाः क्षणिकाः कामुका नराः ॥२३॥
दम्भाचारदुराचारास्तातमातृविहिंसकाः।

वेदहीना द्विजा दीनाः शूद्रसेवापराः सदा ॥ २४ ॥
कुतर्कवादबहुला धर्म्मविक्रयिणोऽधमाः ।
वेदविक्रयिणो व्रात्या रसविक्रयिणस्तथा ॥ २५ ॥
मांसविक्रयिणः क्रूराः शिश्नोदरपरायणाः ।
परदाररता मत्ता वर्णसङ्करकारकाः ॥ २६ ॥
ह्रस्वाकाराः पापसाराः शठा मठनिवासिनः ।
षोड़शाब्दायुषः श्यालबान्धवा नीचसङ्गमाः ॥ २७ ॥
विवादकलहक्षुब्धाः केशवेशविभूषणाः ।
कलौ कुलीना धनिनः पूज्या वार्द्धुषिका द्विजाः ॥२८॥
सन्न्यासिनो गृहासक्ता गृहस्थास्त्वविवेकिनः ।
गुरुनिन्दापरा धर्म्मध्वजिनः साधुवञ्चकाः ॥ २९ ॥
प्रतिग्रहरताः शूद्राः परस्वहरणादराः ।
द्वयोः स्वीकारमुद्वाहः शठे मैत्री वदान्यता ॥ ३० ॥
प्रतिदाने क्षमाशक्तौ विरक्तिकरणाक्षमे ।
वाचालत्वञ्च पाण्डित्ये यशोऽर्थे धर्म्मसेवनम् ॥ ३१ ॥
धनाढ्यत्वञ्च साधुत्वे दूरे नीरे च तीर्थता ।
सूत्रमात्रेण विप्रत्वं दण्डमात्रेण मस्करी ॥ ३२ ॥
अल्पशस्या वसुमती नदीतीरेऽवरोपिता ।
स्त्रियो वेश्यालापसुखाः स्वपुंसा त्यक्तमानसाः ॥ ३३ ॥

परान्नलोलुपा विप्राश्चण्डालगृहयाजकाः ।
स्त्रियो वैधव्यहीनाश्च स्वच्छन्दाचरणप्रियाः ॥ ३४ ॥
चित्रवृष्टिकरा मेघा मन्दशस्या च मेदिनी ।
प्रजाभक्षा नृपा लोकाः करपीड़ाप्रपीड़िताः ॥ ३५ ॥
स्कन्धे भारं करे पुत्रं कृत्वा क्षुब्धाः प्रजाजनाः ।
गिरिदुर्गं वनं घोरमाश्रयिष्यन्ति दुर्भगाः ॥ ३६ ॥
मधुमांसैर्मूलफलैराहारैः प्राणधारिणः ।
एवं तु प्रथमे पादे कलेः कृष्णविनिन्दकाः ॥ ३७ ॥
द्वितीये तन्नामहीनास्तृतीये वर्णसङ्कराः ।
एकवर्णाश्चतुर्थे च विस्मृताच्युतसत्क्रियाः ॥ ३८ ॥
निः-स्वाध्याय-स्वधा-स्वाहा-वौषड़ोंकार-वर्ज्जिताः ।
देवाः सर्व्वे निराहाराः ब्रह्माणं शरणं ययुः ॥३९॥
धरित्रीमग्रतः कृत्वा क्षीणां दीनां मनस्विनीम् ।
ददृशुर्ब्रह्मणो लोकं वेदध्वनिनिनादितम् ॥ ४० ॥
यज्ञधूमैः समाकीर्णं मुनिवर्य्यनिषेवितम् ।
सुवर्णवेदिकामध्ये दक्षिणावर्त्तमुज्ज्वलम् ॥ ४१ ॥
वह्निं यूपाङ्कितोद्यान-वन-पुष्प-फलान्वितम् ।
सरोभिः सारसैर्हंसैराह्वयन्तमिवातिथिम् ॥ ४२ ॥
वायुलोलतताजालकुसुमालिकुलाकुलैः ।

प्रणामाह्वान-सत्कार-मधुरालापवीक्षणैः ॥ ४३ ॥
तद्ब्रह्मसदनं देवाः सेश्वराः क्लिन्नमानसाः ।
विविशुस्तदनुज्ञाता निजकार्य्यं निवेदितुम् ॥ ४४ ॥

त्रिभुवनजनकं सदासनस्थं
सनक-सनन्दन-सनातनैश्च सिद्धैः ।
परिसेवितपादकमलं
ब्रह्माणं देवता नेमुः ॥ ४५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कलिविवरणं नाम प्रथमोऽध्यायः ।

कल्किपुराणम्।

द्वितीयाध्यायः।

सूत उवाच।

उपविष्टास्ततो देवा ब्रह्मणो वचनात् पुरः।
कलेर्दोषाद्धर्म्महानिं कथयामासुरादरात्॥ १॥
देवानां तद्वचः श्रुत्वा ब्रह्मा तानाह दुःखितान्।
प्रसादयित्वा तं विष्णुं साधयिष्याम्यभीप्सितम्॥ २॥
इति देवैः परिवृतो गत्वा गोलोकवासिनम्।
स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्॥ ३॥
तत् श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्।
शम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो! कन्यायां त्वन्निदेशतः॥ ४॥
चतुर्भिर्भ्रातृभिर्देव! करिष्यामि कलिक्षयम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥ ५॥
इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति।
बृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्यैषा पद्मानाम्नी जनिष्यति॥ ६॥

यात यूयं भुवं देवाः स्वांशावतरणे रताः ।
राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि ॥ ७ ॥
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्ब्बवत् ।
कलिव्यालं संनिरस्य प्रयास्ये स्वालयं विभो ! ॥ ८ ॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः ।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः ॥ ९ ॥
महिमा स्वस्य भगवान् निजजन्मकृतोद्यमः ।
विप्रर्षे ! शम्भलग्राममाविवेश परात्मकः ॥ १० ॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ।
ग्रह-नक्षत्र-राश्यादि-सेवित-श्रीपदाम्बुजम् ॥ ११ ॥
सरित्समुद्रा गिरयो लोकाः सस्थाणुजङ्गमाः ।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ ॥ १२ ॥
बभूवुः सर्व्वसत्वानामानन्दा विविधाश्रयाः ।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः ॥ १३ ॥
चक्रुर्वाद्यानि गन्धर्व्वा ननृतुश्चाप्सरोगणाः ॥ १४ ॥
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः ।
जाते ददृशतुः पुत्रं पितरौ हृष्टमानसौ ॥ १५ ॥
धातृमाता महाषष्ठी नाभिच्छेत्री तदम्बिका ।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता ॥ १६ ॥

तस्य विष्णोरनन्तस्य वसुधाऽधात् पयःसुधाम्।
मातृका माङ्गल्यवचः कृष्णजन्मदिने तथा॥ १७॥
ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥ १८॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ! विचारितम्॥ १९॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सशीतः प्राह तरसा ब्रह्मणो वचनादृतः॥ २०॥
तत् श्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥ २१॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु शम्भलग्रामे सोत्सवा जीवजातयः।
मङ्गलाचारबहुलाः पापतापविवर्ज्जिताः॥ २२॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्।
पूर्णकामा विप्रमुख्यानाहूयादात् गवां शतम्॥ २३॥
हरेः कल्याणकृद्विष्णुयशाः शुद्धेन चेतसा।
सामर्ग्यजुर्भिर्विज्ञैरग्र्यैस्तन्नामकरणे रतः॥ २४॥
तदा रामः कृपो व्यासो द्रौणिर्भिक्षुशरीरिणः।
समायाता हरिं द्रष्टुं बालकत्वमुपागतम्॥ २५॥

तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान्।
हृष्टरोमा द्विजवरः पूजयाञ्चक्र ईश्वरान्॥ २६॥
पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः।
हरिं क्रोड़गतं तस्य दद्दृशुः सर्व्वमूर्त्तयः॥ २७॥
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः।
कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्बुधाः॥ २८॥
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम्।
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः॥ २९॥
ततः स ववृधे तत्र सुमत्या परिपालितः।
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी॥ ३०॥
कल्केर्ज्येष्ठास्त्रयः शूराः कवि-प्राज्ञ-सुमन्त्रकाः।
पितृमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः॥ ३१॥
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः।
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः॥ ३२॥
विशाखयूप-भूपाल-पालितास्तापवर्ज्जिताः।
ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः॥ ३३॥
ततो विष्णुयशाः पुत्रं धीरं सर्व्वगुणाकरम्।
कल्किं कमलपत्राक्षं प्रोवाच पठनादृतम्॥ ३४॥
तात! ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम्।

सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥३५॥

कल्किरुवाच।

को वेदः का च सावित्री केन सूत्रेण संस्कृताः।
ब्राह्मणा विदिता लोके तत्तत्त्वं वद तात! माम्॥३६॥

पितोवाच।

वेदो हरेर्वाक् सावित्री वेदमाता प्रतिष्ठिता।
त्रिगुणञ्च त्रिवृत्सूत्रं तेन विप्राः प्रतिष्ठिताः॥ ३७॥
दशयज्ञैः संस्कृता ये ब्राह्मणा ब्रह्मवादिनः।
तत्र वेदाश्च लोकानां त्रयाणामिह पोषकाः॥ ३८॥
यज्ञाध्ययन-दानादि-तपःस्वाध्याय-संयमैः।
प्रीणयन्ति हरिं भक्त्या वेद-तन्त्र-विधानतः॥ ३९॥
तस्मात् यथोपनयन-कर्म्मणोऽहं द्विजैः सह।
संस्कर्त्तुं बान्धवजनैस्त्वामिच्छामि शुभे दिने॥ ४०॥

पुत्र उवाच।

के च ते दश संस्कारा ब्राह्मणेषु प्रतिष्ठिताः।
ब्राह्मणाः केन वा विष्णुमर्च्चयन्ति विधानतः॥ ४१॥

पितोवाच।

ब्राह्मण्यां ब्राह्मणाद् यातो गर्भाधानादिसंस्कृतः।
सन्ध्यात्रयेण सावित्री-पूजा-जप-परायणः॥ ४२॥

तपस्वी सत्यवाग्धीरो धर्म्मात्मा त्राति संसृतिम् ।
विष्णर्च्चनमिदं ज्ञात्वा सदानन्दमयो द्विजः ॥ ४३ ॥

पुत्र उवाच ।

कुत्रास्ते स द्विजो येन तारयत्यखिलं जगत् ।
सन्मार्गेण हरिं प्रीणन् कामदोग्धा जगन्त्रये ॥ ४४ ॥

पितोवाच ।

कलिना बलिना धर्म्म-घातिना द्विज-पातिना ।
निराकृताधर्म्मरता गता वर्षान्तरान्तरम् ॥ ४५ ॥
ये स्वल्पतपसो विप्राः स्थिताः कलियुगान्तरे ।
शिश्नोदरभृतोऽधर्म्मनिरता विरतक्रियाः ॥ ४६ ॥
पापसारा दुराचारास्तेजोहीनाः कलाविह ।
आत्मानं रक्षितुं नैव शक्ताः शूद्रस्य सेवकाः ॥ ४७ ॥

इति जनकवचो निशम्य कल्किः
कलिकुलनाशमनोऽभिलाषजन्मा ।
द्विजनिजवचनैस्तदोपनीतो
गुरुकुलवासमुवास साधनायः ॥४८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्किजन्मोपनयनं नाम द्वितीयोऽध्यायः ।

कल्किपुराणम्।

तृतीयाध्याय:।

सूत उवाच।

ततो वस्तुं गुरुकुले यान्तं कल्किं निरीक्ष्य सः।
महेन्द्राद्रिस्थितो रामः समानीयाश्रमं प्रभुः ॥ १ ॥
प्राह त्वां पाठयिष्यामि गुरुं मां विद्धि धर्म्मतः।
भृगुवंशसमुत्पन्नं जामदग्न्यं महाप्रभुम् ॥ २ ॥
वेदवेदाङ्गतत्त्वज्ञं धनुर्वेदविशारदम्।
कृत्वा निःक्षत्रियां पृथ्वीं दत्त्वा विप्राय दक्षिणाम् ॥३॥
महेन्द्राद्रौ तपस्तप्तुमागतोऽहं द्विजात्मज !।
त्वं पठात्र निजं वेदं यच्चान्यच्छास्त्रमुत्तमम् ॥ ४ ॥
इति तद्वच आश्रुत्य संप्रहृष्टतनूरुहः।
कल्किः पुरो नमस्कृत्य वेदाधीती ततोऽभवत् ॥ ५ ॥
साङ्गं चतुःषष्टिकलं धनुर्वेदादिकञ्च यत्।
समधीत्य जामदग्न्यात् कल्किः प्राह कृताञ्जलिः ॥६॥
दक्षिणां प्रार्थय विभो! या देया तव सन्निधौ।
यया मे सर्व्वसिद्धिः स्याद् या स्यात् त्वत्तोषकारिणी ॥७

राम उवाच ।

ब्रह्मणा प्रार्थितो भूमन्! कलिनिग्रहकारणात् ।
विष्णुः सर्व्वाश्रयः पूर्णः स जातः शम्भले भवान् ॥८॥
मत्तो विद्यां शिवादस्त्रं लब्ध्वा वेदमयं शुकम् ।
सिंहले च प्रियां पद्मां धर्म्मान् संस्थापयिष्यसि ॥ ९॥
ततो दिग्विजये भूपान् धर्म्महीनान् कलिप्रियान् ।
निगृह्य बौद्धान् देवापिं मरुञ्च स्थापयिष्यसि ॥ १०॥
वयमेतैस्तु संतुष्टाः साधुकृत्यैः सदक्षिणाः ।
यज्ञं दानं तपः कर्म्म करिष्यामो यथोचितम् ॥ ११ ॥
इत्येतत् वचनं श्रुत्वा नमस्कृत्य मुनिं गुरुम् ।
विल्वोदकेश्वरं देवं गत्वा तुष्टाव शङ्करम् ॥ १२ ॥
पूजयित्वा यथान्यायं शिवं शान्तं महेश्वरम् ।
प्रणिपत्याशुतोषं तं ध्यात्वा प्राह हृदि स्थितम् ॥१३॥

कल्किरुवाच ।

गौरीनाथं विश्वनाथं शरण्यं
भूतावासं वासुकीकण्ठभूषम् ।
त्र्यक्षं पञ्चास्यादिदेवं पुराणं
वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥ १४ ॥
योगाधीशं कामनाशं करालं
गङ्गासङ्गक्लिन्नमूर्द्धानमीशम् ।

जटाजूटाटोपरिच्छिन्नभावं
महाकालं चन्द्रभालं नमामि ॥ १५ ॥
श्मशानस्थं भूतवेतालसङ्गं
नानाशस्त्रैः खड्गशूलादिभिश्च ।
व्यग्रात्युग्रा बाहवो लोकनाशे
यस्य क्रोधोद्भूतलोकोऽस्तमेति ॥ १६ ॥
यो भूतादिः पञ्चभूतैः सिसृक्षुः
तन्मात्रात्मा कालकर्म्मस्वभावैः ।
प्रहृत्येदं प्राप्य जीवत्वमीशो
ब्रह्मानन्दो रमते तं नमामि ॥ १७ ॥
स्थितौ विष्णुः सर्व्वजिष्णुः सुरात्मा
लोकान् साधून् धर्म्मसेतून् बिभर्षि ।
ब्रह्माद्यांशे योऽभिमानी गुणात्मा
शब्दाद्यङ्गैस्तं परेशं नमामि ॥ १८ ॥
यस्याज्ञया वायवो वान्ति लोके
ज्वलत्यग्निः सविता याति तप्यन् ।
शीतांशुः खे तारकैः सग्रहैश्च
प्रवर्त्तते तं परेशं प्रपद्ये ॥ १९ ॥
यस्याश्वासात् सर्व्वधात्री धरित्री

देवो वर्षत्यम्बु कालः प्रमाता ।
मेरुर्मध्ये भुवनानाञ्च भर्त्ता
तमीशानं विश्वरूपं नमामि ॥ २० ॥
इति कल्किस्तवं श्रुत्वा शिवः सर्व्वात्मदर्शनः ।
साक्षात् प्राह हसन्नीशः पार्व्वतीसहितोऽग्रतः ॥ २१ ॥
कल्केः संस्पृश्य हस्तेन समस्तावयवं मुदा ।
तमाह वरय प्रेष्ठ ! वरं यत्तेऽभिकाङ्क्षितम् ॥२२॥
त्वया कृतमिदं स्तोत्रं ये पठन्ति जना भुवि ।
तेषां सर्व्वार्थसिद्धिः स्यादिह लोके परत्र च ॥ २३ ॥
विद्यार्थी चाप्नुयाद्विद्यां धर्म्मार्थी धर्म्ममाप्नुयात् ।
कामानवाप्नुयात् कामी पठनात् श्रवणादपि ॥२४॥
त्वं गारुड़मिदं चाश्वं कामगं बहुरूपिणम् ।
शुकमेनञ्च सर्व्वज्ञं मया दत्तं गृहाण भोः ! ॥२५ ॥
सर्व्वशास्त्रास्त्रविद्वांसं सर्व्ववेदार्थपारगम् ।
जयिनं सर्व्वभूतानां त्वां वदिष्यन्ति मानवाः ॥ २६ ॥
रत्नत्सरुं करालञ्च करवालं महाप्रभम् ।
गृहाण गुरुभारायाः पृथिव्या भारसाधनम् ॥ २७ ॥
इति तद्वच आश्रुत्य नमस्कृत्य महेश्वरम् ।
शम्भलग्राममगमत् तुरगेण त्वरान्वितः ॥ २८ ॥

पितरं मातरं भ्रातॄन् नमस्कृत्य यथाविधि ।
सर्व्वं तद्वर्णयामास जामदग्न्यस्य भाषितम् ॥ २९ ॥
शिवस्य वरदानञ्च कथयित्वा शुभाः कथाः ।
कल्किः परमतेजस्वी ज्ञातिभ्योऽप्यवदन्मुदा ॥ ३० ॥
गार्ग्यभर्ग्यविशालाद्यास्तत् श्रुत्वा नन्दिताः स्थिताः ।
कथोपकथनं जातं शम्भलग्रामवासिनाम् ॥ ३१ ॥
विशाखयूपभूपालः श्रुत्वा तेषाञ्च भाषितम् ।
प्रादुर्भावं हरेर्मेने कलिनिग्रहकारकम् ॥ ३२ ॥
माहिष्मत्यां निजपुरे यागदानतपोव्रतान् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रानपि हरेः प्रियान् ३३
स्वधर्म्मनिरतान् दृष्ट्वा धर्म्मिष्ठोऽभून्नृपः स्वयम् ।
प्रजापालः शुद्धमनाः प्रादुर्भावात् श्रियः पतेः ॥३४॥
अधर्म्मवंश्यांस्तान् दृष्ट्वा जनान् धर्म्मक्रियापरान् ।
लोभानृतादयो जग्मुस्तद्देशात् दुःखिता भृशम् ॥३५
जैत्रं तुरगमारुह्य खड्गञ्च विमलप्रभम् ।
दंशितः सशरं चापं गृहीत्वागात् पुराद्बहिः ॥ ३६ ॥
विशाखयूपभूपालः प्रायात् साधुजनप्रियः ।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले ॥ ३७ ॥
कविं प्राज्ञं सुमन्तुञ्च पुरस्कृत्य महाप्रभम् ।
गार्ग्य-भर्ग्य-विशालैश्च ज्ञातिभिः परिवारितम् ॥३८॥

विशाखयूपो ददृशे चन्द्रं तारागणैरिव ।
पुराद्बहिः सुरैर्यद्वदिन्द्रमुच्चैःश्रवःस्थितम् ॥ ३९ ॥
विशाखयूपोऽवनतः संप्रहृष्टतनूरुहः ।
कल्केरालोकनात् सद्यः पूर्णात्मा वैष्णवोऽभवत् ॥४०॥
सह राज्ञा वसन् कल्किः धर्म्मानाह पुरोदितान् ।
ब्राह्मणक्षत्त्रियविशामाश्रमाणां समासतः ॥ ४१ ॥
ममांशान् कलिविभ्रष्टानिति मज्जन्मसंगतान् ।
राजसूयाश्वमेधाभ्यां मां यजस्व समाहितः ॥ ४२ ॥
अयमेव परो लोको धर्म्मश्चाहं सनातनः ।
कालस्वभावसंस्काराः कर्म्मानुगतयो मम ॥ ४३ ॥
सोमसूर्य्यकुले जातौ देवापिमरुसंज्ञकौ ।
स्थापयित्वा कृतयुगं कृत्वा यास्यामि सद्गतिम् ॥ ४४॥
इति तद्वचनं श्रुत्वा राजा कल्किं हरिं प्रभुम् ।
प्रणम्य प्राह सद्धर्म्मान् वैष्णवान् मनसेप्सितान् ॥४५॥

इति नृपवचनं निशम्य कल्किः
कलिकुलनाशनवासनावतारः ।
निजजनपरिषद्विनोदकारी
मधुरवचोभिराह साधुधर्म्मान् ॥ ४६ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्किवरलाम-
नामकस्तृतीयोऽध्यायः ।

कल्किपुराणम् ।

चतुर्थोध्याय: ।

सूत उवाच ।

ततः कल्किः सभामध्ये राजमानो रविर्यथा ।
बभाषे तं नृपं धर्म्म-मयो धर्म्मान् द्विजप्रियान् * ॥१॥

कल्किरुवाच ।

कालेन ब्रह्मणो नाशे प्रलये मयि सङ्गताः ।
अहमेवासमेवाग्रे नान्यत् कार्य्यमिदं मम ॥ २ ॥
प्रसुप्तलोकतन्त्रस्य द्वैतहीनस्य चात्मनः ।
महानिशान्ते रन्तुं मे समुद्भूतो विराट् प्रभुः ॥ ३ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
तदङ्गजोऽभवद् ब्रह्मा वेदवक्त्रो महाप्रभुः ॥ ४ ॥
जीवोपाधेर्ममांशाच्च प्रकृत्या मायया स्वया ।
ब्रह्मोपाधिः स सर्व्वज्ञो मम वाग्वेदशासितः ॥ ५ ॥
ससर्ज्ज जीवजातानि कालमायांशयोगतः ।
देवा मन्वादयो लोकाः सप्रजापतयः प्रभुः ॥ ६ ॥

---

* द्विजोत्तमान् इति पाठान्तरम् ।

गुणिन्या माययांशा मे नानोपाधौ ससर्ज्जिरे ।
सोपाधय इमे लोका देवाः सस्थानुजङ्गमाः ॥ ७ ॥
ममांशा मायया सृष्टा यतो मय्याविशन् लये ।
एवंविधा ब्राह्मणा ये मत्शरीरा मदात्मिकाः ॥ ८ ॥
मामुद्धरन्ति भुवने यज्ञाध्ययनसत्क्रियाः ।
मां प्रसेवन्ति शंसन्ति तपोदानक्रियास्विह ॥ ९ ॥
स्मरन्त्यामोदयन्त्येव नान्ये देवादयस्तथा ।
ब्राह्मणा वेदवक्तारो वेदा मे मूर्त्तयः पराः* ॥ १० ॥
तस्मादिमे ब्राह्मणजास्तैः पुष्टास्त्रिजगज्जनाः ।
जगन्ति मे शरीराणि तत्पोषे ब्रह्मणो वरः ॥ ११ ॥
तेनाहं तान् नमस्यामि शुद्धसत्त्वगुणाश्रयः ।
ततो जगन्मयं पूर्ब्बं † मां सेवन्तेऽखिलाश्रयाः ॥ १२ ॥

विशाखयूप उवाच ।

विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तत्कृता ।
यतस्त्वानुग्रहेण वाग्वाणा ब्राह्मणाः कृताः ॥ १३ ॥

कल्किरुवाच ।

वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत्परम् ।

---

* वेदात्ममूर्त्तयः परा इति वा पठनीयम् ।
† ततो जगन्मयं पूर्णम् इति वा पाठः ।

ते वेदा ब्राह्मणमुखे नानाधर्म्मे प्रकाशिताः ॥ १४ ॥
यो धर्म्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला ।
तयाहं तोषितः श्रीशः संभवामि युगे युगे ॥ १५ ॥
ऊर्द्ध्वन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥ १६ ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसंमितम् ।
शिरोधरात् नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥१७॥
यजुर्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥ १८ ॥
मृद्भस्मचन्दनाद्यैस्तु धारयेत् तिलकं द्विजः ।
भाले त्रिपुण्ड्रं कर्म्माङ्गं केशपर्य्यन्तमुज्ज्वलम् ॥ १९ ॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत् त्रिधा कृतम् ।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम् ॥ २० ॥
ब्राह्मणानां करे स्वर्गा वाचो वेदाः करे हरिः ।
गात्रे तीर्थानि रागाश्च नाड़ीषु प्रकृतिस्त्रिवृत् ॥ २१ ॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसंज्ञितम् ।
तेषां स्तनान्तरे धर्म्मः पृष्ठोऽधर्म्मः प्रकीर्त्तितः ॥२२॥
भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्याः सदुक्तिभिः ।
चतुराश्रम्यकुशला मम धर्म्मप्रवर्त्तकाः ॥ २३ ॥

बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः ।
तेषां वचः पालयितुम् अवताराः कृता मया ॥२४॥
महाभाग्यं ब्राह्मणानां सर्व्वपापप्रणाशनम् ।
कलिदोषहरं श्रुत्वा मुच्यते सर्व्वतो भयात् ॥ २५ ॥
इति कल्किवचः श्रुत्वा कलिदोषविनाशनम् ।
प्रणम्य तं प्रहृष्टमनाः प्रययौ वैष्णवाग्रणीः ॥ २६ ॥
गते राजनि सन्ध्यायां शिवदत्तशुको बुधः ।
चरित्वा कल्किपुरतः स्तुत्वा तं पुरतः स्थितः ॥ २७ ॥
तं शुकं प्राह कल्किस्तु सस्मितं स्तुतिपाठकम् ।
स्वागतं भवता कस्मात् देशात् किं खादितं ततः ॥२८॥

शुक उवाच ।

शृणु नाथ ! वचो मह्यं कौतूहलसमन्वितम् ।
अहं गतश्च जलधेर्मध्ये सिंहलसंज्ञके ॥ २९ ॥
यथावृत्तं द्वीपगतं तच्चित्रं श्रवणप्रियम्* ।
वृहद्रथस्य नृपतेः कन्यायाश्चरितामृतम् ॥ ३० ॥
कौमुद्यामिह जाताया जगतां पापनाशनम् ।
चरितं सिंहले द्वीपे चातुर्वर्ण्यजनावृते ॥ ३१ ॥

---

* चरित्रं श्रवणप्रियम् इति पुस्तकान्तरस्य पाठः ।

प्रासाद-हर्म्म्य-सदन-पुर-राजि-विराजिते ।
रत्न-स्फाटिक-कुड्यादि-स्वर्लताभिर्विभूषिते* ॥ ३२ ॥
स्त्रीभिरुत्तमवेशाभिः पद्मिनीभिः समावृते ।
सरोभिः सारसैर्हंसैरुपकूलजलाकुले ॥ ३३ ॥
भृङ्गरङ्गप्रसङ्गाढ्यै पद्मैः कह्लारकुन्दकैः† ।
नानाम्बुजलताजाल-वनोपवन-मण्डिते ॥ ३४ ॥
देशे वृहद्रतो राजा महाबलपराक्रमः ।
तस्य पद्मावती कन्या धन्या रेजे यशस्विनी ॥ ३५ ॥
भुवने दुर्लभा लोकेऽप्रतिमा वरवर्णिनी ।
काम-मोह-करी चारु-चरित्रा चित्र-निर्मिता ॥३६॥
शिवसेवापरा गौरी यथा पूज्या सुसम्मता ।
सखीभिः कन्यकाभिश्च जपध्यानपरायणा ॥ ३७ ॥
ज्ञात्वा ताञ्च हरेर्लक्ष्मीं समुद्भूतां वराङ्गनाम्‡ ।
हरः प्रादुरभूत् साक्षात् पार्व्वत्या सह हर्षितः ॥३८॥
सा तमालोक्य वरदं शिवं गौरीसमन्वितम् ।
लज्जिताधोमुखी किञ्चिन्नोवाच पुरतः स्थिता ॥३९॥

---

* स्वर्लताभिर्विराजिते इत्यपरे पठन्ति ।
† कह्लारहल्लकैः इति वा पाठ्यम् ।
‡ वराननाम् इत्यपरे पठन्ति ।

हरस्तामाह सुभगे ! तव नारायणः पतिः ।
पाणिं ग्रहीष्यति मुदा नान्यो योग्यो नृपात्मजः ॥४०॥
कामभावेन भुवने ये त्वां पश्यन्ति मानवाः ।
तेनैव वयसा नार्य्यो भविष्यन्त्यपि तत्क्षणात् ॥४१॥
देवासुरास्तथा नागा गन्धर्व्वाश्चारणादयः ।
त्वया रन्तुं यथाकाले भविष्यन्ति किल स्त्रियः ॥ ४२॥
विना नारायणं देवं त्वत्पाणिग्रहणार्थिनम् ।
गृहं याहि तपस्त्यक्त्वा भोगायतनमुत्तमम् ॥ ४३ ॥
मा क्षोभय हरेः पत्नि ! कमले ! विमलं कुरु ।
इति दत्त्वा वरं सोमस्तत्रैवान्तर्दधे हरः ॥ ४४ ॥

हरवरमिति सा निशम्य पद्मा
समुचितमात्ममनोरथप्रकाशम् ।
विकसितवदना प्रणम्य सोमं
निजजनकालयमाविवेश रामा ॥ ४५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये हर-वर-प्रदान-
नामकश्चतुर्थोऽध्यायः ।

कल्किपुराणम् ।

पञ्चमाध्यायः ।

शुक उवाच ।

गते बहुतिथे काले पद्मां वीक्ष्य वृहद्रथः ।
निरूढ़यौवनां पुत्रीं विस्मितः पापशङ्कया ॥ १ ॥
कौमुदीं प्राह महिषीं पद्मोद्वाहेऽत्र कं नृपम् ।
वरयिष्यामि सुभगे ! कुलशीलसमन्वितम् ॥ २ ॥
सा तमाह पतिं देवी शिवेन प्रतिभाषितम् ।
विष्णुरस्याः पतिरिति भविष्यति न संशयः ॥ ३ ॥
इति तस्या वचः श्रुत्वा राजा प्राह कदेति ताम् ।
विष्णुः सर्व्वगुहावासः पाणिमस्या ग्रहीष्यति ॥ ४ ॥
न मे भाग्योदयः कश्चित् येन जामातरं हरिम् ।
वरयिष्यामि कन्यार्थे वेदवत्या मुनेर्यथा ॥ ५ ॥
इमां स्वयं वरां पद्मां पद्मामिव महोदधेः ।
मथनेऽसुरदेवानां तथा विष्णुर्ग्रहीष्यति ॥ ६ ॥
इति भूपगणान् भूपः समाहूय पुरस्कृतान् ।
गुणशीलवयोरूपविद्याद्रविणसंवृतान् ॥ ७ ॥

स्वयं वरार्थं पद्मायाः सिंहले बहुमङ्गले ।
विचार्य्य कारयामास स्थानं भूपनिवेशनम् ॥ ८ ॥
तत्रायाता नृपाः सर्व्वे विवाहकृतनिश्चयाः ।
निजसैन्यैः परिवृताः स्वर्णरत्नविभूषिताः ॥ ९ ॥
रथान् गजानश्ववरान् समारूढ़ा महाबलाः ।
श्वेतच्छत्रकृतच्छायाः श्वेतचामरवीजिताः ॥ १० ॥
शस्त्रास्त्रतेजसा दीप्ता देवाः सेन्द्रा इवाभवन् ।
रुचिराश्वः सुकर्म्मा च मदिराक्षो दृढ़ाशुगः ॥ ११ ॥
कृष्णसारः पारदश्च जीमूतः क्रूरमर्द्दनः ।
काशः कुशाम्बुर्वसुमान् कङ्कः क्रथनसञ्जयौ ॥ १२ ॥
गुरुमित्रः प्रमाथी च विजृम्भः सृञ्जयोऽक्षमः* ।
एते चान्ये च बहवः समायाता महाबलाः ॥ १३ ॥
विविशुस्ते रङ्गगता स्वस्वस्थानेषु पूजिताः ।
वाद्यताण्डवसंहृष्टाश्चित्रमाल्याम्बराधराः† ॥ १४ ॥
नानाभोगसुखोद्रिक्ताः कामरामा रतिप्रदाः ।
तानालोक्य सिंहलेशः स्वां कन्यां वरवर्णिनीम् ॥१५॥
गौरीं चन्द्राननां श्यामां तारहारविभूषिताम् ।

---

* सञ्जयोऽक्षमः इति वा पाठः ।

† चित्रमाल्याम्बराम्बरा इति क्वचित् पाठः ।

मणिमुक्ताप्रवालैश्च सर्व्वाङ्गालङ्कृतां शुभाम् ॥ १६ ॥
किं मायां मोहजननीं किंवा कामप्रियां भवि ।
रूपलावण्यसम्पत्त्या न चान्यामिह दृष्टवान् ॥ १७ ॥
स्वर्गे क्षितौ वा पाताले ऽप्यहं सर्व्वत्रगो यदि ।
पश्चाद्दासोगणाकीर्णा सखीभिः परिवारिता ॥१८॥
दौवारिकैर्वेत्रहस्तैः शासितान्तःपराद्वहिः ।
पुरोवन्दिगणाकीर्णां प्रापयामास तां शनैः ॥ १९ ॥
नूपुरैः किङ्किणीभिश्च क्वणन्तीं जनमोहिनीम् ।
स्वागतानां नृपाणाञ्च कुलशीलगुणान् बहून् ॥२०॥
शृण्वन्ती हंसगमना रत्नमालाकरग्रहा ।
रुचिरापाङ्गभङ्गेन प्रेक्षन्ती लोलकुण्डला ॥ २१ ॥
नृत्यत्कुन्तलसोपानगण्डमण्डलमण्डिता ।
किञ्चित्स्मेरोल्लसद्वक्त्रदशनद्योतदीपिता ॥ २२ ॥
वेदीमध्यारुणक्षौमवसना कोकिलस्वना ।
रूपलावण्यपण्येन क्रेतुकामा जगत्त्रयम् ॥ २३ ॥

समागतां तां प्रसमीक्ष्य भूपाः
संमोहिनीं कामविमूढचित्ताः ।
पेतुः क्षितौ विस्मृतवस्त्रशस्त्राः
रथाश्वमत्तद्विपवाहनास्ते ॥ २४ ॥

तस्याः स्वच्छोभनिरीक्षणेन
स्त्रियो बभूवुः कमनीयरूपाः ।
वृहन्नितम्बस्तनभारनम्राः
सुमध्यमास्तत्स्मृतिजातरूपाः ॥ २५ ॥
विलासहासव्यसनातिचित्राः
कान्ताननाः शोणसरोजनेत्राः ।
स्त्रीरूपमात्मानमवेक्ष्य भूपाः
तामन्वगच्छन् विशदानुवृत्त्या ॥ २६ ॥
अहं वटस्थः परिधर्षितात्मा
पद्माविवाहोत्सवदर्शनाकुलः ।
तस्या वचोऽन्तर्हृदि दुःखितायाः
श्रोतुं स्थितः स्त्रीत्वमितेषु तेषु ॥ २७ ॥
जानीहि कल्के ! कमलाविलापं
श्रुतं विचित्रं जगतामधीश ! ।
गते विवाहोत्सवमङ्गले सा
शिवं शरण्यं हृदये निधाय ॥ २८ ॥
तान् दृष्ट्वा नृपतीन् गजाश्वरथिभि-
स्त्यक्तान् सखित्वं गतान् *

* गजाश्वरथिभिस्त्यक्ता सखित्वं गतान् इति पाठान्तरम् ।

स्त्रीभावेन समन्विताननुगतान्
पद्मां विलोक्यान्तिके ।
दीना त्यक्तविभूषणा विलिखती
पादाङ्गुलैः कामिनी
ईशं कर्त्तुं निजनाथमीश्वरवच-
स्तथ्यं हरिं साऽस्मरत् ॥ २९ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पद्मास्वयंवरे भूपतीनां स्त्रीत्वकथनं नाम पञ्चमोऽध्यायः ।

षष्ठाध्यायः ।

शुक उवाच ।

ततः सा विस्मितमुखी पद्मा निजजनैर्वृता ।
हरिं पतिं चिन्तयन्ती प्रोवाच विमलां स्थिताम् ॥ १॥

पद्मोवाच ।

विमले ! किं कृतं धाता ललाटे लिखनं मम ।
दर्शनादपि लोकानां पुंसां स्त्रीभावकारकम् ॥ २ ॥
ममापि मन्दभाग्यायाः पापिन्याः शिवसेवनम् ।
विफलत्वमनुप्राप्तं वीजमुप्तं यथोषरे ॥ ३ ॥
हरिर्लक्ष्मीपतिः सर्व्वजगतामधिपः प्रभुः ।
मत्कृतेऽप्यभिलाषं किं करिष्यति जगत्पतिः ॥ ४ ॥
यदि शम्भोर्वचो मिथ्या यदि विष्णुर्न मां स्मरेत् ।
तदाहमनले देहं त्यक्ष्यामि करिभाविता ॥ ५ ॥
क्व चाहं मानुषी दीना क्वास्ते देवो जनार्द्दनः ।
निगृहीता विधात्राहं शिवेन परिवञ्चिता ॥ ६ ॥
विष्णुना च परित्यक्ता मदन्या कात्र जीवति ॥ ७ ॥

इति नाना विलापिन्या वचनं शोचनाश्रयम्।
पद्मायाश्चारुचेष्टाया: श्रुत्वायातस्तवान्तिके ॥ ८ ॥
शुकस्य वचनं श्रुत्वा कल्किः परमविस्मितः।
तं जगाद पुनर्याहि पद्मां बोधयितुं प्रियाम्॥ ९ ॥
मत्सन्देशहरो भूत्वा मद्रूपगुणकीर्त्तनम्।
श्रावयित्वा पुनः कीर ! समायास्यसि बान्धव ! ॥१०॥
सा मे प्रिया पतिरहं तस्या दैवविनिर्मितः।
मध्यस्थेन त्वया योगमावयोश्च भविष्यति ॥ ११ ॥
सर्व्वज्ञोऽसि विधिज्ञोऽसि कालज्ञोऽसि कथामृतैः।
तामाश्वास्य ममाश्वासकथास्तस्याः समाहरः ॥ १२ ॥
इति कल्केर्वचः श्रुत्वा शुकः परमहर्षितः।
प्रणम्य तं प्रीतमनाः प्रययौ सिंहलं त्वरन्॥ १३ ॥
खगः समुद्रपारेण स्नात्वा पीत्वामृतं पयः।
वीजपूरफलाहारी ययौ राजनिवेशनम्॥ १४ ॥
तत्र कन्यापुरं गत्वा वृक्षे नागेश्वरे वसन्।
पद्मामालोक्य तां प्राह शुको मानुषभाषया॥ १५ ॥
कुशलं ते वरारोहे ! रूपयौवनशालिनि !।
त्वां लोलनयनां मन्ये लक्ष्मीरूपामिवापराम्॥ १६ ॥
पद्माननां पद्मगन्धां पद्मनेत्रां कराम्बुजे।

कमलं कालयन्तीं त्वां लक्षयामि परां श्रियम् ॥१७॥
किं धात्रा सर्व्वजगतां रूपलावण्यसम्पदाम् ।
निर्म्मितासि वरारोहे! जीवानां मोहकारिणि! ॥१८॥
इति भाषितमाकर्ण्य कीरस्यामितमद्भुतम् * ।
हसन्ती प्राह सा देवी तं पद्मा पद्ममालिनी ॥१९॥
कस्त्वं ? कस्मादागतोऽसि कथं मां शुकरूपधृक् ।
देवो वा दानवो वा त्वम् ? आगतोऽसि दयापरः ॥२०॥

शुक उवाच ।

सर्व्वज्ञोऽहं कामगामी सर्व्वशास्त्रार्थतत्त्ववित् ।
देवगन्धर्व्वभूपानां सभासु परिपूजितः ॥२१॥
चरामि स्वेच्छया खे त्वाम् ईक्षणार्थमिहागतः ।
त्वामहं हृदि संतप्तां त्यक्तभोगां मनस्विनीम् ॥२२॥
हास्यालाप-सखीसङ्ग-देहाभरण-वर्ज्जिताम् ।
विलोक्याहं दीनचेताः पृच्छामि श्रोतुमीरितम् ।
कोकिलालाप-सन्ताप-जनकं मधुरं मृदु ॥२३॥
तव दन्तौष्ठजिह्वाग्रलुलिताक्षरपङ्क्तयः ।
यत्कर्णकुहरे मग्नास्तेषां किं वर्ण्यते तपः ॥२४॥
सौकुमार्य्यं शिरीषस्य क कान्तिर्वा निशाकरे ।

---

* कीरस्यामृतमद्भुतम् इति वा पाठः ।

पीयूषं त्वा वदन्त्येवानन्दं ब्रह्मणि ते बुधाः * ॥ २५ ॥
तव बाहुलताबद्धा ये पास्यन्ति सुधाननम्।
तेषां तपोदानजपैर्व्यथैः किं जनयिष्यति ॥ २६ ॥
तिलकालकसंमिश्रं लोलकुण्डलमण्डितम्।
लोलेच्चणोल्लसद्वक्त्रं पश्यतां न पुनर्भवः ॥ २७ ॥
बृहद्व्रतसुते ! स्वाधिं वद भामिनि यत्कृते † ।
तपःचीणामिव तनूं लच्चयामि रुजं विना।
कनकप्रतिमा यद्वत् ‡ पांशुभिर्मलिनीकृता ॥ २८ ॥

पद्मोवाच।

किं रूपेण कुलेनापि धनेनाभिजनेन वा।
सर्व्वं निष्फलतामेति यस्य दैवमदचिणम् ॥ २९ ॥
शृणु कीर ! समाख्यानं ¶ यदि वाविदितं तव।
बाल्य-पौगण्ड-कैशोरे हरसेवां करोम्यहम् ॥ ३० ॥
तेन पूजाविधानेन तुष्टो भूत्वा महेश्वरः।

---

* ब्रह्मणि तेऽधुना इति वा पाठः।

† वद भाविनि ! यत् कृतम् इति पाठान्तरम्।

‡ कनकप्रतिमं तद्वत् इत्यपरे पठन्ति।

¶ शृणु कीर ! समाख्यानम्।

वरं वरय पद्मे ! त्वमित्याह प्रियया सह ॥ ३१ ॥
लज्जयाधोमुखीमग्रे स्थितां मां वीक्ष्य शङ्करः ।
प्राह, ते भविता स्वामी हरिर्नारायणः प्रभुः ॥ ३२॥
देवो वा दानवो वान्यो गन्धर्व्वो वा तवेक्षणात् ।
कामेन मनसा नारी भविष्यति न संशयः ॥ ३३ ॥
इति दत्त्वा वरं सोमः प्राह विष्णूर्च्चनं यथा ।
तथाहं ते प्रवक्ष्यामि समाहितमनाः शृणु ॥ ३४ ॥
एताः सख्यो नृपाः पूर्व्वमाहूता ये स्वयंवरे ।
पित्रा धर्म्मार्थिना दृष्ट्वा रम्यां मां यौवनान्विताम् ॥ ३५ ॥
स्वागतास्ते सुखासीना विवाहकृतनिश्चयाः ।
युवानो गुणवन्तश्च रूपद्रविणसम्मताः ॥ ३६ ॥
स्वयंवरगतां मां ते विलोक्य रुचिरप्रभाम् ।
रत्नमालाश्रितकरां निपेतुः काममोहिताः ॥ ३७ ॥
तत उत्थाय संभ्रान्ताः संप्रेक्ष्य स्त्रीत्वमात्मनः ।
स्तनभारनितम्बेन गुरुणा परिणामिताः ॥ ३८ ॥
ह्रिया भिया च शत्रूणां मित्राणामतिदुःखदम् ।
स्त्रीभावं मनसा ध्यात्वा मामवानुगताः शुक ! ॥ ३९ ॥
परिचर्य्यां हरन्ताः सख्यः सर्व्वगुणान्विताः ।
मया सह तपोध्यानपूजाः कुर्व्वन्ति सम्मताः ॥ ४० ॥

तदुदितमिति संनिशम्य कीरः
श्रवणसुखं निजमानसप्रकाशम् ।
समुचितवचनैः प्रतोष्य पद्मां
मुरहरयजनं पुनः प्रचष्टे ॥ ४१ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये शुकपद्मा-
संवादे षष्ठोऽध्यायः ।

सप्तमाध्यायः ।

शुक उवाच ।

विष्णूर्च्चनं शिवेनोक्तं श्रोतुमिच्छाम्यहं शुभे ! ।
धन्यासि कृतपुण्यासि शिवशिष्यत्वमागता ॥ १ ॥
अहं भाग्यवशादत्र समागम्य तवान्तिकम् ।
शृणोमि परमाश्चर्य्यं कीराकारनिवारणम् ॥ २ ॥
भगवद्भक्तियोगञ्च जपध्यानविधिं मुदा ।
परमानन्द-सन्दोह-दान-दक्षं श्रुतिप्रियम् ॥ ३ ॥

पद्मोवाच ।

श्रीविष्णोरर्च्चनं पुण्यं शिवेन परिभाषितम् ।
यत् श्रद्धयानुष्ठितस्य श्रुतस्य गदितस्य च ॥ ४ ॥
सद्यः पापहरं पुंसां गुरुगोब्रह्मघातिनाम् ।
समाहितेन मनसा शृणु कीर ! यथोदितम् ॥ ५ ॥
कृत्वा यथोक्तकर्म्माणि पूर्व्वाह्णे स्नानकृत् शुचिः ।
प्रक्षाल्य पाणी पादौ च स्पृष्ट्वापः स्वासने वसेत् ॥ ६॥
प्राचीमुखः संयतात्मा साङ्गन्यासं प्रकल्पयेत् ।

भूतशुद्धिं ततोऽर्घ्यस्य स्थापनं विधिवच्चरेत् ॥ ७ ॥
ततः केशवकृत्यादि-न्यासेन तन्मयो भवेत् ।
आत्मानं तन्मयं ध्यात्वा हृदिस्थं स्वासने न्यसेत् ॥ ८॥
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ।
यथोपचारैः संपूज्य मूलमन्त्रेण देशिकः ॥ ९ ॥
ध्यायेत् पादादिकेशान्तं हृदयाम्बुजमध्यगम् ।
प्रसन्नवदनं देवं भक्ताभीष्टफलप्रदम् ॥ १० ॥

ओं नमो नारायणाय स्वाहा ।

योगेन सिद्धविबुधैः परिभाव्यमाणं
लक्ष्म्यालयं तुलसिकाचितभक्तभृङ्गम् ।
प्रोत्तुङ्गरक्तनखराङ्गुलिपत्रचित्रं
गङ्गारसं हरिपदाम्बुजमाश्रयेऽहम् ॥ ११ ॥
गुम्फन्मणिप्रचयघट्टितराजहंस-
सिञ्जत्सुनूपुरयुतं पदपद्मवृन्तम् ।
पीताम्बराञ्चलविलोलचलत्पताकं
स्वर्णत्रिवक्रवलयञ्च हरेः स्मरामि ॥ १२ ॥
जङ्घे सुपर्णगलनीलमणिप्रवृद्धे
शोभास्पदारुणमणिद्युतिचञ्चुमध्ये ।
आरक्तपादतललम्बनशोभमाने

लोकेक्षणोत्सवकरे च हरेः स्मरामि ॥ १३ ॥
ते जानुनी मखपतेर्भुजमूलसङ्ग-
रङ्गोत्सवावृततडिद्वसने विचित्रे ।
चञ्चत्पतत्त्रमुखनिर्गतसामगीत-
विस्तारितात्मयशसी च हरेः स्मरामि ॥ १४ ॥
विष्णोः कटिं विधिकृतान्तमनोजभूमिं
जीवाण्डकोषगणसङ्गदुकूलमध्याम् ।
नानागुणप्रकृतिपीतविचित्रवस्त्रां
ध्यायेन्निबद्धवसनां खगपृष्ठसंस्थाम् ॥ १५ ॥
शातोदरं भगवतस्त्रिवलिप्रकाशम्
आवर्त्तनाभिविकसद्विधिजन्मपद्मम् ।
नाड़ीनदीगणरसोत्थसितान्त्रसिन्धुं
ध्यायेऽण्डकोषनिलयं तनुलोमरेखम् ॥ १६ ॥
वक्षः पयोधितनयाकुचकुङ्कुमेन
हारेण कौस्तुभमणिप्रभया विभातम् ।
श्रीवत्सलक्ष्म हरिचन्दनजप्रसून-
मालोचितं भगवतः* सुभगं स्मरामि ॥ १७ ॥

---

* हरसंवरणप्रसूनमालाचितम् इति पाठान्तरम् ।

बाहू सुवेशसदनौ वलयाङ्गदादि-
शोभास्पदौ दुरितदैत्यविनाशदक्षौ ।
तौ दक्षिणौ भगवतश्च गदासुनाभ-
तेजोर्जितौ सुललितौ मनसा स्मरामि ॥ १८॥
वामौ भुजौ मुररिपोर्धृतपद्मशङ्खौ
श्यामौ करीन्द्रकरवन्मणिभूषणाढ्यौ ।
रक्ताङ्गुलिप्रचयचुम्बितजानुमध्यौ
पद्मालयाप्रियकरौ रुचिरौ स्मरामि ॥ १९ ॥
कण्ठं मृणालममलं मुखपङ्कजस्य
लेखात्रयेण वनमालिकया निवीतम् ।
किंवा विमुक्तिवसमन्त्रकसत्फलस्य
वृन्तं चिरं भगवतः सुभगं स्मरामि ॥ २० ॥
रक्ताम्बुजं दशनहासविकाशरम्यं
रक्ताधरौष्ठवरकोमलवाक्सुधाढ्यम् ।
सन्मानसोद्भवचलेक्षणपत्रचित्रं
लोकाभिराममलञ्च हरेः स्मरामि ॥ २१ ॥
शूरात्मजावसथगन्धविदं सुनाशं
भ्रूपल्लवं स्थितिलयोदयकर्मदक्षम् ।
कामोत्सवञ्च कमलाहृदयप्रकाशं

संचिन्तयामि हरिवक्त्रविलासदक्षम् ॥ २२ ॥
कर्णौ लसन्मकरकुण्डलगण्डलोलौ
नानादिशाञ्च नभसश्च विकासगेहौ।
लोलालकप्रचयचुम्बनकुञ्चिताग्रौ
लग्नौ हरेर्मणिकिरीटतटे स्मरामि ॥ २३ ॥
भालं विचित्रतिलकं प्रियचारुगन्ध-
गोरोचनारचनया ललनाक्षिसख्यम्।
ब्रह्मैकधाममणिकान्तकिरीटयुष्टं
ध्यायेन्मनोनयनहारकमीश्वरस्य ॥ २४ ॥
श्रीवासुदेवचिकुरं कुटिलं निबद्धं
नानासुगन्धिसुकुमैः स्वजनादरेण।
दीर्घं रमाहृदयगाशमनं धुनन्तं
ध्यायेऽम्बुवाहरुचिरं हृदयाब्जमध्ये ॥ २५ ॥
मेघाकारं सोमसूर्य्यप्रकाशं
सुभ्रून्नशं शक्रचापैकमानम्।
लोकातीतं पुण्डरीकायताक्षं
विद्युच्चेलञ्चाश्रयेऽहं त्वपूर्व्वम् ॥ २६ ॥
दीनं दीनं सेवया वेदवत्या
पापैस्तापैः पूरितं मे शरीरम्।

लोभाक्रान्तं शोकमोहाधिविद्धं
कृपादृष्ट्या पाहि मां वासुदेव ! ॥ २७ ॥
ये भक्ताद्यां ध्यायमानां मनोज्ञां
व्यक्तिं विष्णोः षोड़शश्लोकपुष्पैः ।
स्तुत्वा नत्वा पूजयित्वा विधिज्ञाः
शुद्धा मुक्ता ब्रह्मसौख्यं प्रयान्ति ॥ २८ ॥
पद्मेरितमिदं पुण्यं शिवेन परिभाषितम् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥ २९॥
पठन्ति ये महाभागास्ते मुच्यन्तेऽंहसोऽखिलात् ।
धर्म्मार्थकाममोक्षाणां परत्रेह फलप्रदम् ॥ ३० ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये हरिभक्ति-
विवरणं नाम सप्तमोऽध्यायः ।

समाप्तश्चायं प्रथमांशः ।

द्वितीयांशः ।

प्रथमाध्यायः ।

सूत उवाच ।

इति पद्मावचः श्रुत्वा कीरो धीरः सतां मतः ।
कल्किदूतः सखीमध्ये स्थितां पद्मामथाब्रवीत् ॥ १ ॥
वद पद्मे ! साङ्गपूजां हरेरद्भुतकर्म्मणः ।
यामास्थाय विधानेन चरामि भुवनत्रयम् ॥ २ ॥

पद्मोवाच ।

एवं पादादि केशान्तं ध्यात्वा तं जगदीश्वरम् ।
पूर्णात्मा देशिको मूलं मन्त्रं जपति मन्त्रवित् ॥ ३ ॥
जपादनन्तरं दण्ड-प्रणतिं मतिमांश्चरेत् ।
विश्वक्सेनादिकानान्तु दत्त्वा विष्णुनिवेदितम् ॥ ४॥
तत उद्वास्य हृदये स्थापयेन्मनसा सह ।
नृत्यन् गायन् हरेर्नाम तं पश्यन् सर्व्वतः स्थितम् ॥५
ततः शेषं मस्तकेन कृत्वा नैवेद्यभुग्भवेत् ।
इत्येतत् कथितं कीर ! कमलानाथसेवनम् ॥ ६ ॥
सकामानां कामपूरमकामामृतदायकम् ।
श्रोत्रानन्दकरं देव-गन्धर्व्व-नर-हृत्-प्रियम् ॥ ७ ॥

शुक उवाच।

समीरितं श्रुतं साध्वि! भगवद्भक्तिलक्षणम्।
त्वत्प्रसादात् पापिनो मे कीरस्य भुवि मुक्तिदम् ॥८॥
किन्तु त्वां काञ्चनमयीं प्रतिमां रत्नभूषिताम्।
सजीवामिव पश्यामि दुर्लभां रूपिणीं श्रियम् ॥९॥
नान्यां पश्यामि सदृशीं रूपशीलगुणैस्तव।
नान्यो योग्यो गुणी भर्त्ता भुवनेऽपि न दृश्यते ॥१०॥
किन्तु पारे समुद्रस्य परमाश्चर्य्यरूपवान्।
गुणवानीश्वरः साक्षात् कश्चिद् दृष्टोऽतिमानुषः ॥ ११॥
न हि धातृकृतं मन्ये शरीरं सर्व्वसौभगम्।
यस्य श्रीवासुदेवस्य नान्तरं ध्यानयोगतः ॥ १२ ॥
त्वया ध्यातं तु यद्रूपं विष्णोरमिततेजसः।
तत् साक्षात्कृतमित्येव न तत्र कियदन्तरम् ॥ १३॥

पद्मोवाच।

ब्रूहि तन्मम किं कुत्र जातः कीर! परावरम्।
जानासि तत्कृतं कर्म्म विस्तरेणात्र वर्णय ॥ १४ ॥
वृक्षादागच्छ पूजां ते करोमि विधिबोधिताम्।
वीजपूरफलाहारं कुरु साधु पयः पिब ॥१५ ॥
तव चञ्चुयुगं पद्मरागादारुणमुज्ज्वलम्।

रत्नसंघट्टितमहं करोमि मनसः प्रियम् ॥ १६ ॥
कन्धरं सूर्य्यकान्तेन मणिना स्वर्णघट्टिना ।
करोम्याच्छादनं चारु-मुक्ताभिः पङ्क्तिं तव ॥ १७ ॥
पतत्त्रं कुङ्कुमेनाङ्गं सौरभेनातिचित्रितम् ।
करोमि नयनानन्ददायकं रूपमीदृशम् ॥ १८ ॥
पुच्छमच्छमणिव्रात-घर्घरेणातिशब्दितम् ।
पादयोर्नूपुरालाप-लापिनं त्वां करोम्यहम् ॥ १९ ॥
तवामृतकथाव्रातत्यक्ताधिं साधि मामिह ।
सखीभिः संगीताभिस्ते किं करिष्यामि तद्वद ॥ २०॥
इति पद्मावचः श्रुत्वा तदन्तिकमुपागतः ।
कीरो धीरः प्रसन्नात्मा प्रवक्तुमुपचक्रमे ॥ २१ ॥

कीर उवाच ।

ब्रह्मणा प्रार्थितः श्रीशो महाकारुणिको बभौ ।
शम्भले विष्णुयशसो गृहे धर्म्म-रिरक्षिषुः ॥ २२ ॥
चतुर्भिर्भ्रातृभिर्ज्ञाति-गोत्रजैः परिवारितः ।
कृतोपनयनो वेदमधीत्य रामसन्निधौ ॥ २३ ॥
धनुर्वेदञ्च गान्धर्व्वं शिवादश्वमसिं शुकम् ।
कवचञ्च वरं लब्ध्वा शम्भलं पुनरागतः ॥ २४ ॥
विशाखयूपभूपालं प्राप्य शिक्षाविशेषतः ।

धर्म्मानाख्याय मतिमान् अधर्म्मांश्च निराकरोत्॥२५॥
इति पद्मा तदाख्यानं निशम्य मुदितानना ।
प्रस्थापयामास शुकं कल्केरानयनादृता ॥ २६ ॥
भूषयित्वा स्वर्णरत्नैस्तमुवाच कृताञ्जलिः ॥ २७ ॥

पद्मोवाच ।

निवेदितं तु जानासि किमन्यत् कथयाम्यहम् ।
स्त्रीभावभयभीतात्मा यदि नायाति स प्रभुः ॥ २८ ॥
तथापि मे कर्म्मदोषात् प्रणतिं कथयिष्यसि ।
शिवेन यो वरो दत्तः स मे शापोऽभवत् किल ॥२९॥
पुंसां मद्दर्शनेनापि स्त्रीभावं कामतः शुक ! ।
श्रुत्वेति पद्मामामन्त्र्य प्रणम्य च पुनः पुनः ॥ ३० ॥
उड्डीय प्रययौ कीरः शम्भलं कल्किपालितम् ।
तमागतं समाकर्ण्य कल्किः परपुरञ्जयः ॥ ३१ ॥
क्रोडे कृत्वा तं ददर्श स्वर्णरत्नविभूषितम् ।
सानन्दं परमानन्ददायकं प्राह तं तदा ॥ ३२ ॥
कल्किः परमतेजस्वी तस्मिन्नमलं शुकम् ।
पूजयित्वा करे स्पृष्ट्वा पयःपानेन तर्पयन् ॥ ३३ ॥
तन्मुखे स्वमुखं दत्त्वा पप्रच्छ विविधाः कथाः ।
कस्माद्देशाच्चरित्वा त्वं दृष्टापूर्ब्वं किमागतः ? ॥३४॥

कुत्रोषितः कुतो लब्धं मणिकाञ्चनभूषणम् ।
अहर्निशं त्वन्मिलनं वाञ्छितं मम सर्व्वतः ॥ ३५ ॥
तवानालोकनेनापि क्षणं मे युगवद्भवेत् ॥ ३६ ॥
इति कल्केर्वचः श्रुत्वा प्रणिपत्य शुको भृशम् ।
कथयामास पद्मायाः कथाः पूर्व्वोदिता यथा ॥३७ ॥
संवादमात्मनस्तस्या निजालङ्कारधारणम् ।
सर्व्वं तद्वर्णयामास तस्याः प्रणतिपूर्व्वकम् ॥ ३८ ॥
श्रुत्वेति वचनं कल्किः शुकेन सहितो मुदा ।
जगाम त्वरितोऽश्वेन शिवदत्तेन तन्मनाः ॥ ३९ ॥
समुद्रपारममलं सिंहलं जलसंकुलम् ।
नानाविमानबहुलं भास्वरं मणिकाञ्चनैः ॥ ४० ॥
प्रासादसदनाग्रेषु पताकातोरणाकुलम् ।
श्रेणीसभापणाट्टाल-पुरगोपुरमण्डितम् ॥ ४१ ॥
पुरस्त्री-पद्मिनी-पद्म-गन्धामोद-द्विरेफिणीम् ।
पुरीं कारुमतीं तत्र ददर्श पुरतः स्थिताम् ॥४२॥
मराल-जाल-सञ्चाल-विलोल-कमलान्तराम् ।
उन्मीलिताब्जमालालिकलिताकुलितं सरः * ॥ ४३ ॥

---

* उन्मीलितानि मालानि कलिताकुलितं सरः इति वा पाठः ।

जलकुक्कुटदात्यूह-नादितं हंससारसैः ।
ददर्श स्वच्छपयसां लहरीलोलवीजितम् ॥ ४४ ॥
वनं कदम्बकुद्दाल-शालतालाम्रकेसरैः ।
कपित्थाश्वत्थखर्ज्जूर-वीजपूरकरञ्जकैः ॥ ४५ ॥
पुन्नागपनसैर्नागरङ्गैरर्ज्जुनशिंशपैः ।
क्रमुकैर्नारिकेलैश्च नानावृक्षैश्च शोभितम् ।
वनं ददर्श रुचिरं फलपुष्पदलावृतम् ॥ ४६ ॥
दृष्ट्वा हृष्टतनुः शुकं सकरुणः कल्किः पुरान्ते वने
प्राह प्रीतिकरं वचोऽत्र सरसि स्नातव्यमित्यादृतः ।
तत् श्रुत्वा विनयान्वितः प्रभुमतं यामीति पद्माश्रमं
तत्सन्देशमिह प्रयाणमधुना गत्वा स कीरोऽवदत्॥४७॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
कल्केरागमनवर्णनं नाम प्रथमोऽध्यायः ।

द्वितीयांशः ।

द्वितीयाध्यायः ।

सूत उवाच ।

कल्किः सरोवराभ्यासे जलाहरणवर्त्मनि ।
स्वच्छस्फटिकसोपाने प्रवालाचितवेदिके ॥ १ ॥
सरोजसौरभव्यग्रभ्रमद्भ्रमरनादिते ।
कदम्बपोतपल्लालि-वारितादित्यदर्शने ॥ २ ॥
समुवासासने चित्रे सदश्वेनावतारितः ।
कल्किः प्रस्थापयामास शुकं पद्माश्रमं मुदा ॥ ३ ॥
स नागेश्वरमध्यस्थः शुको गत्वा ददर्श ताम् ।
हर्म्म्यस्थां विपिणीपत्रशायिनीं सखीभिर्वृताम् ॥४॥
निश्वासवाततापेन म्लायतीं वदनाम्बुजम् ।
उत्क्षिपन्तीं सखीदत्तकमलं चन्दनोक्षितम् ॥ ५ ॥
रेवावारिपरिस्नातं परागाढ्यं * समागतम् ।
धृतनीरं रसगतं निन्दन्तीं पवनं प्रियम् ॥ ६ ॥
शुकः सकरुणः साधु-वचनैस्तामतोषयत् ।

* परागाढ्यमिति पाठान्तरम् ।

सा, त्वमेह्येहि, ते स्वस्ति, स्वागतं ? स्वस्ति मे शुभे ! ॥७
गते त्वय्यतिव्यग्राहं शान्तिस्तेऽस्तु रसायनात् ।
रसायनं दुर्लभं मे, सुलभं ते शिवाश्रमे ॥ ८ ॥
क्व मे भाग्यविहीनायाः ? इहैव वरवर्णिनि ! ।
देवि ! तं सरसस्तीरे प्रतिष्ठाप्यागता वयम् ॥ ९ ॥
एवमन्योन्यसंवाद-मुदितात्ममनोरथे ।
मुखं मुखेन नयनं नयने साद्दता ददौ ॥ १० ॥
विमला मालिनी लोला कमला कामकन्दला ।
विलासिनी चारुमती कुमुदेत्यष्ट नायिकाः ॥ ११॥
सख्य एता मतास्ताभिर्जलक्रीड़ार्थमुद्यताः ।
पद्मा प्राह, सरस्तीरमायान्तु सा मया स्त्रियः ॥ १२ ॥
इत्याख्यायाशु शिविकामारुह्य परिवारिता ।
सखीभिश्चारुवेशाभिर्भूत्वा स्वान्तःपुराद्बहिः ।
प्रययौ त्वरितं द्रष्टुं भैष्मी यदुपतिं यथा ॥ १३ ॥

जनाः पुमांसः पथि ये पुरस्थाः
प्रदुद्रुवुः स्त्रीत्वभयात् दिगन्तरम् ।
शृङ्गाटके वा विपणिस्थिता ये
निजाङ्गनास्थापितपुण्यकार्य्याः ॥ १४ ॥
निवारितां तां शिविकां वहन्त्यः

नार्य्योऽतिमत्ता बलवत्तराश्च ।
पद्मा शुकोक्त्या तदुपर्य्युपस्था
जगाम ताभिः परिवारिताभिः ॥१५ ॥
सरोजलं सारसहंसनादितं
प्रफुल्लपद्मोद्भवरेणुवासितम् ।
चेरुर्विगाह्याशु सुधाकरालसाः
कुमुद्वतीनामुदयाय शोभनाः ॥ १६ ॥
तासां मुखामोदमदान्धभृङ्गाः
विहाय पद्मानि मुखारविन्दे ।
स्त्रीशाः सुगन्धाधिकमाकलय्य
निवारितास्तापि न तत्यजुस्ते ॥ १७ ॥
हासोपहासैः सरसप्रकाशैः
वाद्यैश्च नृत्यैश्च जले विहारैः ।
करग्रहैस्ता जलयोधनार्त्ताः
चकर्ष ताभिर्वनिताभिरुच्चैः ॥ १८ ॥
सा कामतप्ता मनसा शुकोक्तिं
विविच्य पद्मा सखिभिः समेता ।
जलात् समुत्थाय महार्हभूषा
जगाम निर्दिष्टकदम्बषण्डम् ॥ १९ ॥

सुखे शयानं मणिवेदिकागतं
कल्किं पुरस्तादतिदुर्ल्यवर्च्चसम् ।
महामणिव्रातविभूषणाचितं
शुकेन सार्द्धं तमुदैक्षतेशम् ॥ २० ॥
तमालनीलं कमलापतिं प्रभुं
पीताम्बरं चारुसरोजलोचनम् ।
आजानुबाहुं पृथुपीनवक्षसं
श्रीवत्ससत्कौस्तुभकान्तिराजितम् ॥ २१ ॥
तदद्भुतं रूपमवेक्ष्य पद्मा
संस्तम्भिता विस्मृतसत्क्रियार्था ।
सुप्तं तु संबोधयितुं प्रवृत्तं
निवारयामास विशङ्किताात्मा ॥ २२ ॥
कदाचिद्देषोऽतिबलोऽतिरूपी
मद्दर्शनात् स्त्रीत्वमुपैति साक्षात् ।
तदात्र किं मे भविता भवस्य
वरेण शापप्रतिमेन लोके ॥ २३ ॥
चराचरात्मा जगतामधीशः
प्रबोधितस्तद्धृदयं विविच्य ।
ददर्श पद्मां प्रियरूपशोभां

यथा रमा श्रीमधुसूदनाग्रे ॥ २४ ॥
संवीक्ष्य मायामिव मोहिनीं तां
जगाद कामाकुलितः स कल्किः ।
सखीभिरीशां समुपागतां तां
कटाक्षविक्षेपविनामिताख्याम् ॥ २५ ॥
इहैहि सुस्वागतमस्तु भाग्यात्
समागमस्ते कुशलाय मे स्यात् ।
तवाननेन्दुः किल कामपूर-
तापापनोदाय सुखाय कान्ते ! ॥ २६ ॥
लोलाक्षि-लावण्य-रसामृतं ते
कामाहिदष्टस्य विधातुरस्य ।
तनोतु शान्तिं सुकृतेन कृत्या
सुदुर्लभां जीवनमाश्रितस्य ॥ २७ ॥
बाहू तवैतौ कुरुतां मनोज्ञौ
हृदि स्थितं काममुदन्तवासम् ।
चार्व्वायतौ चारुनखाङ्कुशेन
द्विपं यथा सादिविदीर्णकुम्भम् ॥ २८ ॥
स्तनाविमावुत्थितमस्तकौ ते
कामप्रतोदाविव वाससाक्तौ ।

ममोरसा भिन्ननिजाभिमानौ
सुवर्त्तुलौ व्यादिशतां प्रियं मे ॥ २९ ॥
कान्तस्य सोपानमिदं वलित्रयं
हवेण लोमावलिलेखलञ्छितम् ।
विभाजितं वेदिविलग्नमध्यमे ! ।
कामस्य दुर्गाश्रयमस्तु मे प्रियम् ॥ ३० ॥
रम्भोरु ! सम्भोगसुखाय मे स्यात्
नितम्बविम्बं पुलिनोपमं ते ।
तन्वङ्गि ! तन्वंशुकसङ्गशोभं
प्रमत्तकामाविमदोद्यमम्लम् ॥ ३१ ॥
पादाम्बुजं तेऽङ्गुलिपत्रचित्रितं
वरं मरालक्वणनूपुरावृतम् ।
कामाहिदष्टस्य ममास्तु शान्तये
हृदि स्थितं सद्मघने सुशोभने ॥ ३२ ॥
श्रुत्वैतद्वचनामृतं कलिकुलध्वंसस्य कल्केरलं
दृष्ट्वा सत्पुरुषत्वमस्य मुदिता पद्मा सखीभिर्वृता ।
कान्तं क्रान्तमनाः कृताञ्जलिपुटा प्रोवाच तत् सादरं
धीरं धीरपुरस्कृतं निजपतिं नत्वा नमत्कन्धरा ॥ ३३ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे पद्मा-कल्कि-सचात्-संवादो नाम द्वितीयोऽध्यायः ।

द्वितीयांशः ।

तृतीयाध्यायः ।

सूत उवाच ।

सा पद्मा तं हरिं मत्वा प्रेमगद्गदभाषिणी ।
तुष्टाव व्रीड़िता देवी करुणावरुणालयम् ॥ १ ॥
प्रसीद जगतां नाथ ! धर्म्मवर्म्मन् ! रमापते ! ।
विदितोऽसि विशुद्धात्मन् ! वशगां त्राहि मां प्रभो ॥२॥
धन्याहं कृतपुण्याहं तपोदानजपव्रतैः ।
त्वां प्रतोष्य दुराराध्यं लब्धं तव पदाम्बुजम् ॥ ३ ॥
आज्ञां कुरु पदाम्भोजं तव संस्पृश्य शोभनम् ।
भवनं यामि राजानमाख्यातुं स्वागतं तव ॥ ४ ॥
इति पद्मा रूपसद्मा गत्वा स्वपितरं नृपम् ।
प्रोवाचागमनं कल्केर्विष्णोरंशस्य दौत्यकैः ॥ ५ ॥
सखीमुखेन पद्मायाः पाणिग्रहणकाम्यया ।
हरेरागमनं श्रुत्वा सहर्षोऽभूत् बृहद्रथः ॥ ६ ॥
पुरोधसा ब्राह्मणैश्च पात्रैर्मित्रैः सुमङ्गलैः ।
वाद्यताण्डवगीतैश्च पूजायोजनपाणिभिः ॥ ७ ॥

जगामानयितुं कल्किं सार्द्धं निजजनैः प्रभुः ।
मण्डयित्वा कारुमतीं पताकास्वर्णतोरणैः ॥ ८ ॥
ततो जलाशयाभ्यासं गत्वा विष्णुयशःसुतम् ।
मणिवेदिकयासीनं भुवनैकगतिं पतिम् ॥ ९ ॥
घनाघनोपरि यथा शोभन्ते रुचिराण्यहो ।
विद्युदिन्द्रायुधादीनि तथैव भूषणान्युत ॥ १० ॥
शरीरे पीतवासाद्यघोरभासा विभूषितम् ।
रूपलावण्यसदने मदनोद्यमनाशने ॥ ११ ॥
ददर्श पुरतो राजा रूपशीलगुणाकरम् ।
साश्रुः सपुलकः शीघ्रं दृष्ट्वा साधु तमर्च्चयत् ॥ १२ ॥
ज्ञानागोचरमेतन्मे तवागमनमीश्वर ! ।
यथा मान्धातृपुत्रस्य यदुनाथेन कानने ॥ १३ ॥
इत्युक्त्वा तं पूजयित्वा समानीय निजाश्रमे ।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम् ॥१४॥
पद्मां पद्मपलाशाक्षीं पद्मनेत्राय पद्मिनीम् ।
पद्मजादेशतः पद्मनाभायादात् यथाक्रमम् ॥ १५ ॥
कल्किर्लब्ध्वा प्रियां भार्य्यां सिंहले साधुसत्कृतः ।
समुवास विशेषज्ञः समीक्ष्य द्वीपमुत्तमम् ॥ १६ ॥
राजानः स्त्रीत्वमापन्नाः पद्मायाः सखितां गताः ।

दृष्ट्वा समीयुस्त्वरिताः कल्किं विष्णुं जगत्पतिम् ॥१७॥
ताः स्त्रियोऽपि तमालोक्य संस्पृश्य चरणाम्बुजम् ।
पुनः पुंस्त्वं समापन्ना रेवास्नानात् तदाज्ञया ॥१८॥
पद्माकल्की गौरकृष्णौ विपरीतान्तरावुभौ ।
बहिःस्फुटौ नीलपीत-वासोव्याजेन पश्यतु ॥ १९ ॥
दृष्ट्वा प्रभावं कल्केस्तु राजानः परमाद्भुतम् ।
प्रणम्य परया भक्त्या तुष्टुवुः शरणार्थिनः ॥ २० ॥

जय जय निजमायया कल्पिताशेषविशेषकल्पना-परिणाम ! जलाप्लुतलोकत्रयोपकरणमाकलय्य मनुमनिशम्य पूरितमविजनाविजनाविर्भूतमहामीनशरीर ! त्वं निजकृतधर्म्मसेतुसंरक्षणकृतावतारः ॥ २१ ॥

पुनरिह दितिज-बल-परिलङ्घित-वासव-मृदनादृत-जित-भुवन-पराक्रम-हिरण्याक्ष-निधन-पृथिव्युद्धरण-संकल्पाभिनिवेशेन धृत-कोलावतारः पाहिनः ॥२२॥

पुनरिह जलधि-मथनादृत-देवदानवगण-मन्दराचलानयन-व्याकुलितानां साहाय्येनादृतचित्तः पर्व्वतोद्धरणामृतप्राशनरचनावतारः कूर्म्माकारः प्रसीद परेश त्वं दीननृपाणाम् ॥ २३ ॥

पुनरिह त्रिभुवनजयिनो महाबलपराक्रमस्य हिर-
ण्यकशिपोरर्द्दितानां देववराणां भयभीतानां कल्या-
णाय दितिसुतवधप्रेप्सुर्ब्रह्मणो वरदानादवध्यस्य न
शस्त्रास्त्रराचिर्द्दिवास्वर्गमर्त्यपातालतले देवगन्धर्व्वकि-
न्नरनरनागैरिति विचिन्त्य नरहरिरूपेण नखाग्रभिन्ना-
रुंदष्टदन्तच्छदं त्यक्तासुं कृतवानसि ॥ २४ ॥

पुनरिह त्रिजगज्जयिनो बलेः सत्रे शक्रानुजो
वटुवामनोदैत्यसंमोहनाय त्रिपदभूमियाच्ञाच्छलेन
विश्वकायस्तदुत्सृष्ट-जल-संस्पर्श-विवृद्धमनोऽभिलाष-
स्त्वं भूतले बलेर्दौवारिकत्वमङ्गीकृतमुचितं दान-
फलम् ॥ २५ ॥

पुनरिह हैहयादिनृपाणाम् अमितबलपराक्र-
माणां नानामदोल्लङ्घितमर्य्यादावर्त्मनां निधनाय
भृगुवंशजो जामदग्न्यः पितृहोमधेनुहरणप्रवृद्धमन्यु-
वशात् त्रिसप्तकृत्वो निःक्षत्त्रियां पृथिवीं कृतवानसि
परशुरामावतारः ॥ २६ ॥

पुनरिह पुलस्त्यवंशावतंसस्य विश्रवसः पुत्रस्य
निशाचरस्य रावणस्य लोकत्रयतापनस्य निधनमुररी-
कृत्य रविकुलजातदशरथात्मजो विश्वामित्रादस्त्राण्यु-
पलभ्य वने सीताहरणवशात् प्रवृद्धमन्युना अम्बुधिं

वानरैर्निबध्य सगणं दशकन्धरं हतवानसि रामावतार: ॥ २७ ॥

पुनरिह यदुकुल-जलधिकलानिधिः सकलसुरगणसेवितपादारविन्दद्वन्द्वः विविधदानवदैत्यदलन-लोकत्रयदुरिततापनो वसुदेवात्मजो रामावतारो बलभद्रस्त्वमसि ॥ २८ ॥

पुनरिह विधिकृत-वेदधर्म्मानुष्ठान-विहित-नाना-दर्शन-संघृणः संसारकर्म्मत्यागविधिना ब्रह्माभास-विलासचातुरीं प्रकृतिविमानन्नामसम्पादयन् बुद्धावतारस्त्वमसि ॥ २९ ॥

अधुना कलिकुलनाशावतारो बौद्धपाषण्डम्लेच्छादीनाञ्च वेदधर्म्मसेतुपरिपालनाय कृतावतारः कल्किरूपेणास्मान् स्त्रीत्वनिरयादुद्धृतवानसि तवानुकम्पां किमिह कथयामः ॥ ३० ॥

क्व ते ब्रह्मादीनामविदितविलासावतरणं
क्व नः कामा वामाकुलितमृगतृष्णार्त्तमनसाम् ।
सुदुष्प्राप्यं युष्मच्चरण-जलजालोकनमिदं
कृपापारावारः प्रमुदितदृशाश्वासय निजान् ॥३१॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे नृपाणां

स्तवो नाम तृतीयोऽध्यायः ।

कल्किपुराणम् ।

द्वितीयांशः ।

चतुर्थाऽध्यायः ।

सूत उवाच ।

श्रुत्वा नृपाणां भक्तानां वचनं पुरुषोत्तमः ।
ब्राह्मणक्षत्त्रविट्शूद्र-वर्णानां धर्म्ममाह यत् ॥ १ ॥
प्रवृत्तानां निवृत्तानां कर्म्म यत् परिकीर्त्तितम् ।
सर्व्वं संश्रावयामास वेदानामनुशासनम् ॥ २ ॥
इति कल्केर्वचः श्रुत्वा राजानो विषदाशयाः ।
प्रणिपत्य पुनः प्राहुः पूर्व्वान्तु गतिमात्मनः ॥ ३ ॥
स्त्रीत्वं वाप्यथवा पुंस्त्वं कस्य वा केन वा कृतम् ।
जरा-यौवन-बाल्यादि सुखदुःखादिकञ्च यत् ॥ ४ ॥
कस्मात् कुतो वा कस्मिन् वा किमेतदिति वा विभो ॥
अनिर्णीतान्यविदितान्यपि कर्म्माणि वर्णय ॥ ५ ॥
(तदा तदाकर्ण्य कल्किरनन्तं मुनिमस्मरत् ।)
सोऽप्यनन्तो मुनिवरस्तीर्थपादो वृहद्व्रतः ॥ ६ ॥
कल्केर्दर्शनतो मुक्तिमाकलय्यागतस्त्वरन् ।

समागत्य पुनः प्राह किं करिष्यामि कुत्र वा ।
यास्यामीति वचः श्रुत्वा कल्किः प्राह हसन् मुनिम् ॥७॥
श्रुतं दृष्टं त्वया सर्व्वं ज्ञातं याह्यनिवर्त्तकम् ।
अदृष्टमश्रुतञ्चेति श्रुत्वा हृष्टमना मुनिः ॥ ८ ॥
गमनायोद्यतं तं तु दृष्ट्वा नृपगणास्ततः ।
कल्किं कमलपत्राक्षं प्रोचुर्विस्मितचेतसः ॥ ९ ॥

राजान ऊचुः ।

किमनेन नापि कथितं त्वया वा किमुताच्युत ।
सर्व्वं तत् श्रोतुमिच्छामः कथोपकथनं द्वयोः ॥ १० ॥
नृपाणां तद्वचः श्रुत्वा तानाह मधुसूदनः ।
पृच्छतामुं मुनिं शान्तं कथोपकथनादृताः ॥ ११ ॥
इति कल्केर्वचो भूयः श्रुत्वा ते नृपसत्तमाः ।
अनन्तमाहुः प्रणताः प्रश्नपारतितीर्षवः ॥ १२ ॥

राजान ऊचुः ।

मुने! किमत्र कथनं कल्किना धर्म्मवर्म्मणा ।
दुर्बोधः केन वा जातस्तत्त्वं वर्णय नः प्रभो! ॥ १३ ॥

मुनिरुवाच ।

पुरिकायां पुरि पुरा पिता मे वेदपारगः ।
विद्रुमो नाम धर्म्मज्ञः ख्यातः परहिते रतः ॥ १४ ॥

सोमा मम विभो! माता पतिधर्म्मपरायणा ।
तयोर्वयःपरिणतौ काले षण्डाकृतिस्त्वहम् ॥ १५ ॥
संजातः शोकदः पित्रोर्लोकानां निन्दिताकृतिः ।
मामालोक्य पिता क्लीवं दुःखशोकभयाकुलः ॥ १६ ॥
त्यक्त्वा गृहं शिववनं गत्वा तुष्टाव शङ्करम् ।
संपूज्येशं विधानेन धूपदीपानुलेपनैः ॥ १७ ॥

विद्रुम उवाच ।

शिवं शान्तं सर्व्वलोकैकनाथं
भूतावासं वासुकीकण्ठभूषम् ।
जटाजूटाबद्धगङ्गातरङ्गं
वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥ १८ ॥

इत्यादि बहुभिः स्तोत्रैः स्तुतः स शिवदः शिवः ।
वृषारूढः प्रसन्नात्मा पितरं प्राह मे वृणु ॥ १९ ॥
विद्रुमो मे पिता प्राह मत्पुंस्त्वं तापतापितः ।
हसन् शिवो ददौ पुंस्त्वं पार्व्वत्या प्रतिमोदितः ॥ २० ॥
मम पुंस्त्वं वरं लब्ध्वा पितायातः पुनर्गृहम् ।
पुरुषं मां समालोक्य सहर्षः प्रियया सह ॥ २१ ॥
ततः प्रवयसौ तौ तु पितरौ द्वादशाब्दके ।
विवाहं मे कारयित्वा बन्धुभिर्मुदमापतुः ॥ २२ ॥

यज्ञरातसुतां पत्नीं मानिनीं रूपशालिनीम्।
प्राप्याहं परितुष्टात्मा गृहस्थः स्त्रीवशोऽभवम्॥ २३॥
ततः कतिपये काले पितरौ मे मृतौ नृपाः!।
पारलौकिककार्य्याणि सुहृद्भिर्ब्राह्मणैर्वृतः॥ २४॥
तयोः कृत्वा विधानेन भोजयित्वा द्विजान् बहून्।
पित्रोर्वियोगतप्तोऽहं विष्णुसेवापरोऽभवम्॥ २५॥
तुष्टो हरिर्मे भगवान् जपपूजादिकर्मभिः।
स्वप्ने मामाह मायेयं स्नेहमोहविनिर्मिता॥ २६॥
अयं पितेयं मातेति ममताकुलचेतसाम्।
शोकदुःखभयोद्वेगजरामृत्युविधायिका॥ २७॥
श्रुत्वेति वचनं विष्णोः प्रतिवादार्थमुद्यतम्।
मामालक्ष्यान्तर्हितः स विनिद्रोऽहं ततोऽभवम्॥२८॥
सविस्मयः सभार्य्योऽहं त्यक्त्वा तां पुरिकां पुरीम्।
पुरुषोत्तमाख्यं श्रीविष्णोरालयञ्चागमं नृपाः!॥२९॥
तत्रैव दक्षिणे पार्श्वे निर्मायाश्रममुत्तमम्।
सभार्य्यः सानुगामात्यः करोमि हरिसेवनम्॥ ३०॥
मायासंदर्शनाकाङ्क्षी हरिसद्मनि संस्थितः।
गायन् नृत्यन् जपन् नाम चिन्तयन् शमनापहम्॥३१॥
एवं वृत्ते द्वादशाब्दे द्वादश्यां पारणादिने।

स्नातुकामः समुद्रेऽहं बन्धुभिः सहितो गतः ॥ ३२ ॥
तत्र मग्नं जलनिधौ लहरीलोलसंकुले।
समुत्थातुमशक्तं मां प्रतुदन्ति जलेचराः ॥ ३३ ॥
निमज्जनो मज्जनेन व्याकुलीकृतचेतसम्।
जलहिल्लोलमिलनदलिताङ्गमचेतनम् ॥ ३४ ॥
जलधेर्दक्षिणे कूले पतितं पवनेरितम्।
मां तत्र पतितं दृष्ट्वा वृद्धशर्मा द्विजोत्तमः ॥ ३५ ॥
सन्ध्यामुपास्य सघृणः स्वपुरं मां समानयत्।
स वृद्धशर्मा धर्मात्मा पुत्रदारधनान्वितः।
कृत्वारुग्नन्तु मां तत्र पुत्रवत् पर्य्यपालयत् ॥ ३६ ॥
अहन्तु तत्र दीनात्मा दिग्देशाभिज्ञ एव न।
दम्पती तौ स्वपितरौ मत्वा तत्रावसं नृपाः ! ॥ ३७ ॥
स मां विज्ञाय बहुधा वेदधर्म्मेष्वनुष्ठितम्।
प्रददौ स्वां दुहितरं विवाहे विनयान्वितः ॥ ३८ ॥
लब्ध्वा चामीकराकारां रूपशीलगुणान्विताम्।
नाम्ना चारुमतीं तत्र मानिनीं विस्मितोऽभवम् ॥ ३९
तयाहं परितुष्टात्मा नानाभोगसुखान्वितः।
जनयित्वा पञ्च पुत्रान् संमर्देनावृतोऽभवम् ॥ ४० ॥
जयश्च विजयश्चैव कमलो विमलस्तथा।

बुध इत्यादयः पञ्च विदितास्तनया मम ॥ ४१ ॥
स्वजनैर्बन्धुभिः पुत्रैर्धनैर्नानाविधैरहम् ।
विदितः पूजितो लोके देवैरिन्द्रो यथा दिवि ॥ ४२ ॥
बुधस्य ज्येष्ठपुत्रस्य विवाहार्थं समुद्यतम् ।
दृष्ट्वा द्विजवरस्तुष्टो धर्मसारो निजां सुताम् ॥ ४३ ॥
दित्सुः कर्माणि वेदज्ञश्चकाराभ्युदयान्यपि ।
वाद्यैर्गीतैश्च नृत्यैश्च स्त्रीगणैः स्वर्णभूषितैः ॥ ४४ ॥
अहञ्च पुत्राभ्युदये पितृदेवर्षितर्पणम् ।
कर्त्तुं समुद्रवेलायां प्रविष्टः परमादरात् ॥ ४५ ॥
वेलालोलायितनुर्जलादुत्थाय सत्वरः ।
तीरे सखीन् स्नानसन्ध्या-परान् वीक्ष्याहमुन्मनाः ॥४६
सद्यः समभवं भूपाः ! द्वादश्यां पारणादृतान् ।
पुरुषोत्तमसंवासान् विष्णुसेवार्थमुद्यतान् ॥ ४७ ॥
तेऽपि मामग्रतः कृत्वा तद्रूपवयसां निधिम् ।
विस्मयाविष्टमनसं दृष्ट्वा मामब्रुवन् जनाः ॥ ४८ ॥
अनन्त ! विष्णुभक्तोऽसि जले किं दृष्टवानिह ।
स्थले वा व्यग्रमनसं लक्षयामः कथं तव ॥ ४९ ॥
पारणं कुरु तद् ब्रूहि त्यक्त्वा विस्मयमात्मनः ।
तानब्रुवमहं, नैव किञ्चित् दृष्टं श्रुतं जनाः ! ॥५०

कामात्मा नत् कृपणधीर्मायासन्दर्शनाहतः ।
तथा हरेर्मायथाहं मूढ़ो व्याकुलितेन्द्रियः ॥ ५१ ॥
न धर्म्मं वेद्मि कुत्रापि स्नेहमोहवशं गतः ।
आत्मनो विस्मृतिरियं को वेद विदितां तु ताम्॥५२
इति भार्य्याधनागार-पुत्रोद्वाहानुरक्तधीः ।
अनन्तोऽहं दीनमना न जाने स्वापसम्मितम् ॥५३॥
मां वीक्ष्य मानिनी भार्य्या विवशं मूढ़वत् स्थितम्।
क्रन्दन्ती किमहोऽकस्मात् आलपन्ती ममान्तिके ॥५४
इह तां वीक्ष्य तांस्तत्र स्मृत्वा कातरमानसम्।
हंसोऽप्येको बोधयितुम् आगतो मां सदुक्तिभिः ॥५५
धीरो विदितसर्व्वार्थः पूर्णः परमधर्म्मवित् ॥ ५६ ॥

सूर्य्याकारं सत्त्वसारं प्रशान्तं
दान्तं शुद्धं लोकशोकच्छयिष्णुम् ।
ममाग्रे तं पूजयित्वा मदङ्गाः
पप्रच्छुस्ते मत्शुभध्यानकामाः ॥५७॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
अनन्त-मायादर्शनं नाम चतुर्थोऽध्यायः ।

कल्किपुराणम् ।

द्वितीयांशः ।

पञ्चमाध्यायः ।

सूत उवाच ।

उपविष्टे तदा हंसे भिक्षां कृत्वा यथोचिताम् ।
ततः प्राहुरनन्तस्य शरीरारोग्यकाम्यया ॥ १ ॥
हंसस्तेषां मतं ज्ञात्वा प्राह मां पुरतः स्थितम् ।
तव चारुमती भार्य्या पुत्राः पञ्च बुधादयः ॥ २ ॥
धनरत्नान्वितं सद्म सम्बाधं सौधसंकुलम् ।
त्यक्त्वा कदागतोऽसीह पुत्रोद्वाहदिने न तु ॥ ३ ॥
समुद्रतीरसञ्चारः पुरात् धर्म्मजनादृतः ।
निमन्त्र्य मामिहायातः शोकसंविग्नमानसः ॥ ४ ॥
त्वञ्च सप्ततिवर्षीयस्तत्र दृष्टो मया प्रभो ! ।
विंशद्वर्षीयवत् कस्मात् इति मे संभ्रमो महान् ॥५॥
इयं भार्य्या सहाया ते न तत्रालोकिता क्वचित् ।
अहं वा क्व कुतस्तस्मात् कथं वा केन काशितः ॥६॥
स एव वा न वापि त्वं नाहं वा भिक्षुरेव सः ।

आवयोरिह संयोगश्चेन्द्रजाल इवाभवत् ॥ ७ ॥
त्वं गृहस्थः स्वधर्म्मज्ञो भिक्षुकोऽहं परात्मकः ।
आवयोरिह संवादो बालकोन्मत्तयोरिव ॥ ८ ॥
तस्मादीशस्य मायेयं त्रिजगन्मोहकारिणी ।
ज्ञानाप्राप्याद्वैतलभ्या मन्येऽहमिति भो द्विज ! ॥९॥
इति भिक्षुः समाश्राव्य यदन्यत् प्राह विस्मितः ।
मार्कण्डेय ! महाभाग ! भविष्यं कथयामि ते ॥१०॥
प्रलये या त्वया दृष्टा पुरुषस्योदराम्भसि ।
सा माया मोहजनिका पन्थानं गणिका यथा ॥११॥
तमो ह्यनन्तसन्तापा नोदनोद्यतमञ्जरी ।
ययेदमखिलं लोकमावृत्यावस्थया स्थितम् ॥१२॥
लये लीने त्रिजगति ब्रह्म तन्मात्रतां गतः ।
निरुपाधौ निरालोके सिसृक्षुरभवत् परः ॥१३॥
ब्रह्मण्यपि द्विधाभूते पुरुषप्रकृती स्वया ।
भासा संजनयामास महान्तं कालयोगतः ॥१४॥
कालस्वभावकर्म्मात्मा सोऽहङ्कारस्ततोऽभवत् ।
त्रिवृत् विष्णु-शिव-ब्रह्म-मयः संसारकारणम् ॥१५॥
तन्मात्राणि ततः पञ्च यज्ञिरे गुणवन्ति च ।
महाभूतान्यपि ततः प्रकृतौ ब्रह्मसंश्रयात् ॥१६॥

जाता देवासुरनरा ये चान्ये जीवजातय: ।
ब्रह्माण्डभाण्डसंभार-जन्मनाशक्रियात्मिका: ॥१७॥
मायया मायया जीव-पुरुष: परमात्मन: ।
संसारशरणव्यग्रो न वेदात्मगतिं क्वचित् ॥१८॥
अहो बलवती माया ब्रह्माद्या यद्वशे स्थिता: ।
गावो यथा नसि प्रोता गुणबद्धा: खगा इव ॥१९॥
तां मायां गुणमय्यां ये तितीर्षन्ति मुनीश्वरा: ।
स्रवन्तीं वासनानक्रां त एवार्थविदो भुवि ॥२०॥

शौनक उवाच ।

मार्कण्डेयो वसिष्ठश्च वामदेवादयोऽपरे ।
श्रुत्वा गुरुवचो भूय: किमाहु: श्रवणादृता: ॥२१॥
राजानोऽनन्तवचनम् इति श्रुत्वा सुधोपमम् ।
किंवा प्राहुरहो सूत ! भविष्यमिह वर्णय ॥२२॥
इति तद्वच आश्रुत्य सूत: सत्कृत्य तं पुन: ।
कथयामास कार्त्स्न्येन शोकमोहविघातकम् ॥२३॥

सूत उवाच ।

तत्रानन्तो भूपगणै: पृष्ट: प्राह कृतादर: ।
तपसा मोहनिधनम् इन्द्रियाणाञ्च निग्रहम् ॥२४॥

अनन्त उवाच ।

अतोऽहं वनमासाद्य तपः कृत्वा विधानतः ।
नेन्द्रियाणां न मनसो निग्रहोऽभूत् कदाचन ॥२५॥
वने ब्रह्म ध्यायतो मे भार्य्यापुत्रधनादिकम् ।
विषयञ्चान्तरा शश्वत् संस्मारयति मे मनः ॥२६॥
तेषां स्मरणमात्रेण दुःखशोकभयादयः ।
प्रतुदन्ति मम प्राणान् धारणा-ध्याननाशकाः ॥२७॥
ततोऽहं निश्चितमतिरिन्द्रियाणाञ्च घातने ।
मनसो निग्रहस्तेन भविष्यति न संशयः ॥२८॥
अतो मामिन्द्रियाणाञ्च निग्रहव्यग्रचेतसम् ।
तदधिष्ठातृदेवाश्च दृष्ट्वा मामीयुरञ्जसा ॥२९॥
रूपिणो मामथोचुस्ते भोऽनन्त! इति ते दश ।
दिग्वातार्कप्रचेतोऽश्वि-वह्नीन्द्रोपेन्द्रमित्रकाः ॥३०॥
इन्द्रियाणां वयं देवास्तव देहे प्रतिष्ठिताः ।
नखाग्रकाण्डसंभिन्नान् नास्मान् कर्त्तुमिहार्हसि ॥३१॥
न श्रेयो हि तवानन्त! मनोनिग्रहकर्म्मणि ।
छेदने भेदनेऽस्माकं भिन्नमर्म्मा मरिष्यसि ॥३२॥
अन्धानां वधिराणाञ्च विकलेन्द्रियजीविनाम् ।
वनेऽपि विषयव्यग्रं मानसं लक्षयामहे ॥३३॥

जीवस्यापि गृहस्थस्य देहो गेहं मनोऽनुगः ।
बुद्धिर्भार्य्या तदनुगा वयमित्यवधारय ॥३४॥
कर्म्मायत्तस्य जीवस्य मनो बन्धविमुक्तिकृत् ।
संसारयति लुब्धस्य ब्रह्मणो यस्य मायया ॥३५॥
तस्मान्मनोनिग्रहार्थं विष्णुभक्तिं समाचर ।
सुखमोक्षप्रदा नित्यं दाहिका सर्व्वकर्म्मणाम् ॥३६॥
द्वैताद्वैतप्रदानन्द-सन्दोहा हरिभक्तिका ।
हरिभक्त्या जीवकोष-विनाशान्ते महामते ! ॥३७॥
परं प्राप्स्यसि निर्वाणं कल्केरालोकनात् त्वया ।
इत्यहं बोधितस्तेन भक्त्या संपूज्य केशवम् ॥३८॥
कल्किं दिदृक्षुरायातः कृष्णं कलिकुलान्तकम् ।
दृष्टं रूपमरूपस्य स्पृष्टस्तत्पदपल्लवः ।
अपदस्य, श्रुतं वाक्यम् अवाच्यस्य परात्मनः ॥४०॥
इत्यनन्तः प्रमुदितः पद्मानाथं निजेश्वरम् ।
कल्किं कमलपत्राक्षं नमस्कृत्य ययौ मुनिः ॥४१॥
राजानो मुनिवाक्येन निर्वाण-पदवीं गताः ।
कल्किमभ्यर्च्च्य पद्माञ्च नमस्कृत्य मुनिव्रताः ॥४२॥

शुक उवाच ।

अनन्तस्य कथामेतामज्ञानध्वान्त-नाशिनीम् ।

मायानियन्त्रीं प्रपठन् शृण्वन् बन्धाद्विमुच्यते ॥४३॥
संसाराब्धि-विलासलालसमतिः श्रीविष्णुसेवादरो
भक्ताख्यानमिदं स्वभेद-रहितं निर्माय धर्म्मात्मना ।
ज्ञानोल्लास-निशात-खड्गमुदितः सद्भक्ति-दुर्गाश्रयः
षड्वर्गं जयताद्शेषजगतामात्मस्थितं वैष्णवः ॥४४॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे अनन्त-
माया-निरसनं नाम पञ्चमोऽध्यायः ।

द्वितीयांशः।

षष्ठाध्यायः।

सूत उवाच।

गते नृपगणे कल्किः पद्मया सह सिंहलात्।
शम्भलग्राम-गमने मतिं चक्रे स्वसेनया॥ १॥
ततः कल्केरभिप्रायं विदित्वा वासवस्त्वरन्।
विश्वकर्म्माणमाहूय वचनञ्चेदमब्रवीत्॥ २॥

इन्द्र उवाच।

विश्वकर्मन्! शम्भले त्वं गृहोद्यानाट्ट-घट्टितम्।
प्रासादहर्म्य-संबाधं रचय स्वर्णसञ्चयैः॥ ३॥
रत्नस्फटिक-वैदूर्य्य-नानामणि-विनिर्म्मितैः।
तत्रैव शिल्पनैपुण्यं तव यच्चास्ति तत् कुरु॥ ४॥
श्रुत्वा हरेर्वचो विश्वकर्मा शर्म निजं स्मरन्।
शम्भले कमलेशस्य स्वस्तिकादि-प्रमुखान् गृहान्॥ ५॥
हंस-सिंह-सुपर्णादि-मुखांश्चक्रे स विश्वकृत्।
उपर्य्युपरि तापघ्न-वातायन-मनोहरान्॥ ६॥

नानावन-लतोद्यान-सरोवापी-सुशोभितः ।
शम्भलश्चाभवत् कल्केर्यथेन्द्रस्यामरावती ॥ ७ ॥
कल्किस्तु सिंहलाद् द्वीपात् वहिः सेनागणैर्वृतः ।
त्यक्त्वा कारुमतीं कूले पाथोधेरकरोत् स्थितिम् ॥८॥
वृहद्रथस्तु कौमुद्या सहितः स्नेहकातरः ।
पद्मया सहितायास्मै पद्मानाथाय विष्णवे ॥९॥
ददौ गजानामयुतं लक्षं मुख्यञ्च वाजिनाम् ।
रथानाञ्च द्विसाहस्रं दासीनां द्वे शते मुदा ॥१०॥
दत्त्वा वासांसि रत्नानि भक्ति-स्नेहाश्रु-लोचनः ।
तयोर्मुखालोकनेन नाशकत् किञ्चदीरितुम् ॥११॥
महाविष्णुदम्पती तौ प्रस्थाप्य पुनरागतौ ।
पूजितौ कल्किपद्माभ्यां निजकारुमतीं पुरीम् ॥१२॥
कल्किस्तु जलधेरम्भो विगाह्य पृतनागणैः ।
पारं जिगमिषुं दृष्ट्वा जम्बुकं स्तम्भितोऽभवत् ॥१३॥
जलस्तम्भमथालोक्य कल्किः सबलवाहनः ।
प्रययौ पयसां राशेरुपरि श्रीनिकेतनः ॥१४॥
गत्वा पारं शुकं प्राह याहि मे शम्भलालयम् ॥१५॥
विश्वकर्म्मकृतं यत्र देवराजाज्ञया बहु ।
सद्म संबाधममलं मत्प्रियार्थं सुशोभनम् ॥१६॥

तत्रापि पित्रोर्ज्ञातीनां स्वस्ति ब्रूया यथोचितम् ।
यद्द्वाङ्ग ! विवाहादि सर्व्वं वक्तुं त्वमर्हसि ॥१७॥
पश्चाद्द्यामि वृतस्त्वेतैस्त्वमादौ याहि शम्भलम् ॥१८॥
कल्केर्वचनमाकर्ण्य कीरो धीरस्ततो ययौ ।
आकाशगामी सर्व्वज्ञः शम्भलं सुरपूजितम् ॥१९॥
सप्त-योजन-विस्तीर्णं चातुर्वर्ण्यजनाकुलम् ।
सूर्य्य-रश्मि-प्रतीकाशं प्रासाद-शत-शोभितम् ॥२०॥
सर्व्वर्त्तुसुखदं रम्यं शम्भलं विह्गोऽविशत् ॥२१॥
गृहात् गृहान्तरं दृष्ट्वा प्रासादादपि चाम्बरम् ।
वनाद् वनान्तरं तत्र वृक्षाद् वृक्षान्तरं व्रजन् ॥२२॥
शुकः स विष्णुयशसः सदनं मुदितोऽव्रजत् ।
तं गत्वा रुचिरालापैः कथयित्वा प्रियाः कथाः ॥२३॥
कल्केरागमनं प्राह सिंहलात् पद्मया सह ॥२४॥
ततस्त्वरन् विष्णुयशाः समानार्य्य प्रजाजनान् ।
विशाखयूप-भूपालं कथयामास हर्षितः ॥२५॥
स राजा कारयामास पुर-ग्रामादि मण्डितम् ।
स्वर्णकुम्भैः सदम्भोभिः पूरितैश्चन्दनोक्षितैः ॥२६॥
कालागुरु-सुगन्धाढ्यैर्दीपलाजाङ्कुराक्षतैः ।
कुसुमैः सुकुमारैश्च रम्भा-पूग-फलान्वितैः ।

शुशुभे शम्भलग्रामो विबुधानां मनोहरः ॥२७॥
तं कल्किः प्राविशद् भीम-सेनागण-विलक्षणः ।
कामिनी-नयनानन्दमन्दिराङ्गः कृपानिधिः ॥२८॥
पद्मया सहितः पित्रोः पदयोः प्रणतोऽपतत् ।
सुमतिर्मुदिता पुत्रं स्नुषां शक्रं शचीमिव ।
ददर्श त्वमरावत्यां पूर्णकामा दितिः सती ॥२९॥
शम्भल-ग्राम-नगरी पताका-ध्वज-शालिनी ।
अवरोधसुजघना प्रासादविपुलस्तनी ।
मयूर-चूचका हंस-संघ-हार-मनोहरा ॥३०॥
पटवासोद्योतधूम-वसना कोकिलस्वना ।
सहासगोपुरमुखी वामनेत्रा यथाङ्गना ।
कल्किं पतिं गुणवती प्राप्य रेजे तमीश्वरम् ॥३१॥
स रेमे पद्मया तत्र वर्षपूगानजाश्रयः ।
शम्भले विह्वलाकारः कल्किः कल्कविनाशनः ॥३२॥
कवेः पत्नी कामकला सुषुवे परमेष्ठिनौ ।
वृहत्कीर्त्तिर्वृहद्बाहू महाबलपराक्रमौ ॥३३॥
प्राज्ञस्य सन्नतिर्भार्य्या तस्यां पुत्रौ बभूवतुः ।
यज्ञविज्ञौ सर्व्वलोक-पूजितौ विजितेन्द्रियौ ॥३४॥
सुमन्त्रकस्तु मालिन्यां जनयामास शासनम् ।

वेगवन्तञ्च साधूनां द्वावेतावुपकारकौ ॥ ३५ ॥
ततः कल्किस्त्र पद्मायां जयो विजय एव च ।
द्वौ पुत्रौ जनयामास लोकख्यातौ महाबलौ ॥३६॥
एतैः परिवृतोऽमात्यैः सर्व्वसम्पत्समन्वितौ ।
वाजिमेधविधानार्थम् उद्यतं पितरं प्रभुः ॥३७॥
समीक्ष्य कल्किः प्रोवाच पितामहमिवेश्वरः ।
दिशां पालान् विजित्याहं धनान्याहृत्य इत्युत ॥३८॥
कारयिष्याम्यश्वमेधं यामि दिग्विजयाय भोः ! ॥३९॥
इति प्रणम्य तं प्रीत्या कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतः प्रययौ कीकटं पुरम् ॥४०॥
बुद्धालयं सुविपुलं वेदधर्म्मवहिष्कृतम् ।
पितृदेवार्च्चनाहीनं परलोकविलोपकम् ॥४१॥
देहात्मवादबहुलं कुलजातिविवर्ज्जितम् ।
धनैः स्त्रीभिर्भक्ष्यभोज्यैः स्वपराभेददर्शिनम् ॥४२॥
नानाजनैः परिवृतं पानभोजनतत्परैः ॥४३॥
श्रुत्वा जिनो निजगणैः कल्केरागमनं क्रुधा ।
अक्षौहिणीभ्यां सहितः संबभूव पुराद्वहिः ॥४४॥

गजरथतुरगैः समाचिता भूः
कनकविभूषण-भूषितैर्वराङ्गैः ।

शतशतरथिभिर्ध्वतास्त्रशस्त्रैः
ध्वजपटराजि-निवारितातपैर्बभौ सा ॥४५॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
बुद्धनिग्रहे कीकटपुरगमनं नाम षष्ठोऽध्यायः ।

कल्किपुराणम्।

द्वितीयांशः।

सप्तमाध्यायः।

सूत उवाच।

ततो विष्णुः सर्व्वजिष्णुः कल्किः कल्कविनाशनः।
कालयामास तां सेनां करिणीमिव केशरी ॥१॥
सेनाङ्गनां तां रतिसङ्गरद्धतीं
रक्ताक्तवस्त्रां विवृतोरुमध्याम्।
पलायतीं चारुविकीर्णकेशां
विकूजतीं प्राह स कल्किनायकः ॥२॥
रे बौद्धाः! मा पलायध्वं निवर्त्तध्वं रणाङ्गणे।
युध्यध्वं पौरषं साधु दर्शयध्वं पुनर्मम ॥३॥
जिनो हीनबलः कोपात् कल्केराकर्ण्य तद्वचः।
प्रतियोद्धुं वृषारूढ़ः खड्गचर्म्मधरो ययौ ॥ ४ ॥
ननाप्रहरणोपेतो नानायुधविशारदः।
कल्किना युयुधे धीरो देवानां विस्मयावहः ॥५॥
शूलेन तुरगं विद्ध्वा कल्किं बाणेन मोहयन्।

क्रोड़ीकृत्य द्रुतं भूमेर्नाशकत् तोलनादृतः ॥ ६ ॥
जिनो विश्वम्भरं ज्ञात्वा क्रोधाकुलितलोचनः ।
चिच्छेदास्य तनुत्राणं कल्केः शस्त्रञ्च दासवत् ॥७॥
विशाखयूपोऽपि तथा निहत्य गदया जिनम् ।
मूर्च्छितं कल्किमादाय लीलया रथमारुहत् ॥८॥
लब्धसंज्ञस्तथा कल्किः सेवकोत्साहदायकः ।
समुत्पत्य रथात् तस्य नृपस्य जिनमाययौ ॥९॥
शूलव्यथां विहायाजौ महासत्वस्तुरङ्गमः ।
रिङ्गणैर्भ्रमणैः पादविक्षेपहननैर्मुहुः ॥१०॥
दण्डाघातैः सटाक्षेपैर्बौद्धसेनागणान्तरे ।
निजघान रिपून् कोपात् शतशोऽथ सहस्रशः ॥११॥
निश्वासवातैरुड्डीय केचिद् द्वीपान्तरेऽपतत् ।
हस्त्यश्वरथसंबाधाः पतिता रणमूर्द्धनि ॥ १२॥
गर्ग्यो जघ्नुः षष्टिशतं गर्ग्यः कोटिशतायुतम् ।
विशालास्तु सहस्राणां पञ्चाविंशं रणे त्वरन् ॥ १३
अयुते द्वे जघानाजौ पुत्राभ्यां सहितः कविः ।
दशलक्षं तथा प्राज्ञः पञ्चलक्षं सुमन्त्रकः ॥ १४ ॥
जिनं प्राह हसन् कल्किस्तिष्ठाग्रे मम दुर्मते ! ।
दैवं मां विद्धि सर्व्वत्र शुभाशुभफलप्रदम् ॥ १५ ॥

मद्बाणजालभिन्नाङ्गो निःषङ्गो यास्यसि क्षयम् ।
न यावत् पश्य तावत् त्वं बन्धूनां ललितं मुखम् ॥१६॥
कल्केरितीरितं श्रुत्वा जिनः प्राह हसन् बली ।
दैवं त्वद्दृश्यं शास्त्रे ते बधोऽयमुररीकृतः ।
प्रत्यक्षवादिनो बौद्धा वयं यूयं वृथाश्रमाः ॥ १७ ॥
यदि वा दैवरूपस्त्वं तथाप्यग्रे स्थिता वयम् ।
यदि भेत्तासि वाणौघैस्तदा बौद्धैः किमत्र ते ॥ १८ ॥
सोपालम्भं त्वया ख्यातं त्वय्येवास्तु स्थिरो भव ।
इति क्रोधाद् वाणजालैः कल्किं घोरैः समावृणोत्॥१९
स तु वाणमयं वर्षं क्षयं निन्येऽर्कवह्निमम् ॥ २० ॥
ब्राह्मं वायव्यमाग्नेयं पार्जन्यं चान्यदायुधम् ।
कल्केर्दर्शनमात्रेण निष्फलान्यभवन् क्षणात् ॥ २१ ॥
यथोषरे वोजमुप्तं दानमश्रोत्रिये यथा ।
यथा विष्णौ सतां द्वेषात् भक्तिर्येन कृताप्यहो ॥ २२ ॥
कल्किस्तु तं वृषारूढमवप्लुत्य कचेऽग्रहीत् ।
ततस्तौ पेततुर्भूमौ ताम्रचूडाविव क्रुधा ॥ २३ ॥
पतित्वा स कल्किकचं जग्राह तत्करं करे ॥२४॥
ततः समुत्थितौ व्यग्रौ यथा चानूरकेशवौ ।
धृतहस्तौ धृतकचौ ऋक्षाविव महाबलौ ।

युयुधाते महावीरौ जिनकल्की निरायुधौ ॥ २५ ॥
ततः कल्की महायोगी पदाघातेन तत्कटिम्।
विभज्य पातयामास तालं मत्तगजो यथा ॥ २६ ॥
जिनं निपतितं दृष्ट्वा बौद्धा हाहेति चुक्रुशुः।
कल्केः सेनागणा विप्रा जहृषुर्निहतारयः ॥ २७ ॥
जिने निपतिते भ्राता तस्य शुद्धोदनो बली।
पादचारी गदापाणिः कल्किं हन्तुं द्रुतं ययौ ॥२८॥
कविस्तु तं बाणवर्षैः परिवार्य्य समन्ततः।
जगर्ज्ज परवीरघ्नो गजमावृत्य सिंहवत् ॥ २९ ॥
गदाहस्तं तमालोक्य पत्तिं स धर्म्मवित् कविः।
पदातिगो गदापाणिस्तस्थौ शुद्धोदनाग्रतः ॥ ३० ॥
स तु शुद्धोदनस्तेन युयुधे भीमविक्रमः।
गजः प्रतिगजेनेव दन्ताभ्यां सगदावुभौ ॥ ३१ ॥
युयुधाते महावीरौ गदायुद्धविशारदौ।
कृतप्रतिकृतौ मत्तौ नदन्तौ भैरवान् रवान् ॥३२॥
कविस्तु गदया गुर्व्व्या शुद्धोदनगदां नदन्।
करादपास्याशु तया स्वया वक्षस्यताड़यत् ॥ ३३ ॥
गदाघातेन निहतो वीरः शुद्धोदनो भुवि।
पतित्वा सहसोत्थाय तं जघ्ने गदया पुनः ॥ ३४ ॥

संताड़ितेन तेनापि शिरसा स्तम्भितः कविः ।
न पपात स्थितस्तत्र स्थाणुवद्विक्लेन्द्रियः ॥ ३५ ॥
शुद्धोदनस्तमालोक्य महासारं रथायुतैः ।
प्रावृतं तरसा माया-देवीमानेतुमाययौ ॥ ३६ ॥
यस्या दर्शनमात्रेण देवासुरनरादयः ।
निःसाराः प्रतिमाकारा भवन्ति भुवनाश्रयाः ॥३७॥
बौद्धा शौद्धोदनाद्यग्रे कृत्वा तामग्रतः पुनः ।
योद्धुं समागता म्लेच्छकोटिलक्षशतैर्वृताः ॥ ३८ ॥
सिंहध्वजोत्थितरथाम् फेरु-काक-गणावृताम् ।
सर्वास्त्रशस्त्रजननीं षड्वर्गपरिसेविताम् ॥ ३९ ॥
नानारूपां बलवतीं त्रिगुणव्यक्तिलक्षिताम् ।
मायां निरीक्ष्य पुरतः कल्किसेना समापतत् ॥ ४०॥
निःसाराः प्रतिमाकाराः समस्ताः शस्त्रपाणयः ॥४१॥
कल्किस्तानालोक्य निजान् भ्रातृज्ञातिसुहृज्जनान् ।
मायया जायया जीर्णान् विभुरासीत् तदग्रतः ॥ ४२॥
तामालोक्य वरारोहां श्रीरूपां हरिरीश्वरः ।
सा प्रियेव तमालोक्य प्रविष्टा तस्य विग्रहे ॥ ४३ ॥
तामनालोक्य ते बौद्धा मातरं कतिधा वराः ।
रुरुदुः संघशो दीनाः हीनस्वबलपौरुषाः ॥ ४४ ॥

विस्मयाविष्टमनसः क्व गतेयमथाब्रुवन् ।
कल्किः समालोकनेन समुत्थाप्य निजान् जनान् ॥ ४५ ॥
निशातमसिमादाय म्लेच्छान् हन्तुं मनो दधे ।
सन्नद्धं तुरगारूढं दृढ़हस्तधृततत्सरुम् ॥ ४६ ॥
धनुर्निषङ्गमनिशं बाणजालप्रकाशितम् ।
धृतहस्ततनुत्राणगोधाङ्गुलिविराजितम् ॥ ४७ ॥
मेघोपर्य्युद्गताराभं दंशनस्वर्णविन्दुकम् ।
किरीटकोटिविन्यस्त-मणिराजिविराजितम् ॥ ४८ ॥
कामिनीनयनानन्दसन्दोहरसमन्दिरम् ।
विपक्षपक्षविक्षेपक्षिप्तरूक्षकटाक्षकम् ॥ ४९ ॥
निजभक्तजनोल्लास-संवासचरणाम्बुजम् ।
निरीक्ष्य कल्किं ते बौद्धास्तत्रसुर्धर्म्मनिन्दकाः ॥ ५० ॥
जहृषुः सुरसंघाः खे यागाहुतिहुताशनाः ॥ ५१ ॥

सुबलमिलनहर्षः शत्रुनाशैकतर्षः
समरवरविलासः साधुसत्कारकाशः ।
स्वजनदुरितहर्त्ता जीवजातस्य भर्त्ता
रचयतु कुशलं वः कामपूरावतारः ॥ ५२ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
बौद्धयुद्धो नाम सप्तमोऽध्यायः ।

समाप्तोऽयं द्वितीयांशः ।

कल्किपुराणम् ।

तृतीयांशः ।

प्रथमाध्यायः ।

सूत उवाच ।

ततः कल्किर्म्लेच्छगणान् करवालेन कालितान् ।
बाणैः संताड़ितानन्यान् अनयद् यमसादनम् ॥ १॥
विशाखयूपोऽपि तथा कविप्राज्ञसुमन्त्रकाः ।
गार्ग्यभार्ग्यविशालाद्या म्लेच्छान् निन्युर्यमक्षयम् ॥ २ ॥
कपोतरोमा काकाक्षः काककृष्णादयोऽपरे ।
बौद्धाः शौद्धोदना याता युयुधुः कल्किसैनिकैः ॥ ३॥
तेषां युद्धमभूद् घोरं भयदं सर्व्वदेहिनाम् ।
भूतेशानन्दजनकं रुधिरारुणकर्द्दमम् ॥ ४ ॥
गजाश्वरथसंघानां पततां रुधिरस्रवैः ।
स्रवन्ती केशशैवाला वाजिग्राहा सुगाहिका ॥ ५॥
धनुस्तरङ्गा दुष्पारा गजरोधःप्रवाहिणी ।
शिरःकूर्म्मा रथतरिः पाणिमीनासृगापगा ॥ ६ ॥
प्रवृत्ता तत्र बहुधा हर्षयन्तो मनस्विनाम् ।

दुन्दुभेयरवा फेरुशकुनानन्ददायिनी ॥ ७ ॥
गजैर्गजा नरैरश्वाः खरैरुष्ट्रा रथै रथाः ।
निपेतुर्बाणभिन्नाङ्गाः छिन्नबाकङ्घ्रिकन्धराः ॥ ८ ॥
भस्मना गुण्ठितमुखा रक्तवस्त्रा निवारिताः ।
विकीर्णकेशाः परितो यान्ति सन्न्यासिनो यथा ॥ ९ ॥
व्यग्राः केऽपि पलायन्ते याचन्त्यन्ये जलं पुनः ।
कल्किसेनाशुगक्षुण्णा म्लेच्छा नो शर्म्म लेभिरे ॥ १० ॥
तेषां स्त्रियो रथारूढा गजारूढा विहङ्गमैः ।
समारूढा हयारूढाः खरोष्ट्रवृषवाहनाः ॥ ११ ॥
योद्धुं समाययुस्त्यक्त्वा पत्यापत्यसुखाश्रयान् ।
रूपवत्यो युवत्योऽतिबलवत्यः पतिव्रताः ॥ १२ ॥
नानाभरणभूषाढ्याः सन्नद्धा विशदप्रभाः ।
खड्गशक्तिधनुर्बाणवलयाक्तकराम्बुजाः ॥ १३ ॥
स्वैरिण्योऽप्यतिकामिन्यो पुंश्चल्यश्च पतिव्रताः ।
ययुर्योद्धुं कल्किसैन्यैः पतीनां निधनातुराः ॥ १४ ॥
म्लेच्छकाष्ठचितानां प्रभुताम्नायशासनात् ।
साक्षात् पतीनां निधनं किं युवत्योऽपि सेहिरे ॥१५॥
ताः स्त्रियः स्वपतीन् बाणभिन्नान् व्याकुलितेन्द्रियान् ।
कृत्वा पश्चाद्युयुधिरे कल्किसैन्यैर्धृतायुधाः ॥ १६ ॥

ताः स्त्रीरूपीक्ष्य ते सर्व्वे विस्मयस्मितमानसाः।
कल्किमागत्य ते योधाः कथयामासुरादरात् ॥ १७ ॥
स्त्रीणामेव युयुत्सूनां कथाः श्रुत्वा महामतिः।
कल्किः समुदितः प्रायात् स्वसैन्यैः सानुगो रथैः ॥१८॥
ताः समालोक्य पद्मेशः सर्व्वशस्त्रास्त्रधारिणीः।
नाना-वाहन-संरूढ़ाः कृतव्यूहा उवाच सः ॥ १९ ॥

कल्किरुवाच।

रे स्त्रियः! शृणुतास्माकं वचनं पथ्यमुत्तमम्।
स्त्रिया युद्धेन किं पुंसां व्यवहारोऽत्र विद्यते ॥ २० ॥
मुखेषु चन्द्रबिम्बेषु राजितालकपंक्तिषु।
प्रहरिष्यन्ति के तत्र नयनानन्ददायिषु ॥ २१ ॥
विभ्रान्ततारभ्रमरं नवकोकनदप्रभम्।
दीर्घापाङ्गेक्षणं यत्र तत्र कः प्रहरिष्यति ॥ २२ ॥
वक्षोजशम्भू सत्तार-हारव्यालविभूषितौ।
कन्दर्पदर्पदलनौ तत्र कः प्रहरिष्यति ॥ २३ ॥
लोललीलालकव्रात-चकोराक्रान्तचन्द्रिकम्।
मुखचन्द्रं चिह्नहीनं कस्तं हन्तुमिहार्हति ॥ २४ ॥
स्तनभार-भराक्रान्त-नितान्त-क्षीण-मध्यमम्।
तनुलोमलताबन्धं कः पुमान् प्रहरिष्यति ॥ २५ ॥

नेत्रानन्देन नेत्रेण समावृतमनिन्दितम् ।
जघनं सुघनं रम्यं बाणैः कः प्रहरिष्यति ॥ २६ ॥
इति कल्केर्वचः श्रुत्वा प्राहस्य प्राहुरादृताः ।
अस्माकं त्वं पतीन् हंसि तेन नष्टा वयं विभो ! ।
हन्तुं गतानामस्त्राणि कराण्येवागतान्युत ॥ २७ ॥
खड्ग-शक्ति-धनुर्बाण-शूल-तोमर-यष्टयः ।
ताः प्राहुः पुरतो मूर्त्ताः कार्त्तस्वरविभूषणाः ॥२८॥

अस्त्राण्यूचुः ।

यमासाद्य वयं नार्य्यो हिंसयामः स्वतेजसा ।
तमात्मानं सर्व्वमयं जानीत कृतनिश्चयाः ॥ २९ ॥
तमीशमात्मना नार्य्यः ! चरामो यदनुज्ञया ।
यत्कृता नामरूपादिभेदेन विदिता वयम् ॥ ३० ॥
रूप-गन्ध-रस-स्पर्श-शब्दाद्या भूतपञ्चकाः ।
चरन्ति यदधिष्ठानात् सोऽयं कल्किः परात्मकः ॥३१॥
काल-स्वभाव-संस्कार-नामाद्या प्रकृतिः परा ।
यस्येच्छया सृजत्यण्डं महाहङ्कारकादिकान् ॥ ३२ ॥
यन्मायया जगद्यात्रा सर्गस्थित्यन्तसंज्ञिता ।
य एवाद्यः स एवान्ते तस्यायः सोऽयमीश्वरः ॥ ३३ ॥
असौ पतिर्मे भार्य्याहमस्य पुत्त्राप्तबान्धवाः ।

स्वप्नोपमास्तु तन्निष्ठा विविधाश्चैन्द्रजालवत्॥ ३४॥
स्नेहमोहनिबन्धानां यातायातदृशां मतम्।
न कल्किसेविनां रागद्वेषविद्वेषकारिणाम्॥ ३५॥
कुतः कालः कुतो मृत्युः क यमः कास्ति देवता।
स एव कल्किर्भगवान् मायया बहुलीकृतः॥३६॥
न शस्त्राणि वयं नार्य्यः संप्रहार्य्या न च क्वचित्।
शस्त्रप्रहर्त्तृभेदोऽयमविवेकः परात्मनः॥ ३७॥
कल्किदासस्यापि वयं हन्तुं नार्हाः कथोद्भुतम्।
हनिष्यामो दैत्यपतेः प्रह्लादस्य यथा हरिम्॥ ३८॥
इत्यस्त्राणां वचः श्रुत्वा स्त्रियो विस्मितमानसाः।
स्नेहमोहविनिर्मुक्तास्तं कल्किं शरणं ययुः॥ ३९॥
ताः समालोक्य पद्मेशः प्रणता ज्ञाननिष्ठया।
प्रोवाच प्रहसन् भक्ति-योगं कल्मषनाशनम्॥ ४०॥
कर्म्मयोगञ्चात्मनिष्ठं ज्ञानयोगं भिदाश्रयम्।
नैष्कर्म्म्यलक्षणं तासां कथयामास माधवः॥४१॥
ताः स्त्रियः कल्किगदितज्ञानेन विजितेन्द्रियाः।
भक्त्या परमवापुस्तत् योगिनां दुर्लभं पदम्॥४२॥

दत्त्वा मोक्षं म्लेच्छबौद्धप्रियाणां
कृत्वा युद्धं भैरवं भीमकर्म्मा।

हत्वा बौद्धान् म्लेच्छसंघांश्च कल्कि-
स्तेषां ज्योतिः स्थानमापूर्य्य रेजे ॥ ४३ ॥
ये शृण्वन्ति वदन्ति बौद्धनिधनं म्लेच्छक्षयं सादरात्
लोकाः शोकहरं सदा शुभकरं भक्तिप्रदं माधवे ।
तेषामेव पुनर्न जन्ममरणं सर्व्वार्थसम्पत्करं
मायामोहविनाशनं प्रतिदिनं संसारतापच्छिदम् ॥४४॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे म्लेच्छ-
निधनं नाम प्रथमोऽध्यायः ।

कल्किपुराणम्।

तृतीयांशः।

द्वितीयाध्यायः।

सूत उवाच।

ततो बौद्धान् म्लेच्छगणान् विजित्य सह सैनिकैः।
धनान्यादाय रत्नानि कीकटात् पुनराव्रजत् ॥१॥
कल्किः परमतेजस्वी धर्म्माणां परिरक्षकः।
चक्रतीर्थं समागत्य स्नानं विधिवदाचरत् ॥२॥
भ्रातृभिर्लोकपालाभैर्बहुभिः स्वजनैर्वृतः।
समायातान् मुनींस्तत्र ददर्श दीनमानसान् ॥३॥
समुद्विग्नागतांस्तत्र परिपाहि जगत्पते।
इत्युक्तवन्तो बहुधा ये तानाह हरिः परः ॥४॥
बालखिल्लादिकानल्पकायान् चीरजटाधरान्।
विनयावनतः कल्किस्तानाह कृपणान् भयात् ॥५॥
कस्माद्यूयं समायाताः केन वा भीषिता वत।
तमहं निहनिष्यामि यदि वा स्यात् पुरन्दरः ॥६॥
इत्याश्रुत्य कल्किवाक्यं तेनोल्लासितमानसाः।

जगदुः पुण्डरीकाक्षं निकुम्भदुहितुः कथाः ॥७॥

मुनय ऊचुः ।

शृणु विष्णुयशःपुत्त्र! कुम्भकर्णात्मजात्मजा ।
कुथोदरीति विख्याता गगनार्द्धसमुत्थिता ॥८॥
कालकञ्जस्य महिषी विकञ्जजननी च सा ।
हिमालये शिरः कृत्वा पादौ च निषधाचले ।
शेते स्तनं पाययन्ती विकञ्जं प्रस्नुतस्तनी ॥९॥
तस्या निश्वासवातेन विवशा वयमागताः ।
दैवेनैव समानीताः संप्राप्तास्त्वत्पदाम्बुजम् ।
मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च ॥१०॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम् ॥११॥
उपत्यकां समासाद्य निशामेकां निनाय सः ।
प्रातर्जिगमिषुः सैन्यैर्ददृशे क्षीरनिम्नगाम् ॥१२॥
महेन्द्रधवलाकारां फेनिलां वहतीं द्रुतम् ।
वलन्तीं वीक्ष्य ते सर्व्वे स्तम्भिता विस्मयान्विताः ॥१३॥
सेनागणगजाश्वादिरथयोधैः समावृतः ।
कल्किस्तु भगवांस्तत्र ज्ञातार्थोऽपि मुनीश्वरान् ॥१४॥
पप्रच्छ का नदी चेयं कथं दुग्धवहाभवत् ।

ते कल्केस्तु वचः श्रुत्वा मुनयः प्राहुरादरात् ॥१५॥
शृणु कल्के पयस्वत्याः प्रभवं हिमवद्गिरौ।
समायाता कुथोदर्य्याः स्तनप्रस्रवनादिह ॥१६॥
घटिकासप्तकैः चान्या पयो यास्यति वेगितम्।
हीनसारा तटाकारा भविष्यति महामते ॥१७॥
इति श्रुत्वा मुनीनान्तु वचनं सैनिकैः सह।
अहो किमस्या राक्षस्याः स्तनादेका त्वियं नदी ॥१८॥
एकं स्तनं पाययति विकञ्जं पुत्त्रमादरात्।
न जानेऽस्याः शरीरस्य प्रमाणं कति वा भवेत् ॥१९॥
एवं वास्या निशाचर्य्या इत्यूचुर्विस्मयान्विताः।
कल्किः परात्मा सन्नह्य सेनाभिः सहसा ययौ ॥२०॥
मुनिदर्शितमार्गेण यत्रास्ते सा निशाचरी।
एवं स्तनं पाययन्ती गिरिमूर्द्ध्नि घनोपमा ॥ २१॥
श्वासवातातिवातेन दूरक्षिप्तवनद्विपाः।
यस्याः कर्णविलावासं प्रसुप्ताः सिंहसंकुलाः ॥२२॥
पुत्त्रपौत्त्रपरिवृता गिरिगह्वरविभ्रमाः।
केशमूलमुपालम्ब्य हरिणा शेरते चिरम् ॥२३॥
यूका इव न च व्यग्रा लुब्धजातङ्कया भृशम्।
तामालोक्य गिरेर्मूर्द्ध्नि गिरिवत् परमाद्भुताम्।

कल्किः कमलपत्राक्षः सर्व्वांस्तानाह सैनिकान् ॥२४॥
भयोद्विग्नान् बुद्धिहीनान् त्यक्तोद्यमपरिच्छदान् ॥२५॥

कल्किरुवाच ।

गिरिदुर्गे वह्निदुर्गं कृत्वा तिष्ठन्तु मामकाः ।
गजाश्वरथयोधा ये समायान्तु मया सह ॥२६॥
अहं स्वल्पेन सैन्येन याम्यस्याः संमुखं शनैः ।
प्रहर्त्तुं बाणसन्दोहैः खड्गशक्तिपरश्वधैः ॥२७॥
इत्युक्त्वास्थाप्य पश्चात्तान् बाणैस्तां समहनद् बली ।
सा क्रुधोत्थाय सहसा ननर्द परमाद्भुतम् ॥२८॥
तेन नादेन महता वित्रस्ताश्चाभवन् जनाः ।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले ॥२९॥
सा रथांश्च गजांश्चापि विवृतास्या भयानका ।
जघास प्रश्वासवातैः समानीय कुथोदरी ॥३०॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह ।
यथर्क्षमुखवातेन प्रविशन्ति पिपीलिकाः ॥३१॥
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे ।
तत्रस्था मुनयः शेपुर्जेपुश्चान्ये महर्षयः ॥३२॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः ।
रुरुदुः शिष्टयोधा ये जहृषुस्तन्निशाचराः ॥३३॥

जगतां कदनं दृष्ट्वा सस्मारात्मानमात्मना ।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः ॥३४॥
बाणाग्निं चेलचर्म्माभ्यां कर्म्मनैर्यानदारुभिः ।
प्रज्वाल्योदरमध्येन करवालं समाददे ॥ ३५ ॥
तेन खड्गेन महता दारुयं निर्भिद्य बन्धुभिः ।
बलिभिर्भ्रातृभिर्वाहैर्वृतः शस्त्रास्त्रपाणिभिः ॥३६॥
वह्निर्बभूव सर्व्वेशः कल्किः कल्कविनाशनः ।
सहस्राक्षो यथा वृत्रकुक्षिं दम्भोलि-नेमिना ॥३७॥
योनिरन्ध्राद्गजरथास्तुरगाश्वाभवन् वहिः ।
नासिकाकर्णविवरात् केऽपि तस्याः विनिर्गताः ॥३८॥
ते निर्गतास्ततस्तस्याः सैनिका रुधिरोक्षिताः ।
तां विव्यधुर्निक्षिपन्तीं तरसा चरणौ करौ ॥३९॥
ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा ।
नादयन्तीं दिशो द्योः खं चूर्णयन्ती च पर्व्वतान् ॥४०
करञ्जोऽपि तथा वीक्ष्य मातरं कातरोऽभवत् ।
स विकञ्जः क्रुधा धावन् सेनामध्ये निरायुधः ॥४१ ॥
गजमालाकुलो वक्षोवाजिराजिविभूषणः ।
महासर्पकृतोष्णीषः केशरिमुद्रिताङ्गुलिः ॥४२॥
ममर्द कल्किसेनां तां मातुर्व्यसनकर्षितः ।

स कल्किस्तं ब्रह्ममस्त्रं रामदत्तं जिघांसया ॥४३॥
धनुषा पञ्चवर्षीयं राक्षसं शस्त्रमाददे।
तेनास्त्रेण शिरस्तस्य छित्वा भूमावपातयत् ॥४४॥
रुधिराक्तं धातुचित्रं गिरिशृङ्गमिवाद्भुतम्।
सपुत्रां राक्षसीं हत्वा मुनीनां वचनाद्विभुः ॥४५॥
गङ्गातीरे हरिद्वारे निवासं समकल्पयत्।
देवानां कुसुमासारैर्मुनिस्तोत्रैः सुपूजितः ॥४६॥
निनाय तां निशां तत्र कल्किः परिजनावृतः।
प्रातर्ददर्श गङ्गायास्तीरे मुनिगणान् बहून्।
तस्याः स्नानव्याजविष्णोरात्मनो दर्शनाकुलान् ॥४७॥

हरिद्वारे गङ्गातटनिकटपिण्डारकवने
वसन्तं श्रीमन्तं निजगणवृतं तं मुनिगणाः।
स्तवैः स्तुत्वा स्तुत्वा विधिवदुदितैर्जह्नुतनयां
प्रपश्यन्तं कल्किं मुनिजनगणा द्रष्टुमगमन् ॥४८॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कुथोदरीवधानन्तरं मुनिदर्शनं नाम द्वितीयाध्यायः।

कल्किपुराणम् ।

तृतीयांशः ।

तृतीयाध्यायः ।

सूत उवाच ।

सुखागतान् मुनीन् दृष्ट्वा कल्किः परमधर्म्मवित् ।
पूजयित्वा च विधिवत् सुखासीनानुवाच तान् ॥१॥

कल्किरुवाच ।

के यूयं सूर्य्यसङ्काशा मम भाग्यादुपस्थिताः ।
तीर्थाटनोत्सुका लोकत्रयाणामुपकारकाः ॥२॥
वयं लोके पुण्यवन्तो भाग्यवन्तो यशस्विनः ।
यतः कृपाकटाक्षेण युष्माभिरवलोकिताः ॥३॥
ऋतस्ते वामदेवोऽत्रिर्वशिष्ठो गालवो भृगुः ।
पराशरो नारदोऽश्वत्थामा रामः कृपस्त्रितः ॥४॥
दुर्व्वासा देवलः कण्वो वेदप्रमितिरङ्गिराः ।
एते चान्ये च बहवो मुनयः संशितव्रताः ॥५॥
कृत्वाग्रे मरुदेवापी चन्द्रसूर्य्यकुलोद्भवौ ।
राजानौ तौ महावीर्य्यौ तपस्याभिरतौ चिरम् ॥६॥

ऊचुः प्रहृष्टमनसः कल्किं कल्कविनाशनम् ।
महोदधेस्तीरगतं विष्णुं सुरगणा यथा ॥७॥

मुनय ऊचुः ।

जयाशेष-जगन्नाथ विदिताखिलमानस ।
सृष्टिस्थितिलयाध्यक्ष! परमात्मन् प्रसीद नः ॥८॥
कालकर्म्मगुणावास प्रसारितनिजक्रिय ।
ब्रह्मादिनुतपादाब्ज! पद्मानाथ प्रसीद नः ॥९॥
इति तेषां वचः श्रुत्वा कल्किः प्राह जगत्पतिः ।
कावेतौ भवतामग्रे महासत्त्वौ तपस्विनौ ॥१०॥
कथमत्रागतौ स्तुत्वा गङ्गां मुदितमानसौ ।
का वा स्तुतिस्तु जाह्नव्या युवयोर्नामनी च के ॥११॥
तयोर्मरुः प्रमुदितः कृताञ्जलिपुटः कृती ।
आदावुवाच विनयी निजवंशानुकीर्त्तनम् ॥१२॥

मरुरुवाच ।

सर्व्वं वेत्सि परात्मापि अन्तर्यामिन् हृदि स्थितः ।
तवाज्ञया सर्व्वमेतत् कथयामि शृणु प्रभो ॥१३॥
तव नाभेरभूद्ब्रह्मा मरीचिस्तत्सुतोऽभवत् ।
ततो मनुस्तत्सुतोऽभूदिक्ष्वाकुः सत्यविक्रमः ॥१४॥

युवनाश्व इति ख्यातो मान्धाता तत्सुतोऽभवत् ।
पुरुकुत्सस्तत्सुतोऽभूदनरण्यो महामतिः ॥१५॥
त्रसदस्युः पिता तस्मात् हर्य्यश्वस्त्वरुणस्ततः ।
त्रिशङ्कुस्तत्सुतो धीमान् हरिश्चन्द्रः प्रतापवान् ॥१६॥
हरितस्तत्सुतस्तस्मात् भरुकस्तत्सुतो वृकः ।
तत्सुतः सगरस्तस्मादसमञ्जास्ततोऽंशुमान् ॥१७॥
ततो दिलीपस्तत्पुत्रो भगीरथ इति स्मृतः ।
येनानीता जाह्नवीयं ख्याता भागीरथी भुवि ।
स्तुता नुता पूजितेयं तव पादसमुद्भवा ॥१८॥
भगीरथात् सुतस्तस्मान्नाभस्तस्मादभूद्बली ।
सिन्धुद्वीपसुतस्तस्मात् अयुतायुस्ततोऽभवत् ॥१९॥
ऋतुपर्णस्तत्सुतोऽभूत् सुदासस्तत्सुतोऽभवत् ।
सौदासस्तत्सुतो धीमानश्मकस्तत्सुतो मतः ॥२०॥
मूलकात् स दशरथस्तस्मादैड़विड़स्ततः ।
राजा विश्वसहस्तस्मात् खट्वाङ्गो दीर्घबाहुकः ॥२१॥
ततो रघुरजस्तस्मात् सुतो दशरथः कृती ।
तस्माद्रामो हरिः साक्षादाविर्भूतो जगत्पतिः ॥२२॥
रामावतारमाकर्ण्य कल्किः परमहर्षितः ।
महं प्राह विस्तरेण श्रीरामचरितं वद ॥ २३ ॥

मरुरुवाच ।

सीतापतेः कर्म्म वक्तुं कः समर्थोऽस्ति भूतले ।
शेषः सहस्रवदनैरपि लालायितो भवेत् ॥ २४ ॥
तथापि सेमुषी मेऽस्ति वर्णयामि तवाज्ञया ।
रामस्य चरितं पुण्यं पापतापप्रमोचनम् ॥२४॥
अजादिविबुधार्थितोऽजनि चतुर्भिरंशैः कुले
रवेरजसुतादजो जगति यातुधानक्षयः ।
शिशुः कुशिकजाध्वरक्षयकरक्षयो यो बलाद्-
बली-ललितकन्धरो जयति जानकीवल्लभः ॥२५॥
मुनेरनु सहानुजो निखिलशस्त्रविद्यातिगो
ययावतिवनप्रभो जनकराजराजत्सभाम् ।
विधाय जनमोहनद्युतिमतीव कामद्रुहः
प्रचण्डकरचण्डिमा भवनभञ्जने जन्मनः ॥२६॥
नमःप्रतिमतेजसं दशरथात्मजं सानुजं
मुनेरनु यथाविधेः शशिवदादिदेवं परम् ।
निरीक्ष्य जनको मुदा क्षितिसुतापतिं संमतं
निजोचितपणक्षमं मनसि भर्त्सयन्नाययौ ॥२७॥
स भूपपरिपूजितो जनकजेक्षितैरर्च्चितः
करालकठिनं धनुः करसरोरुहे संहितम् ।

विभज्य बलवद्दृढं जय रघूद्वहेत्युच्चकै-
र्ध्वनिं त्रिजगतीगतं परिविधाय रामो बभौ ॥२८॥
ततो जनकभूपतिर्दशरथात्मजेभ्यो ददौ
चतस्र उषतीर्मुदा वरचतुर्भ्य उद्वाहने ।
स्वलंकृतनिजात्मजाः पथि ततो बलं भार्गव-
श्चकार उररी निजं रघुपतौ महोग्रं त्यजन् ॥२९॥
ततः स्वपुरमागतो दशरथस्तु सीतापतिं
नृपं सचिवसंयुतो निजविचित्रसिंहासने ।
विधातुममलप्रभं परिजनैः क्रियाकारिभिः
समुद्यतमतिं तदा द्रुतमवारयत् केकयी ॥३०॥
ततो गुरुनिदेशतो जनकराजकन्यायुतः
प्रयाणमकरोत् सुधीर्यदनुगः सुमित्रासुतः ।
वनं निजगणं त्यजन् गुहगृहे वसन्नादरात्
विसृज्य नृपलाञ्छनं रघुपतिर्जटाचीरभृत् ॥३१॥
प्रियानुजयुतस्ततो मुनिमतो वने पूजितः
स पञ्चवटिकाश्रमे भरतमातुरं सङ्गतम् ।
निवार्य्य मरणं पितुः समवधार्य्य दुःखातुर-
स्तपोवनगतोऽवसद्रघुपतिस्ततस्ताः समाः ॥३२॥
दशाननसहोदरां विषमबाणवेधातुरां

समीक्ष्य वररूपिणीं प्रहसतीं सतीं सुन्दरीम्।
निजाश्रयमभीप्सतीं जनकजापतिर्लक्ष्मणात्
करालकरवालतः समकरोद्विरूपां ततः ॥३३॥
समाप्य पथि दानवं खरशरैः शनैर्नाशयन्
चतुर्दशसहस्रकं समहनत् खरं सानुगम्।
दशाननवशानुगं कनकचारु-चन्द्राङ्गं
प्रियाप्रियकरो वने समवधीद्‌बलाद्राक्षसम् ॥३४॥
ततो दशमुखस्त्वरंस्तमभिवीक्ष्य रामं रुषा
व्रजन्तमनुलक्ष्मणं जनकजां जहाराश्रमे।
ततो रघुपतिः प्रियां दलकुटीरसंस्थापितां
नवीक्ष्य तु विमूर्च्छितो बहु विलप्य सीतेति ताम् ॥३५॥
वने निजगणाश्रमे नगतले जले पल्वले
विचित्य पतितं खगं पथि ददर्श सौमित्रिणा।
जटायुवचनात् ततो दशमुखाहृतां जानकीं
विविच्य कृतवान् मृते पितरि वह्निकृत्यं प्रभुः ॥३६॥
प्रियाविरहकातरोऽनुजपुरःसरो राघवो
धनुर्धरधुरन्धरो हरिबलं नवालापिनम्।
ददर्श ऋषभाचलाद्द्विजबालिराजानुज-
प्रियं पवननन्दनं परिणतं हितं प्रेषितम् ॥३७॥

ततस्तदुदितं मतं पवनपुत्त्रसुग्रीवयो-
स्तृणाधिपतिभेदनं निजनृपासनस्थापितम् ।
विविच्य व्यवसायकैर्निजसखाप्रियं बालिनम्
निहत्य हरिभूपतिं निजसखं स रामोऽकरोत् ॥३८॥
अथोत्तरमिमां हरिर्जनकजां समन्वेषयन्
जटायुसहजोदितैर्जलनिधिं तरन् वायुजः ।
दशाननपुरं विशन् जनकजां समानन्दयन्
अशोकवनिकाश्रमे रघुपतिं पुनः प्राययौ ॥३९॥
ततो हनुमता बलादमितरक्षसां नाशनं
ज्वलज्ज्वलनसंकुलज्वलितदग्धलङ्कापुरम् ।
विविच्य रघुनायको जलनिधिं रुषा शोषयन्
बबन्ध हरियूथपैः परिवृतो नगैरीश्वरः ॥
बभञ्ज पुरपत्तनं विविधसर्गदुर्गक्षमं
निशाचरपतेः क्रुधा रघुपतिः कृती सङ्गतिः ॥४०॥
ततोऽनुजयुतो युधि प्रबलचण्डकोदण्डभृत्
शरैः खरतरैः क्रुधा गजरथाश्वहंसाकुले ।
करालकरवालतः प्रबलकालजिह्वाग्रतो
निहत्य वरराक्षसान् नरपतिर्बभौ सानुगः ॥४१॥
ततोऽतिबलवानरैर्गिरिमहीरुहोद्यत्करैः

करालनखरताड़नैर्जनकजारुषा नाशितान् ।
निजघ्नुरसुराहिनानतिबलान् दशास्यानुगान्
नलाङ्गदहरीश्वराऽशुगसुतर्क्षराजादयः ॥४२॥
ततोऽतिबललक्ष्मणस्त्रिदशनाथशत्रुं रणे
जघान घनघोषणानुगगणैरस्त्रप्रासनैः ।
प्रहस्त-विकटादिकानपि निशाचरान् सङ्गतान्
निकुम्भ-मकराक्षकान् निशितखड्गपातैः क्रुधा॥४३॥
ततो दशमुखो रणे गजरथाश्वपत्तीश्वरै-
रलङ्ख्यगणकोटिभिः परिवृतो युयोधायुधैः ।
कपीश्वरचमूपतेः पतिमनन्तदिव्यायुधं
रघूद्वहमनिन्दितं सपदि सङ्गतो दुर्जयः ॥४४॥
दशाननमरिं ततो विधिवरस्मयावर्द्धितं
महाबलपराक्रमं गिरिमिवाचलं संयुगे ।
जघान रघुनायको निशितशायकैरद्भुतं
निशाचरचमूपतिं प्रबलकुम्भकर्णं ततः ॥४५॥
तयोः खरतरैः शरैर्गगनमच्छमाच्छादितं
बभौ घनघटासमं मुखरमत्तड़िद्वल्लिभिः ।
धनुर्गुणमहाशनिध्वनिभिरावृतं भूतलं
भयङ्करनिरन्तरं रघुपतेश्च रक्षःपतेः ॥४६॥

ततो धरणिजारुषा विविधरामबाणौजसा
पपात भुवि रावणस्त्रिदशनाथविद्रावणः ।
ततोऽतिकुतुकी हरिर्ज्ज्वलनरक्षितां जानकीं
समर्प्य रघुपुङ्गवे निजपुरीं ययौ हर्षितः ॥४७॥
पुरन्दरकथादरः सपदि तत्र रक्षःपतिं
विभीषणमभीषणं समकरोत्ततो राघवः ॥ ४८ ॥
हरीश्वरगणावृतोऽवनिसुतायुतः सानुजो
रथे शिवसखेरिते सुविमले लसत्पुष्पके ।
मुनीश्वरगणार्च्चितो रघुपतिस्त्वयोध्यां ययौ
विविच्य मुनिलाञ्छनं गहगृहेऽतिसख्यं स्मरन् ॥४९॥
ततो निजगणावृतो भरतमातुरं सान्त्वयन्
स्वमातृगणवाक्यतः पितृनिजासने भूपतिः ।
वशिष्ठमुनिपुङ्गवैः कृतनिजाभिषेको विभुः
समस्तजनपालकः सुरपतिर्यथा संबभौ ॥५०॥
नरा बहुधनाकरा द्विजवरास्तपस्तत्पराः
स्वधर्म्मकृतनिश्चया स्वजनसङ्गता निर्भयाः ।
घनाः सुबहुवर्षिणो वसुमती सदा हर्षिता
भवत्यनिबले नृपे रघुपतावभूत् सज्जगत् ॥५१॥
गतायुतसमाः प्रियैर्निजगुणैः प्रजा रञ्जयन्

निजां रघुपतिः प्रियां निजमनोभवैर्मोहयन् ।
मुनीन्द्रगणसंयुतोऽप्ययजदादिदेवान्मखै-
र्धनैर्विपुलदक्षिणैरतुलवाजिमेधैस्त्रिभिः ॥५२॥
ततः किमपि कारणं मनसि भावयन् भूपति-
र्जहौ जनकजां वने रघुवरस्तदा निर्घृणः ।
ततो निजमतं स्मरन् समनयत् प्रचेतःसुतो
निजाश्रममुदारधीरघुपतेः प्रियां दुःखिताम् ॥५३॥
ततः कुशलवौ सुतौ प्रसुसुवे धरित्रीसुता
महाबलपराक्रमौ रघुपतेर्यशोगायनौ ।
स तामपि सुतान्वितां मुनिवरस्तु रामान्तिके
समर्पयदनिन्दितां सुरवरैः सदा वन्दिताम् ॥५४॥
ततो रघुपतिस्तु तां सुतयुतां रुदन्तीं पुरो
जगाद दहने पुनः प्रविश शोधनायात्मनः ।
इतीरितमवेक्ष्य सा रघुपतेः पदाब्जे नता
विवेश जननीयुता मणिगणोज्ज्वलं भूतलम् ॥५५॥
निरीक्ष्य रघुनायको जनकजाप्रयाणं स्मरन्
वशिष्ठगुरुयोगतोऽनुजयुतोऽगमत् स्वं पदम् ।
पुरःस्थितजनैः स्वकैः पशुभिरीश्वरः संस्पृशन्

मुदा सरयुजीवनं रथवरैः परीतो विभुः ॥५६॥
ये शृण्वन्ति रघूद्वहस्य चरितं कर्णामृतं सादरात्
संसारार्णवशोषणञ्च पठतामामोददं मोक्षदम् ।
रोगाणामिह शान्तये धनजनस्वर्गादिसम्पत्तये
वंशानामपि वृद्धये प्रभवति श्रीशः परेशः प्रभुः ॥५७॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे सूर्य्यवंशानुवर्णने श्रीरामचन्द्रचरितं नाम तृतीयाध्यायः ।

तृतीयांशः ।

चतुर्थोऽध्यायः ।

रामात् कुशोऽभूदतिथि-स्ततोऽभून्निषधान्नभः ।
तस्मादभूत् पुण्डरीकः क्षेमधन्वाऽभवत् ततः ॥१॥
देवानीकस्ततो हीनः पारिपात्रोऽथ हीनतः ।
बलाहकस्ततोऽर्कश्च रजनाभस्ततोऽभवत् ॥२॥
खगणाद्विधृतस्तस्माद्धिरण्यनाभसञ्ज्ञितः ।
ततः पुष्पाद्ध्रुवस्तस्मात् स्यन्दनोऽथाग्निवर्णकः ॥३॥
तस्मात् शीघ्रोऽभवत् पुत्रः पिता मेऽतुलविक्रमः ।
तस्मान्मरुं मां केऽपीह बुधञ्चापि सुमित्रकम् ॥४॥
कलापग्राममासाद्य विद्धि सत्तपसि स्थितम् ।
तवावतारं विज्ञाय व्यासात् सत्यवतीसुतात् ॥५॥
प्रतीक्ष्य कालं लक्षाब्दं कलेः प्राप्तस्तवान्तिकम् ।
जन्मकोट्यंघसां राशेर्नाशनं धर्म्म शासनम् ।
यशःकीर्त्तिकरं सर्व्व-कामपूरं परात्मनः ॥६॥

कल्किरुवाच ।

ज्ञातस्तवान्वयं त्वाञ्च सूर्य्यवंशसमुद्भवम् ।

द्वितीयः कोऽपरः श्रीमान् महापुरुषलक्षणः ॥७॥
इति कल्किवचः श्रुत्वा देवापिर्मधुराक्षराम्।
वाणीं विनयसम्पन्नः प्रवक्तुमुपचक्रमे ॥८॥

देवापिरुवाच।

प्रलयान्ते नाभिपद्मात् तवाभूच्चतुराननः।
तदीयतनयादत्रेश्चन्द्रस्तस्मात्ततो बुधः ॥९॥
तस्मात् पुरूरवा यज्ञे ययातिर्नाहुषस्ततः।
देवयान्यां ययातिस्तु यदुं तुर्वसुमेव च ॥१०॥
शर्म्मिष्ठायां तथा द्रुह्युञ्चानुं पूरुञ्च सत्पते।
जनयामास भूतादिर्भूतानीव सिसृक्षया ॥११॥
पूरोर्ज्जन्मेजयस्तस्मात् प्रचिन्वानभवत् ततः।
प्रवीरस्तन्मनस्युर्वै तस्माच्चाभयदोऽभवत् ॥१२॥
उरुक्षयाच्च व्यरुणिस्ततोऽभूत् पुष्करारुणिः।
वृहत्क्षेत्राद्भूद्धस्ती यन्नाम्ना हस्तिनापुरम् ॥१३॥
अजमीढोऽद्विमीढश्च पुरमीढस्तु तत्सुताः।
अजमीढादभूदृक्षस्तस्मात् संवरणात् कुरुः ॥१४॥
कुरोः परिक्षित् सुधनुर्जह्नुर्निषध एव च।
सुहोत्रोऽभूत् सुधनुषश्च्यवनाच्च ततः कृती ॥१५॥

ततो वृहद्रथस्तस्मात् कुशाग्राद्दषभोऽभवत्।
ततः सत्यजितः पुत्त्रः पुष्पवान्नहुषस्ततः ॥१६॥
वृहद्रथान्यभार्य्यायां जरासन्धः परन्तपः
सहदेवस्ततस्तस्मात् सोमापिर्यत् श्रुतश्रवाः ॥१७॥
सुरथाद्विदूरथस्तस्मात् सार्व्वभौमोऽभवत् ततः।
जयसेनाद्रथानीकोऽभूद्युतायुश्च कोपनः ॥१८॥
तस्माद्देवातिथिस्तस्माद्दच्चस्तस्माद्दिलीपकः।
तस्मात् प्रतीपकस्तस्य देवापिरहमीश्वर ॥१९॥
राज्यं शान्तनवे दत्त्वा तपस्येकधिया चिरम्।
कलापग्राममासाद्य त्वां दिदृक्षुरिहागतः ॥२०॥
मरुणाऽनेन मुनिभिरेभिः प्राप्य पदाम्बुजम्।
तव, कालकरास्याद्दयास्याम्यात्मवतां पदम् ॥२१॥
तयोरेवं वचः श्रुत्वा कल्किः कमललोचनः।
प्रहस्य मरुदेवापी समाश्वास्य समब्रवीत् ॥२२॥

कल्किरुवाच।

युवां परमधर्म्मज्ञौ राजानौ विदिताबुभौ।
मदादेशकरौ भूत्वा निजराज्यं भरिष्यथः ॥२३॥
मरो त्वामभिषेक्ष्यामि निजायोध्यापुरेऽधुना।

हत्वा म्लेच्छानधर्म्मिष्ठान् प्रजाभूतविहिंसकान् ॥२४॥
देवापे तव राज्ये त्वां हस्तिनापुरपत्तने ।
अभिषेक्ष्यामि राजर्षे हत्वा पुक्कसकान् रणे ॥२५॥
मथुरायामहं स्थित्वा हरिष्यामि तु वो भयम् ।
शय्याकर्णानुष्ट्रमुखान् एकजङ्घान् विनोदरान् ॥२६॥
हत्वा कृतं युगं कृत्वा पालयिष्याम्यहं प्रजाः ।
तपोवेषं व्रतं त्यक्त्वा समारुह्य रथोत्तमम् ॥२७॥
युवां शस्त्रास्त्रकुशलौ सेनागणपरिच्छदौ ।
भूत्वा महारथौ लोके मया सह चरिष्यथः ॥२८॥
विशाखयूपभूपालस्तनयां विनयान्विताम् ।
विवाहे रुचिरापाङ्गीं सुन्दरीं त्वां प्रदास्यति ॥२९॥
सा वो भूपाल लोकानां स्वस्तये कुरु मे वचः ।
रुचिराश्वसुतां शान्तां देवापे त्वं समुद्वह ॥३०॥
इत्याश्वासकथाः कल्केः श्रुत्वा तौ मुनिभिः सह ।
विस्मयाविष्टहृदयौ मेनाते हरिमीश्वरम् ॥३१॥
इति ब्रुवत्यभयदे आकाशात् सूर्य्यसन्निभौ ।
रथौ नानामणिव्रात-घटितौ कामगौ पुरः ।
समायातौ ज्वलद्दिव्य-शस्त्रास्त्रैः परिवारितौ ॥३२॥

ददृशुस्ते सदोमध्ये विश्वकर्म्मविनिर्म्मितौ ।
भूपा मुनिगणाः सभ्याः सहर्षाः किमितीरिताः ॥३३॥

कल्किरुवाच ।

युवामादित्यसोमेन्द्र-यमवैश्रवणाङ्गजौ ।
राजानौ लोकरक्षार्थमाविर्भूतौ विदन्त्यमी ॥३४॥
कालेनाच्छादिताकारौ मम सङ्गादिहोदितौ ।
युवां रथावारुहतां शक्रदत्तं ममाज्ञया ॥३५॥
एवं वदति विश्वेशे पद्मनाथे सनातने ।
देवा ववर्षुः कुसुमैस्तुष्टुवुर्मुनयोऽग्रतः ॥३६॥
गङ्गावारिपरिक्लिन्न-शिरोभूतिपरागवान् ।
शनैः पर्व्वतजासङ्गशिववत् पवनो ववौ ॥३७॥
तत्रायातः प्रमुदिततनुस्तप्तचामीकराभो
धर्म्मावासः सुरुचिरजटाचीरभृद्दण्डहस्तः ।
लोकातीतो निजतनुमरुन्नाशिताऽधर्म्मसंघ-
स्तेजोराशिः सनकसदृशो मस्करी पुष्कराक्षः ॥३८॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे चन्द्रवंशानु-
कीर्त्तनं नाम चतुर्थोऽध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

पञ्चमाध्यायः ।

शुक उवाच ।

अथ कल्किः समालोक्य सद्साम्यतिभिः सह ।
समुत्थाय ववन्दे तं पाद्यार्घ्याचमनादिभिः ॥१॥
वृद्धं संवेश्य तं भिक्षुं सर्व्वाश्रमनमस्कृतम् ।
पप्रच्छ को भवानत्र मम भाग्यादिहागतः ॥२॥
प्रायशो मानवा लोके लोकानां पारणेच्छया ।
चरन्ति सर्व्वसुहृदः पूर्णा विगतकल्मषाः ॥३॥

मस्कर्य्युवाच ।

अहं कृतयुगं श्रीश तवादेशकरं परम् ।
तवाविर्भावविभवमीक्षणार्थमिहागतम् ॥४॥
निरुपाधिर्भवान् कालः सोपाधित्वमुपागतः ।
क्षणदण्डलवाद्यङ्गैर्मायया रचितं त्वया ॥५॥
पक्षाहोरात्रमासर्त्तु-संवत्सरयुगादयः ।
तवेच्छया चरन्त्येते मनवश्च चतुर्दश ॥६॥

स्वायम्भुवस्तु प्रथमस्ततः स्वारोचिषो मनुः।
तृतीय उत्तमस्तस्माच्चतुर्थस्तामसः स्मृतः ॥७॥
पञ्चमो रैवतः षष्ठश्चाक्षुषः परिकीर्त्तितः।
वैवस्वतः सप्तमो वै ततः सावर्णिरष्टमः ॥८॥
नवमो दक्षसावर्णिर्ब्रह्मसावर्णिकस्ततः।
दशमो धर्म्मसावर्णिरेकादशः स उच्यते ॥९॥
रुद्रसावर्णिकस्तत्र मनुर्वै द्वादशः स्मृतः।
त्रयोदशमनुर्वेदसावर्णिर्लोकविश्रुतः ॥१०॥
चतुर्दशेन्द्रसावर्णिरेते तव विभूतयः।
यान्त्यायान्ति प्रकाशन्ते नामरूपादिभेदतः ॥११॥
द्वादशाब्दसहस्रेण देवानाञ्च चतुर्युगम्।
चत्वारि त्रीणि द्वे चैकं सहस्रगणितं मतम् ॥१२॥
तावत् शतानि चत्वारि त्रीणि द्वे चैकमेव हि।
सन्ध्याक्रमेण तेषान्तु सन्ध्यांशोऽपि तथाविधः ॥१३॥
एकसप्ततिकं तत्र युगं भुङ्क्ते मनुर्भुवि।
मनूनामपि सर्व्वेषामेवं परिणतिर्भवेत्।
दिवा प्रजापतेस्तत्तु निशा सा परिकीर्त्तिता ॥१४॥
अहोरात्रञ्च पक्षस्ते माससंवत्सरर्त्तवः।
तदुपाधिकृतः कालो ब्रह्मणो जन्ममृत्युकृत् ॥१५॥

शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि ।
लयान्ते त्वन्नाभिमध्यादुत्थितः सृजति प्रभुः ॥१६॥
तत्र कृतयुगन्तेऽहं कालं सद्धर्म्मपालकम् ।
कृतकृत्याः प्रजा यत्र तन्नाम्ना मां कृतं विदुः ॥१७॥
इति तद्वच आश्रुत्य कल्किर्निजजनावृतः ।
प्रहर्षमतुलं लब्ध्वा श्रुत्वा तद्वचनामृतम् ॥१८॥
अवहित्थामुपालक्ष्य युगस्याह जनान् हितान् ।
योद्धुकामः कलेः पूर्य्यां हृष्टो विश्वसने प्रभुः ॥१९॥

गजरथतुरगान्नरांश्च योधान्
कनकविचित्रविभूषणार्चिताङ्गान् ।
धृतविविधवरास्त्रशस्त्रपूगान्
युधिनिपुणान् गणयध्वमानयध्वम् ॥२०॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कृतयुगागमनं नाम पञ्चमोऽध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

षष्ठाध्यायः ।

सूत उवाच ।

इति तौ मरुदेवापी श्रुत्वा कल्केर्वचः पुरः ।
कृतोद्वाहौ रथारूढौ समायातौ महाभुजौ ॥१॥
नानायुधधरैः सैन्यैरावृतौ शूरमानिनौ ।
बद्धगोधाङ्गुलित्राणौ दंशितौ बद्धहस्तकौ ॥२॥
कार्ष्णायसशिरस्त्राणौ धनुर्द्धरधुरन्धरौ ।
अक्षौहिणीभिः षड्भिस्तु कम्पयन्तौ भुवं भरैः ॥३॥
विशाखयूपभूपस्तु गजलक्षैः समावृतः ।
अश्वैः सहस्रनियुतैः रथैः सप्तसहस्रकैः ॥४॥
पदातिभिर्द्विलक्षैश्च सन्नद्धैर्धृतकार्मुकैः ।
वातोद्धतोत्तरोष्णीषैः सर्व्वतः परिवारितः ॥५॥
रुधिराश्वसहस्राणां पञ्चाशद्भिर्महारथैः ।
गजैर्दशशतैर्मत्तैर्नवलक्षैर्वृतो बभौ ॥६॥

अक्षौहिणीभिर्दशभिः कल्किः परपुरञ्जयः।
समावृतस्तथा देवैरेवमिन्द्रो दिवि स्वराट् ॥७॥
भ्रातृपुत्त्रसुहृद्भिश्च मुदितः सैनिकैर्वृतः।
ययौ दिग्विजयाकाङ्क्षी जगतामीश्वरः प्रभुः ॥८॥
काले तस्मिन् द्विजो भूत्वा धर्म्मः परिजनैः सह।
समाजगाम कलिना बलिनापि निराकृतः ॥९॥
ऋतं प्रसादमभयं सुखं मुदमुथ स्वयम्।
योगमर्थं ततोऽदर्पं स्मृतिं क्षेमं प्रतिश्रयम् ॥१०॥
नरनारायणौ चोभौ हरेरंशौ तपोव्रतौ।
धर्म्मस्त्वेतान् समादाय पुत्त्रान् स्त्रीश्चागतस्त्वरन् ॥११॥
श्रद्धा मैत्री दया शान्ति-स्तुष्टिः पुष्टिः क्रियोन्नतिः।
बुद्धिर्मेधा तितिक्षा च ह्रीर्मूर्त्तिर्धर्म्मपालकाः ॥१२॥
एतास्तेन सहायाता निजबन्धुगणैः सह।
कल्किमालोकितुं तत्र निजकार्य्यं निवेदितुम् ॥१३॥
कल्किर्द्विजं समासाद्य पूजयित्वा यथाविधि।
प्रोवाच विनयापन्नः कस्त्वं कस्मादिहागतः ॥१४॥
स्त्रीभिः पुत्त्रैश्च सहितः क्षीणपुण्य इव ग्रहः।
कस्य वा विषयाद्राज्ञस्तत्त्वं वद तत्वतः ॥१५॥
पुत्त्राः स्त्रियश्च ते दीनाः हीनस्वबलपौरुषाः।

वैष्णवाः साधवो यद्वत् पाषण्डैश्च तिरस्कृताः ॥१६॥
कल्केरिति वचः श्रुत्वा धर्म्मः शर्म्म निजं स्मरन्।
प्रोवाच कमलानाथम् अनाथस्त्वतिकातरः ॥१७॥
पुत्रैः स्त्रीभिर्निजजनैः कृताञ्जलिपुटैर्हरिम्।
स्तुत्वा नत्वा पूजयित्वा मुदितं तं दयापरम् ॥१८॥

धर्म्म उवाच।

शृणु कल्के ममाख्यानं धर्म्मोऽहं ब्रह्मरूपिणः।
तव वक्षःस्थलाज्जातः कामदः सर्व्वदेहिनाम् ॥१९॥
देवानामग्रणीर्हव्यकव्यानां कामधुग्विभुः।
तवाज्ञया चराम्येव साधुकीर्त्तिकृदन्वहम् ॥२०॥
सोऽहं कालेन बलिना कलिनापि निराकृतः।
शककाम्बोजशवरैः सर्व्वैरावासवासिना ॥२१॥
अधुना तेऽखिलाधार! पादमूलमुपागताः।
यथा संसारकालाग्निसंतप्ताः साधवोऽर्हिताः ॥२२॥
इति वाग्भिरपूर्व्वाभिर्धर्म्मेण परितोषितः।
कल्किः कल्कहरः श्रीमानाह संहर्षयन् शनैः ॥२३॥
धर्म्म! कृतयुगं पश्य मरुं चण्डांशुवंशजम्।
मां जानासि यथा जातं धातृप्रार्थितविग्रहम् ॥२४॥
कीटकैर्बौद्धदलनमिति मत्वा सुखी भव।

अवैष्णवानामन्येषां तवोपद्रवकारिणाम् ।
जिघांसुर्यामि सेनाभिश्चर गां त्वं विनिर्भयः ॥२५॥
का भीतिस्ते क्व मोहोऽस्ति यज्ञदानतपोव्रतैः ।
सहितैः संचर विभो! मयि सत्ये व्युपस्थिते ॥२६॥
अहं यामि त्वयागच्छ स्वपुत्रैर्बान्धवैः सह ।
दिशां जयार्थं त्वं शत्रुनिग्रहार्थं जगत्प्रिय ॥२७॥
इति कल्केर्वचः श्रुत्वा धर्म्मः परमहर्षितः ।
गन्तुं कृतमतिस्तेन आधिपत्यममुं स्मरन् ॥२८॥
सिद्धाश्रमे निजजनानवस्थाप्य स्त्रियश्च ताः ॥२९॥
सन्नद्धः साधुसत्कारैर्वेदब्रह्ममहारथः ।
नानाशास्त्रान्वेषणेषु संकल्पवरकार्मुकः ॥३०॥
सप्तस्वराश्वो भूदेवसारथिर्वह्निराश्रयः ।
क्रियाभेदबलोपेतः प्रययौ धर्म्मनायकः ॥३१॥
यज्ञदानतपःपात्रैर्यमैश्च नियमैर्वृतः ।
खशकाम्बोजकान् सर्व्वान् शवरान् वर्व्वरानपि ॥३२॥
जेतुं कल्किर्ययौ यत्र कलेरावासमीप्सितम् ।
भूतवासबलोपेतं सारमेयवराकुलम् ॥३३॥
गोमांसपूतिगन्धाढ्यं काकोलूकशिवावृतम् ।
स्त्रीणां दुर्द्यूतकलहविवादव्यसनाश्रयम् ॥३४॥

घोरं जगद्भयकरं कामिनीस्वामिनं गृहम्।
कलिः श्रुत्वोद्यमं कल्केः पुत्रपौत्रवृतः क्रुधा ॥३५॥
पुराद्विशसनात् प्रायात् पेचकाह्वरथोपरि।
धर्म्मः कलिं समालोक्य ऋषिभिः परिवारितः ॥३६॥
युयुधे तेन सहसा कल्किवाक्यप्रचोदितः।
ऋतेन दम्भः संग्रामे प्रसादो लोभमाह्वयत् ॥३७॥
समयादभयं क्रोधो भयं सुखमुपाययौ।
निरयो मुदमासाद्य युयुधे विविधायुधैः ॥३८॥
आधिर्योगेन च व्याधिः क्षेमेण च बलीयसा।
प्रश्रयेण तथा ग्लानिर्जरा स्मृतिमुपाह्वयत् ॥३९॥
एवं वृत्तो महाघोरो युद्धः परमदारुणः।
तं द्रष्टुमागता देवा ब्रह्माद्याः खे विभूतिभिः ॥४०॥
मरुः खशैश्च काम्बोजैर्युयुधे भीमविक्रमैः।
देवापिः समरे चौनैर्व्वर्व्वरैस्तद्गणैरपि ॥४१॥
विशाखयूपभूपालः पुलिन्दैः श्वपचैः सह।
युयुधे विविधैः शस्त्रैरस्त्रैर्दिव्यैर्महाप्रभैः ॥४२॥
कल्किः कोकविकोकाभ्यां वाहिनीभिर्वरायुधैः।
तौ तु कोकविकोकौ च ब्रह्मणो वरदर्पितौ ॥४३॥
भ्रातरौ दानवश्रेष्ठौ मत्तौ युद्धविशारदौ।

एकरूपौ महासत्वौ देवानां भयवर्द्धनौ ॥४४॥
पदातिकौ गदाहस्तौ वज्राङ्गौ जयिनौ दिशाम् ।
शुम्भैः परिवृतौ मृत्युजितावेकत्र योधनात् ॥४५॥
ताभ्यां स युयुधे कल्किः सेनागणसमन्वितः ।
शुभानां कल्किसैन्यानां समरस्तुमुलोऽभवत् ॥४६॥
हेषितैर्वृंहितैर्दन्तशब्दैष्टंङ्कारनादितैः ।
शूरोत्क्रुष्टैर्बाहुवेगैः संशब्दस्तलताड़नैः ॥४७॥
संपूरिता दिशः सर्व्वा लोका नो शर्म्म लेभिरे ।
देवाश्च भयसंत्रस्ता दिवि व्यस्तपथा ययुः ॥४८॥

पाशैर्दण्डैः खड्गशक्त्यृष्टिशूलै-
र्गदाघातैर्बाणपातैश्च घोरैः ।
युद्धे शूराश्छिन्नबाह्वङ्घ्रिमध्याः
पेतुः संख्ये शतशः कोटिशश्च ॥४९॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्कि-
सेनासंग्रामो नाम षष्ठाध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

सप्तमाध्यायः ।

सूत उवाच ।

एवं प्रवृत्ते संग्रामे धर्म्मः परमकोपनः ।
कृतेन सहितो घोरं युयुधे कलिना सह ॥१॥
कलिर्दमित्वबाणौघैर्धर्म्मस्यापि कृतस्य च ।
पराभूतः पुरीं प्रायात् त्यक्त्वा गर्द्दभवाहनम् ॥२॥
विच्छिन्नपेचकरथः स्रवद्रक्ताङ्गसञ्चयः ।
च्छुर्गन्धः करालास्यः स्त्रीस्वामिकमगाद् गृहम् ॥३॥
दम्भः सम्भोगरहितोद्भूतबाणगणाहतः ।
याकुलः स्वकुलाङ्गारो निःसारः प्राविशद्गृहम् ॥४॥
लोभः प्रसादाभिहतो गदया भिन्नमस्तकः ।
सारमेयरथं छिन्नं त्यक्त्वागाद्रुधिरं वमन् ॥५॥
अभयेन जितः क्रोधः कषायीकृतलोचनः ।
आखुवाहं विच्छिन्नं त्यक्त्वा विशसनं गतः ॥६॥

भयं सुखतलाघाताद्भतास्तु न्यपतद्भुवि ।
निरयो मुद्‌गमुष्टिभ्यां पीड़ितो यममाययौ ॥७॥
आधिव्याध्यादयः सर्व्वे त्यक्त्वा वाहमुपाद्रुवन् ।
नानादेशान् भयोद्विग्ना कृतबाणप्रपीड़िताः ॥८॥
धर्म्मः कृतेन सहितो गत्वा विशसनं कलेः ।
नगरं बाणदहनैर्द्ददाह कलिना सह ॥९॥
कलिर्व्विसृष्टसर्व्वाङ्गो मृतदारो मृतप्रजः ।
जगामैको रुदन् दीनो वर्षान्तरमलक्षितः ॥१०॥
मरुस्तु शककाम्बोजान् जघ्ने दिव्यास्त्रतेजसा ।
देवापिः शवरांश्चोलान् वर्व्वरांस्तद्गणानपि ॥११॥
दिव्यास्त्रशस्त्रसम्पातैरर्द्दयामास वीर्य्यवान् ।
विशाखयूपभूपालः पुलिन्दान् पुक्कसानपि ॥१२॥
जघान विमलप्रज्ञः खड्‌गपातेन भूरिणा ।
नानास्त्रशस्त्रवर्षैस्ते योधा नेशुरनेकधा ॥१३॥
कल्किः कोकविकोकाभ्यां गदापाणिर्युधां पतिः ।
युयुधे विन्यासविज्ञो लोकानां जनयन् भयम् ॥१४॥
वृकासुरस्य पुत्रौ तौ नप्तारौ शकुनेर्हरिः ।
तयोः कल्किः स युयुधे मधुकैटभयोर्यथा ॥१५॥
तयोर्गदा प्रहारेण चूर्णिताङ्गस्य तत्पतेः ।

करात् च्युतापतद्भूमौ दृष्ट्वोचुरित्यहो जनाः ॥१६॥
ततः पुनः क्रुधा विष्णुर्जगज्जिष्णुर्महाभुजः ।
भल्लकेन शिरस्तस्य विकोकस्याच्छिनत् प्रभुः ॥१७॥
मृतो विकोकः कोकस्य दर्शनादुत्थितो बली ।
तद्दृष्ट्वा विस्मिता देवाः कल्किश्च परवीरहा ॥१८॥
प्रतिकर्त्तुर्गदापाणेः कोकस्याप्यच्छिनच्छिरः ।
मृतः कोको विकोकस्य दृष्टिपातात् समुत्थितः ॥१९॥
पुनस्तौ मिलितौ तेन युयुधाते महाबलौ ।
कामरूपधरौ वीरौ कालमृत्यू इवापरौ ॥२०॥
खड्गचर्म्मधरौ कल्किं प्रहरन्तौ पुनःपुनः ।
कल्किः क्रुधा तयोस्तद्वद्बाणेन शिरसी हते ॥२१॥
पुनर्लग्ने समालोक्य हरिश्चिन्तापरोऽभवत् ।
विसत्त्वत्वमथालोक्य तुरगस्तावताड़यत् ॥२२॥
कालकल्पौ दुराधर्षौ तुरगेणार्द्दितौ भृशम् ।
कल्केस्तं जघ्नतुर्बाणैरमर्षाताम्रलोचनौ ॥२३॥
तयोर्भुजान्तरं सोऽश्वः क्रुधा समदशद्भृशम् ।
तौ तु प्रभिन्नास्थिभुजौ विस्रस्ताङ्गदकार्मुकौ ।
पुच्छं जगृहतुः सप्तेर्गोपुच्छं बालकाविव ॥२४॥
धृतपुच्छौ तु तौ ज्ञात्वा सप्तिः परमकोपनः ।

पश्चात् पद्भ्यां दृढं जघ्ने तयोर्वक्षसि वज्रवत् ॥२५॥
त्यक्तपुच्छौ मूर्च्छितौ तौ तत्क्षणात् पुनरुत्थितौ ।
पुरतः कल्किमालोक्य बभाषाते स्फुटाक्षरौ ॥२६॥
ततो ब्रह्मा तमभ्येत्य कृताञ्जलिपुटः शनैः ।
प्रोवाच कल्किं नैवामू शस्त्रास्त्रैर्वधमर्हतः ॥२७॥
कराघातादेककाले उभयोर्निर्मितो वधः ।
उभयोर्दर्शनादेव नोभयोर्मरणं क्वचित् ।
विदित्वेति कुरुष्वात्मन् युगपच्चानयोर्वधम् ॥२८॥
इति ब्रह्मवचः श्रुत्वा त्यक्तशस्त्रास्त्रवाहनः ।
तयोः प्रहरतोः स्वैरं कल्किर्दानवयोः क्रुधा ।
मुष्टिभ्यां वज्रकल्पाभ्यां बभञ्ज शिरसी तयोः ॥२९॥
तौ तत्र भग्नमस्तिष्कौ भग्नश्रृङ्गावगाविव ।
पेततुर्दिवि देवानां भयदौ भुवि बाधकौ ॥३०॥
तद्दृष्ट्वा महदाश्चर्य्यं गन्धर्व्वाप्सरसां गणाः ।
ननृतुर्जगुस्तुष्टुवुश्च मुनयः सिद्धचारणाः ।
देवाश्च कुसुमासारैर्ववर्षुर्हर्षमानसाः ॥३१॥
दिवि दुन्दुभयो नेदुः प्रसन्नाश्चाभवन् दिशः ।
तयोर्वधप्रमुदितः कविर्दशसहस्रकान् ।
साश्वान् महारथान् साक्षादहनद् दिव्यसायकैः ॥३२॥

प्राज्ञः शतसहस्राणां योधानां रणमूर्द्धनि।
जयं निन्ये सुमन्त्रस्तु रथिनां पञ्चविंशति ॥३३॥
एवमन्ये गार्गभर्ग्य-विशालाद्या महारथान्।
निजघ्नुः समरे क्रुद्धा निषादान् म्लेच्छवर्व्वरान् ॥३४॥
एवं विजित्य तान् सर्व्वान् कल्किर्भूपगणैः सह।
शय्याकर्णैश्च भल्लाटनगरं जेतुमाययौ ॥३५॥
नानावाद्यैर्लोकसंघैर्वरास्त्रैः
नानावस्त्रैर्भूषणैर्भूषिताङ्गैः।
नानावाहैश्चामरैर्वीज्यमानैः
यातो योद्धुं कल्किरत्युग्रसेनः ॥३६॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कोक-
विकोकादीनां बधो नाम सप्तमाध्यायः।

कल्किपुराणम् ।

तृतीयांशः ।

अष्टमाध्यायः ।

सूत उवाच ।

सेनागणैः परिवृतः कल्किर्नारायणः प्रभुः ।
भल्लाटनगरं प्रायात् खड्गधृक् सप्तिवाहनः ॥१॥
स भल्लाटेश्वरो योगी ज्ञात्वा विष्णुं जगत्पतिम् ।
निजसेनागणैः पूर्णो योद्धुकामो हरिं ययौ ॥२॥
स हर्षोत्पुलकः श्रीमान् दीर्घाङ्गः कृष्णभावनः ।
शशिध्वजो महातेजा गजायुतबलः सुधीः ॥३॥
तस्य पत्नी महादेवी विष्णुव्रतपरायणा ।
सुशान्ता स्वामिनं प्राह कल्किना योद्धुमुद्यतम् ॥४॥
नाथ कान्तं जगन्नाथं सर्व्वान्तर्यामिनं प्रभुम् ।
कल्किं नारायणं साक्षात् कथं त्वं प्रहरिष्यसि ॥५॥

शशिध्वज उवाच ।

सुशान्ते परमो धर्म्मः प्रजापतिविनिर्म्मितः ।

युद्धे प्रहारः सर्व्वत्र गुरौ शिष्ये हरेरिव ॥६॥
जीवतो राजभोगः स्यात् मृतः स्वर्गे प्रमोदते ।
युद्धे जयो वा मृत्युर्वा क्षत्त्रियाणां सुखावहः ॥७॥

सुशान्तोवाच ।

देवत्वं भूपतित्वं वा विषयाविष्टकामिनाम् ।
उन्मदानां भवेद्देव न हरेः पादसेविनाम् ॥८॥
त्वं सेवकः स चापीशस्त्वं निष्कामः स चाप्रदः ।
युवयोर्युद्धमिलनं कथं मोहाद्भविष्यति ॥९॥

शशिध्वज उवाच ।

द्वन्द्वातीते यदि द्वन्द्वमीश्वरे सेवके तथा ।
देहावेशालीलयैव सा सेवा स्यात्तथा मम ॥१०॥
देहावेशादीश्वरस्य कामाद्या दैहिका गुणाः ।
मायाङ्गा यदि जायन्ते विषयास्च न किं तथा ॥११॥
ब्रह्मतो ब्रह्मतेशस्य शरीरित्वे शरीरिता ।
सेवकस्याभेददृशस्त्वेवं जन्मलयोदयाः ॥१२॥
सेव्यसेवकता विष्णोर्माया सेवेति कीर्त्तिता ।
द्वैताद्वैतस्य चेष्टैषा त्रिवर्गजनिका सताम् ॥१३॥
अतोऽहं कल्किना योद्धुं यामि कान्ते स्वसेनया ।
त्वं तं पूजय कान्तेऽद्य कमलापतिमीश्वरम् ॥१४॥

सुशान्तोवाच ।

कृतार्थोऽहं त्वया विष्णु-सेवासंमिलितात्मना ।
स्वामिन्निह परत्रापि वैष्णवी प्रथिता गतिः ॥१५॥
इति तस्या वल्गुवाग्भिः प्रणतायाः शशिध्वजः ।
आत्मानं वैष्णवं मेने साश्रुनेत्रो हरिं स्मरन् ॥१६॥
तामालिङ्ग्य प्रमुदितः शूरैर्बहुभिरावृतः ।
वदन्नाम स्मरन् रूपं वैष्णवैर्योद्धुमाययौ ॥१७॥
गत्वा तु कल्किसेनायां विद्राव्य महतीं चमूम् ।
शय्याकर्णगणैर्वीरैः सन्नद्धैरुद्यतायुधैः ॥१८॥
शशिध्वजसुतः श्रीमान् सूर्य्यकेतुर्महाबलः ।
मरुभूपेन युयुधे वैष्णवो धन्विनां वरः ॥१९॥
तस्यानुजो बृहत्केतुः कान्तः कोकिलनिस्वनः ।
देवापिना स युयुधे गदायुद्धविशारदः ॥२०॥
विशाखयूपभूपस्तु शशिध्वजनृपेण च ।
युयुधे विविधैः शस्त्रैः करिभिः परिवारितः ॥२१॥
रुधिराश्वो धनुर्धारी लघुहस्तः प्रतापवान् ।
रजस्थानेन युयुधे भर्ग्यः शान्तेन धन्विना ॥२२॥
शूलैः प्रासैर्गदाघातैर्बाणशक्तृयष्टितोमरैः ।
भल्लैः खड्गैर्भुशुण्डीभिः कुन्तैः समभवद्रणः ॥२३॥

पताकाभिर्ध्वजैश्चित्रैस्तोमरैश्छत्रचामरैः।
प्रोद्भूतधूलिपटलैरन्धकारो महानभूत् ॥३४॥
गगनेऽनुघना देवाः के वा वासं न चक्रिरे।
गन्धर्व्वैः साधुसन्दर्भैर्गायनैरप्सरायनैः ॥३५॥
द्रष्टुं समागताः सर्व्वे लोकाः समरमद्भुतम्।
शङ्खदुन्दुभिसन्नादैरास्फोटैर्बृंहितैरपि ॥३६॥
ह्रेषितैर्यौधनोत्कृष्टैर्लोका मूका इवाभवन्।
रथिनो रथिभिः शाकं पदाताश्च पदातिभिः ॥३७॥
हया हयैरिभाश्चेभैः समरोऽमरदानवैः।
यथाभवत् स तु घनो यमराष्ट्रविवर्द्धनः ॥३८॥
शस्त्रिध्वजचमूनाथैः कल्किसेनाधिपः सह।
निपेतुः सैनिका भूमौ छिन्नबाह्वङ्घ्रिकन्धराः ॥३९॥
धावन्तोऽभिद्रवन्तश्च विकुर्व्वन्तोऽसृगुक्षिताः।
उपर्य्युपरि संछन्ना गजाश्वरथमर्द्दिताः ॥४०॥
निपेतुः प्रधने वीराः कोटिकोटि सहस्रशः।
भूते सानन्दसन्दोहाः स्रवन्तो रुधिरोदकम् ॥४१॥
उष्णीषहंसाः संछिन्नगजरोधोरथप्लवाः।
करोरुमीनाभरणमसिकाञ्चनवालुकाः ॥४२॥
एवं प्रवृत्ताः संग्रामे नद्यः सद्योऽतिदारुणाः।

सूर्य्यकेतुस्तु मरुणा सहितो युयुधे बली ॥४३॥
कालकल्पो दुराधर्षो मरुं बाणैरताड़यत् ।
मरुस्तु तत्र दशभिर्मार्गणैरदरद्भृशम् ॥४४॥
मरुबाणाहतो वीरः सूर्य्यकेतुरमर्षितः ।
जघान तुरगान् कोपात् पदोद्घातेन तद्रथम् ॥४५॥
चूर्णयित्वाऽथ तेनापि तस्य वक्षस्यताड़यत् ।
गदाघातेन तेनापि मरुर्मूर्च्छामवाप ह ॥४६॥
सारथिस्तमपोवाहरथेनान्येन धर्म्मवित् ।
वृहत्केतुश्च देवापिं बाणैः प्राच्छादयद्बली ॥४७॥
धनुर्विकृष्य तरसा नीहारेण यथा रविम् ।
स तु बाणमयं वर्षं परिवार्य्य निजायुधैः ॥४८॥
वृहत्केतुं दृढ़ं जघ्ने कङ्कपत्रैः शिलाशितैः ।
भिन्नं शूलमथालोक्य धनुर्गृह्य पतत्त्रिभिः ॥४९॥
शितधारैः स्वर्णपुङ्खैर्गार्द्धपत्रैरयोमुखैः ।
देवापिमाशुगैर्जघ्ने वृहत्केतुःससैनिकम् ॥५०॥
देवापिस्तद्धनुर्दिव्यं चिच्छेद निशितैः शरैः ।
छिन्नधन्वा वृहत्केतुः खड्गपाणिर्जिघांसया ॥५१॥
देवापेः सारथिं शाश्वं जघ्ने शूरो महामृधे ।
स देवापिर्धनुस्त्यक्त्वा तलेनाहत्य तं रिपुम् ॥५२॥

भुजयोरन्तरानीय निष्पिपेष स निर्दयः ।
तं द्वाष्टवर्षं निष्क्रान्तं मूर्च्छितं शत्रुणार्द्दितम् ॥५३॥
अनुजं वीक्ष्य देवापि-मूर्ध्नि सूर्य्यध्वजोऽवधीत् ।
मुष्टिना वज्रपातेन सोऽपतन्मूर्च्छितो भुवि ।
मूर्च्छितस्य रिपुः क्रोधात् सेनागणमताड़यत् ॥५४॥

शशिध्वजः सर्व्वजगन्निवासं
कल्किं पुरस्तादभिसूर्य्यवर्च्चसम् ।
श्यामं पिशङ्गाम्बरमम्बुजेक्षणं
वृहद्भुजं चारुकिरीटभूषितम् ॥५६॥
नानामणिव्रातचिताङ्गशोभया
निरस्तलोकेक्षणहृत्तमोमयम् ।
विशाखयूपादिभिरावृतं प्रभुं
ददर्श धर्म्मेण कृतेन पूजितम् ॥५७॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे शशिध्वज-
कल्किसेनयोर्युद्धं नाम अष्टमाध्यायः ।

तृतीयांशः ।

नवमाध्यायः ।

सूत उवाच ।

हृदि ध्यानास्पदं रूपं कल्केर्दृष्ट्वा शशिध्वजः ।
पूर्णं खड्गधरं चारु-तुरगारूढमब्रवीत् ॥१॥
धनुर्बाणधरं चारु-विभूषणवराङ्ककम् ।
पापतापविनाशार्थमुद्यतं जगतां परम् ॥२॥
प्राह तं परमात्मानं हृष्टरोमा शशिध्वजः ।
एह्येहि पुण्डरीकाक्ष! प्रहारं कुरु मे हृदि ॥३॥
अथवात्मन्! बाणभिया तमोऽन्धे हृदि मे विश ।
निर्गुणस्य गुणज्ञत्वमद्वैतस्यास्त्रताड़नम् ॥४॥
निष्कामस्य जयोद्योगसहायं यस्य सैन्निकम् ।
लोकाः पश्यन्तु युद्धे मे द्वैरथे परमात्मनः ॥५॥
परबुद्धिर्यदि दृढ़ं प्रवृत्ताविभवे त्वयि ।
शिवविष्णोर्भेदकृते लोकं यास्यामि संयुगे ॥६॥
इति राज्ञो वचः श्रुत्वा अक्रोधः क्रुद्धवद्विभुः ।
बाणैरताड़यत् संख्ये धृतायुधमरिन्दमम् ॥७॥
शशिध्वजस्तत्प्रहारमगणय्य वरायुधैः ।

तं जघ्ने बाणवर्षेण धाराभिरिव पर्व्वतम् ॥८॥
तद्बाणवर्षभिन्नान्तः कल्किः परमकोपनः।
दिव्यैः शस्त्रास्त्रसंघातैस्तयोर्युद्धमवर्त्तत ॥९॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रै-र्वायव्यस्य च पर्व्वतैः।
आग्नेयस्य च पार्ज्जन्यैः पन्नगस्य च गारुडैः ॥१०॥
एवं नानाविधैरस्त्रैरन्योन्यमभिजघ्नतुः।
लोकाः सपालाः संत्रस्ता युगान्तमिव मेनिरे ॥११॥
देवा बाणाग्निसंत्रस्ता अगमन् खगमाः किल।
ततोऽतिवितथोद्योगौ वासुदेवशशिध्वजौ ॥१२॥
निरस्त्रौ बाहुयुद्धेन युयुधाते परस्परम्।
पदाघातैस्तलाघातैर्मुष्टिप्रहरणैस्तथा ॥१३॥
नियुद्धकुशलौ वीरौ मुमुदाते परस्परम्।
वराद्धोद्भूतशब्देन तं तलेनाहनद्धरिः ॥१४॥
स मूर्च्छितो नृपः कोपात् समुत्थाय च तत्क्षणात्।
मुष्टिभ्यां वज्रकल्पाभ्यामबधीत् कल्किमोजसा।
स कल्किस्तत्प्रहारेण पपात भुवि मूर्च्छितः ॥१५॥
धर्म्मः कृतञ्च तं दृष्ट्वा मूर्च्छितं जगदीश्वरम्।
समागतौ तमानेतुं कक्षे तौ जगृहे नृपः ॥१६॥
कल्किं वक्षस्युपादाय लब्धार्थः प्रययौ गृहम्।

युद्धे नृपाणामन्येषां पुत्रौ दृष्ट्वा सुदुर्ज्जयौ ॥१७॥
कल्किं सुराधिपपतिं प्रधने विजित्य
धर्म्मं कृतञ्च निजकक्षयुगे निधाय ।
हर्षोल्लसद्धृदय उत्सुलकः प्रमाथी
गत्वा गृहं हरिगृहे ददृशे सुशान्ताम् ॥१८॥
दृष्ट्वा तस्याः सुललितमुखं वैष्णवीनाञ्च मध्ये
गायन्तीनां हरिगुणकथास्तामथ प्राह राजा ।
देवादीनां विनयवचसा सम्भले जन्मवाना
विद्यालाभं परिणयविधिं म्लेच्छपाषण्डनाशम् ॥१९॥
कल्किः स्वयं हृदि समायमिहागतोऽद्धा
मूर्च्छिकलेन तव सेवनमोक्षणार्थम् ।
धर्म्मं कृतञ्च मम कक्षयुगे सुशान्ते!
कान्ते विलोकय समर्च्चय संविधेहि ॥२०॥
इति नृपवचसा विनोदपूर्णा
हरिकृतधर्म्मयुतं प्रणम्य नाथम् ।
सह निजसखिभिर्ननर्त्त रामा
हरिगुणकीर्त्तनवर्त्तना विलज्जा ॥२१॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे धर्म्म-
कल्किकृतानामानयनं नाम नवमाध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

दशमाध्यायः ।

सुशान्तोवाच ।

जय हरेऽमराधीशसेवितं
तव पदाम्बुजं भूरिभूषणम् ।
कुरु ममाग्रतः साधुसत्कृतं
त्यज महामते! मोहमात्मनः ॥१॥
तव वपुर्जगद्रूपसम्पदा
विरचितं सतां मानसे स्थितम् ।
रतिपतेर्मनोमोहदायकं
कुरु विचेष्टितं कामलम्पटम् ॥२॥
तव यशो जगत्शोकनाशनं
मृदुकथामृतप्रीतिदायकम् ।
स्मितसुधोक्षितं चन्द्रवन्मुखं
तव करोत्यलं लोकमङ्गलम् ॥३॥

मम पतिस्त्वयं सर्व्वदुर्जयो
यदि तवाप्रियं कर्म्मणाचरेत् ।
जहि तदात्मनः शत्रुमुद्यतं
कुरु कृपां नचेदीदृगीश्वरः ॥४॥
महदहंयुतं पञ्चमात्रया
प्रकृतिजायया निर्म्मितं वपुः ।
तव निरीक्षणाल्लीलया जगत्
स्थितिलयोदयं ब्रह्मकल्पितम् ॥५॥
भूवियन्मरुद्वारितेजसां
राशिभिः शरीरेन्द्रियाश्रितैः ।
त्रिगुणया स्वया मायया विभो
कुरु कृपां भवत्सेवनार्थिनाम् ॥६॥
तव गुणालयं नाम पावनं
कलिमलापहं कीर्त्तयन्ति ये ।
भवभयक्षयं, तापतापिता
मुहुरहो जनाः संसरन्ति नो ॥७॥
तव जन्मः सतां मानवर्द्धनं
निजकुलक्षयं देवपालकम् ।
कृतयुगार्पकं धर्म्मपूरकं

कलिकुलान्तकं शन्तनो तु मे ॥८॥
मम गृहं पतिपुत्रनप्तृकं
गजरथैर्ध्वजैश्चामरैर्धनैः ।
मणिवरासनं सत्कृतिं विना
तव पदाब्जयोः शोभयन्ति किम् ॥९॥
तव जगद्वपुः सुन्दरस्मितं
मुखमनिन्दितं सुन्दरारवम् ।
यदि न मे प्रियं वल्गुचेष्टितं
परिकरोत्यहो मृत्युरस्त्विह ॥१०॥
हयचरभयहरकरहरशरण-
खरतरवरशरदशबलमदन ।
जयहतपरभरभववरनशन-
शशधरशतसमरसभरवदन ॥११॥
इति तस्याः सुशान्ताया गीतेन परितोषितः ।
उत्तस्थौ रणशय्यायाः कल्किर्युद्धस्थवीरवत् ॥१२॥
सुशान्तां पुरतो दृष्ट्वा कृतं वामे तु दक्षिणे ।
धर्म्मं शशिध्वजं पश्चात् प्राहेति व्रीड़िताननः ॥१३॥
का त्वं पद्मपलाशाक्षि! मम सेवार्थमुद्यता ।
कान्ते शशिध्वजः शूरो मम पश्चादुपस्थितः ॥१४॥

हे धर्म्म! हे कृतयुग! कथमत्रागता वयम्।
रणाङ्गनं विहायास्याः शत्रोरन्तःपुरे वद ॥१५॥
शत्रुपत्नाः कथं साधु सेवन्ते मामरिं मुदा।
शशिध्वजः शूरमानी मूर्च्छितं हन्ति नो कथम् ॥१६॥

सुशान्तोवाच।

पाताले दिवि भूमौ वा नरनागसुराऽसुराः।
नारायणस्य ते कल्के के वा सेवां न कुर्व्वते ॥१७॥
यत्सेवकानां जगतां मित्राणां दर्शनादपि।
निवर्त्तन्ते शत्रुभावस्तस्य साक्षात्कुतो रिपुः ॥१॥
त्वया सार्द्धं मम पतिः शत्रुभावेन संयुगे।
यदि योग्यस्तदानेतुं किं समर्थो निजालयम् ॥१९॥
तव दासो मम स्वामी अहं दासी निजा तव।
आवयोः संप्रसादाय आगतोऽसि महाभुज ॥२०॥

धर्म्म उवाच।

अहं तवैतयोर्भक्त्या नामरूपानुकीर्त्तनात्।
कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि कलिक्षय ॥२१॥

कृतयुग उवाच।

अधुनाहं कृतयुगं तव दासस्य दर्शनात्।
त्वमीश्वरो जगत्पूज्य-सेवकस्यास्य तेजसा ॥२२॥

शशिध्वज उवाच ।

दण्ड्यं मां दण्डय विभो योऽहं त्वादुद्यतायुधम् ।
येन कामादिरागेण त्वय्यात्मन्यपि वैरिता ॥२३॥
इति कल्किर्वचस्तेषां निशम्य हसिताननः ।
त्वया जितोऽस्मीति नृपं पुनःपुनरुवाच ह ॥२४॥
ततः शशिध्वजो राजा युद्धादाहूय पुत्रकान् ।
सुशान्तायाः मतिं बुद्ध्वा रमां प्रादात् स कल्कये ॥२५॥
तदैत्य मरुदेवापी शशिध्वजसमाहृतौ ।
विशाखयूपभूपश्च रुधिराश्वश्च संयुगात् ॥२६॥
शय्याकर्णनृपेणापि भल्लाटं पुरमाययुः ।
सेनागणैरसंख्यातैः सा पुरी महिताभवत् ॥२७॥
गजाश्वरथसंबाधैः पत्तिच्छत्ररथध्वजैः ।
कल्किनापि रमायाश्च विवाहोत्सवसम्पदाम् ॥२८॥
द्रष्टुं समीयुस्त्वरिता हर्षात् सबलवाहनाः ।
शङ्खभेरीमृदङ्गानां वादित्राणाञ्च निस्वनैः ॥२९॥
नृत्यगीतविधानैश्च पुरस्त्रीकृतमङ्गलैः ।
विवाहो रमया कल्केरभूदतिसुखावहः ॥३०॥
नृपा नानाविधैर्भोज्यैः पूजिता विविशुः सभाम् ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चावरजातयः ॥३१॥

विचित्रभोगाभरणाः कल्किं द्रष्टुमुपाविशन् ।
तस्यां सभायां शुशुभे कल्किः कमललोचनः ॥३२॥
नक्षत्रगणमध्यस्थः पूर्णः शशधरो यथा ।
रेजे राजगणाधीशो लोकान् सर्व्वान् विमोहयन् ॥३३॥
रमापतिं कल्किमवेक्ष्य भूपः
सभागतं पद्मदलायतेक्षणम् ।
जामातरं भक्तियुतेन कर्म्मणा
विबुध्य मध्ये निषसाद तत्र ह ॥३४॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्किना रमाविवाहो नाम दशमाध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

एकादशाध्यायः ।

सूत उवाच ।

तत्राहस्ति सभामध्ये वैष्णवं तं शशिध्वजम् ।
मुनिभिः कथिताशेष-भक्तिव्यासक्तविग्रहम् ॥१॥
सुशान्ताञ्च कृतेनापि धर्म्मेण विधिवद्युताम् ।

राजान ऊचुः ।

युवां नारायणास्यास्य कल्केः श्वशुरतां गतौ ।
वयं नृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ॥३॥
प्रेक्ष्य भक्तिवितानं वां हरौ विस्मितमानसाः ।
पृच्छामस्त्वामियं भक्तिः क्व लब्धा परमात्मनः ॥४॥
कस्य वा शिक्षिता राजन्! किंवा नैसर्गिकी तव ।
श्रोतुमिच्छामहे राजन्! त्रिजगज्जनपावनीम् ।
कथां भागवतीं त्वत्तः संसाराश्रमनाशिनीम् ॥५॥

शशिध्वज उवाच ।

स्त्रीपुंसोरावयोस्तत्त्व शृणुतामोघविक्रमाः ।

वृत्तं यज्जन्मकर्म्मादि स्मृतिं तद्भक्तिलक्षणाम् ॥७॥
पुरा युगसहस्रान्ते गृध्रोऽहं पूतिमांसभुक् ।
गृध्रीयं मे प्रियारण्ये कृतनीड़ो वनस्पतौ ॥८॥
चचार कामं सर्व्वत्र वनोपवनसंकुले ।
मृतानां पूतिमांसौघैः प्राणिनां वृत्तिकल्पकौ ॥९॥
एकदा लुब्धकः क्रूरो लुलोभ पिशिताशिनौ ।
आवां वीक्ष्य गृहे पुष्टं गृध्रं तत्राप्ययोजयत् ॥१०॥
तं वीक्ष्य जातविश्रम्भौ क्षुधया परिपीड़ितौ ।
स्त्रीपुंसौ पतितौ तत्र मांसलोभितचेतसौ ॥११॥
बद्धावावां वीक्ष्य तदा हर्षादागत्य लुब्धकः ।
जग्राह कण्ठे तरसा चञ्चाग्राघातपीड़ितः ॥१२॥
आवां गृहीत्वा गण्डक्याः शिलायां सलिलान्तिके ।
मस्तिस्कं चूर्णयामास लुब्धकः पिशिताशनः ॥१३॥
चक्राङ्कितशिलागङ्गामरणादपि तत्क्षणात् ।
ज्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ॥१४॥
प्राप्तौ वैकुण्ठनिलयं सर्व्वलोकनमस्कृतम् ।
तत्र स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ॥१५॥
ब्रह्मलोके पञ्चशतं युगानामुपभुज्य वै ।
देवलोके कालवशाद्गतं युगचतुःशतम् ॥१६॥

ततो भुवि नृपास्तावत् बद्धस्नेहनूरहं स्मरन्।
हरेरनुग्रहं लोके शालग्रामशिलाश्रमम् ॥१७॥
जातिस्मरत्वं गण्डक्याः किं तस्याः कथयाम्यहम्।
यज्जलस्पर्शमात्रेण माहात्म्यं महदद्भुतम् ॥१८॥
चक्राङ्कितशिलास्पर्शमरणस्येदृशं फलम्।
न जाने वासुदेवस्य सेवया किं भविष्यति ॥१९॥
इत्यावां हरिपूजासु हर्षविक्लवचेतसौ।
नृत्यन्तावनुगायन्तौ विलुठन्तौ स्थिताविह ॥२०॥
कल्केर्नारायणांशस्य अवतारः कलिक्षयः।
पुरा विदितवीर्य्यस्य पृष्टो ब्रह्ममुखात् श्रुतः ॥२१॥
इति राजसभायां सः श्रावयित्वा निजाः कथाः।
ददौ गजानामयुतमश्वानां लक्षमादरात् ॥२२॥
रथानां षट्सहस्रन्तु ददौ पूर्णस्य भक्तितः।
दासीनां युवतीनाञ्च रमानाथाय षट्शतम् ॥२३॥
रत्नानि च महार्घाणि दत्त्वा राजा शशिध्वजः।
मेने कृतार्थमात्मानं स्वजनैर्बान्धवैः सह ॥२४॥
सभासद इति श्रुत्वा पूर्व्वजन्मोदिताः कथाः।
विस्मयाविष्टमनसः पूर्णं तं मेनिरे नृपम् ॥२५॥
कल्किं स्तुवन्तो ध्यायन्तो प्रशंसन्तो जगज्जनाः।

पुनस्तमाहूराजानं लक्षणं भक्तिभक्तयोः ॥२६॥

नृपा ऊचुः ।

भक्तिकाम्याद्भगवतः को वा भक्तो विधानवित् ।
किं करोति किमश्नाति क्व वा वसति वक्ति किम् ॥२७॥
एतान् वर्णय राजेन्द्र ! सर्व्वं त्वं वेत्सि सादरात् ।
जातिस्मरत्वात् कृष्णस्य जगतां पावनेच्छया ॥२८॥
इति तेषां वचः श्रुत्वा प्रफुल्लवदनो नृपः ।
साधुवादैः समामन्त्र्य तानाह ब्रह्मणोदितम् ॥२९॥

शशिध्वज उवाच ।

पुरा ब्रह्मसभामध्ये महर्षिगणसंकुले ।
सनको नारदं प्राह भवद्भिर्यास्त्विहोदिताः ॥३०॥
तेषामनुग्रहेणाहं तत्रोषित्वा श्रुताः कथाः ।
यास्ताः संकथयामीह शृणुध्वं पापनाशनाः ॥३१॥

सनक उवाच ।

का भक्तिः संसृतिहरा हरौ लोकनमस्कृता ।
तामादौ वर्णय मुने नारदावहिता वयम् ॥३२॥

नारद उवाच ।

मनःषष्ठानीन्द्रियाणि संयम्य परया धिया ।
गुरावपि न्यसेद्देहं लोकतन्त्रविचक्षणः ॥३३॥

गुरौ प्रसन्ने भगवान् प्रसीदति हरिः स्वयम्।
प्रणवाग्निप्रियामध्ये सवर्णं तन्निदेशतः ॥३४॥
स्मरेदनन्यया बुध्या देशिकः सुसमाहितः।
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥३५॥
पूजयित्वा वासुदेव-पादपद्मं समाहितः।
सर्व्वाङ्गसुन्दरं रम्यं स्मरेत् हृत्पद्ममध्यगम् ॥३६॥
एवं ध्यात्वा वाक्यमनो-बुद्धीन्द्रियगणैः सह।
आत्मानमर्पयेद्विद्वान् हरावेकान्तभाववित् ॥३७॥
अङ्गानि देवास्त्वेषान्तु नामानि विदितान्युत।
विष्णोः कल्केरनन्तस्य तान्येवान्यन्न विद्यते ॥३८॥
सेव्यः कृष्णः सेवकोऽहमन्ये तस्यात्ममूर्त्तयः।
अविद्योपाधयो ज्ञानाद्वदन्ति प्रभवादयः ॥३९॥
भक्तस्यापि हरौ द्वैतं सेव्यसेवकवत्तदा।
नान्यद्विना तमित्येव क्वच किञ्चन विद्यते ॥४०॥
भक्तः स्मरति तं विष्णुं तन्नामानि च गायति।
तत् कर्म्माणि करोत्येव तदानन्दसुखोदयः ॥४१॥
नृत्यत्युद्धतवद्रौति हसति प्रैति तन्मनाः।
विलुठत्यात्मविस्मृत्या न वेत्ति कियदन्तरम् ॥४२॥
एवंविधा भगवतो भक्तिरव्यभिचारिणी।

पुनाति सहसा लोकान् सदेवासुरमानुषान् ॥४४॥
भक्तिः सा प्रकृतिर्नित्या ब्रह्मसम्पत् प्रकाशिता ।
शिवविष्णुब्रह्मरूपा वेदाद्यानां वरापि वा ॥४५॥
भक्ताः सत्वगुणाध्यासात् रजसेन्द्रियलालसाः ।
तमसा घोरसंकल्पा भजन्ति द्वैतदृग्जनाः ॥४६॥
सत्वान्निर्गुणतामेति रजसा विषयस्पृहा ।
तमसा नरकं यान्ति संसाराद्वैतधर्म्मिणि ॥४७॥
उच्छिष्टमवशिष्टं वा पथ्यं पूतमभीप्सितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्विकं मतम् ॥४८॥
इन्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥४९॥
अतःपरं तामसानां कट्वम्लोष्णविदाहिकम् ।
पूतिपर्य्युषितं ज्ञेयं भोजनं तामसप्रियम् ॥५०॥
सात्विकानां वने वासो ग्रामे वासस्तु राजसः ।
तामसं द्यूतमद्यादिसदनं परिकीर्त्तितम् ॥५१॥
न दाता स हरिः किञ्चित् सेवकस्तु न याचकः ।
तथापि परमा प्रीतिस्तयोः किमिति शाश्वती ॥५२॥

इत्येतत् भगवत ईश्वरस्य विष्णो-
र्गुणकथनं सनको विबुध्य भक्त्या ।

सविनयवचनैः सुरर्षिवर्य्यं
परिणुत्वेन्द्रपुरं जगाम शुद्धः ॥५२॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
नृपगणशशिध्वजसंवादे जातिस्मरत्वकथनं
नाम एकादशोऽध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

द्वादशाध्यायः ।

शशिध्वज उवाच ।

एतद्वः कथितं भूपाः कथनीयोरुकर्म्मणः ।
कथा भक्तस्य भक्तेश्च किमन्यत् कथयाम्यहम् ॥१॥

भूपा ऊचुः ।

त्वं राजन् वैष्णवश्रेष्ठः सर्व्वसत्वहिते रतः ।
तवावेशः कथं युद्धरङ्गे हिंसादिकर्म्मणि ॥२॥
प्रायशः साधवो लोके जीवानां हितकारिणः ।
प्राणबुद्धिधनैर्वाग्भिः सर्व्वेषां विषयात्मनाम् ॥३॥

शशिध्वज उवाच ।

द्वैतप्रकाशिनी या तु प्रकृतिः कामरूपिणी ।
सा सूते त्रिजगत् कृत्स्नं वेदांश्च त्रिगुणात्मिका ॥४॥
ते वेदास्त्रिजगत्धर्म्मशासनाधर्म्मनाशनाः ।
भक्तिप्रवर्त्तका लोके कामिनां विषयैषिणाम् ॥५॥
वात्स्यायनादिमुनयो मनवो वेदपारगाः ।

वहन्ति बलिमीशस्य वेदवाक्यानुशासिता: ॥६॥
वयं तदनुगाः कर्म्म धर्म्म निष्ठा रणप्रियाः।
जिघांसन्तं जिघांसामो वेदार्थकृतनिश्चयाः ॥७॥
अवध्यस्य बधे यावांस्तावान् बध्यस्य रक्षणे।
इत्याह भगवान् व्यासः सर्व्ववेदार्थतत्परः ॥८॥
प्रायश्चित्तं न तत्रास्ति तत्राधर्म्मः प्रवर्त्तते।
अतोऽत्र वाहिनीं हत्वा भवतां युधि दुर्जयाम् ॥९॥
धर्म्मं कृतञ्च कल्किन्तु समानीयागता वयम्।
एषा भक्तिर्मम मता तवाभिप्रेतमीरय ॥ १०॥
अहं तदनुवक्ष्यामि वेदवाक्यानुसारतः।
यदि विष्णुः स सर्व्वत्र तदा कं हन्ति को हतः ॥११॥
हन्ता विष्णुर्हतो विष्णुर्बधः कस्यास्ति तत्र चेत्।
युद्धयज्ञादिषु बधे न बधो वेदशासनात् ॥१२॥
इति गायन्ति मुनयो मनवश्च चतुर्दश।
इत्थं युद्धैश्च यज्ञैश्च भजामो विष्णुमीश्वरम् ॥१३॥
अतो भागवतीं मायामाश्रित्य विधिना यजन्।
सेव्यसेवकभावेन सुखीभवति नान्यथा ॥१४॥

भूपा ऊचुः।

निमेर्भूपस्य भूपाल! गुरोः शापात् मृतस्य च।

तादृशे भोगायतने विरागः कथमुच्यताम् ॥१५॥
शिष्यशापात् वशिष्ठस्य देहावाप्तिर्म्मतस्य च ।
श्रूयते किल मुक्तानां जन्म भक्तविमुक्तता ॥१६॥
अतो भागवती माया दुर्बोध्या विजितात्मनाम् ।
विमोहयन्ति संसारे नानात्वादिन्द्रजालवत् ॥१७॥
इति तेषां वचो भूयः श्रुत्वा राजा शशिध्वजः ।
प्रोवाच वदतां श्रेष्ठो भक्तिप्रवणया धिया ॥१८॥

शशिध्वज उवाच ।

बहुना जन्मनामन्ते तीर्थक्षेत्रादियोगतः ।
दैवाद्भवेत् साधुसङ्गस्तस्मादीश्वरदर्शनम् ॥१९॥
ततः सालोक्यताम्प्राप्य भजन्त्यादृतचेतसः ।
भुक्ता भोगाननुपमान् भक्तो भवति संसृतौ ॥२०॥
रजोयुषः कर्म्मपराः हरिपूजापराः सदा ।
तन्नामानि प्रगायन्ति तद्रूपस्मरणोत्सुकाः ॥२१॥
अवतारानुकरणपर्व्वव्रतमहोत्सवाः ।
भगवद्भक्तिपूजाढ्याः परमानन्दसंप्लुताः ॥२२॥
अतो मोक्षं न वाञ्छन्ति दृष्टमुक्तिफलोदयाः ।
मुक्ता लभन्ते जन्मानि हरिभावप्रकाशकाः ॥२३॥
हरिरूपाः क्षेत्रतीर्थपावना धर्म्मतत्पराः ।

सारासारविदः सेव्यसेवका द्वैतविग्रहाः ॥२४॥
यथावतारः कृष्णस्य तथा तत्सेविनामिह।
एवं निमेर्निमिषता लीला भक्तस्य लोचने ॥२५॥
मुक्तस्यापि वशिष्ठस्य शरीरभजनादरः।
एतद्वः कथितं भूपा माहात्म्यं भक्तिभक्तयोः ॥२६॥
सद्यःपापहरं पुंसां हरिभक्तिविवर्द्धनम्।
सर्व्वेन्द्रियस्थदेवानामानन्दसुखसञ्चयम्।
कामरागादिदोषघ्नं मायामोहनिवारणम् ॥२७॥
नानाशास्त्रपुराणवेदविमलव्याख्यामृताम्भोनिधिं
संमथ्यातिचिरं त्रिलोकमुनयो व्यासादयो भावुकाः।
कृष्णे भावमनन्यमेवममलं हैयङ्गवीनं नवं
लब्ध्वा संसृतिनाशनं त्रिभुवने श्रीकृष्णतुल्यायते ॥२८॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे भक्तिभक्त-
माहात्म्यं नाम द्वादशाध्यायः।

कल्किपुराणम्।

तृतीयांशः।

त्रयोदशाध्यायः।

सूत उवाच।

इति भूपः सभायां सः कथयित्वा निजाः कथाः।
शशिध्वजः प्रीतमनाः प्राह कल्किं कृताञ्जलिः ॥१॥

शशिध्वज उवाच।

त्वं हि नाथ! त्रिलोकेश एते भूपास्त्वदाश्रयाः।
मां तथा विद्धि राजानं त्वन्निर्देशकरं हरे ॥२॥
तपस्तप्तुं यामि कामं हरिद्वारं मुनिप्रियम्।
एते मत्पुत्रपौत्राश्च पालनीयास्त्वदाश्रयाः ॥३॥
ममापि कामं जानासि पुरा जाम्बवतो यथा।
निधनं द्विविदस्यापि तदा सर्व्वं सुरेश्वर ॥४॥
इत्युक्त्वा गन्तुमुद्युक्तं भार्य्यया सहितं नृपम्।
लज्जयाधोमुखं कल्किं प्राहुर्भूपाः किमित्युत ॥५॥
हे नाथ! किमनेनोक्तं यत्श्रुत्वा त्वमधोमुखः।
कथं तद्ब्रूहि कामं नः किं वा नः शाधि संशयात् ॥६॥

कल्किरुवाच ।

अमूं पृच्छत वो भूपा यूष्माकं संशयच्छिदम् ।
शशिध्वजं महाप्राज्ञं मद्भक्तिकृतनिश्चयम् ॥७॥
इति कल्केर्वचः श्रुत्वा ते भूपाः प्रोक्तकारिणः ।
राजानं तं पुनः प्राहुः संशयापन्नमानसाः ॥८॥

नृपा ऊचुः ।

किं त्वया कथितं राजन्! शशिध्वज महामते ।
कथं कल्किस्तद्वदिदं श्रुत्वैवाभूदधोमुखः ॥९॥

शशिध्वज उवाच ।

पुरा रामावतारेण लक्ष्मणादिन्द्रजिद्वधम् ।
मोहच्चालक्ष्य द्विविदो राक्षसत्वात् स दारुणात् ॥१०॥
अश्मागारे ब्रह्मवीरबधेनैकाह्निको ज्वरः ।
लक्ष्मणस्य शरीरेण प्रविष्टो मोहकारकः ॥११॥
तं व्याकुलमभिप्रेक्ष्य द्विविदो भिषजां वरः ।
अश्विवंशेन संजातः स्नापयामास लक्ष्मणम् ॥१२॥
लिखित्वा रामभद्रस्य संज्ञापत्रीमतन्द्रितः ।
लक्ष्मणं दर्शयामास ऊर्द्धस्तिष्ठन् महाभुजः ॥१३॥
लक्ष्मणो वीक्ष्य तां पत्रीं विज्वरो बलवानभूत् ।
स ततो द्विविदं प्राह वरं वरय वानर ॥१४॥

द्विविदस्तद्वचः श्रुत्वा लक्ष्मणं प्राह हृष्टवत् ।
त्वत्तो मे मरणं प्रार्थ्यं वानरत्वाच्च मोचनम् ॥१५॥
पुनस्तं लक्ष्मणः प्राह मम जन्मान्तरे तव ।
मोचनं भविता कोश, बलरामशरीरिणः ॥१६॥
समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाह्निकं ज्वरं हन्ति लिखनं यस्तु पश्यति ॥१७॥
इति मन्त्राक्षरं द्वारि लिखित्वा तालपत्रके ।
यस्तु पश्यति तस्यापि नश्यत्यैकाह्निकज्वरः ॥१८॥
इति तस्य वरं लब्ध्वा चिरायुः सुस्थवानरः ।
बलरामास्त्रभिन्नात्मा मोक्षमापाकुतोभयम् ॥१९॥
तथा चेक्रे सूतपुत्रो निहतो लोमहर्षणः ।
बलरामास्त्रयुक्तात्मा नैमिषेऽभूत् स्ववाञ्छया ॥२०॥
जाम्बवांश्च पुरा भूपा वामनत्वं गते हरौ ।
तस्याप्यूर्द्ध्वगतं पादं तत्र चक्रे प्रदक्षिणम् ॥२१॥
मनोजवं तं निरीक्ष्य वामनः प्राह विस्मितः ।
मत्तो वृणु वरं काममृक्षाधीश महाबल ॥२२॥
इति तं हृष्टवदनो ब्रह्मांशो जाम्बुवान्मुदा ।
प्राह भो चक्रदहनात् मम मृत्युर्भविष्यति ॥२३॥
इत्युक्ते वामनः प्राह कृष्णजन्मनि मे तव ।

मोक्षस्त्वक्रेण संभिन्नशिरसः संभविष्यति ॥२४॥
मम कृष्णावतारे तु सूर्य्यभक्तस्य भूपतेः।
सत्राजितस्तु मण्यर्थे दुर्वादः समजायत ॥२५॥
प्रसेनस्य मम भ्रातुर्बधस्तु मणिहेतुकः।
सिंहात्तस्यापि मण्यर्थे बधो जाम्बवता कृतः ॥२६॥
दुर्वादभयभीतस्य कृष्णस्यामिततेजसः।
मण्यन्वेषणचित्तस्य क्षत्तेणाभूद्रणो विले ॥२७॥
स निजेशं परिज्ञाय तच्चक्रग्रस्तबन्धनम्।
मुक्तो बभूव सहसा कृष्णं पश्यन् सलक्षणम् ॥२८॥
नवदूर्वादलश्यामं दृष्ट्वा प्रादात् निजात्मजाम्।
तदा जाम्बवतीं कन्यां प्रगृह्य मणिना सह ॥२९॥
द्वारकां पुरमागत्य सभायां मामुपाह्वयत्।
आहूय मह्यं प्रददौ मणिं मुनिगणार्च्चितम् ॥३०॥
सोऽहं तां लज्जया तेन मणिना कन्यकां स्वकाम्।
विवाहेन ददावस्मै लावण्याज्जगृहे मणिम् ॥३१॥
तां सत्यभामामादाय मणिं मय्यर्प्य स प्रभुः।
द्वारकामागत्य पुनर्गजाह्वयमगाद्विभुः ॥३२॥
गते कृष्णे मां निहत्य शतधन्वाग्रहीन्मणिम्।
अतोऽहमिह जानामि पूर्ब्बजन्मनि यत् कृतम् ॥३३॥

मिथ्याभिशापात् कृष्णस्य नैवाभून्मोचनं मम।
अतोऽहं कल्किरूपाय कृष्णाय परमात्मने।
दत्त्वा रमां सत्यभामारूपिणीं यामि सद्‌गतिम् ॥३४॥
सुदर्शनास्त्रघातेन मरणं मम काङ्क्षितम्।
मरणेऽभूदिति ज्ञात्वा रणे वाञ्छामि मोचनम् ॥३५॥
इत्यसौ जगतामीशः कल्किः श्वशुरघातनम्।
श्रुत्वैवाधोमुखस्तस्थौ ह्रिया धर्म्मभिया प्रभुः ॥३६॥
अत्याश्चर्य्यमपूर्व्वमुत्तममिदं श्रुत्वा नृपा विस्मिता
लोकाः संसदि हर्षिता मुनिगणाः कल्केर्गुणाकर्षिताः।
आख्यानं परमादरेण सुखदं धन्यं यशस्यं परं
श्रीमद्भूपशशिध्वजेरितवचो मोक्षप्रदं चाभवन् ॥३७॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे शशिध्वजे-
रितचक्रमरणाख्यानं नाम त्रयोदशाध्यायः।

कल्किपुराणम् ।

तृतीयांशः ।

चतुर्दशाध्यायः ।

सूत उवाच ।

ततः कल्किर्महातेजाः स्वपुरं तं शशिध्वजम् ।
समामन्त्र्य वचस्विभिः सह भूपैर्ययौ हरिः ॥१॥
शशिध्वजो वरं लब्ध्वा यथाकामं महेश्वरीम् ।
स्तुत्वा मायां त्यक्तमायः सप्रियः प्रययौ वनम् ॥२॥
कल्किः सेनागणैः सार्द्धं प्रययौ काञ्चनीं पुरीम् ।
गिरिदुर्गावृतां गुप्तां भोगिभिर्विषवर्षिभिः ॥३॥
विदार्य्य दुर्गं सगणः कल्किः परपुरञ्जयः ।
छित्त्वा विषायुधान् बाणैस्तां पुरीं ददृशेऽच्युतः ॥४॥
मणिकाञ्चनचित्राढ्यां नागकन्यागणावृताम् ।
हरिचन्दनवृक्षाढ्यां मनुजैः परिवर्ज्जिताम् ॥५॥
विलोक्य कल्किः प्रहसन् प्राह भूपान् किमित्यहो ।
सर्पस्येयं पुरी रम्या नराणां भयदायिनी ।
नागनारीगणाकीर्णा किं यास्यामो वदन्त्विह ॥६॥
इतिकर्त्तव्यताव्यग्रं रमानाथं हरिं प्रभुम् ।

भूपांस्तदनुरूपांश्च खे वागाहाशरीरिणी ॥७॥
विलोक्य नेमां सेनाभिः प्रवेष्टुं भोस्त्वमर्हसि।
त्वां विनान्ये मरिष्यन्ति विषकन्यादृशादपि ॥८॥
आकाशवाणीमाकर्ण्य कल्किः शुकसहायकृत्।
ययावेकः खड्गधरस्तुरगेण त्वरान्वितः ॥९॥
गत्वा तां ददृशे वीरो धीराणां धैर्य्यनाशिनीम्।
रूपेणालक्ष्य लक्ष्मीशं प्राह प्रहसिताननना ॥१०॥

विषकन्योवाच।

संसारेऽस्मिन् मम नयनयोर्वीक्षणक्षीणदेहा
लोका भूपाः कति कति गता मृत्युमत्युग्रवीर्य्याः।
साहं दीनासुरसुरनरप्रेक्षणप्रेमहीना
ते नेत्राब्जद्वयरससुधाप्लाविता त्वां नमामि ॥११॥
क्वाहं विषेक्षणा दीना क्वामृतेक्षणसङ्गमः।
भवेऽस्मिन् भाग्यहीनायाः केनाहो तपसा कृतः ॥१२॥

कल्किरुवाच।

कासि कन्यासि सुश्रोणि कस्मादेषा गतिस्तव।
ब्रूहि मां कर्म्मणा केन विषनेत्रं तवाभवत् ॥१३॥

विषकन्योवाच।

चित्रग्रीवस्य भार्य्याहं गन्धर्व्वस्य महामते।

सुलोचनेति विख्याता पत्युरत्यन्तकामदा ॥१४॥
एकदाहं विमानेन पत्या पीठेन सङ्गता ।
गन्धमादनकुञ्जेषु रेमे कामकलाकुला ॥१५॥
तत्र यक्षमुनिं दृष्ट्वा विकृताकारमातुरम् ।
रूपयौवनगर्व्वेण कटाक्षेणाहसं मदात् ॥१६॥
सोपालम्भं मुनिः श्रुत्वा वचनञ्च ममाप्रियम् ।
शशाप मां क्रुधा तत्र तेनाहं विषदर्शना ॥१७॥
निक्षिप्ताहं सर्पपुरे काञ्चन्यां नागिनीगणे ।
पतिहीना दैवहीना चरामि विषवर्षिणी ॥१८॥
न जाने केन तपसा भवदृष्टिपथं गता ।
त्यक्तशापामृताचाहं पतिलोकं व्रजाम्यतः ॥१९॥
अहो तेषामस्तु शापः प्रसादो मा सतामिह ।
पत्युः शापाद्विषेर्मोक्षात् तव पादाब्जदर्शनम् ॥२०॥
इत्युक्त्वा सा ययौ स्वर्गं विमानेनार्कवर्च्चसा ।
कल्किस्तु तत्पुराधीशं नृपं चक्रे महामतिम् ॥२१॥
अमर्षस्तत्सुतो धीमान् सहस्रो नाम तत्सुतः ।
सहस्रतः सुतश्चासीद्राजा विश्रुतवानसिः ॥२२॥
बृहन्नलानां भूपानां संभूता यस्य वंशजाः ।
तं मनुं भूपशार्द्दूलं नानामुनिगणैर्वृतः ॥२३॥

अयोध्यायां चाभिषिच्य मथुरामगमद्धरिः ।
तस्यां भूपं सूर्य्यकेतुमभिषिच्य महाप्रभम् ॥२४॥
भूपं चक्रे ततो गत्वा देवापिं वारणावते ।
अरिस्थलं वृकस्थलं माकन्दञ्च गजाह्वयम् ॥२५॥
पञ्चदेशेश्वरं कृत्वा हरिः शम्भलमाययौ ।
शौम्भं पौण्ड्रं पुलिन्दञ्च सुराष्ट्रं मगधन्तथा ।
कविप्राज्ञसुमन्तेभ्यः प्रददौ भ्रातृवत्सलः ॥२६॥
कीकटं मध्यकर्णाटमन्ध्रमोड्रं कलिङ्गकम् ।
अङ्गं वङ्गं स्वगोत्रेभ्यः प्रददौ जगदीश्वरः ॥२७॥
स्वयं शम्भलमध्यस्थः कङ्केन कलापकान् ।
देशं विशाखयूपाय प्रादात् कल्किः प्रतापवान् ॥२८॥
चोलवर्ब्बरकर्ब्बाख्यान् द्वारकादेशमध्यगान् ।
पुत्रेभ्यः प्रददौ कल्किः कृतवर्म्मपुरस्कृतान् ॥२९॥
पित्रे धनानि रत्नानि ददौ परमभक्तितः ।
प्रजाः समाश्वास्य हरिः शम्भलग्रामवासिनः ॥३०॥
पद्मया रमया कल्किर्गृहस्थो मुमुदे भृशम् ।
धर्म्मश्चतुष्पादभवत् कृतपूर्णं जगत्त्रयम् ॥३१॥
देवा यथोक्तफलदाश्चरन्ति भुवि सर्व्वतः ।
सर्व्वशस्या वसुमती हृष्टपुष्टजनावृता ।

शाठ्यचौर्य्यानृतैर्हीना आधिव्याधिविवर्ज्जिता ॥३२॥
विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चार्य्या व्रतैः
पूजाहोमपराः पतिव्रतधरा यागोद्यताः क्षत्त्रियाः।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजापराः
शूद्रास्तु द्विजसेवनाद्धरिकथालापाः सपर्य्यापराः ॥३३॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
विषकन्यामोक्ष-कृतधर्म्मप्रवृत्तिकथनं
नाम चतुर्दशोऽध्यायः।

तृतीयांशः ।

पञ्चदशाध्यायः ।

शौनक उवाच ।

शशिध्वजो महाराजः स्तुत्वा मायां गतः कुतः ।
का वा मायास्तुतिः सूत वद तत्त्वविदां वर ।
या त्वत्कथा विष्णुकथा वक्तव्या सा विशुद्धये ॥१॥

सूत उवाच ।

शृणुध्वं मुनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥२॥
तत् शृणुष्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्व्वकामप्रदं नृणां पापतापविनाशनम् ॥३॥

शुक उवाच ।

भल्लाटनगरं त्यक्त्वा विष्णुभक्तः शशिध्वजः ।
आत्मसंसारमोक्षाय मायास्तवमलं जगौ ॥४॥

शशिध्वज उवाच ।

ओं ह्रींकारां सत्त्वसारां विशुद्धां
ब्रह्मादीनां मातरं वेदबोध्याम् ।

तन्वीं स्वाहां भूततन्मात्रकत्त्वां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥५॥
लोकातीतां द्वैतभूतां समीड़े
भूतैर्भव्यां व्याससामासिकाद्यैः।
विद्वद्गीतां कालकल्लोललोलां
लीलापाङ्गक्षिप्तसंसारदुर्गाम् ॥६॥
पूर्णां प्राप्यां द्वैतलभ्यां शरण्याम्
आद्ये शेषे मध्यतो या विभाति।
नानारूपैर्देवतिर्य्यङ्मनुष्यै-
स्तामाधारां ब्रह्मरूपां नमामि ॥७॥
यस्या भासा त्रिजगद्भाति भूतै-
र्न भात्येतत्तदभावे विधातुः।
कालो दैवं कर्म्म चोपाधयो ये
तस्यां भाषा तां विशिष्टां नमामि ॥८॥
भूमौ गन्धो रसताप्सु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम्।
खे शब्दो वा यच्चिदाभाति नाना
तामभ्येतां विश्वरूपां नमामि ॥९॥
सावित्री त्वं ब्रह्मरूपा भवानी

भूतेशस्य, श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि मायि जगत्सु ॥१०॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैरुपास्या
ज्ञानातीता कामरूपा विभासि ॥११॥
वरेण्या त्वं वरदा लोकसिद्धग्रा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥१२॥
तव चरणसरोजं देवि! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या* ।
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसम्पत्
जनयति जगदाद्ये सर्व्वसिद्धिञ्च तेषाम् ॥१३॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादवाप्यापि सिद्धिं लेभे शशिध्वजः ॥१४॥

---

* सुकृतमभियुक्तं हृत्सरोजे स्मरन्ति इति पाठान्तरम् ।१२

कोकामुखे तपस्तप्त्वा हरिं ध्यात्वा वनान्तरे ।
सुदर्शनेन निहतो वैकुण्ठं शरणं ययौ ॥१५॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे मायास्तवो
नाम पञ्चदशाध्यायः ।

कल्किपुराणम्।

तृतीयांशः।

षोड़शाध्यायः।

सूत उवाच।

एतद्वः कथितं विप्राः शशिध्वजविमोक्षणम्।
कल्केः कथामप्रतिमां शृण्वन्तु विबुधर्षभाः ॥१॥
वेदो धर्म्मः कृतयुगं देवा लोकाश्चराचराः।
हृष्टाः पुष्टाः सुसंतुष्टाः कल्कौ राजनि चाभवन् ॥२॥
नानादेवादिलिङ्गेषु भूषणैर्भूषितेषु च।
इन्द्रजालिकवद्वृत्तिकल्पकाः पूजका जनाः ॥३॥
न सन्ति मायामोहाढ्याः पाषण्डाः साधुवञ्चकाः।
तिलकाचितसर्व्वाङ्गाः कल्कौ राजनि कुत्रचित् ॥४॥
शम्भले वसतस्तस्य पद्मया रमया सह।
प्राह विष्णुयशाः पुत्रं देवान् यष्टुं जगद्धितान् ॥५॥
तत् श्रुत्वा प्राह पितरं कल्किः परमहर्षितः।
विनयावनतो भूत्वा धर्म्मकामार्थसिद्धये ॥६॥
राजसूयैर्वाजपेयैरश्वमेधैर्महामखैः।
नानायागैः कर्म्मतन्त्रैरीजे क्रतुपतिं हरिम् ॥७॥

कृपरामवशिष्ठाद्यैर्व्यासधौम्याकृतव्रणैः ।
अश्वत्थाममधुच्छन्दो-मन्दपालैर्महात्मनः ॥८॥
गङ्गायमुनयोर्मध्ये स्नात्वावभृथमादरात् ।
दक्षिणाभिः समभ्यर्च्च्य ब्राह्मणान् वेदपारगान् ॥९॥
चर्व्यैश्चोष्यैश्च पेयैश्च पूगशष्कुलियावकैः ।
मधुमांसैर्मूलफलैरन्यैश्च विविधैर्द्विजान् ॥१०॥
भोजयामास विधिवत् सर्व्वकर्म्मसमृद्धिभिः ।
यत्र वह्निर्वृतः पाके वरुणो जलदो मरुत् ॥११॥
परिवेष्टा द्विजान् कामैः सदन्नाद्यैरतोषयत् ।
वाद्यैर्नृत्यैश्च गीतैश्च पितृयज्ञमहोत्सवैः ॥१२॥
कल्किः कमलपत्राक्षः प्रहृष्टः प्रददौ वसु ।
स्त्रीबालस्थविरादिभ्यः सर्व्वेभ्यश्च यथोचितम् ॥१३॥
रम्भा तालधरानन्दी हुहुर्गायति नृत्यति ।
दत्त्वा दानानि पात्रेभ्यो ब्राह्मणेभ्यः स ईश्वरः ॥१४॥
उवास तीरे गङ्गायाः पितृवाक्यानुमोदितः ।
सभार्यां विष्णुयशसः पूर्व्वराजकथाः प्रियाः ॥१५॥
कथयन्तो हसन्तश्च हर्षयन्तो द्विजा बुधाः ।
तत्रागतस्तुम्बुरुणा नारदः सुरपूजितः ॥१६॥
तं पूजयामास मुदा पित्रा सह यथाविधि ।

तौ संपूज्य विष्णुयशाः प्रोवाच विनयान्वितः ।
नारदं वैष्णवं प्रीत्या वीणापाणिं महामुनिम् ॥१७॥

विष्णुयशा उवाच ।

अहो भाग्यमहो भाग्यं मम जन्मशतार्ज्जितम् ।
भवद्विधानां पूर्णानां यन्मे मोक्षाय दर्शनम् ॥१८॥
अद्याग्नयश्च सुहुतास्तृप्ताश्च पितरः परम् ।
देवाश्च परिसन्तुष्टास्तवावेक्षणपूजनात् ॥१९॥
यत्पूजायां भवेत् पूज्यो विष्णुर्यन्ममदर्शनम् ।
पापसंघं स्पर्शनाच्च किमहो साधुसङ्गमः ॥२०॥
साधूनां हृदयं धर्म्मो वाचो देवाः सनातनाः ।
कर्म्मक्षयाणि कर्म्माणि यतः साधुर्हरिः स्वयम् ॥२१॥
मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ।
यथावतारे कृष्णस्य सतो दुष्टविनिग्रहे ॥२२॥
पृच्छामि त्वामतो ब्रह्मन् मायासंसारवारिधौ ।
नौकायां विष्णुभक्त्या च कर्णधारोऽसि पारकृत् ॥२३॥
केनाहं यातनागारात् निर्व्वाणपदमुत्तमम् ।
लप्स्यामीह जगद्बन्धो कर्म्मणा शर्म्म तद्वद ॥२४॥

नारद उवाच ।

अहो बलवती माया सर्व्वाश्चर्य्यमयी शुभा ।

पितरं मातरं विष्णुर्नैव मुञ्चति कर्हिचित् ॥२५॥
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ॥२६॥
विविच्येत्थं ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्तो विष्णुयशसं ब्रह्मसंपद्विवर्द्धनम् ॥२७॥

नारद उवाच ।

देहावसाने जीवं सा दृष्ट्वा देहावलम्बनम् ।
मायाह कर्त्तुमिच्छन्तं यन्मे तत् शृणु मोक्षदम् ॥२८॥
विन्ध्याद्रौ रमणी भूत्वा मायोवाच यथेच्छया ॥२९॥

मायोवाच ।

अहं माया मया त्यक्तः कथं जीवितुमिच्छसि ।

जीव उवाच ।

नाहं जीवाम्यहं माये कायेऽस्मिन् जीवनाश्रये ।
अहमित्यन्यथाबुद्धिर्विना देहं कथं भवेत् ॥३०॥

मायोवाच ।

देहबन्धे यथाश्लेषात् तथा बुद्धिः कथं तव ।
मायाधीनां विना चेष्टां विशिष्टां ते कुतो वद ॥३१॥

जीव उवाच ।

मां विना प्राज्ञता माये प्रकाशविषयस्पृहा ॥३२॥

मायोवाच ।

मायया जीवति नरश्चेष्टते हतचेतनः ।
निःसारः सारवद्भाति गजभुक्तकपित्थवत् ॥३३॥

जीव उवाच ।

मम संसर्गजाता त्वं नाना-नामस्वरूपिणी ।
मां विनिन्दसि किं मूढ़े स्वैरिणी स्वामिनं यथा ॥३४॥
ममाभावे तवाभावः प्रोद्यत्सूर्य्ये तमो यथा ।
मामावर्य्य! विभासि त्वं रविं नवघनो यथा ॥३५॥
वीजावीजकुशूलासि मम माये जगन्मये ।
नाद्यन्तमध्यतो भासि नानात्वादिन्द्रजालवत् ॥३६॥
एवं निर्विषयं नित्यं मनोव्यापारवर्जितम् ।
अभौतिकमजीवञ्च शरीरं वीक्ष्य सात्यजत् ॥३७॥
त्यक्ता मां सा ददौ शापमिति लोके तवाप्रिय ।
न स्थितिर्भविता काष्ठकुड्योपम कथञ्चन ॥३८॥
सा माया तव पुत्रस्य कल्केर्विश्वात्मनः प्रभोः ।
तां विज्ञाय यथाकामं चर गां हरिभावनः ॥३९॥
निराशो निर्ममः शान्तः सर्व्वभोगेषु निस्पृहः ।
विष्णौ जगदिदं ज्ञात्वा विष्णुर्जगति वासकृत् ।
आत्मनात्मानमावेश्य सर्व्वतो विरतो भव ॥४०॥

एवं तं विष्णुयशसमामन्त्र्य च मुनीश्वरौ।
कल्किं प्रदक्षिणीकृत्य जग्मतुः कपिलाश्रमम् ॥४१॥
नारदेरितमाकर्ण्य कल्किं सुतमनुत्तमम्।
नारायणं जगन्नाथं वनं विष्णुयशा ययौ ॥४२॥
गत्वा वदरिकारण्यं तपस्तप्त्वा सुदारुणम्।
जीवं वृहति संयोज्य पूर्णस्तत्याज भौतिकम् ॥४३॥
मृतं स्वामिनमालिङ्ग्य सुमतिः स्नेहविक्लवा।
विवेश दहनं साध्वी सुवेशैर्दिवि संस्तुता ॥४४॥
कल्किः श्रुत्वा मुनिमुखात् पित्रोर्निर्याणमीश्वरः।
सबाष्पनयनं स्नेहात्तयोः समकरोत् क्रियाम् ॥४५॥
पद्मया रमया कल्किः शम्भले सुरवाञ्छिते।
चकार राज्यं धर्म्मात्मा लोकवेदपुरस्कृतः ॥४६॥
महेन्द्रशिखराद्रामस्तीर्थपर्य्यटनादतः।
प्रायात् कल्केर्दर्शनार्थं शम्भलं तीर्थतीर्थकृत् ॥४७॥
तं दृष्ट्वा सहोत्थाय पद्मया रमया सह।
कल्किः प्रहर्षी विधिवत् पूजाञ्चक्रे विधानवित् ॥४८॥
नानारसैर्गुणमयैर्भोजयित्वा विचित्रिते।
पर्य्यङ्केऽनर्घवस्त्राढ्ये शाययित्वा मुदं ययौ ॥४९॥
तं भुक्तवन्तं विश्रान्तं पादसंवाहनैर्गुरुम्।

संतोष्य विनयापन्नः कल्किर्मधुरमब्रवीत् ॥५०॥
तव प्रसादात् सिद्धं मे गुरो त्रैवर्गिकञ्च यत् ।
शशिध्वजसुतायास्तु शृणु राम निवेदितम् ॥५१॥
इति पतिवचनं निशम्य रामा
निजहृदयेप्सितपुत्रलाभमिष्टम् ।
व्रतजपनियमैर्यमैश्च कैर्वा
मम भवतीह मुदाह जामदग्न्यम् ॥५२॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे विष्णुयशसो मोक्षो रामदर्शनं च नाम षोड़शोऽध्यायः ।

कल्किपुराणम् ।

तृतीयांशः ।

सप्तदशाध्यायः ।

सूत उवाच ।

जामदग्न्यः समाकर्ण्य रमां तां पुत्रगर्द्धिनीम् ।
कल्केरभिमतं बुद्ध्वाकारयद्रुक्मिणीव्रतम् ॥१॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना ॥२॥

शौनक उवाच ।

विधानं ब्रूहि मे सूत! व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्मं रुक्मिणीव्रतमुत्तमम् ॥३॥

सूत उवाच ।

शृणु ब्रह्मन्! राजपुत्री शर्म्मिष्ठा वार्षपर्व्वणी ।
अवगाह्य सरोनीरं सोमं हरमपश्यत ॥४॥
सा सखीभिः परिवृता देवयान्या च संगता ।
शम्भुभीत्या समुत्थाय पर्य्यधुर्वसनं श्रुतम् ॥५॥
तत्र शुक्रस्य कन्याया वस्त्रवत्ययमात्मनः ।
संलक्ष्य कुपिता प्राह वसनं त्यज भिक्षुकि ॥६॥

इति दानवकन्या सा दासीभिः परिवारिता।
तां तस्या वाससा बद्ध्वा कूपे क्षिप्त्वा गता गृहम् ॥७॥
तां मग्नां रुदतीं कूपे जलार्थी नहुषात्मजः।
करे स्पृश्य समुद्धृत्य प्राह का त्वं वरानने ॥८॥
सा शुक्रपुत्री वसनं परिधाय ह्रिया भिया।
शर्म्मिष्ठायाः कृतं सर्व्वं प्राह राजानमीक्षती ॥९॥
ययातिस्तदभिप्रायं ज्ञात्वानुव्रज्य शोभनम्।
आश्वास्य तां ययौ गेहं तस्याः परिणयादृतः ॥१०॥
सा गत्वा भवनं शुक्रं प्राह शर्म्मिष्ठया कृतम्।
तत् श्रुत्वा कुपितं विप्रं वृषपर्व्वाह सान्त्वयन् ॥११॥
दण्ड्यं मां दण्डय विभो! कोपो यद्यस्ति ते मयि।
शर्म्मिष्ठां वाप्यपकृतां कुरु यन्मनसेप्सितम् ॥१२॥
राजानं प्रणतं पादे पितुर्दृष्ट्वा रुषाब्रवीत्।
देवयानी त्वियं कन्या मम दासी भवत्विति ॥१३॥
समानीय तदा राजा दास्ये तां विनियुज्य सः।
ययौ निजगृहं ज्ञानी दैवं परमकं स्मरन् ॥१४॥
ततः शुक्रस्तमानीय ययातिं प्रतिलोमकम्।
तस्मै ददौ तां विधिवत् देवयानीं तया सह ॥१५॥
दत्त्वा प्राह नृपं विप्रोऽप्येनां राजसुतां यदि।

शयने क्षयसे सद्यो जरा त्वामुपभोक्ष्यति ॥१६॥
शुक्रस्यैतद्वचः श्रुत्वा राजा तां वरवर्णिनीम् ।
अदृश्यां स्थापयामास देवयान्यनुगां भिया ॥१७॥
सा शर्म्मिष्ठा राजपुत्री दुःखशोकभयाकुला ।
नित्यं दासीशताकीर्णा देवयानीन्तु सेवते ॥१८॥
एकदा सा वनगता रुदती जाह्नवीतटे ।
विश्वामित्रं मुनिं सा तं ददर्श स्त्रीभिरावृतम् ॥१९॥
व्रतिनं पुण्यगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माल्यधूपदीपोपहारकैः ॥२०॥
निर्म्माय्याष्टदलं पद्मं वेदिकायां सुचिह्नितम् ।
रम्भापोतैश्चतुर्भिस्तु चतुष्कोणं विराजितम् ॥२१॥
वाससा निर्म्मितगृहे स्वर्णपट्टैर्विचित्रिते ।
निर्म्मितं श्रीवासुदेवं नानारत्नविघट्टितम् ॥२२॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः ।
पञ्चामृतैः पञ्चगव्यैर्यथामन्त्रैर्द्विजेरितैः ॥२३॥
स्नापयित्वा भद्रपीठे कर्णिकायां प्रपूजयेत् ।
पञ्चभिर्दशभिर्वापि षोड़शैरुपचारकैः ॥२४॥
पाद्यमर्घ्यश्रमहरं शीतलं सुमनोहरम् ।
परमानन्दजनकं गृहाण परमेश्वर ॥२५॥

दूर्वाचन्दनगन्धाढ्यमर्घ्यं युक्तं प्रयत्नतः।
गृहाण रुक्मिणीनाथ प्रसन्नस्य मम प्रभो ॥२६॥
नानातीर्थोद्भवं वारि सुगन्धि सुमनोहरम्।
गृहाणाचमनीयं त्वं श्रीनिवास श्रिया सह ॥२७॥
नानाकुसुमगन्धाढ्यं सूत्रग्रथितमुत्तमम्।
वक्षःशोभाकरं चारु माल्यं नय सुरेश्वर ॥२८॥
तन्तुसन्तानसन्धानरचितं बन्धनं हरे।
गृहाणावरणं शुद्धं निरावरण सप्रिय ॥२९॥
यज्ञसूत्रमिदं देव! प्रजापतिविनिर्म्मितम्।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह ॥३०॥
नानारत्नसमायुक्तं स्वर्णमुक्ताविघट्टितम्।
प्रियया सह देवेश गृहाणाभरणं मम ॥३१॥
दधि-क्षीर-गुड़ान्नादि-पूप-लड्डुक-खण्डकान्।
गृहाण रुक्मिणीनाथ सनाथं कुरु मां प्रभो ॥३२॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम्।
धूपं गृहाण वरद वैदर्भ्या प्रियया सह ॥३३॥
भक्तानां गेहशक्तानां संसारध्वान्तनाशनम्।
दीपमालोकय विभो! जगदालोकनादर ॥३४॥
श्यामसुन्दर! पद्माक्ष! पीताम्बर! चतुर्भुज!।

प्रपन्नं पाहि देवेश! रुक्मिण्या सहिताच्युत ॥३५॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता।
शर्म्मिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः ॥३६॥

शर्म्मिष्ठोवाच।

राजपुत्रीं दुर्भगां मां स्वामिना परिवर्ज्जिताम्।
त्रातुमर्हथ हे देव्यो व्रतेनानेन कर्म्मणा ॥३७॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च कियत् कियत्।
पूजोपकरणं दत्त्वा कारयामासुरादरात् ॥३८॥
व्रतं कृत्वा तु शर्म्मिष्ठा लब्ध्वा स्वामिनमीश्वरम्।
लब्ध्वा पुत्रान् सुसन्तुष्टा समभूत् स्थिरयौवना ॥३९॥
सीता चाशोकवनिकामध्ये सरमया सह।
व्रतं कृत्वा पतिं लेभे रामं राक्षसनाशनम् ॥४०॥
बृहदश्वप्रसादेन कृत्वेमं द्रौपदी व्रतम्।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥४१॥
तथा रमा सिते पक्षे वैशाखे द्वादशीदिने।
जामदग्न्याद् व्रतं चक्रे पूर्णं वर्षचतुष्टयम् ॥४२॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून्।
भुक्त्वा हविष्यं क्षीराक्तं सुमृष्टं स्वामिना सह ॥४३॥

बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता ।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ ॥४४॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतैः ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ ॥४५॥

व्रतवरमिति कृत्वा सर्व्वसम्पत्समृद्धा
भवति विदिततत्त्वा पूजिता पूर्णकामा ।
हरिचरणसरोजद्वन्द्वभक्तैकताना
व्रजति गतिमपूर्व्वां ब्रह्मविद्भिरगम्याम् ॥४६॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
रुक्मिणीव्रतंनाम सप्तदशोऽध्यायः ।

तृतीयांशः ।

षष्टादशोऽध्यायः ।

सूत उवाच ।

एतद्वः कथितं विप्रा व्रतं त्रैलोक्यविश्रुतम् ।
अतःपरं कल्किकृतं कर्म्म यत् शृणुत द्विजाः ॥१॥
शम्भले वसतस्तस्य सहस्रपरिवत्सराः ।
व्यतीता भ्रातृपुत्रस्वज्ञातिसम्बन्धिभिः सह ॥२॥
शम्भले शुशुभे श्रेणी सभापणकचत्वरैः ।
पताकाध्वजचित्राढ्यैर्यथेन्द्रस्यामरावती ॥३॥
यत्राष्टषष्टितीर्थानां सम्भवः शम्भलेऽभवत् ।
मृत्योर्मोक्षः क्षितौ कल्केरकल्कस्य पदाश्रयात् ॥४॥
वनोपवनसन्ताननानाकुसुमसंकुलैः ।
शोभितं शम्भलं ग्रामं मन्ये मोक्षपदं भुवि ॥५॥
तत्र कल्किः पुरस्त्रीणां नयनानन्दवर्द्धनः ।
पद्मया रमया कामं रराम जगतीपतिः ॥६॥
सुराधिपप्रदत्तेन कामगेन रथेन वै ।
नदीपर्व्वतकुञ्जेषु द्वीपेषु परया मुदा ॥७॥

रममाणो विशन् पद्मारमाद्याभीरमापतिः ।
दिवानिशं न बुबुधे स्त्रैणश्च कामलम्पटः ॥८॥

पद्मामुखामोदसरोजसीधु-
वासोपभोगी सुविलासवासः ।
प्रभूतनीलेन्द्रमणिप्रकाशे
गुहाविशेषे प्रविवेश कल्किः ॥९॥

पद्मा तु पद्माशतरूपरूपा
रमा च पीयूषकलाविलासा ।
पतिं प्रविष्टं गिरिगह्वरे ते
नारीसहस्राकुलिते त्वगाताम् ॥१०॥

पद्मा पतिं प्रेच्य गुहानिविष्टं
रन्तुं मनोज्ञा प्रविवेश पश्चात् ।
रमाबलायूथसमन्विता तत-
पश्चाद्गता कल्किमहोग्रकामा ॥११॥

तत्रेन्द्रनीलोत्पलगह्वरान्ते
कान्ताभिरात्मप्रतिमाभिरीशम् ।
कल्किञ्च दृष्ट्वा नवनीरदाभं
ततः स्थितं प्रस्तरवन्मुमोह ॥१२॥

रमा सखीभिः प्रमदाभिरार्त्ता

विलोकयन्ती दिग्भ्रमाकुलाची।
पद्मापि पद्माश्रतशोभमाना
विषण्णचित्ता न बभौ स्म चार्त्ता ॥१३॥
भूमौ लिखन्ती निजकज्जलेन
कल्किं प्लुकं तं कुचकुङ्कुमेन।
कस्तूरिकाभिस्तु तदग्रमग्रे
निर्म्माय चालिङ्ग्य ननाम भावात् ॥१४॥
रमा कलालापपरा स्तुवन्ती
कामार्द्दिता तं हृदये निधाय।
ध्यात्वा निजालङ्करणैः प्रपूज्य
तस्थौ विषण्णा करुणावसन्ना ॥१५॥
क्षणात् समुत्थाय रुरोद रामा
कलापिनः कण्ठनिभं स्वनाथम्।
हृदोपगूढं न पुनः प्रलभ्य
कामार्द्दितेत्याह हरे प्रसीद ॥१६॥
पद्मापि निर्म्मुच्य निजाङ्गभूषा-
श्चकार धूलीपटले विलासम्।
कण्ठञ्च कस्तूरिकयापि नीलं
कामं निहन्तुं शिवतामुपेत्य ॥१७॥

कलावतीनां कलयाकलय्य
क्षीणेक्षणानां हरिरार्त्तबन्धुः ।
कामप्रपूराय ससार मध्ये
कल्किः प्रियाणां सुरतोत्सवाय ॥१८॥
ताः सादरेणात्मपतिं मनोज्ञाः
करेणवो यूथपतिं यथेयुः ।
सानन्दभावा विषदानुवृत्ता
वनेषु रामाः परिपूर्णकामाः ॥१९॥
वैभ्राजके चैत्ररथे सुपुष्पे
सुनन्दने मन्दरकन्दरान्ते ।
रेमे स रामाभिरुदारतेजा
रथेन भास्वत्खगमेन कल्किः ॥२०॥
पद्मामुखाब्जामृतपानमत्तो
रमासमालिङ्गनवासरङ्गी ।
वराङ्गनानां कुचकुङ्कुमाक्तो
रतिप्रसङ्गे विपरीतयुक्तः ।
मुखे विदष्टो रसनावशिष्टा-
मोदः स कल्किर्नहि वेद देहम् ॥२१॥
रमाः समानाः पुरुषोत्तमं तं

वक्षोजमध्ये विनिधाय धीराः।
परस्पराश्लेषणजातहासा
रेमुर्मुकुन्दं विलसत्शरीराः ॥२२॥
ततः सरोवरं त्वरा स्त्रियो ययुः क्लमज्वराः।
प्रियेण तेन कल्किना वनान्तरे विहारिणा ॥
सरः प्रविश्य पद्मया विमोहरूपया तया
जलं ददुर्वराङ्गनाः करेणवो यथा गजम् ॥२३॥
इति ह युवतिलीला लोकनाथः स कल्किः
प्रियुवतिपरीतः पद्मया रामयाद्यः ॥
निजरमणविनोदैः शिक्षयन् लोकवर्गान्
जयति विबुधभर्त्ता शम्भले वासुदेवः ॥२४॥
ये शृण्वन्ति वदन्ति भावचतुरा ध्यायन्ति सन्तः सदा
कल्केः श्रीपुरुषोत्तमस्य चरितं कर्णामृतं सादराः।
तेषां नो सुखयत्ययं मुररिपोर्दास्याभिलाषं विना
संसारः परिमोचनञ्च परमानन्दामृताम्भोनिधेः ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्किवर्णनं नाम अष्टादशोऽध्यायः।

कल्किपुराणम्।

तृतीयांशः।

ऊनविंशोऽध्यायः।

सूत उवाच।

ततो देवगणाः सर्व्वे ब्रह्मणाः सहिता रथैः।
स्वैः स्वैर्गणैः परिवृताः कल्किं द्रष्टुमुपाययुः॥१॥
महर्षयः सगन्धर्व्वाः किन्नराश्चाप्सरोगणाः।
समाजग्मुः प्रमुदिताः शम्भलं सुरपूजितम्॥२॥
तत्र गत्वा सभामध्ये कल्किं कमललोचनम्।
तेजोनिधिं प्रपन्नानां जनानामभयप्रदम्॥३॥
नीलजीमूतसंकाशं दीर्घपीवरबाहुकम्।
किरीटेनार्कवर्णेन स्थिरविद्युन्निभेन तम्॥४॥
शोभमानं द्युमणिना कुण्डलेनाभिशोभिना।
सहर्षालापविकसद्वदनं स्मितशोभिनम्॥५॥
कृपाकटाक्ष-विक्षेप-परिक्षिप्त-विपक्षकम्।
तारहारोल्लसद्वक्षश्चन्द्रकान्तमणिश्रिया॥६॥
कुमुद्वतीमोदवहं स्फुरत्शक्रायुधाम्बरम्।
सर्व्वदानन्दसन्दोहरसोल्लसितविग्रहम्॥७॥

नानामणिगणोद्द्योतदीपितं रूपमद्भुतम्।
ददृशुर्देवगन्धर्व्वा ये चान्ये समुपागताः ॥८॥
भक्त्या परमया युक्ताः परमानन्दविग्रहम्।
कल्किं कमलपत्राक्षं तुष्टुवुः परमादरात् ॥९॥

देवा ऊचुः।

जयाशेषसंक्लेशकक्षप्रकीर्णानलोद्दामसंकीर्ण ईश।
देवेश विश्वेश भूतेश भावः।
तवानन्त चान्तःस्थितोऽङ्गाश्मरत्न-
प्रभाभातपादाजितानन्तशक्ते ॥१०॥
प्रकाशीकृताशेषलोकत्रयात्र
वक्षःस्थले भास्वत्कौस्तुभश्याम।
मेघौघराजत्शरीरद्विजाधीशपुञ्जानन
त्राहि विष्णो स दाराः वयं त्वां प्रसन्ना सशेषाः ॥११॥
यद्यस्त्यनुग्रहोऽस्माकं व्रज वैकुण्ठमीश्वर।
त्यक्त्वा शासितभूतखण्डं सत्यधर्म्माविरोधतः ॥१२॥
कल्किस्तेषामिति वचः श्रुत्वा परमहर्षितः।
पात्रमित्रैः परिवृतश्चकार गमने मतिम् ॥१३॥
पुत्रानाहूय चतुरो महाबलपराक्रमान्।
राज्ये निक्षिप्य सहसा धर्म्मिष्ठान् प्रकृतिप्रियान् ॥१४॥

ततः प्रजाः समाहूय कथयित्वा निजाः कथाः।
प्राह तान् निजनिर्याणं देवानामुपरोधतः ॥१५॥
तत् श्रुत्वा ताः प्रजाः सर्व्वा रुरुदुर्विस्मयान्विताः।
तं प्राहुः प्रणताः पुत्रा यथा पितरमीश्वरम् ॥१६॥

प्रजा ऊचुः।

भो नाथ सर्व्वधर्म्मज्ञ नास्मान् त्यक्तुमिहार्हसि।
यत्र त्वं तत्र तु वयं यामः प्रणतवत्सल ॥१७॥
प्रिया गृहा धनान्यत्र पुत्राः प्राणास्तवानुगाः।
परत्रेह विशोकाय ज्ञात्वा त्वां यज्ञपूरुषम् ॥१८॥
इति तद्वचनं श्रुत्वा सान्त्वयित्वा सदुक्तिभिः।
प्रययौ क्लिन्नहृदयः पत्नीभ्यां सहितो वनम् ॥१९॥
हिमालयं मुनिगणैराकीर्णं जाह्नवीजलैः।
परिपूर्णं देवगणैः सेवितं मनसः प्रियम् ॥२०॥
गत्वा विष्णुः सुरगणैर्वृतश्चारुचतुर्भुजः।
उषित्वा जाह्नवीतीरे सस्मारात्मानमात्मना ॥२१॥
पूर्णज्योतिर्मयः साक्षी परमात्मा पुरातनः।
बभौ सूर्य्यसहस्राणां तेजोराशिसमद्युतिः ॥२२॥
शङ्खचक्रगदापद्मशार्ङ्गाद्यैः समभिष्टुतः।
नानालङ्करणानाञ्च समलङ्करणाकृतिः ॥२३॥

ववृषुस्तं सुराः पुष्पैः कौस्तुभामुक्तकन्धरम्।
सुगन्धिकुसुमासारैर्दैवदुन्दुभिनिस्वनैः ॥२४॥
तुष्टुवुर्मुमुहुः सर्व्वे लोकाः स्थाणुजङ्गमाः।
दृष्ट्वा रूपमरूपस्य निर्याणे वैष्णवं पदम् ॥२५॥
तद्दृष्ट्वा महदाश्चर्य्यं पत्युः कल्केर्महात्मनः।
रमा पद्मा च दहनं प्रविश्य तमवापतुः ॥२६॥
धर्म्मः कृतयुगं कल्केराज्ञया पृथिवीतले।
निःसपत्नौ सुसुखिनौ भूलोकं चेरतुश्चिरम् ॥२७॥
देवापिश्च मरुः कामं कल्केरादेशकारिणौ।
प्रजाः संपालयन्तौ तु भुवं जुगुपतुः प्रभू ॥२८॥
विशाखयूपभूपालः कल्केर्निर्याणमीदृशम्।
श्रुत्वा स्वपुत्रं विषये नृपं कृत्वा गतो वनम् ॥२९॥
अन्ये नृपतयो ये च कल्केर्विरहकर्षिताः।
तं ध्यायन्तो जपन्तश्च विरक्ताः स्युर्नृपासने ॥३०॥
इति कल्केरनन्तस्य कथां भुवनपावनीम्।
कथयित्वा शुकः प्रायात् नरनारायणाश्रमम् ॥३१॥
मार्कण्डेयादयो ये च मुनयः प्रशमायनाः।
श्रुत्वानुभावं कल्केस्ते तं ध्यायन्तो जगुर्यशः ॥३२॥
यस्यानुशासनात् भूमौ नाधर्म्मिष्ठाः प्रजा जनाः।

नाल्पायुषो दरिद्राश्च न पाषण्डा न हैतुकाः ॥३३॥
नाधयो व्याधयः क्लेशा देवभूतात्मसम्भवाः ।
निर्मत्सराः सदानन्दा बभूवुर्जीवजातयः ॥३४॥
इत्येतत् कथितं कल्केरवतारं महोदयम् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥३५॥
शोकसन्तापपापघ्नं कलिव्याकुलनाशनम् ।
सुखदं मोक्षदं लोके वाञ्छितार्थफलप्रदम् ॥३६॥
तावत् शास्त्रप्रदीपानां प्रकाशो भुवि रोचते ।
भक्तिभानुपुराणाख्या यावत् लोकेऽतिकामधुक् ॥३७॥
श्रुत्वैतत् भृगुवंशजो मुनिगणैः साकं सहर्षो वशी
ज्ञात्वा स्तमप्रमेयबोधविदितं श्रीलोमहर्षात्मजम् ।
श्रीकल्केरवतारवाक्यममलं भक्तिप्रदं श्रीहरेः
शुश्रूषुः पुनराह साधुवचसा गङ्गास्तवं सत्कृतः ॥३८॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्कि-
निर्याणं नाम ऊनविंशोऽध्यायः ।

कल्किपुराणम्।

तृतीयांशः।

विंशोऽध्यायः।

शौनक उवाच।

हे सूत! सर्व्वधर्म्मज्ञ यत्त्वया कथितं पुरा।
गङ्गां स्तुत्वा समायाता मुनयः कल्किसन्निधिम् ॥१॥
स्तवं तं वद गङ्गायाः सर्व्वपापप्रणाशनम्।
मोक्षदं शुभदं भक्त्या शृण्वतां पठतामिह ॥२॥

सूत उवाच।

शृणुध्वमृषयः सर्व्वे गङ्गास्तवमनुत्तमम्।
शोकमोहहरं पुंसां ऋषिभिः परिकीर्त्तितम् ॥३॥

ऋषय ऊचुः।

इयं सुरतरङ्गिणी भवनवारिधेस्तारिणी
स्तुता हरिपदाम्बुजादुपगता जगत्संसदः।
सुमेरुशिखरामरप्रियजला मलक्षालनी
प्रसन्नवदना शुभा भवभयस्य विद्रावणी ॥४॥
भगीरथमथानुगा सुरकरीन्द्रदर्पापहा
महेशमुकुटप्रभा गिरिशिरःपताका सिता।
सुरासुरनरोरगैरजभवाच्युतैः संस्तुता
विमुक्तिफलशालिनी कलुषनाशिनी राजते ॥५॥

पितामहकमण्डलुप्रभवमुक्तिवीजा लता
श्रुतिस्मृतिगणस्तुतद्विजकुलालवालावृता ।
सुमेरुशिखराभिदा निपतिता त्रिलोकावृता
सुधर्म्मफलशालिनी सुखपलाशिनी राजते ॥६॥
चरद्विहगमालिनी सगरवंशमुक्तिप्रदा
मुनीन्द्रवरनन्दिनी दिवि मता च मन्दाकिनी ।
सदा दुरितनाशिनी विमलवारिसंदर्शन-
प्रणामगुणकीर्त्तनादिषु जगत्सु संराजते ॥७॥
महाभिधसुताङ्गना हिमगिरीशकूटस्तना
सफेनजलहासिनी सितमरालसञ्चारिणी ।
चलल्लहरसत्करा वरसरोजमालाधरा
रसोल्लसितगामिनी जलधिकामिनी राजते ॥८॥
क्वचिन्मुनिगणैः स्तुता क्वचिदनन्तसंपूजिता
क्वचित् कलकलस्वना कचिदधीरयादोगणा ।
क्वचिद्रविकरोज्ज्वला कचिदुदग्रपाताकुला
कचिज्जनविगाहिता जयति भीष्ममाता सती ॥९॥
स एव कुशली जनः प्रणमतीह भागीरथीं
स एव तपसां निधिर्जपति जाह्नवीमादरात् ।
स एव पुरुषोत्तमः स्मरति साधु मन्दाकिनीम्

स एव विजयी प्रभुः सुरतरङ्गिणीं सेवते ॥१०॥

तवामलजलाचितं खगसृगालमीनक्षतं
चलल्लहरिलोलितं रुचिरतीरजम्बालितम् ।
कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतोऽ-
प्यहं त्रिपथगामिनी प्रियमतीव पश्याम्यहो ॥११॥

त्वत्तीरे वसतिं तवामलजलस्नानं तव प्रेक्षणं
त्वन्नामस्मरणं तवोदयकथासंलापनं पावनम् ।
गङ्गे मे तव सेवनैकनिपुणोऽप्यानन्दितश्चादृतः
स्तुत्वा त्वोद्गतपातको भुवि कदा शान्तश्चरिष्याम्यहम् ॥१२॥

इत्येतदृषिभिः प्रोक्तं गङ्गास्तवमनुत्तमम् ।
स्वर्ग्यं यशस्यमायुष्यं पठनात् श्रवणादपि ॥१३॥

सर्व्वपापहरं पुंसां बलमायुर्विवर्द्धनम् ।
प्रातर्मध्याह्नसायाह्ने गङ्गासान्निध्यता भवेत् ॥१४॥

इत्येतत् भार्गवाख्यानं शुकदेवात् मया श्रुतम् ।
पठितं श्रावितं चात्र पुण्यं धन्यं यशस्करम् ॥१५॥

अवतारं महाविष्णोः कल्केः परममद्भुतम् ।
पठतां शृण्वतां भक्त्या सर्व्वाशुभविनाशनम् ॥१६॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे गङ्गास्तवो
नाम त्रिंशोऽध्यायः ।

कल्किपुराणम्।

तृतीयांशः।

एकविंशोऽध्यायः।

सूत उवाच।

अत्रापि शुकसंवादो मार्कण्डेयेन धीमता।
अधर्म्मवंशकथनं कलेर्विवरणं ततः ॥१॥
देवानां ब्रह्मसदनप्रयाणं गोभुवा सह।
ब्रह्मणो वचनाद्विष्णोर्जन्म विष्णुयशोगृहे ॥२॥
सुमत्यां स्वांशकैर्भ्रातृचतुर्भिः शम्भले पुरे।
पितुः पुत्रेण संवादस्तथोपनयनं हरेः ॥३॥
पुत्रेण सह संवासो वेदाध्ययनमुत्तमम्।
शस्त्रास्त्राणां परिज्ञानं शिवसंदर्शनं ततः ॥४॥
कल्केस्तवं शिवपुरो वरलाभः शुकापनम्।
शम्भलागमनं चक्रे ज्ञातिभ्यो वरकीर्त्तनम् ॥५॥
विशाखयूपभूपेन निजसर्व्वात्मवर्णनम्।
महाभागात् ब्राह्मणानां शुकस्यागमनं ततः ॥६॥
कल्किना शुकसंवादः सिंहलाख्यानमुत्तमम्।
शिवदत्तवरा पद्मा तस्या भूप स्वयंवरे ॥७॥

दर्शनात् भूपसंघानां स्त्रीभावपरिकीर्त्तनम्।
तस्या विषादः कल्केस्तु विवाहार्थं समुद्यमः॥८॥
शुकप्रस्थापनं दौत्ये तया तस्यापि दर्शनम्।
शुकपद्मापरिचयः श्रीविष्णोः पूजनादिकम्॥९॥
पादादिदेहध्यानञ्च केशान्तं परिवर्णितम्।
शुकभूषणदानञ्च पुनः शुकसमागमः॥१०॥
कल्केः पद्माविवाहार्थं गमनं दर्शनं तयोः।
जलक्रीड़ाप्रसङ्गेन विवाहस्तदनन्तरम्॥११॥
पुंस्त्वप्राप्तिश्च भूपानां कल्केर्दर्शनमात्रतः।
अनन्तागमनं राज्ञां संवादस्तेन संसदि॥१२॥
षण्डत्वादात्मनो जन्म कर्म्म चात्र शिवस्तवः।
मृते पितरि तद्विष्णोः छेवे मायाप्रदर्शनम्॥१३॥
अत्राख्यानमनन्तस्य ज्ञानवैराग्यवैभवम्।
राज्ञां प्रयाणं कल्केश्च पद्मया सह शम्भले॥१४॥
विश्वकर्म्मविधानञ्च वसतिः पद्मया सह।
ज्ञातिभ्रातृसुहृत्पुत्रैः सेनाभिर्बुद्धनिग्रहः॥१५॥
कथितश्चात्र तेषाञ्च स्त्रीणां संयोधनाश्रयः।
ततोऽत्र बालखिल्यानां मुनीनां स्वनिवेदनम्॥१६॥
सपुत्रायाः कुथोदर्य्या बधश्चात्र प्रकीर्त्तितः।

हरिद्वारगतस्यापि कल्केर्मुनिसमागमः ॥१७॥
सूर्य्यवंशस्य कथनं सोमस्य च विधानतः ।
श्रीरामचरितं चारु सूर्य्यवंशानुवर्णने ॥१८॥
देवापेश्च मरोः सङ्गो युद्धायात्र प्रकीर्त्तितः ।
महाघोरवने कोक-विकोकविनिपातनम् ॥१९॥
भल्लाटगमनं तत्र शय्याकर्णादिभिः सह ।
युद्धं शशिध्वजेनात्र सुशान्ताभक्तिकीर्त्तनम् ॥२०॥
युद्धे कल्केरानयनं धर्म्मस्य च कृतस्य च ।
सुशान्तायाः स्तवस्तत्र रमोद्वाहस्तु कल्किना ॥२१॥
सभायां पूर्व्वकथनं निजगृध्रत्वकारणम् ।
मोक्षः शशिध्वजस्यात्र भक्तिप्रार्थयितुर्विभोः ॥२२॥
विषकन्यामोचनञ्च नृपाणामभिषेचनम् ।
मायास्तवः शम्भलेषु नानायज्ञादिसाधनम् ॥२३॥
नारदात् विष्णुयशसो मोक्षश्चात्र प्रकीर्त्तितः ।
कृतधर्म्मप्रवृत्तिश्च रुक्मिणीव्रतकीर्त्तनम् ॥२४॥
ततो विहारः कल्केश्च पुत्रपौत्रादिसम्भवः ।
कथितो देवगन्धर्व्वगणागमनमत्र हि ॥२५॥
ततो वैकुण्ठगमनं विष्णोः कल्केरिहोदितम् ।
शुकप्रस्थानमुचितं कथयित्वा कथाः शुभाः ॥२६॥

गङ्गास्तोत्रमिह प्रोक्तं पुराणे मुनिसम्मतम्।
जगतामानन्दकरं पुराणं पञ्चलक्षणम्॥२७॥
सकल्कसिद्धिदं श्लोकैः षट्सहस्रं शताधिकम्।
सर्व्वशास्त्रार्थतत्त्वानां सारं श्रुतिमनोहरम्॥२८॥
चतुर्वर्गप्रदं कल्किपुराणं परिकीर्त्तितम्।
प्रलयान्ते हरिमुखात् निःसृतं लोकविस्तृतम्॥२९॥
अहो व्यासेन कथितं हि जद्रूपेण भूतले।
विष्णोः कल्केर्भगवतः प्रभावं परमाद्भुतम्॥३०॥
ये भक्त्याच पुराणसारममलं श्रीविष्णुभावाद्भुतं
शृण्वन्तीह वदन्ति साधुसदसि क्षेत्रे सुतीर्थाश्रमे।
दत्त्वा गां तुरगं गजं गजवरं स्वर्णं द्विजायादरात्
वस्त्रालङ्करणैः प्रपूज्य विधिवत् मुक्तास्तएवोत्तमाः॥३१॥
श्रुत्वा विधानं विधिवत् ब्राह्मणो वेदपारगः।
क्षत्त्रियो भूपतिर्वैश्यो धनी शूद्रो महान् भवेत्॥३२॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां पठनात् श्रवणादपि॥३३॥
इत्येतत् पुण्यमाख्यानं लोमहर्षणजो मुनिः।
श्रावयित्वा मुनीन् भक्त्या ययौ तीर्थाटनादृतः॥३४॥
शौनको मुनिभिः सार्द्धं सूतमामन्त्र्य धर्म्मवित्।

पुण्यारण्ये हरिं ध्यात्वा ब्रह्म प्राप स योगवित् ॥३५॥
लोमहर्षणजं सर्व्व-पुराणज्ञं यतव्रतम्।
व्यासशिष्यं मुनिवरं तं सूतं प्रणमाम्यहम् ॥३६॥
आलोक्य सर्व्वशास्त्राणि विचार्य्य च पुनःपुनः।
इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥३७॥
वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्व्वत्र गीयते ॥३८॥

सजलजलदेहो वातवेगैकवाहः
कधृतकरबालः सर्व्वलोकैकपालः।
कलिकुलबलहन्ता सत्यधर्म्मप्रणेता
कलयतु कुशलं वः कल्किरूपः स भूपः ॥४९॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
एकविंशोऽध्यायः।

समाप्तं कल्किपुराणम्।

PRINTED FOR KEDARNATH BANDOPADHYA AT THE
KAVAPRAKASA JANTRA.

ऋक्वेदसंहिता	२ अध्याय	२।।०
कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मण	२४ खण्ड	१५
तैत्तिरीय आरण्यक	२० ,,	६।०
तैत्तिरीय प्रातिशाख्य	३ ,,	१।।।=
गोपथ ब्राह्मण	२ ,,	२।०
अथर्व्व उपनिषत्	१ ,,	।।=
सामवेद	५ ,,	२=
आश्वलायनकृत श्रौतसूत्र		६।०
शाण्डिल्यसूत्र		।।=
कौषितकि ब्राह्मणोपनिषद्		१।०
सटीक मैत्रीपनिषद्		१।।।=
लाट्यायन श्रौतसूत्र	५ खण्ड	५
ताण्ड्यमहाब्राह्मण	१८ खण्ड	११।०
ईश केन कठ प्रश्न मुण्ड माण्डुक्योपनिषद्	१० दूष्प्राप्य	१०
वृहदारण्यक उपनिषत्	२० ,,	२०
ब्रह्मसूत्रभाष्य	१२ ,,	१२
तैत्तिरीयसंहिता	२६ खण्ड	१६।०
नृसिंहतापिनी	३ ,,	१।।।=
आश्वलायनकृत गृह्यसूत्र	४ ,,	२।।०
गोभीलगृह्यसूत्र	२ ,,	१।०
मुक्तिकोपनिषत्		=
सामवेदसंहिता		८
सामविधान		२
सामसूची	१ खण्ड	२
चतुर्वर्गचिन्तामणि	५ ,,	३=
कामन्दकी नीतिशास्त्र		१।।।=
वैशेषिकदर्शन		२=
न्यायदर्शन		१।।।=
सांख्यसार		।।=
सांख्यतत्त्वकौमुदी		२।।०
सांख्यसूत्रभाष्य		२
मञ्जावली		२।।०

अनुमानदीधिति		२॥०
सर्व्वदर्शनसंग्रह		२
भाषापरिच्छेद मुक्तावलिसमेत		१
तर्कसंग्रह		॥०
विवेकचूड़ामणि		।०
कुसुमाञ्जलि		१॥०
पदार्थतत्त्वसार		१
वृहत्संहिता		४।=
सूर्य्यसिद्धान्त		१॥०
लीलावती		१
वीजगणित		१
अनुमानचिन्तामणि		१॥०
मीमांसादर्शन	११ खण्ड	६॥।=
भागवत सटीक		२०
मार्कण्डेयपुराण		१॥।=
अग्निपुराण	३ ,,	१॥।=
मत्स्यपुराण वाङ्गाला अनुवाद समे[illegible]	,	।०
कल्किपुराण		१॥०
नारदपञ्चरात्र		२॥०
चैतन्यचन्द्रोदयनाटक		१॥।=
भगवद्गीता सटीक		६
गोपालतापनी	१ खण्ड	॥=
न्ट संहतापनी		॥०
हरिवंश		४
आत्मतत्त्वविवेक		२
साहित्यदर्पण		२॥०
एसियाटीक सोसाइटी प्रकाशित दुष्प्राप्य		५
उपमान चिन्तामणि		।०
अध्यात्मरामायण		६
शङ्करविजय		३॥।=
संस्कृतशिक्षा प्रथम भाग		=
संस्कृतशिक्षा द्वितीय भाग		।०
विद्यासुन्दर		२